* रसतरङ्गिणी *

श्रीमद्दैवज्ञरत्न पण्डित जीवानन्दशर्म-
तनूजेन सदानन्द शर्म्मणा
विरचिता।

सा चेयं
लवपुरीय मित्रौषधालयाध्यक्षवर्यैः
श्रीमद्भिः कविराज नरेन्द्रनाथ
मित्रमहोदयैः प्रकाशिता।

(ग्रन्थ सर्वेऽधिकारा राजकीयनियमानुसारेण
प्रकाशकैः स्वायत्तीकृताः)

विक्रमाब्दाः १९८१] [मूल्यं पञ्चरूप्यकाणि

लवपुरीय हिन्दीमुद्रणालयाध्यक्षवर्यैः
श्रीलालजीदास महोदयैः
स्वकीये मुद्रणालये सम्मुद्रिता ।

मित्रान्वयावतंसः सन्मानसैकहंसः ।
जयति क्षमासनाथः श्रीमान्नरेन्द्रनाथः

ॐ

● समर्पणम् ●

गुणिगणभूषण
परमविचक्षण
लब्धसुशिक्षणकीर्तेः ।
प्रणयपरीक्षण
सदयनिरीक्षण
मधुरमनोहरमूर्तेः ॥
मित्रकुलोद्भव
सज्जनवैभव
वैद्यविकत्थितबुद्धेः ।
रसनिगमोदित
सुबहुपरीक्षित
मार्गकृतेशविशुद्धेः ॥
श्रीमत्परमपूज्यायुर्वेदार्णवकर्णधारशिरोमणेः
श्रीगुरुवर्य कविराज नरेन्द्रनाथ मित्रमहोदयस्य
करकमलयुगले
समर्प्यते
इयं
रसतरङ्गिणी

तथा च—

यदेव सततं मया ह्यधिगतं भवद्भ्यः पुरा
तदेव खलु साम्प्रतं बत समर्पयेयं कथम् ।
तथापि विनयानतो लघुनिबन्धरूपेण तत्
भवद्भ्यतुष्टये किमिव नार्पयेयं मुदा ॥

इति निवेदयति

घिल्डियालोपाह्वः सदानन्दशर्मा

भूमिका

अयि आयुर्वेदार्णवकर्णधारधुरीणाः ! रसनिगमपारावारपारीणाः !! प्राणाचार्याशिरोमणयः !!! विदिततरमेवैतत्सर्वेषां तत्र भवतां भवतां यत्सुरभारतीसाहित्यस्य गौरवास्पदभूतासु रसमूलिकाशस्त्राभिधेयासु तिसृष्वपि चिकित्सासु रसचिकित्साया एव प्राधान्यम् ॥

अत एव आमनन्त्येवं वृद्धवैद्याः—

"उत्तमो रसवैद्यस्तु मध्यमो मूलिकादिभिः ।
अधमः शस्त्रदाहाभ्याम्"

अपि च रसचिकित्सकचूडामणिना श्रीगोपालकृष्णेन रसेन्द्रसारसंग्रहनामकस्वसंगृहीतग्रन्थोपक्रमेऽपि समर्थितमस्य प्राशस्त्यम् । तथाहि—

"अल्पमात्रोपयोगित्वादरुचेरप्रसङ्गतः ।
क्षिप्रमारोग्यदायित्वादौषधेभ्योऽधिको रसः ॥"

एतावतैवास्या रसचिकित्सायाः प्राशस्त्यमध्यवसीयते यदियमादिदेवन महादेवेन शतसहस्रपद्यनिबद्धसंहितात्मकतया सर्वप्रथममाविष्कृतेति ।

अपि च समुपेयसुखावहपदार्थप्रधानभूतस्य पुरुषार्थचतुष्टयस्योपजनकत्वेन कियदुपादेयत्वमस्येति सुधीभिरेव भिषग्भिरवधेयम् ।

पुरुषार्थचतुष्टयोपजनकत्वं चास्य सुविदितमेव सर्वेषां वैद्यविद्याविदाम् । तथा हि–निःशुल्कौषधदानरोगिनिरीक्षणादिना आर्तत्राणरूपः, सन्निपाताद्यात्ययिकामयेषु प्राणप्रदत्वेन नवजीवनदानरूपश्च धर्मः, प्रचुरार्थराशिशालिनां धनपतिविरुदभाजां चिकित्सनेन अर्थोदयः, निरुक्तरीतिसमुपार्जितधनेन कामश्च समुल्लसतीति निर्विवादम् ।

आयुर्वेदाङ्गभूतस्य रसशास्त्रस्य मोक्षाभिधायकत्वं च रसार्णवादिप्राचीनार्षग्रन्थेषु षड्दर्शनादिविलक्षणलक्षणतया प्राधान्येनैव

प्रतिपादितम्। मन्यन्ते च प्राचीना रसायनाचार्याः प्रधानप्रयोजनं रसशास्त्रस्य मोक्षावाप्तिसाधनम्। तथा हि–

श्रीदेव्युवाच—

त्वत्प्रसादाच्छ्रुतं सर्वमशेषमवधारितम्।
यदि तेऽहमनुग्राह्या यद्यहं तव वल्लभा॥

श्रीभैरव उवाच–

साधु साधु महाभाग ! साधु पर्वतनन्दिनि।
साधु पृष्टं त्वया देवि भक्तानां हितकाम्यया॥
अजरामरदेहस्य शिवतादात्म्यवेदनम्।
जीवन्मुक्तिर्महादेवि देवानामपि दुर्लभा॥
पिण्डपाते च यो मोक्षः स च मोक्षो निरर्थकः।
पिण्डे तु पतिते देवि गर्दभोऽपि विमुच्यते॥
षड्दर्शनेऽपि मुक्तिस्तु दर्शिता पिण्डपातने।
करामलकवत्सापि प्रत्यक्षं नोपलभ्यते॥
देवानामपि देवेशि ! दुर्लभं पिण्डधारणम्।
किं पुनर्मानुषाणां तु धरणीतलवासिनाम्॥
तेन पिण्डो महादेवि रक्षणीयः प्रयत्नतः।
..... ॥
यावन्न हरबीजं तु भक्षयेत्पारदं रसम्।
तावत्तस्य कुतो मुक्तिः कुतः पिण्डस्य धारणम्॥
[रसार्णव प्रथमः पटलः]

श्रीमद्भगवद्गोविन्दपादाश्चैवमामनन्ति—

इति धनशरीरभोगान् मत्वाऽनित्यान्सदैव यतनीयम्।
मुक्तिस्तस्य ज्ञानात् तच्चाभ्यासात् स च स्थिरे देहे॥
स्थिरदेहोऽभ्यासवशात् प्राप्य ज्ञानं गुणाष्टकोपेतम्।
प्राप्नोति ब्रह्मपदं न पुनर्भववासदुःखानि॥
नहि देहेन कथंचिद् व्याधिजरामरणदुःखविधुरेण।
क्षणभङ्गुरेण सूक्ष्मं तद् ब्रह्मोपासितुं शक्यम्॥
अस्मिन्नेव शरीरे येषां परमात्मनो न संवेदः।
देहत्यागादूर्ध्वं तेषां तद् ब्रह्म दूरतरम्॥

तस्माज्जीवन्मुक्तिं समीहमानेन योगिना प्रथमम् ।
दिव्या तनुर्विधेया हरगौरीसृष्टिसंयोगात् ॥
[रस० हृ० त० प्र० अ०]

अस्याश्च रसचिकित्सायास्तन्त्रकाराः—श्रीशङ्कर- नन्दीश्वर-भैरव-ब्रह्म-विष्णु-दत्तात्रेयप्रभृतयो देवाः,अगस्त्य-कपिल-भालुकि व्याडि-मत्तमाण्डव्यादयो महर्षयः, चन्द्रसेन-लङ्केश-विशारद-भास्कर-सुरसेन-रत्नकोश--स्वच्छन्दभैरव-मन्थानभैरव--काकचण्डीश्वर-नरवाहन--कापालिक-रसेन्द्रतिलक--सुरानन्द--यशोधन गोमुख-नरेन्द्र-मैथिल-स्कन्द-भगवद्गोविन्दपादप्रभृतयः प्राचीना रससिद्धाः, नागार्जुन-भैरवनाथ-सोमनाथ-सिद्धनाथ-आदिनाथ-चर्पटीनाथ-गोरक्षनाथ-मत्स्येन्द्रनाथादयश्च प्रसिद्धा बहवो रस-सिद्धाः समजायन्त ।

रसतन्त्रेषु च—रसेन्द्रसंहिता-दत्तात्रेयसंहिता-अगस्त्यसंहिता नासत्यसंहिता-गोरक्षसंहिता—रुद्रयामलतन्त्र--महारसायनतन्त्र-कामधेनुतन्त्र--दत्तात्रेयतन्त्र--सिद्धलक्ष्मीश्वरतन्त्र--लम्पटतन्त्र—स्वच्छन्दभैरवतन्त्र-मन्थानभैरवतन्त्र--काकचण्डीश्वरतन्त्र-हरीश्वरतन्त्र-महादेवतन्त्र-नागार्जुनतन्त्र-बालतन्त्र-चन्द्रसेनसिद्धान्त लङ्केशसिद्धान्त-कपिलसिद्धान्त—ब्रह्मसिद्धान्त—रसरत्नाकर-रस-रत्नप्रदीप-रसपारिजातप्रभृतयोऽसङ्ख्या रसग्रन्थाः श्रूयन्ते नाम-मात्रेण सांप्रतम् ।

हन्त !!! यस्या रसविद्याया इतः सहस्रवर्षपूर्वं भारतेऽपरि-गणनीया आचार्याः, ग्रन्थाश्च लब्धप्रतिष्ठा लब्धप्रचाराश्च आसन् तस्या एव अङ्गुलिगणनीया ग्रन्था दृष्टिसरणिमुपयान्तीति महान् खेदः । रसतन्त्राचार्याश्च न दृश्यन्ते नाममात्रेण क्वापि । उपलब्ध-रसतन्त्राणामप्यतिदुर्बोध्यतया विरला एवोपलभ्यन्ते तदर्थज्ञा रसवैद्याः । ये केचन रसायनाचार्यम्मन्या रसवैद्याः क्वचिद् दृश्यन्ते ते रसतन्त्रार्थजातं स्वकीयं पैतृकं धनमिति मन्यमाना देशजात्यादि-साम्यभेदजनितमात्सर्यमलकलुषितस्वान्ताः पठनकर्मणि व्ययी-कृतानेकवर्षेभ्योऽनन्यभक्तेभ्यः शिष्येभ्योऽपि गोपयन्त्येव। कुतश्चित् समधिगतनिशाशकलोऽपि मूषिकश्चिकित्सकत्वेनात्मानं सम्भावय-तीति लोकश्रुतिं प्रत्यक्षीकारयन्ति ।

अपि च इदानीन्तना ये केचन वैद्याः प्राचीनाचार्यप्रणीतान्यपि पुस्तकानि कुतश्चित्स्वगृहाद्वा समधिगच्छन्ति तानि सूर्यदेवमपि नोपदर्शयन्ति किं पुनर्मुद्रणालयान् ।

हन्त ! यस्यायुर्वेदशास्त्रस्य विविधदेशागत ऋषिमहर्षिसिद्धाचार्यसम्मेलनसाहाय्येनैव पुरा प्रादुर्भावः समजाने, सम्मिलिता ऋषयः सिद्धा आचार्याश्च समस्तविश्वमङ्गलकाम्यया स्वानुभवपथमुपगतमायुर्वेदतत्वं निरवशेषं सदसि समभिधाय आयुर्वेद कल्पतरुं प्रत्यहमुत्तरोत्तरमतिवेलं परिपोषयामासुस्तस्यैव साम्प्रतिकी कीदृशी दुरवस्थेति परं परिभवस्थानं भारतीयभिषजाम् ।

इमामेव दशामवलोकयद्भिः श्रीमद्भिर्गुरुवर्यैः कविराज नरेन्द्रनाथ महोदयैराज्ञापितोऽहं पद्यनिबद्धग्रन्थं स्वानुभूतरसशास्त्ररहस्यं भारतीयभिषजां करकमलेषु उपायनीकर्तुम् ।

एतादृशदुष्करकर्मणि अशक्तस्यापि मादृशस्य मन्दमतेः गुर्वादेशस्य शिरोधार्यतया कृतोऽयं प्रयत्नश्चेद् भारतीयभिषजां किञ्चिदप्युपकारजातमुपजनयेत्तदात्मानं सफलपरिश्रमं मन्येयम् ।

अस्मिंश्च ग्रन्थे पारदस्य स्वानुभूता अष्टावेव संस्काराः प्रतिपादिता न तु स्वानुभवपथबहिर्भूताः सर्वे (अष्टादश) संस्काराः । अस्यां च रसतरङ्गिण्यां क्वचित्पूर्वाचार्यपद्धतिरेवानुसृता क्वचिच्च नव्यरसायनतन्त्रोक्तसिद्धान्ता एवानुमता मया । तथाहि—

"गन्धाश्मगैरिकाशीसकाङ्क्षीतालशिलाञ्जनम् ।
कङ्कुष्ठं चेत्युपरसाश्चाष्टौ पारदकर्मणि ॥"

इत्यत्र पूर्वाचार्यैरुपरसत्वेन स्वीकृतानां गैरिककाशीसाञ्जनकङ्कुष्ठानां मध्ये गैरिकं लोहांशविशिष्टतया, काशीसं च रूपान्तरीभूतलोहांशसमन्वितत्वेन, उपधातुषु परिगणितं ग्रन्थेऽस्मिन् । अञ्जनञ्च सीसकादिधात्वंशमिश्रितत्वेन मिश्रकधातुषु परिसङ्ख्यातम् । कङ्कुष्ठश्च वनौषधिविशेषतया नेह प्रदर्शितम् ॥

कम्पिल्लश्चपलो गौरीपाषाणो नवसादरः ।
कपर्दो वह्निजारश्च गिरिसिन्दूरहिङ्गुलौ ॥
मृद्दारशृङ्गमित्यष्टौ साधारणरसाः स्मृताः ।
रससिद्धिकराः प्रोक्ता नागार्जुनपुरःसरैः ॥

इत्यत्र नागार्जुनादिभिः सिद्धैः साधारणरसत्वेन समाम्नातानां कम्पिल्लनवसारकपर्दवह्निजारगिरिसिन्दूरमृद्दारशृङ्गानां मध्ये कम्पिल्लो वनौषधिविशेषतया साधारणरसेषु न परिगणितः (परित्यक्त एव, निघण्टुग्रन्थैरेव तत्प्रतिपादनीयत्वात्)। नवसारश्च क्षारविशेषात्मकतया इह क्षारविशेषेषु निर्दिष्टः। कपर्दश्च मृतजलजन्तुकीकसविशेषतया जान्तवपदार्थेषु पृथक् परिगणितः। वह्निजारस्तु जन्तुविशेषजतयापि प्रायशो रसौषधेष्वप्रयुक्तत्वात् नेह प्रदर्शितः। गिरिसिन्दूरमृद्दारशृङ्गे च सीसकधात्वात्मकतया उपधातुषु परिगणिते।

ताप्यं च विमला तुत्थं कांस्यं पित्तलकं तथा।
सिन्दूरं शैलनिर्यासः स्मृताः सप्तोपधातवः॥

इत्यत्र उपधातुत्वेन समाम्नातानां कांस्यपित्तलशैलनिर्यासानां मध्ये कांस्यं ताम्रवङ्गांशमिश्रितत्वेन, पित्तलं ताम्रयशदांशसंमिश्रितत्वेन, शिलाजतु च लोहादिधातुमिश्रितत्वेन मिश्रकधातुषु परिगणितम्।

क्वचिच्च रसतन्त्रानिर्दिष्टानां मृगशृङ्गसमुद्रफेनादिकानां शोधनमारणादिविधानत्वात् वराटकादिजान्तवपदार्थसमतया जान्तवपदार्थेषु समाम्नानं विहितम्। तथा च प्राचीनरसागमेषु सामान्यतया प्रतिपादितानां विषोपविषाणां तत्तद्रसेषु प्रधानाङ्गतया सुसूक्ष्मभावेनावश्यज्ञातव्यतया च पृथगेव परिगणनं कृतं सविस्तरं गुणनिरूपणपूर्वकम्।

क्वचिच्च प्राचीनरसतन्त्रेषु नाममात्रेणाप्यश्रुतानां नव्यरसायनतन्त्रप्रसिद्धानां निम्बूकाम्ल–टङ्कणाम्ल–सोरकाम्लीयरजत–आरनालीयकसीसकद्रव–गन्धकाम्लीययशदादीनामत्युपयोगिनां विषयाणां सन्निवेशः कृतः।

अपि च रसोपरसधातूपधात्वादिकानामवश्यप्रतिपत्तव्याः स्वानुभूताः शास्त्रसंमताश्च मात्राभेदाः, गुणाः, पूर्वाचार्यैरनिरूपिता विशिष्टा गुणाः, सद्यो व्याधिहराः शास्त्रदृष्टाश्चामयिकप्रयोगा निर्दिष्टास्तत्र तत्र निर्व्याजम्। इहोक्ताश्च रसोपरसादिकानां शोधनमारणादिविधयः प्रायशः स्वानुभूताः सुखसाध्या एव वा सविस्तरं तथा प्रतिपादिता यथा सुकुमारमतयोऽपि शास्त्ररहस्यमधिगन्तुं शास्त्रोक्तक्रियाश्चानायासेनैव साधयितुं प्रभवेयुः।

एतद्ग्रन्थनिर्माणे श्रीमद्भिर्गुरुवर्यैः कविराज नरेन्द्रनाथ मित्र-महोदयैर्यन्महत्साहाय्यमनुष्ठितम्, तदुपकारभारं वहामि सादर-मवहितचेतसा । यच्च मदीयपरमसुहृद्भिर्विद्यालङ्कारविरुदवि-भूषितैः श्रीजयदेववर्म्ममहोदयैः मुद्रणीपत्रसंशोधनादिकर्मणि साहाय्यं सम्पादितं, तदपि कृतज्ञतापूर्वकमभिनन्दनीयम् ।

अन्ते तु—

वर्णयोजकदोषेण त्वज्ञानाद्वा प्रमादतः ।
कुत्रचित्स्खलनं जातं वर्णान्यत्वादिरूपकम् ॥
संशोधयन्तु सततं सन्तस्तदनुकम्पया ।
स्खलनं यच्च कुत्रापि स्यान्मे पूरुषदोषतः ॥
सयुक्तिकं सूचनीयं श्रीमद्भिस्तद्विशेषतः ।
द्वितीयमुद्रणावृत्तौ तत्सर्वं शोधयिष्यते ॥

इति निवेदयति—
भिषजां वशंवदः
सदानन्दशर्म्मा
घिल्डियालोपाह्वः ।

मेषार्कदिने १
विक्रमाब्दाः १९८१

❀ तरङ्गानुक्रमणिका ●

तरङ्गाः		पृष्ठाङ्काः
रसशालाविज्ञानीयः प्रथमस्तरङ्गः	...	१
परिभाषाविज्ञानीयो द्वितीयस्तरङ्गः	...	५
मूषादिविज्ञानीयस्तृतीयस्तरङ्गः	...	१४
यन्त्रविज्ञानीयश्चतुर्थस्तरङ्गः	...	१९
पारदस्य अष्टसंस्कारविज्ञानीयः पञ्चमस्तरङ्गः	...	२६
मूर्च्छनाविज्ञानीयः षष्ठस्तरङ्गः	...	३८
पारदमारणविज्ञानीयः सप्तमस्तरङ्गः	...	६२
गन्धकविज्ञानीयोऽष्टमस्तरङ्गः	...	८४
हिङ्गुलविज्ञानीयो नवमस्तरङ्गः	...	८७
अभ्रकविज्ञानीयो दशमस्तरङ्गः	...	९३
तालकादिविज्ञानीय एकादशस्तरङ्गः	...	१०५
शङ्खादिविज्ञानीयो द्वादशस्तरङ्गः	...	१२८
क्षारत्रिकविज्ञानीयस्त्रयोदशस्तरङ्गः	...	१४०
क्षारविशेषादिविज्ञानीयश्चतुर्दशस्तरङ्गः	...	१५२
सुवर्णविज्ञानीयः पञ्चदशस्तरङ्गः	...	१७०
रजतविज्ञानीयः षोडशस्तरङ्गः	...	१८२
ताम्रविज्ञानीयः सप्तदशस्तरङ्गः	..	१९४
वङ्गविज्ञानीयोऽष्टादशस्तरङ्गः	...	२०८
सीसकादिविज्ञानीय एकोनविंशस्तरङ्गः	...	२२०
लोहादिविज्ञानीयो विंशस्तरङ्गः	...	२३७
उपधात्वादिविज्ञानीय एकविंशस्तरङ्गः	...	२५२
मिश्रलोहादिविज्ञानीयो द्वाविंशस्तरङ्गः	...	२७७
रत्नविज्ञानीयस्त्रयोविंशस्तरङ्गः	...	२९१
विषोपविषादिविज्ञानीयश्चतुर्विंशस्तरङ्गः	...	३१४

ॐ

* रसतरङ्गिणी *

श्री कुसुमर्दिन्यै नमः ।

अथ रसशालाविज्ञानीयः प्रथमस्तरङ्गः

गणेशमुखचुम्बिनी सुरकदम्बकादम्बिनी
दयारसतरङ्गिणी दनुजसङ्घसंहारिणी ।
अघव्रजविडम्बिनी हरकुटुम्बिनी संततं
भवत्वमरवन्दिता ममहृदन्तरालम्बिनी ॥ १ ॥
ज्योतिःशास्त्रमहाम्भोधिकर्णधारं नमाम्यहम् ।
जीवानन्दं तु पितरं मातरञ्च सरस्वतीम् ॥ २ ॥
क्वाहं विमूढधिषणः क्व च सूततन्त्र-
माकुण्ठितामलधियामपि यत्र बुद्धिः ।
सत्यं तदेतदपि तत्र तथापि यत्नः
साफल्यमेष्यति गुरोरनुकम्पयायम् ॥ ३ ॥
य इह गुरुसमीपे यत्नतोऽब्दत्रयेण
रसनिगमनिगूढग्रन्थितत्वावबोधः ।
अपि च गुरुरहस्यः कर्ममार्गोऽप्यकारि
सरलमधुरपद्यैर्ग्रथ्यते वै स एव ॥ ४ ॥
प्राचीनेषु दुरूहेषु रसतन्त्रेषु मुह्यताम् ।
सन्दिग्धास्वतिकष्टासु रसपाकक्रियासु च ॥ ५ ॥

पदे पदे विशेषेण नित्यं व्यामोहितात्मनाम् ।
ग्रन्थसम्पद्विहीनानां स्वल्पाध्ययनसम्पदाम् ॥ ६ ॥
इदानीन्तनछात्राणां स्वल्पेन समयेन तु ।
सुखतः प्रतिपत्त्यर्थं प्रयत्नोऽयं कृतो मया ॥ ७ ॥
घिल्डियालोपसंज्ञेन सदानन्देन शर्मणा ।
निबध्यते महायत्नादियं रसतरङ्गिणी ॥ ८ ॥

रसतरङ्गिण्याः परिचयः ।

सशिलापि निराघाता सनागापि भयोज्झिता ।
सुखावगाहा बोभूयादियं रसतरङ्गिणी ॥ ९ ॥
ससत्वापि निराबाधा सघोषापि स्थिरक्रिया ।
सुखावगाहा जयति भृशं रसतरङ्गिणी ॥ १० ॥

रसवैद्यस्य प्रशंसा ।

तत्तत्संस्कारगीत्या सपदि रसवरः शोधितः स्यान्न यावद्
यावद्वा मारितः स्यात्सकृदपि हि न रसो नो कृता स्याद्बुभुक्षा ।
यद्वा नैवाभ्रसत्वं खलु कृतमथवा जारितं वा सुवर्णं
प्राणाचार्यः क्व तावद्भवति हि भिषजां मण्डले मण्डनीयः ॥११॥

कृतिरियमिह दोषैराचिता स्यान्मदीया
यदि तदपि न धीरैः काप्युपेक्षा विधेया ।
कृमिशतपरिपूर्णा कण्टकाकीर्णकाया
स्वनसि नहि नरेन्द्रैरर्प्यते केतकी किम् ॥ १२ ॥

रसशाला ।

विमलापवनप्रदेशगां रमणीयां जलयन्त्रशोभिताम् ।
कमनीयगवाक्षसंयुतां जनबाधारहितामसंकुलाम् ॥ १३ ॥

निखिलौषधवर्गमण्डितां रससिद्धेश्वरचित्रभूषिताम् ।
विपुलाखिलसाधनान्वितां रसशालां विदधीत शोभनाम्॥१४॥

रसशालायां कर्मविभागः ।

शङ्करं पूर्वदिग्भागे स्थापयेद्भिषजाग्रणीः ।
आग्नेये वह्निकार्याणि याम्ये प्रस्तरकृत्यकम् ॥ १५ ॥
शस्त्रकृत्यन्तु नैर्ऋत्ये क्षालनादीनि वारुणे ।
वायव्ये शोषणं शस्तमुत्तरे यन्त्ररक्षणम् ॥ १६ ॥
निदध्यादशिकोणे तु रससाधनमूलकम् ।
मुख्योपकरणं तत्तन्नित्यकृत्यसमागतम् ॥ १७ ॥

रसशालायां उपकरणद्रव्याणि –

द्रोणीरूपा वर्तुलाश्च खल्वाः पाषाणनिर्मिताः ।
आयसाश्चापि संग्राह्यास्तद्योग्याश्चैव मर्दकाः ॥ १८ ॥
काचमृत्काष्ठलोहादिनिर्मितानि बहूनि च ।
पात्राणि कारयेद्धीमान् यत्नतः पात्रमानवित् ॥ १९ ॥
मन्दांशिका कर्तरी च तथा शूर्पमुदूखलम् ।
चालनी वह्निमित्रा च स्थापनीया प्रयत्नतः ॥ २० ॥
दोलायन्त्रादिकानाञ्च सामग्रीं निखिलामपि ।
सुरक्षिते प्रदेशे तु स्थापयेद्भिषजाग्रणीः ॥ २१ ॥
सुदृढा विविधाकाराः कूपिकाः काचनिर्मिताः ।
सपिधानाः सिद्धरसस्थापनाय समाहरेत् ॥ २२ ॥
विविधानि सुरूपाणि पित्तलादिकृतानि च ।
मानयुक्तानि वै वैद्यस्तुलायन्त्राणि रक्षयेत् ॥ २३ ॥
मसृणान्यतिनूतानि कागदानि सितानि तु ।

रसौषधप्रदानार्थं प्रशस्यन्ते भिषग्वरैः ॥ २४ ॥
वन्योत्पलानि काष्ठानि तुषादीनि तृणानि च ।
शिखित्रान् कोकिलांश्चापि रक्षयेद्भिषजां वरः ॥ २५ ॥
यच्चान्यदुपयोगि स्याद् देशकालाद्यपेक्षया ।
तत्तत्संस्थापयेत्तत्र रसकर्मविशारदः ॥ २६ ॥
प्रत्यहं कारयेद्धीमान् शालायां मार्जनादिकम् ।
भृत्यैः कर्मसु निष्णातैः सदाऽऽतङ्कनिवृत्तये ॥ २७ ॥

परिचारकलक्षणम्

साद्यमाः सत्यवक्तारा निर्लोभाः शुचयः परम् ।
शूराः पथ्याशिनो ग्राह्याः भिषग्भिः परिचारकाः ॥ २८ ॥

रससिद्धानां नामपरिगणनम्

श्रीशङ्करो भैरवश्च नन्दी स्वच्छन्दभैरवः ।
मन्थानभैरवः शम्भुर्ब्रह्मा विष्णुश्च भास्करः ॥ २९ ॥
कापालिकश्च लङ्केशो ह्यगस्त्यो नरवाहनः ।
नागार्जुनो नरेन्द्रश्च काकचण्डीश्वराभिधः ॥ ३० ॥
मत्तो माण्डव्यगोविन्दो नागबोधिर्विशारदः ।
यशोधनो रत्नकोशो व्याडिगोरक्षनाथकः ॥ ३१ ॥
सुगृहीताभिधेयास्तु रससिद्धा इमे मताः ।
नामान्येतानि हि पठेत् प्रत्यहं रससिद्धये ॥ ३२ ॥

रसशास्त्राचार्यस्य स्वरूपम्

सदाचारः सुचरितः समदर्शी सदाशयः ।
सत्यवादी सिद्धमन्त्रः सर्वदा शङ्करप्रियः ॥ ३३ ॥
धीरो वीरः स्थिरप्रज्ञो रसकर्मविचक्षणः ।

रसतन्त्रस्वतन्त्रो यः स आचार्यः प्रशस्यते ॥ ३४ ॥

शिष्यस्य स्वरूपम्

सदाशयः सदाचारः स्वकुलाचारदीक्षितः ।
गुरुपूजारतो वीरः सत्यवादी दृढव्रतः ॥ ३५ ॥
आज्ञापरो निरालस्यो कुलीनोऽतिविचक्षणः ।
आयुर्वेदकृताभ्यासः शिष्यः खलु प्रशस्यते ॥ ३६ ॥

शिष्योपनयने वर्जनीयाः

दुराचारा दुश्चरिता अकुलीना मदोद्धताः ।
चौर्यच्छलादिना नित्यं विद्याग्रहणलोलुपाः ॥ ३७ ॥
अज्ञातकुलशीला ये नास्तिका गुरुनिन्दकाः ।
शिष्योपनयने हेया नरा रसविशारदैः ॥ ३८ ॥

इति रसशालाविज्ञानीयो नाम प्रथमस्तरङ्गः ।

अथ परिभाषाविज्ञानीयो द्वितीयस्तरङ्गः ।

परिभाषाविज्ञानफलम्

परिभाषाध्यायमादौ योऽधीते रससाधकः ।
रसतन्त्रार्थविज्ञाने न स मुह्यति कुत्रचित् ॥ १ ॥

परिभाषा लक्षणम्

निगूढानुक्तलेशोक्तसन्दिग्धार्थप्रदीपिका ।
सुनिश्चितार्था विबुधैः परिभाषा निगद्यते ॥ २ ॥

लवणपञ्चकम्

सैन्धवञ्चाथ सामुद्रं बिडं सौवर्चलं तथा ।
रोमकञ्चेति विज्ञेयं बुधैर्लवणपञ्चकम् ॥ ३ ॥

लवणत्रिकम्

सिन्धुजं रुचकं पाक्यमेतत् त्रिलवणं स्मृतम् ।
प्रकीर्तितञ्च लवणत्रिकम्वा लवणत्रयम् ॥ ४ ॥

सैन्धवस्य मुख्यत्वम्

तत्रापि सैन्धवं मुख्यं विद्वद्भिः परिकीर्तितम् ।
उक्ते लवणसामान्ये सैन्धवं विनियोजयेत् ॥ ५ ॥

क्षारद्वयं क्षारत्रिकञ्च

स्वर्जिक्षारो यवक्षारः क्षारद्वयमुदाहृतम् ।
सौभाग्येनसमायुक्तं क्षारत्रिकमुदाहृतम ॥ ६ ॥

क्षारपञ्चकम्

मुष्कक्षारो यवक्षारः किंशुकक्षार एव च ।
सर्ज्जिक्षारस्तिलक्षारः क्षारपञ्चकमुच्यते ॥ ७ ॥

क्षाराष्टकम्

सुधापलाशशिखरिचिञ्चार्कतिलनालजाः ।
स्वर्जिका यावशूकश्च क्षाराष्टकमुदाहृतम ॥ ८ ॥

मूत्राष्टकम्

सरिभाजाविकरभगोखरद्विपवाजिनाम ।
मूत्राणीति भिषग्वर्यैर्मूत्राष्टकमुदाहृतम् ॥ ९ ॥
खरेभोष्ट्रतुरङ्गाणां पुंसां मूत्रं प्रशस्यते ।
गोजाविमहिषीणाञ्च मूत्रं स्त्रीणां हितं मतम् ॥ १० ॥
निखिलेष्वपि मूत्रेषु गोमूत्रं गुणवत्तमम् ।
अतो विशेषानुक्तौ तु गोमूत्रं विनियोजयेत् ॥ ११ ॥

गोबरम्

गोखुरैस्ताडितं गोष्ठे शुष्कं चूर्णोपमञ्च यत् ।

गोमयं तत्समाख्यातं बुधैर्गोर्वरसंज्ञकम् ॥ १२ ॥

अम्लवर्गः

जम्बीरं निम्बुकश्चैव त्वम्लवेतसमम्लिका ।
नारङ्गं दाडिमश्चैव वृक्षाम्लं बीजपूरकम् ॥ १३ ॥
चाङ्गेरी चणकाम्लश्च कर्कन्धुः करमर्दकः ।
चुक्रिका चेति सामान्यादम्लवर्गः प्रकीर्तितः ॥ १४ ॥

अम्लपञ्चकम्

अम्लवेतसजम्बीरलुङ्गनारङ्गनिम्बुकैः ।
फलपञ्चाम्लकं ख्यातं कीर्तितञ्चाम्लपञ्चकम् ॥ १५ ॥

अपरमम्लपञ्चकम

कोलदाडिमवृक्षाम्लचाङ्गेरीचिञ्चिकारसैः ।
पञ्चाम्लकं समाख्यातं त्वम्लपञ्चकमेव च ॥ १६ ॥
सर्वेषामम्लजातीनां निम्बूकं गुणवत्तमम् ।
अम्लवेतसकम्वापि त्वाम्लिका वा गुणाधिका ॥ १७ ॥

पञ्चतिक्तकम्

गुडूची निम्बमूलत्वक् भिषङ्मता निदिग्धिका ।
पटोलपत्रमित्येतत् पञ्चतिक्तं प्रकीर्तितम् ॥ १८ ॥

पञ्चमृत्तिकाः

इष्टिका चूर्णकं भस्म तथा वल्मीकमृत्तिका ।
गैरिकं लवणश्चेति कीर्तिताः पञ्चमृत्तिकाः ॥ १९ ॥

मधुरत्रिकम्

आज्यं गुडो माक्षिकञ्च विज्ञेयं मधुरत्रिकम् ।
मतं त्रिमधुरञ्चापि तथैव मधुरत्रयम् ॥ २० ॥

पञ्चामृतम्

गव्यं क्षीरं दधि घृतं माक्षिकञ्चाथ शर्करा ।
पञ्चामृतं समाख्यातं रसकर्मप्रसाधकम् ॥ २१ ॥

पञ्चगव्यम्

गव्यं क्षीरं दधि घृतं गोमूत्रं गोमयं तथा ।
एकत्र योजितं तुल्यं पञ्चगव्यमिहोच्यते ॥ २२ ॥

क्षीरत्रयम्

रविक्षीरं वटक्षीरं स्नुहीक्षीरन्तथैव च ।
क्षीरत्रयमिति ख्यातं मारणादौ प्रशस्यते ॥ २३ ॥

दुग्धवर्गः

करिणी घोटिका धेनुस्त्वविका छागिकोष्ट्रिका ।
महिषी गर्दभी नारी काकोदुम्बरिका सुधा ॥ २४ ॥
दुग्धिकोदुम्बरश्चार्को न्यग्रोधोऽश्वत्थतिल्वकौ ।
एषां दुग्धैः समाख्यातो दुग्धवर्गः ममामतः ॥ २५

तैलवर्गः

तिलसर्षपकान्मत्तभल्लातरण्डनिम्बजः ।
उमादीनाञ्च तैलैस्तु तैलवर्गोऽत्र सम्मतः ॥ २६ ॥

कज्जलीस्वरूपम्

निर्द्रवैर्धातुभिश्चाथ गन्धादिभिः
पेषितः पारदः श्लक्ष्णतां प्रापितः ।
कज्जलाभो यदा जायतेऽसौ तदा-
नामतः कोविदैः कज्जलीत्युच्यते ॥ २७ ॥
कज्जली कज्जलश्चैव मता कज्जालिका च सा ।
रससम्पादनादौ च विशेषात्सा विधीयते ॥ २८ ॥

द्वितीयस्तरङ्गः

रसपङ्कस्य लक्षणम्

सद्रवैर्गन्धकाद्यैश्च धातुभिः पेषितो रसः ।
सुश्लक्ष्णः पङ्कसङ्काशो रसपङ्क इति स्मृतः ॥ २९ ॥

पिष्टिका

सूतं विमर्द्य गन्धेन दुग्धाद्यैस्तु द्रवैस्तथा ।
पेषणात् पिष्टतां नीता मता पिष्टी च पिष्टिका ॥ ३० ॥

हिंगुलाकृष्टो रसः

ऊर्ध्वपातनयन्त्रेण हिंगुलादुत्थितो रसः ।
हिङ्गुलोत्थः स्मृतश्चैव हिङ्गुलाकृष्ट उच्यते ॥ ३१ ॥

धातुसत्वलक्षणम्

कोष्ठ्यां ध्मातस्य वज्रादेर्द्रावकौषधिभिः समम् ।
सारो यो निर्गतः सोऽत्र सत्वमित्यभिधीयते ॥ ३२ ॥

वनौषधिसत्वलक्षणम्

बाष्पस्वेदनयन्त्रेण वनौषधिसमुद्भवः ।
सारः सत्वमिति प्रोक्तं रसतन्त्रविचक्षणैः ॥ ३३ ॥

सिक्थतैलस्य लक्षणम्

सिक्थकं तिलतैलञ्च युक्तमानविमिश्रितम् ।
विपक्वं नवनीताभं सिक्थतैलं प्रकीर्तितम् ॥ ३४ ॥

द्रावको गणः

गुञ्जा मधु गुडः सर्पिः सौभाग्यं गुग्गुल्लुस्तथा ।
पूर्वाचार्यैः कीर्तितोऽयं धातूनां द्रावको गणः ॥ ३५ ॥

ढालनम

संद्रावितस्य द्रव्यस्य द्रवे निक्षेपणन्तु यत् ।
ढालनं तत्समुद्दिष्टं रसकर्मविशारदैः ॥ ३६ ॥

मित्रपञ्चकम्

आज्यं गुञ्जाथ सौभाग्यं क्षौद्रं च पुरसंज्ञकम् ।
एतत्तु मिलितं विज्ञैर्मित्रपञ्चकमुच्यते ॥ ३७ ॥

विविधानां तु लोहानां द्रावणाय विशेषतः ।
रसतन्त्रविशेषज्ञैर्युज्यते मित्रपञ्चकम् ॥ ३८ ॥

आवापलक्षणम्

द्रव्यान्तरविनिक्षेपो द्रुते वङ्गादिके तु यः ।
क्रियते स प्रतीवाप आवापश्च निगद्यते ॥ ३९ ॥

निर्वापलक्षणम्

धात्वादेर्वह्नितप्तस्य जलादौ यन्निषेचनम् ।
स निर्वापः स्मृतश्चापि निषेकः स्नपनञ्च तत् ॥ ४० ॥

शुद्धावर्तलक्षणम्

यदा तु ज्वलनो ज्वालाकुलः शुक्लसमुत्थितिः ।
सत्वनिर्गमकालः स शुद्धावर्त इति स्मृतः ॥ ४१ ॥

पर्पटी स्वरूपम्

संद्राविता कज्जलिकाग्नियोगात्
रम्भापलासे चिपिटीकृता च ।
रसागमज्ञैः खलु पर्पटी सा
प्रकीर्तिता पर्पटिका च सैव ॥ ४२ ॥

ताडनम्

यत् श्लिष्टलोहयोरेकतरस्य परिणाशनम् ।
अपरस्य च लोहस्य भवेच्च परिसाधनम् ॥ ४३ ॥
आध्मानाद् वङ्कनालेन ताडनं तदिहोच्यते ।
सञ्जाततताडनं लोहं ताडितं परिकीर्तितम् ॥ ४४ ॥

घोषाकृष्टं ताम्रम्

ताडितं वङ्कनालेन सौषधं घोषकं यदा ।
स्यान्मुक्तरंगं तत्ताम्रं घोषाकृष्टमिहोच्यते ॥ ४५ ॥

वङ्कनालम्

करप्रमाणं यन्नालं पित्तलादिविनिर्मितम् ।

वह्नौ फूत्कारदानाय वङ्कनालं तदुच्यते ॥ ४६ ॥

स्वाङ्गशीतस्य लक्षणम्

ज्वलनस्थितमेवेह शीतलत्वमुपैति यत् ।
स्वाङ्गशीतं तदुद्दिष्टं स्वतःशीतश्च तन्मतम् ॥ ४७ ॥

बहिः शीतलक्षणम्

वह्नेर्बहिः समानीय यद् द्रव्यं याति शीतताम् ।
बहिःशीतं तदुद्दिष्टं बाह्यशीतश्च तन्मतम् ॥ ४८ ॥

भावनालक्षणम्

यच्चूर्णितस्य धात्वादेर्द्रवैः सम्पेष्य शोषणम् ।
भावनं तन्मतं विज्ञैर्भावना च निगद्यते ॥ ४९ ॥

भावनायां-द्रवपरिमाणम्

द्रवेण यावता द्रव्यं चूर्णितं त्वार्द्रतां व्रजेत् ।
तावानेव द्रवो देयो भिषग्भिर्भावनाविधौ ॥ ५० ॥
भाव्यद्रव्यमितः क्वाथ्यो जलमष्टगुणं ततः ।
वस्त्रंशशेषितः क्वाथो देयः क्वाथेन भावने ॥ ५१ ॥

शोधनम्

उद्दिष्टैरौषधैः सार्द्धं क्रियते पेषणादिकम् ।
मलविच्छित्तये यत्तु शोधनं तदिहोच्यते ॥ ५२ ॥

वारितर लक्षणम्

मृतं लोहं विनिक्षिप्तं यदा तरति वारिणि ।
रसतन्त्रसुनिष्णातैस्तद् वारितरमीरितम् ॥ ५३ ॥

मृतलोहम्

तर्जन्यङ्गुष्ठसंघृष्टं विशेद्रेखान्तरं तु यत् ।
निविष्टश्च बहिर्नैति मृतलोहं तदुच्यते ॥ ५४ ॥
मृतं लोहं पुटे ध्मातं ताराज्यमधुसंयुतम् ।
न त्यजेत्तारमानम्वा मृतलोहं तदुच्यते ॥ ५५ ॥

अपुनर्भवलक्षणम्

सामित्रपञ्चकं ध्मातं प्रकृतिं नैति यत् पुनः ।
अपुनर्भवमुक्तं तन्निरुत्थं च तदीरितम् ॥ ५६ ॥

निरुत्थलक्षणम्

अपुनर्भवसंज्ञं यल्लोहं तारसमान्वितम् ।
यदा तारेण लगति तन्निरुत्थमिहोच्यते ॥ ५७ ॥

अमृतीकरणम्

लोहादीनां मृतानां वै शिष्टदोषापनुत्तये ।
क्रियते यस्तु संस्कार अमृतीकरणं मतम् ॥ ५८ ॥

परिस्रुतसालिलम्

यन्त्रेण नाडिकाख्येन वह्निसंतापयोगतः ।
बिन्दुशो यत्स्रुतं नीरं तत्परिस्रुतमुच्यते ॥ ५९ ॥

मानपरिभाषा

मानमादौ परीक्षेत योगान्निर्मापयेत्ततः ।
योगनिर्माणसिद्ध्यर्थं मानं निर्दिश्यतेऽधुना ॥ ६० ॥
षड्भिस्तु सर्षपैर्गौरैर्यवस्त्वेकः प्रकीर्तितः ।
त्रिभिर्यवैश्च गुञ्जैका मता सैवेह रक्तिका ॥ ६१ ॥
वसुसंख्योन्मिताभिश्च रक्तिकाभिस्तु माषकः ।
माषकै रविसंख्यातैस्तोलकं परिकीर्तितम् ॥ ६२ ॥
वटकः क्षुद्रकश्चैव द्रंक्षणश्च प्रकीर्तितः ।
तोलकद्वितयेनेह कर्षः स्यात्सैव तिन्दुकः ॥ ६३ ॥
अक्षः स एव कथितो बिडालपदकं तथा ।
कवलग्रहसंज्ञश्च सुवर्णश्च निगद्यते ॥ ६४ ॥
कर्षद्वयं त्वर्द्धपलं स्याच्छुक्तिश्च निगद्यते ।
मता चाष्टमिका सैव पलार्द्धश्च प्रकीर्तितम् ॥ ६५ ॥

शुक्तिभ्यान्तु पलं ज्ञेयं मुष्टिः षोडशिका च सा ।
चतुर्थिका च बिल्वश्च प्रकुञ्चश्च निगद्यते ॥ ६६ ॥
पलाभ्यां प्रसृतं ज्ञेयं प्रसृतिश्च निगद्यते ।
प्रसृतिभ्यां समाख्यातः कुडवश्चाञ्जलिः स्मृतः ॥ ६७ ॥
कुडवाभ्यां शरावः स्यात् मानिकाच निगद्यते ।
तदेवाष्टपलं ख्यातं रसतन्त्रे विचक्षणैः ॥ ६८ ॥
दशभिश्च पलैरत्र सेरस्त्वाधुनिकः स्मृतः ।
अशीतितोलकमितः स एव सेरकः स्मृतः ॥ ६९ ॥

धन्वन्तरिभागः—

अर्द्धं सिद्धरसादीनां तथैव घृततैलयोः ।
पादस्तु मृतधात्वादेरवलेहस्य चाष्टमः ॥ ७० ॥
भागस्तुरीयोऽरिष्टादेश्चूर्णादीनाञ्च सप्तमः ।
भिषग्वराय लोकेऽस्मिन् स्वास्थ्यमङ्गलकाम्यया ॥ ७१ ॥
धन्वन्तरिं विनिर्दिश्य रोगिभिर्दीयते तु यः ।
पूर्वाचार्यैः समाख्यातो भागो धन्वन्तरेस्तु सः ॥ ७२ ॥

विश्वासघातको वैद्यः

भागाद्धन्वन्तरेर्लोभादधिकं यो हरेद्भिषक् ।
दद्याच्च भेषजं दुष्टं स वै विश्वासघातकः ॥ ७३ ॥
इयमिह रसतन्त्रागाधरत्नाकराद्या
परिचितपरिभाषामूल्यरत्नानि चित्वा ।
रुचिरतरनिवेशा गुम्फिता कण्ठमाला
भवतु विबुधकण्ठालम्बिनी सा नितान्तम् ॥ ७४ ॥

इति परिभाषाविज्ञानीयो नाम द्वितीयस्तरङ्गः ।

अथ मूषादिविज्ञानीयस्तृतीयस्तरङ्गः ।

मूषानामानि

मूषा हि कुमुदी ख्याता प्रोक्ता कुमुदिका च सा ।
क्रौञ्चिका वह्निमित्रा च पाचनी च निगद्यते ॥ १ ॥
मुष्णाति दोषान् यस्मात्सा तस्मान्मूषा प्रकीर्तिता ।
कुमुदाकारसादृश्यात् कुमुदी च निगद्यते ॥ २ ॥
वह्निर्मित्रं यतश्चास्या वह्निमित्रा ततः स्मृता ।
द्रव्यपाचनयोगाच्च पाचनी समुदीरिता ॥ ३ ॥

पिधानम्

द्रव्यपूरितमूषादेः द्रव्यपातनिवृत्तये ।
आच्छादकं भवेद् यत्तु पिधानं तदिहोच्यते ॥ ४ ॥

सन्धिलेपनम्

मूषादीनां तु यत्सन्धौ किट्टाद्यैः स्याद्विलेपनम् ।
तत्सन्धिलेपनं ख्यातं तच्चोक्तं सन्धिबन्धनम् ॥ ५ ॥

मूषानिर्माणोचिता मृत्तिका

सशर्करा पाण्डुरा च वह्नितापसहा चिरम् ।
स्थूला च मृत्तिका या स्यात् मूषार्थं सा मतोत्तमा ॥ ६ ॥

सामान्यमूषा

शिखित्रकैर्दग्धतुषैः शणेन
सलट्टिका दण्डसुकुट्टिता च ।
या मृत्तिका तद्विहिता तु मूषा
सामान्यमूषा कथिता रसज्ञैः ॥ ७ ॥

वज्रमूषा

त्रयो भागा मृदो द्वौ तु शणलट्टिकयोस्तथा ।
भागो दग्धतुषादेश्च किट्टस्य त्वर्ध एव च ॥ ८ ॥

एभिः कृता तु या मूषा वज्रमूषा तु सा मता ।
प्रयुज्यते विशेषेण सत्वपातनकर्मणि ॥ ९ ॥

योगमूषा

तुषाद्यैश्च बिडाद्यैश्च कृता चापि विलेपिता ।
सूतसिद्धिकरी चैषा योगमूषा निगद्यते ॥ १० ॥

वज्रद्रावणिका मूषा

सर्मभूनागगाराद्यैस्तुषाद्यैश्चापि निर्मिता ।
धीरैश्च माहिषैर्मूषा वज्रद्रावणिका मता ॥ ११ ॥
वज्रद्रावणिका मूषा वज्रसत्वप्रसाधिका ।
यामद्वयमपि ध्माता नासौ द्रवति कर्हिचित् ॥ १२ ॥

गारमूषा

दग्धषड्गुणगारेण मृदा चासितया तु या ।
विधीयते च किट्टाद्यैर्गारमूषा तु सा मता ॥ १३ ॥
यामयुग्ममपि ध्माता नासौ द्रवति निश्चितम् ।
ढालनादौ विशेषेण रसज्ञैः सा प्रयुज्यते ॥ १४ ॥

गोस्तनीमूषा

सपिधाना शिखोपेता गोस्तनाकारसन्निभा ।
सत्वद्रावणशुद्ध्यर्था सा मूषा गोस्तनी मता ॥ १५ ॥

मल्लमूषा

सम्पुटाकारतां नीता मल्लद्वितययोजनात् ।
मल्लमूषा समाख्याता पर्पट्यादिप्रसाधिका ॥ १६ ॥

महामूषा

वर्तुला चिपिटा मूले स्थूला चायामविस्तरा ।

---

१ इयमेव मूषा रसार्णवे अन्धमूषाख्यया प्रतिपादिता । तथा हि—
"अन्धमूषा तु कर्तव्या गोस्तनाकारसन्निभा ।
पिधानकसमायुक्ता किञ्चिदुन्नतमस्तका ॥ १ ॥
[चतुर्थपटलः]

विस्तृतास्या च या मूषा महामूषा तु सा मता ॥ १७ ॥
लोहाभ्रताप्यसत्वादेः पुटनाय भिषग्वरैः ।
प्रयुज्यते महामूषा स्थूलमूषा च सा स्मृता ॥ १८ ॥

वृन्ताकमूषा

धत्तूरपुष्पाकारेण सच्छिद्राष्टाङ्गुलेन च ।
नालेन तूर्ध्वतः श्लिष्टा सुदृढं द्वादशाङ्गुला ॥ १९ ॥
वृन्ताकसदृशाकारा मूषा वृन्ताकमूषिका ।
साधयेत्खर्परादीनां सत्वं वै मूषयाऽनया ॥ २० ॥

मूषाप्यायनकर्म

द्रव्ये द्रवोन्मुखे जाते मूषाया वह्नियोगतः ।
निष्कासनं क्षणं यत्तु तन्मूषाप्यायनं मतम् ॥ २१ ॥

अङ्गारधानिका

अङ्गारधानिका ख्याता हसन्ती च हसन्तिका ।
अङ्गारशकटी चापि हसनी च निगद्यते ॥ २२ ॥
अङ्गारधानिका ह्येषा मृदुद्रव्यप्रसाधिका ।
वङ्गादीनां ढालनादौ विशेषेण प्रयुज्यते ॥ २३ ॥

कोष्ठिका

सत्वादिपातनाद्यर्था द्रव्यढालनसाधिका ।
वह्निसन्धानिका या तु कोष्ठिका सा निगद्यते ॥ २४

अङ्गारकोष्ठिका

नृपहस्तमितोत्सेधे तदर्धायामविस्तृता ।
मध्यतश्चतुरस्रा च मृदा च परिलेपिता ॥ २५ ॥
चतुरङ्गुलमानेन रन्ध्रेण परिशोभिता ।
नालिकां समकोणाञ्च रन्ध्रे तिर्यङ् निवेशयेत् ॥ २६
नालिकाया मुखे चैव भस्त्रावक्त्रं निवेशयेत् ।

आपूर्य कोकिलैः कोष्ठीं द्रव्यमूषान्वितां धमेत् ॥ २७ ॥
अङ्गारकोष्ठिका ख्याता द्रव्यढालनसाधिका ।
सत्वानां पातने चेयं विशेषाद्विनियुज्यते ॥ २८ ॥

पातालकोष्ठिका

वितस्तिविस्तृतं गर्तं भूमौ कुर्याद्विधानतः ।
तन्मध्ये वर्तुलं छिद्रं निम्नदेशे प्रकल्पयेत् ॥ २९ ॥
गर्तमध्यगते छिद्रे तिर्यङ् नालं निवेशयेत् ।
नालवक्त्रे च भस्त्राया मुखं सम्यङ् निरोधयेत् ॥ ३० ॥
द्रव्यमूषां कोष्ठिकायां निधाय भस्त्रया धमेत् ।
पातालकोष्ठिका ह्येषा मृदुद्रव्यप्रसाधिका ॥ ३१ ॥

अथ पुटलक्षणम्

रसोपरसलोहादेः पाकमानप्रमापकम् ।
उत्पलाद्यग्निसंयोगात् यत्तदत्र पुटं स्मृतम् ॥ ३२ ॥

पुटप्रयोजनम्

भवेद्यतः पुटादेव दोषहानिर्गुणोदयः ।
रसोपरसलोहानां पुटपाकस्ततः स्मृतः ॥ ३३ ॥
पुटपाकेन लोहादेर्निरुत्थत्वञ्च दीपनम् ।
भवेद्धारितरत्वञ्च पुटपाकस्ततः स्मृतः ॥ ३४ ॥
मृतलोहादिकं यस्मादतिशेते मृतं रसम् ।
पुटपाकविधानेन, पुटं तस्मात्प्रशस्यते ॥ ३५ ॥

सामान्यपुटक्रमः

मूषागते तु लोहादौ पुटनीये विशेद्यथा ।
वह्निस्तु स्वानुकूल्येन तथा स्यात्तु पुटक्रमः ॥ ३६ ॥

सूर्यपुटलक्षणम्

द्रव्याणां भावितानान्तु भावनौषधजै रसैः ।
शोषणं सूर्यतापे यत्तत्सूर्यपुटमुच्यते ॥ ३७ ॥

महापुटम्

व्यामार्द्धनिम्ने चतुरस्ररूपे हस्तद्वयायामामिते च कुण्डे ।
वन्योत्पलापूरितगर्भभागे मूषां निदध्यात्पुटनीयपूर्णाम् ॥३८॥
पुनस्तु विन्यस्य वनोत्पलानि सम्पूरयेत्कुण्डमुखं रसज्ञः ।
सन्दीप्य वह्निं पुटनं ततस्तन्महापुटाख्यं विबुधैः प्रदिष्टम्॥३९॥

गजपुटम्

नृपकरचतुरस्रोत्सेधदैर्घ्ये तु कुण्डे
छगणगणभृतार्द्धे मूषिकां स्थापयित्वा ।
पुटनमिह भवेद्यच्छाणपूर्णोर्द्धभागे
गजपुटमिह तन्त्रे भाषितं तद्रसज्ञैः ॥ ४० ॥

वाराहपुटम

कुण्डे त्वरत्निमानेन चतुरस्रे तथोच्छ्रिते ।
पुटं यद् दीयते तत्तु वाराहपुटमुच्यते ॥ ४१ ॥

कुक्कुटकपुटम्

वितस्तिद्वयमानेन निम्ने च चतुरस्रके ।
पुटं यद्दीयते तत्तु मतं कुक्कुटकं बुधैः ॥ ४२ ॥

कपोतपुटम्

वन्योत्पलैरष्टसंख्यैः क्षितौ यद्दीयते पुटम् ।
रसादीनान्तु सिद्ध्यर्थं तत्कपोतपुटं स्मृतम् ॥ ४३ ॥

गोवरपुटम्

गोवरैर्वा तुषैर्वापि खलु कुण्डेऽथवा क्षितौ ।
पुटं यद्दीयते विज्ञैस्तद् गोवरपुटं स्मृतम् ॥ ४४ ॥

भाण्डपुटम्

मूषागर्भे तुषापूर्णे स्थूले भाण्डेऽग्नियोजनात् ।
दीयते यत्पुटं विज्ञैस्तद् भाण्डपुटमुच्यते ॥ ४५ ॥

वालुकापुटम्

प्रतप्तवालुकागर्भे न्यस्य मूषादिकं दृढम् ।
यद् दीयते पुटं तत्तु वालुकापुटमुच्यते ॥ ४६ ॥

भूधरपुटम्

भूमिगर्भे कुमुदिकां विन्यस्य द्व्यङ्गुलोपरि ।
यद् दीयते पुटं तत्तु पुटं भूधरसंज्ञकम् ॥ ४७ ॥

लावकपुटम्

गोर्वरर्वा तुषर्वापि वितस्त्यूर्ध्वं पुटन्तु यत् ।
मृद्द्रव्यप्रसिद्ध्यर्थं तल्लावकपुटं मतम् ॥ ४८ ॥

पुटमानानुक्तौ पुटप्रदानप्रकारः

पुटनाम्नामनिर्देशे वीक्ष्य द्रव्यबलाबलम् ।
पुटेष्वन्यतमं दद्यात् यत्स्याद्युक्ततमं भृशम् ॥ ४९ ॥

उपलनामानि

उपलं चोत्पलं ख्यातं गिरिण्डं पिष्टकन्तथा ।
छाणश्च छगणश्चैव करीषश्च निगद्यते ॥ ५० ॥

इति मूषादिविज्ञानीयो नाम तृतीयस्तरङ्गः ।

अथ यन्त्रविज्ञानीयश्चतुर्थस्तरङ्गः ।

यन्त्रलक्षणम्

रसोपरसलाहोद्या मारणाद्यर्थसिद्धये ।
यन्त्र्यन्तेऽनेन यस्मात्तु तस्माद् यन्त्रं प्रकीर्तितम् ॥ १ ॥

दोलायन्त्रलक्षणम्

सूतादिकं स्वेदनीयं निक्षिपेत् त्रिगुणाम्बरे ।
स्फोतकेन निरुध्याथ पोट्टलीं कारयेद् भृशम् ॥ २ ॥

पूरिताद्धोदरे भाण्डे द्रवैस्तन्मुखपार्श्वयोः ।
रन्ध्रद्वयं विधायाथ तत्र दण्डं विनिक्षिपेत् ॥ ३ ॥
दण्डमध्ये तु सुदृढं बध्नीयाद् द्रव्यपोट्टलीम् ।
गुरुदर्शितमार्गेण वह्निं प्रज्वालयेदधः ॥ ४ ॥
स्वेदयेच्च ततश्चैतद् दोलायन्त्रमिति स्मृतम् ।
द्रव्याणां शोधनाद्यर्थं विशेषेण नियुज्यते ॥ ५ ॥

ऊर्ध्वपातनयन्त्रम्

द्वादशाङ्गुलमुखी सुवर्तुला सुदृढा च खलु गर्भविस्तृता ।
अङ्गुलद्वयमितोष्ठसंयुता पातने भवति निम्नगा घटी ॥ ६ ॥
उक्तसर्वगुणसंयुता तले छिद्रयुक्तदृढवृत्तिकान्विता ।
ऊर्ध्वगा च जठरोज्ज्वला घटी तूर्ध्वपातनविधौ प्रशस्यते । ७ ।
निम्नगायां रसं क्षिप्त्वा मेलयेदनयोर्मुखम् ।
सम्वेष्ट्य शोषयेत् सन्धिं चुल्यामारोपयेत्ततः ॥ ८ ॥
नालिकां वृत्तिकाछिद्रे न्यस्य सन्धिं प्रलेपयेत् ।
वृत्तिमध्ये क्षिपेत्तोयं नालिकामुखमार्गतः ॥ ९ ॥
तप्तं निष्कासयेत्तोयं शीतलञ्च विनिक्षिपेत् ।
रसज्ञैः कीर्तितमिदमूर्ध्वपातनयन्त्रकम् ॥ १० ॥

अधःपातनयन्त्रम्

ऊर्ध्वपात्रान्तरे सूतं क्षिप्त्वाधःपात्रके जलम् ।
निक्षिप्य भूमौ गर्तञ्च विधाय विन्यसेद् दृढम् ॥ ११ ॥
प्रदीप्तैश्छगणैस्तत्र वह्निं प्रज्वालयेद् भृशम् ।
रसज्ञैः कीर्तितमिदमधःपातनयन्त्रकम् ॥ १२ ॥

तिर्यक्पातनयन्त्रम्

नतनाल घटे दीर्घे रसराजं विनिक्षिपेत् ।
तन्नालं योजयेदन्यकुम्भगर्भे प्रयत्नतः ॥ १३ ॥

रोधयेदथ यत्नेन रसगर्भघटीमुखम् ।
ततो रसघटस्याधो वह्निं प्रज्वालयेद् भृशम् ॥ १४ ॥
पूरयेच्च घटं त्वन्यं विमलैः शीतलैर्जलैः ।
यन्त्रमेतत्समाख्यातं तिर्यक्पातनसंज्ञकम् ॥ १५ ॥

भस्मयन्त्रम्

मृन्मिर्मितं पात्रमिहाहरेद् दृढं
वितस्तिगम्भीरमथोऽतिनूत्नम् ।
भूत्या तदर्धं परिपूर्य यत्नात्
तालादिगोलान् क्रमशो निदध्यात् ॥ १६ ॥
निर्दिष्टभूत्यैव तदूर्ध्वभागं
प्रपूर्य संमुद्य च भाण्डवक्त्रम् ।
चुल्यां निधायाग्निमथ प्रदद्या-
देतन्मतं वै खलु भस्मयन्त्रम् ॥ १७ ॥

कच्छपयन्त्रस्य स्वरूपम

जलपूरितभाजनमध्यगते
घटखर्परके विनिधाय रसम् ।
बलिमध्यगतं कुमुदीनिहितं
चषकेन भृशं पिदधीत ततः ॥ १८ ॥
कृतसन्धिविलेपनमम्बुमृदा
खलु खादिरकोकिलकैर्ज्वलनम् ।
परिदीप्य भृशं सुपचेद् गदितं
किल कच्छपसंज्ञकयन्त्रमिदम् ॥ १९ ॥
बलिजारणसिद्ध्यर्थं यन्त्रं कच्छपसंज्ञकम् ।
समाख्यातं रसाचार्यैः रससिद्धिप्रदायकम् ॥ २० ॥

भूधरयन्त्रम्

वालुकाचितसर्वाङ्गां कुमुदीं कुण्डगां पचेत् ।

आच्छाद्य दीप्तैरुपलैर्यन्त्रं भूधरसंज्ञकम् ॥ २१ ॥

मृदङ्गयन्त्रम्

मृदङ्गसदृशाकारं शून्यगर्भञ्च सुदृढम् ।
पात्रं निर्मापयेद् युक्त्या रसतन्त्रविचक्षणः ॥ २२ ॥
व्यावर्तनापिधानेन संयुक्तं त्वेकपार्श्वतः ।
परिभ्रामणशीलौ च वारङ्गौ पार्श्वयोस्तथा ॥ २३ ॥
कारयेच्च ततो युक्त्या सूतं गन्धञ्च निक्षिपेत् ।
व्यावर्तनापिधानञ्च सुदृढं सन्निवेशयेत् ॥ २४ ॥
ततो नरोत्सेधमितौ स्तम्भौ भूमौ तु विन्यसेत् ।
सम्मुखीनतया तत्र विधानज्ञो भिषग्वरः ॥ २५ ॥
ततः प्रलम्बयेद् यन्त्रं स्तम्भयोर्दण्डसंश्रितम् ।
मृदङ्गयन्त्रकमिदं रसज्ञैः परिकीर्तितम् ॥ २६ ॥
निर्मातुं कृत्रिमं म्लेच्छं रसतन्त्रविचक्षणैः ।
मृदङ्गयन्त्रमधुना विशेषेण प्रयुज्यते ॥ २७ ॥

स्थालीयन्त्रम

स्थाल्यां संस्थाप्य लोहादि मल्लेनावृणुयान्मुखम् ।
स्थाल्यधो ज्वालयेदग्निं स्थालीयन्त्रमिदं स्मृतम् ॥ २८ ॥

वालुकायन्त्रम

सवस्त्रकुट्टितमृदा लिप्ताङ्गीञ्च विशोषिताम् ।
रसादिपूर्णजठरां काचकूपीन्तु विन्यसेत् ॥ २९ ॥
स्थाल्यां मृत्तूललिप्तायां सुदृढायां प्रयत्नतः ।
आकण्ठं कूपिकान्तत्र वालुकाभिः प्रपूरयेत् ॥ ३० ॥
भाण्डाधो ज्वालयेदग्निं यथाकालं यथाक्रमम् ।
एतद्बुधैः समाख्यातं वालुकायन्त्रसंज्ञकम् ॥ ३१ ॥

लवणयन्त्रम्

लवणस्य च निक्षेपादेवं लवणयन्त्रकम् ।
प्रकीर्तितं भिषग्वर्यैर्मृगाङ्कादिरसार्थकम् ॥ ३२ ॥

पुटयन्त्रम्

पुटनीयं तु कुम्भादौ विन्यस्यावृणुयात् पुनः ।
पिधानेन दृढेनाथ विदध्यात्सन्धिबन्धनम् ॥ ३३ ॥
करीषाग्नौ चुल्लिकायां वा पचेदग्निमानवित् ।
लोहादीनां मारणार्थं पुटयन्त्रं प्रशस्यते ॥ ३४ ॥

बाष्पस्वेदनयन्त्रम

नीरपूरितगर्भे तु पात्रे पात्रं निवेशयेत् ।
पार्श्वयोः कर्णिकोपेतं द्रव्यक्काथप्रपूरितम् ॥ ३५ ॥
चुल्लिकायां निधायाथ वह्निं प्रज्वालयेदधः ।
संशोषयेत्ततः क्काथं यावदायाति चूर्णताम् ॥ ३६ ॥
बाष्पेन स्वेदनं यस्माद् रसतन्त्रविशारदैः ।
तस्माद्यन्त्रमिदं ख्यातं बाष्पस्वेदनसंज्ञकम् ॥ ३७ ॥
वन्यौषधिविशेषाणां सत्वनिर्माणसाधकम् ।
यन्त्रमेतत्समाख्यातं भिषजां सुखहेतवे ॥ ३८ ॥

दर्विकायन्त्रम्

चषकं दर्विकाकल्पं दीर्घहस्तकसंयुतम् ।
दार्विकायन्त्रमेतद्धि गन्धशोधनसाधकम् ॥ ३९ ॥

पालिकायन्त्रम्

एतदेव हि यन्त्रन्तु नतहस्तकसंयुतम् ।
पालिकायन्त्रमुद्दिष्टं रसतन्त्रविचक्षणैः ॥ ४० ॥

डमरुकाख्ययन्त्रम्

स्थालिकोपरि विन्यस्य स्थालीं न्युब्जतयापराम् ।
पचेद्यथाक्रमं त्वेतद्यन्त्रं डमरुकाह्वयम् ॥ ४१ ॥

नाडिकायन्त्रम्

घटे तु चुल्लिकासंस्थे निक्षिपेत्सलिलादिकम् ।
अधोमुखं घटं त्वन्यं मुखे तस्य निधापयेत् ॥ ४२ ॥
उभयोर्मुखमालिप्य मृदा संशोषयेत्ततः ।
उपरिस्थे ततो भाण्डे नाडिकान्तु निवेशयेत् ॥ ४३ ॥
एतान्तु नाडिकां प्राज्ञो यत्नतः कुण्डलीकृताम् ।
जलद्रोण्यां विनिक्षिप्य भित्त्वा चाथ निवेशयेत् ॥ ४४ ॥
काचकूपीमुखे सम्यक्, वह्निं प्रज्वालयेत्ततः ।
यावद् घटस्थितद्रव्यसारो यातीह बाष्पताम् ॥ ४५ ॥
एतद्धि नाडिकायन्त्रं भिषग्भिः परिकीर्तितम् ।
परिस्रुताम्बुनिर्माणे विशेषेण प्रयुज्यते ॥ ४६ ॥

पातालयन्त्रम्

भूमौ हस्तमितं निम्नं विदध्याद् गर्त्तमुत्तमम् ।
तस्मिन् पात्रं निधायाथ तद्रूपं पात्रमन्यकम् ॥ ४७ ॥
आददीत ततस्तस्मिन्नौपधानि निधापयेत् ।
आस्यमस्य शरावेण छिद्रगर्भेण रोधयेत् ॥ ४८ ॥
पात्रमेतत्तु गर्तस्थे पात्रे यत्नेन विन्यसेत् ।
विदध्यानयोर्यत्नात् सुदृढं सन्धिबन्धनम् ॥ ४९ ॥
मृदा सम्पूर्य गर्तन्तु वह्निं दद्यात् प्रयोगवित् ।
स्वाङ्गशीतं ततो ज्ञात्वा रसतन्त्रविचक्षणः ॥ ५० ॥
उपरिस्थन्तु वै पात्रं शनैः समवतारयेत् ।
अधःपात्रगतं तैलं गृह्णीयात्तु विधानतः ॥ ५१ ॥
एतद् बुधैः समाख्यातं यन्त्रं पातालसंज्ञकम् ।
आहर्तुं गन्धकादीनां तैलमेतत्प्रयुज्यते ॥ ५२ ॥

खल्वयन्त्रम्

चषकोपममत्यच्छं सुदृढं पिच्छिलोपलम्

सच्छिलाविहितं पात्रं खल्वयन्त्रमिहोच्यते ॥ ५३ ॥

खल्वयन्त्रस्य प्रयोजनम्

रसोपरसलोहादेः पेषणादिककर्मणि ।
रसतन्त्रक्रियादक्षैः खल्वयन्त्रं प्रयुज्यते ॥ ५४ ॥

खल्वयन्त्रस्य द्वैविध्यम्

खल्वयन्त्रं द्विधा प्रोक्तं रसतन्त्रे विशेषतः ।
प्रथमं वर्तुलाकारं द्रोणीरूपं द्वितीयकम् ॥ ५५ ॥

वर्तुलः खल्वः

विस्तारे तपनाङ्गुलः समतलो नीलाब्जतुल्यप्रभः ।
निम्नत्वे च नवाङ्गुलः सुमसृणो रुद्राङ्गुलोच्छ्रायवान् ॥
भित्त्या द्व्यङ्गुलसंमितः खलु तथा चेन्द्राङ्गुलो घर्षकः ।
खल्वोऽयं खलु वर्तुलो निगदितः सूतादिसिद्धिप्रदः ॥ ५६ ॥

द्रोणीरूपः खल्वः

उत्सेधे तुरगाङ्गुलः खलु कलातुल्याङ्गुलश्चायतौ
विस्तारे तपनाङ्गुलश्च मसृणो भित्त्या च वै द्व्यङ्गुलः ।
घर्षः सूर्यसमाङ्गुलः सुविशदो लोहादिभिर्निर्मितः
खल्वोऽयं रससिद्धिकृन्निगदितो द्रोणीनिभोऽत्युत्तमः ॥ ५७ ॥

उलूखलयन्त्रम्

दशाङ्गुलन्तु विस्तारे तूत्सेधे षोडशाङ्गुलम् ।
त्रयोदशाङ्गुलश्चैव निम्नत्वेन च सुदृढम् ॥ ५८ ॥
अयसा निर्मितश्चैव मध्येऽतिमसृणीकृतम् ।
विंशत्यङ्गुलदीर्घश्च लोहदण्डः सुशोभनः ॥ ५९ ॥
उलूखलाभिधं यन्त्रं बुधैरेतत्प्रकीर्तितम् ।
ताप्यादीनां कुट्टनार्थं यन्त्रमेतत्प्रयुज्यते ॥ ६० ॥

लघूनि चाथ दीर्घाणि युक्त्या यन्त्राणि कारयेत् ।
द्रव्यमानानुकूल्येन विधानज्ञो भिषग्वरः ॥ ६१ ॥
यन्त्राण्येतानि प्रोक्तानि दिग्दर्शनतया मया ।
अध्येतॄणां शिशूनान्तु सुखबोधाय सत्वरम् ॥ ६२ ॥
इति यन्त्रविज्ञानीयो नाम चतुर्थस्तरङ्गः ।

अथ पारदस्य अष्टसंस्काराविज्ञानीयः पञ्चमस्तरङ्गः

अथ पारदस्य नामानि

रसो रसेन्द्रः सूतश्च रसेशश्च रसेश्वरः ।
चपलो रसराजश्च पारदश्च शिवाह्वयः ॥ १ ॥
रसनादभ्रकादीनां धातूनां कीर्तितो रसः ।
अभ्रकाद्यधिराजत्वाद्रसेन्द्र इति कथ्यते ॥ २ ॥
देहलोहमयीं सिद्धिं सूतेऽतः सूत उच्यते ।
स्वभावाच्चपलो यस्मात् ततोऽसौ चपलः स्मृतः ॥ ३ ॥
आतङ्कपङ्कमग्नानां पारदानाच्च पारदः ।
अभ्रादिरसराजत्वाद्रसराजः स्मृतो बुधैः ॥ ४ ॥

विशुद्धाविशुद्धसूतस्य स्वरूपम्

शुद्धः सूतो मतस्त्वन्तःसुनीलो बहिरुज्ज्वलः ।
सूर्यप्रभश्चाविशुद्धो धूम्रो वा परिपाण्डुरः ॥ ५ ॥

अविशुद्धसूतस्य हेयत्वम्

सदोषो रसराजस्तु विदध्याद्विविधान् गदान् ।
तस्माद् दोषविहीनन्तु योगेषु विनियोजयेत् ॥ ६ ॥

अथ पारदस्य नैसर्गिका दोषाः

नागवङ्गौ वह्निमलौ चापल्यं गरलं गिरिः ।
असह्याग्निश्च विज्ञेया दोषा नैसर्गिका रसे ॥ ७ ॥

नागाद् व्रणं भवेत्कुष्ठं वङ्गात्तापोऽग्निदोषतः ।
मलाज्जाड्यं तु चापल्याद् बीजनाशो विषान्मृतिः ॥ ८ ॥
गिरेः स्फोटोऽथ मोहश्च ह्यसह्याग्नेः प्रजायते ।
एतैर्दोषैर्विहीनश्च रसेन्द्रमिह योजयेत् ॥ ९ ॥

पारदस्य सप्तकञ्चुकाः

भेदी द्रावी मलकरी ध्वाङ्क्षी पर्पटिका च सा ।
अन्धकारी पाटनिका कञ्चुकाः सप्त कीर्तिताः ॥ १० ॥

सप्तकञ्चुकानां परिचयः

धातवो रससंश्लिष्टा यदा विष्णुपदामृतम् ।
गृह्णन्ति हि तदा तेषां कश्चिद् भागोऽवशीर्यते ॥ ११ ॥
ततश्चूर्णत्वमापन्ना रसमाच्छादयन्ति ते ।
तेनावरणसाम्येन धातवः सूतसंगताः ॥ १२ ॥
कञ्चुकाख्यां भजन्तीति प्राच्यपाश्चात्यसंमतिः ।
कैश्चिदेते कञ्चुकाख्या दोषा औपाधिकाः स्मृताः ॥ १३ ॥

पारदशोधनस्यावश्यकता

नैसर्गिकास्तु ये दोषा ये चान्ये कञ्चुकाह्वयाः ।
तेषान्तु परिहाराय सामान्यं शोधनं स्मृतम् ॥ १४ ॥
विशुद्धो रसराजस्तु सत्यं पीयूषसोदरः ।
सदोषस्तु रसो वैद्यैर्यमोऽयमपरः स्मृतः ॥ १५ ॥
तस्मात्सूतविशुद्ध्यर्थं युक्तः सुपरिचारकैः ।
सर्वामादाय सामग्रीं रसशुद्धिं समारभेत् ॥ १६ ॥

शोधनार्थे रसपरिमाणम्

पलानां शतकं ग्राह्यं तदर्धार्धमथापि वा ।

---

1. Impure mercury, when shaken with air yields a black powder, caused by the oxidation of the metallic impurities, and the film of the oxide incloses a small globule of the liquid metal.

(Chemistry by H. E. Roscoe and C. Schorlemmer F. R. S.)

पलानां दशकं वापि पञ्चकं वा पलोन्मितम् ॥ १७ ॥
पलान्न्यूनो न संग्राह्यः संस्कारार्थं रसो बुधैः ।
बहुप्रयाससाध्यत्वाल्लाभाभावाच्च निश्चितम् ॥ १८ ॥

अथ समयशोधनम्

सुदिने शुभनक्षत्रे स्वेष्टदेवञ्च शङ्करम् ।
भैरवञ्चापि सम्पूज्य रसकर्म समाचरेत् ॥ १९ ॥

अथ रसपूजनम्

अघोरेण च मन्त्रेण खल्वे संस्थापितं रसम् ।
गन्धधूपादिभिः प्राज्ञः पूजयेद्भिषजां वरः ॥ २० ॥

अथ रसस्य साधारणशोधनम्

आधिव्याधिविनाशार्थं प्रयोगार्थं रसेषु च ।
सामान्यं शोधनं शस्तं रसतन्त्रविशारदैः ॥ २१ ॥

प्रथमः शोधनप्रकारः

धूमेष्टिकाहट्टविलासिनीनां सोर्णैस्तु चूर्णैः परिमर्द्य सूतम् ।
प्रक्षालयेदम्लजलेन सम्यक् ततो रसो मुञ्चति नागदोषम् ॥२२॥
मृगेक्षणाङ्कोलनिशोत्थचूर्णैः सूतो जहातीह तु वंगदोषम् ।
चित्रोऽग्निदोषं विनिहन्ति शीघ्रं दोषं मलोत्थं खलु राजवृक्षः ॥२३॥
चापल्यहारी खलु कृष्णधूर्तो विषापहर्त्री त्रिफला प्रशस्ता ।
दोषं गिरेस्त्र्यूषणमाशु हन्यात् त्रिकण्टको वह्न्यसहत्वदोषम् ॥२४॥
चूर्णं कलांशप्रमितं तु सूतात् सकन्यकं भाषितभेषजानाम् ।
विमर्दयेत्खल्वगतं दिनैकं प्रक्षालयेच्चापि ततोऽम्लतोयैः ॥ २५ ॥
रीत्यानया शोधित ईशसंज्ञः सत्यं भवेत्कञ्चुकदोषहीनः ।
इत्थं विशुद्धं खलु सूतराजं नियोजयेद्वैद्यवरो रसेषु ॥ २६ ॥

द्वितीयः शोधनप्रकारः

रसेश्वरं समसुधारजसा मर्दयेत् त्र्यहम् ।
ततो द्विगुणवस्त्रान्तर्गालितं खल्वके न्यसेत् ॥ २७ ॥

रसोन निस्तुषं तुल्यं तदर्धं लवणं हरेत् ।
तत्कल्के मर्दयेत्सूतं यावदायाति कृष्णताम् ॥ २८ ॥
कृष्णं कल्कं परित्यज्य तथा प्रक्षाल्य युक्तितः ।
एवमेकेन वारेण रसेन्द्रः शुद्धिमाप्नुयात् ॥ २९ ॥
श्रीमद्गुरुमुखोद्गीतः कृतश्च बहुशो मया ।
सौकर्यार्थं प्रयोगेषु प्रकारोऽयम्प्रकाशितः ॥ ३० ॥

तृतीयः शोधनप्रकारः

कुमारिकाचित्रकरक्तसर्षपैः कृतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्दितो रसो दिनत्रयं सप्तमलैर्विमुच्यते ॥ ३१ ॥

चतुर्थः शोधनप्रकारः

गुडस्त्रिकटु यामिनी लवणपञ्चकं पावकः
फलत्रिकयवाग्रजौ खलु सुवर्चिकष्टङ्कणः ।
तथा कितवसर्षपौ खलु समैस्तु विंशांशकैः
विशुद्ध्यति विमर्दितो रसवरोऽश्वसंख्यैर्दिनैः ॥ ३२ ॥
श्रीमद्गुरुमुखोद्गीतः कृतश्च बहुशो मया ।
अनुभूतश्च योगेषु प्रकारोऽयं निरूपितः ॥ ३३ ॥

पञ्चमः शोधनप्रकारः

नागवल्लीदलरसैस्तथा चार्द्रकजै रसैः ।
क्षारत्रययुतैश्चापि रसराजं विमर्दयेत् ॥ ३४ ॥
ततस्तेभ्यः पृथक् कृत्वा सप्तदोषविवर्जितम् ।
मुक्ताफलसमाकारं रसराजं प्रयोजयेत् ॥ ३५ ॥

षष्ठः शोधनप्रकारः

विमर्द्य सुधया सप्तदिनं धूमनिशेष्टकैः ।
त्रिदिनं मर्दयेत्सूतं काञ्जिकैः क्षालयेत्ततः ॥ ३६ ॥
वस्त्रं चतुर्गुणं कृत्वा सूतं निःसारयेत्ततः ।

सप्तकञ्चुकनिर्मुक्तो जायते निर्मलो रसः ॥ ३७ ॥

इति रसस्य सामान्यशोधनम्

अथ हिङ्गुलोत्थितपारदस्य निर्माणप्रकारः

हिंगुलं पारिभद्रस्य रसैः सम्पेषयेद् बुधः ।
चाङ्गेर्या वा रसेनैव द्रवैर्जम्बीरजैस्तथा ॥ ३८ ॥
ऊर्ध्वपातनयन्त्रेण सप्तकञ्चुकवर्जितम् ।
गृह्णीयान्निर्मलं सूतं रसतन्त्रविशारदः ॥ ३९ ॥
षोडशांशं निशाचूर्णे ततस्तं पेषयेद् बुधः ।
लवणाम्लविनिक्षिप्तं स्थापयेद्वा दिनद्वयम् ॥ ४० ॥
वस्त्रं चतुर्गुणीकृत्य ततो निःसारयेद्रसम् ।
योगेषु योजयेद्वैद्यो रसराजं सुनिर्मलम् ॥ ४१ ॥
गुरुदाशतमागण यन्त्रमान प्रकल्पयत् ।
मानाभावाद्रसेन्द्रस्य लेखितुं नैव शक्यते ॥ ४२ ॥

अथ पारदस्य-अष्टौ संस्काराः

रसायनप्रयोगेषु रसागमविशारदः ।
रसराजं प्रयुञ्जीत कर्माष्टकविशोधितम् ॥ ४३ ॥
स्वेदनं मर्दनञ्चैव मूर्च्छनोत्थापने तथा ।
पातनत्रितयञ्चाथ बोधनं सुनियामनम् ॥ ४४ ॥
सुप्रदीपनमित्यष्टौ प्रोक्ताः सर्वोपयोगिनः ।
संस्कारा रसराजस्य रसशास्त्रविशारदैः ॥ ४५ ॥

स्वेदनलक्षणम्

दोलायन्त्रे स्थापयित्वा रसेन्द्रं क्षारैरम्लैरौषधैर्वा कषायैः ।
युक्त्या यत्स्यात्पाचनं स्वेदनं तत् प्राज्ञैरुक्तं दोषशैथिल्यकारि ।४६।

प्रथमः स्वेदनप्रकारः

पिप्पलीमरिचचित्रकार्द्रकैर्विश्वसैन्धवफलत्रिकान्वितैः ।
षोडशांशकमितैर्दिनत्रयं स्वेदयद्रसवरं सकाञ्जिकैः ॥ ४७ ॥

नूतनं कल्कमादाय नातितीक्ष्णेन वह्निना ।
प्रत्यहं स्वेदयेद्धीमान् रसतन्त्रविशेषवित् ॥ ४८ ॥

द्वितीयः स्वेदनप्रकारः

त्र्यूषणं मूलकासुर्यौ पटुकार्द्रकवह्नयः ।
तत्कल्कैः काञ्जिके सूतं स्वेदयेद्दिवसत्रयम् ॥ ४९ ॥

तृतीयः स्वेदनप्रकारः

पिप्पली मरिचविश्वभेषजे शृङ्गवेरलशुनार्द्रकाग्नयः ।
मेघनादलवणौ महाबला चुल्लिकालवणमाजशृङ्गिका ॥ ५० ॥
आसुरी खलु गवेधुका वरा प्रक्षिपेद्रसकलांशकं पृथक् ।
तत्समस्तमथ व्यस्तमेव वा काञ्जिकेन सह मर्दयेद् बुधः ॥ ५१ ॥
कल्कतामुपगतेन तेन वै वस्त्रमङ्गुलिमितं प्रलेपयेत् ।
निक्षिपेद्रसवरं तदन्तरे स्फीतकेन सुदृढं निरोधयेत् ॥ ५२ ॥

दोलिकायन्त्रके स्थापयेत्पोट्टलीं
नातितीक्ष्णानलं ज्वालयेत्संततम् ।
नूतनं काञ्जिकं प्रक्षिपेत्प्रत्यहं
स्वेदयेत्पारदं वासराणां त्रयम् ॥ ५३ ॥

मर्दनस्वरूपम

क्षाराद्यैरौषधैर्वा यत् खल्वे सूतस्य पेषणम् ।
तन्मर्दनं बुधैः प्रोक्तं बहिर्मलनिवृत्तये ॥ ५४ ॥

मर्दनस्य प्रथमःप्रकारः

सैन्धवं सदनधूमआसुरी यामिनी लशुनमार्द्रकं वरा ।
षोडशांशमिह निक्षिपेद्रसान्मर्दयेद्रसवरं दिनत्रयम् ॥ ५५ ॥

मर्दनस्य द्वितीयःप्रकारः

इष्टिकाचूर्णकं सैन्धवं यामिनी गेहधूमो गुडश्चासुरी नागरम् ।
षोडशांशं क्षिपेत्सर्वमेतद्रसान्मर्दयेत् पारदं वासराणां त्रयम् ॥५६॥

मूर्च्छनस्वरूपम्

गृहकन्यादिभिर्द्रव्यैर्नष्टपिष्टत्वसाधनम् ।
दोषत्रयनिवृत्त्यर्थं तन्मूर्च्छनमिहोच्यते ॥ ५७ ॥
स्वरूपत्यागसहितं पिष्टित्वकरणं हि यत् ।
रसज्ञैर्जितसूतोऽसौ नष्टपिष्ट उदाहृतः ॥ ५८ ॥

मूर्च्छनस्य प्रथमःप्रकारः

कुमारिका मलं हन्ति वरा दहननाशिनी ।
चित्रमूलं विषं हन्ति तस्मादेभिःप्रयत्नतः ॥ ५९ ॥
मर्दितं सूतकं द्रव्यैः सप्तवाराणि मूर्च्छयेत् ।
एवं सम्मूर्च्छितः सूतो दोषैः सर्वैः प्रमुच्यते ॥ ६० ॥

मूर्च्छनस्य द्वितीयःप्रकारः

यवाग्रजः स्वर्जिका च तथा लवणपञ्चकम् ।
अम्लौषधानि विबुधः प्रक्षिप्य सूतके दृढम् ॥ ६१ ॥
तावत्सुपेषयेद्यावन्नष्टपिष्टत्वमाप्नुयात् ।
इत्थं सम्मूर्च्छितः सूतो विमुञ्चति मलत्रयम् ॥ ६२ ॥

उत्थापनस्वरूपम्

स्वेदाद्यैर्यद्रसेन्द्रस्य मूर्च्छाव्यापत्तिनाशनम् ।
पुनः स्वरूपकरणं तदुत्थापनमीरितम् ॥ ६३ ॥

उत्थापनस्य प्रथमःप्रकारः

सौभाग्यलवणक्षौद्रैः पारदं पेषयेद् भृशम् ।
तद्गोलकं विधायाथ पोट्टल्यान्तु विनिक्षिपेत् ॥ ६४ ॥
क्षाराद्यैः स्वेदयेत्सम्यक् दोलायन्त्रे भिषग्वरः ।
एवं वारत्रयं कुर्यादुत्थितो जायते रसः ॥ ६५ ॥

द्वितीयःप्रकारः

अथवा काञ्जिकेनैव रसेन्द्रं स्वेदयेद् बुधः ।
अम्लैः प्रक्षालयेत्सम्यगुत्थितो रसराड् भवेत् ॥ ६६ ॥

तृतीयः प्रकारः

रसेन्द्रं काञ्जिकेनेह याममात्रं विमर्दयेत् ।
सलिलैः क्षालयेत्सम्यगुत्थितो जायते रसः ॥ ६७ ॥

चतुर्थः प्रकारः

जम्बीरमातुलुङ्गाद्यैः पेषयेदातपे रसम् ।
वसनात्सारयेत्सम्यगुत्थितो जायते रसः ॥ ६८ ॥

पातनात्रितयस्वरूपम्

उक्तौषधं रसवरस्य विमर्दितस्य
यन्त्राहितस्य यदिहोर्ध्वमधश्च तिर्यक् ।
निष्कासनं तदिह पातनसंज्ञमुक्तं
वंगाहिदोषयुगलं शमयत्यनल्पम् ॥ ६९ ॥

तत्र ऊर्ध्वपातनस्य प्रथमः प्रकारः

स्वर्जिका खलु यवाग्रजं तथा
रामठं लवणपञ्चकान्वितम् ।
अम्लवर्गगदितैस्तु भेषजैः
संयुतं रसवरं विमर्दयेत् ॥ ७० ॥
स्थापयेदिह सुयुक्तितो भिषक्
पारदं विहितकल्कसंयुतम् ।
ऊर्ध्वपातनकयन्त्रमार्गतः
पातयेदिह रसेश्वरं भिषक् ॥ ७१ ॥

द्वितीयः प्रकारः

तुत्थके विमलहेममाक्षिके
निक्षिपेत्खलु रसेन्द्रमुज्ज्वलम् ।
मर्दयेद् गृहकुमारिकारसै-
र्यावदेति खलु नष्टपिष्टताम् ॥ ७२ ॥
कारयेच्च तदन्तरं भिषक्

स्थालिकातलगतं रसेश्वरम्

ऊर्ध्वपातनकयन्त्रपातित-
मादद्दीत विमलं रसेश्वरम् ॥ ७३ ॥

तृतीयः प्रकारः

त्रयो भागा ग्राह्याः खलु रसवरस्येह विबुधैः
रवश्चका भागा विधिविहितशुद्धः कृतदलः ।
समं सर्वं मर्द्यं भृशमिह हि जम्बीरजरसैः
रसः पात्यो युक्त्या खलु डमरुयन्त्रे बुधवरैः ॥ ७४ ॥

अधःपातनस्य प्रथमः प्रकारः

बलिसम्वलितं रसेश्वरं सुचिरं वैद्यवरः सुपेषयेत् ।
विधिना च विधाय कज्जलीमथजम्बीररसैः सुमर्दयेत् ॥७५॥
शिखी च शिग्रुबीजकं तथासुरी च सैन्धवम् ।
तथा च मर्कटी बुधः समं समं विनिक्षिपेत् ॥ ७६ ॥
पिष्टेनानेन तु प्राज्ञो लेपयेदूर्ध्वभाजनम् ।
ऊर्ध्वपातनयन्त्रे च गृह्णीयान्निर्मलं रसम् ॥ ७७ ॥

द्वितीयः प्रकारः

हरीतकी विभीतकस्तथासुरी च सैन्धवम् ।
शिखी च शिग्रुजः समैः समैः सुपेषयेद्रसम् ॥ ७८ ॥
यदा स नष्टपिष्टतामियात्तदा भिषग्वरः ।
निरुक्तयन्त्रवर्त्मना रसं निपातयेदधः ॥ ७९ ॥

तिर्यक्पातनम्

उद्दिष्टैरौषधैः साकं रसराजं सुपेषयेत् ।
तिर्यक्पातनयन्त्रे च गृह्णीयान्निर्मलं रसम् ॥ ८० ॥

बोधनलक्षणम्

मर्दनादिकयोगेन जातक्लैब्यस्य शूलिनः ।
क्लैब्यापहं तु यत्कर्म कथ्यते बुधैः ॥ ८१ ॥

बोधनस्य प्रथमः प्रकारः

भूर्जपत्रे निधायाथ रसराजं निरोधयेत् ।
प्रक्षिप्य सैन्धवं तोये दोलायन्त्रे पचेद् बुधः ॥ ८२ ॥
एवं संस्वेदितः सूतः भृशमाप्यायितो भवेत् ।
जातवीर्यप्रकर्षो हि षण्ढतामिह मुञ्चति ॥ ८३ ॥

द्वितीयः प्रकारः

जलसैन्धवसूतपूरितां क्षितिगर्ते खलु काचकूपिकाम् ।
विनिधाय दिनत्रयं ततो गतषाण्ढ्यः सबलो रसो भवेत् ॥८४॥

तृतीयः प्रकारः

सैन्धवेनाम्लपिष्टेन रसेन्द्रं कूपिकागतम् ।
गर्ते निधाय चोर्ध्वन्तु देयो लघुपुटो बुधैः ॥ ८५ ॥
एवं सम्पुटितः शीघ्रं भृशमाप्यायते रसः ।
जातवीर्यप्रकर्षश्च षण्ढभावं विमुञ्चति ॥ ८६ ॥

नियामनस्य स्वरूपम्

बोधनाल्लब्धवीर्यस्य रसस्य स्वेदनं हि यत् ।
चापल्यविनिवृत्त्यर्थं तन्नियामनमीरितम् ॥ ८७ ॥

नियामनस्य प्रथमः प्रकारः

अम्लिकानागिनीभृङ्गवन्ध्याब्दकितवोद्भवैः ।
रसैः संस्वेदितः सूतो नियतं नियतो भवेत् ॥ ८८ ॥

द्वितीयः प्रकारः

रसोनभृङ्गराजाब्दचिञ्चिकानवसागरैः ।
भृशं संस्वेदितः सूतो नियतं नियतो भवेत् ॥ ८९ ॥

तृतीयः प्रकारः

नियामकगणोद्दिष्टैः समस्तव्यस्तभेषजैः ।
पूर्वदर्शितमार्गेण भिषक् कुर्यान्नियामनम् ॥ ९० ॥

रसस्य नियामको गणः

महाबला नागबला यमचिञ्चा पुनर्नवा ।
आखुपर्णी सहचरा वासिका काकमाचिका ॥ ९१ ॥
गोक्षुरः शरपुङ्खा च विष्णुक्रान्ता घनध्वनिः ।
मण्डूकपर्णी तुलसी बला च गिरिकर्णिका ॥ ९२ ॥
शतावरी शङ्खपुष्पी श्वेतार्कः कनकाह्वयः ।
चक्रमर्दः करञ्ज ब्रह्मदण्डी शिखण्डिनी ॥ ९३ ॥
गुडूची सैन्धवं पाठा मृगाक्षी सोमवल्लिका ।
नियामकगणो ह्येष प्रोक्तो रसविशारदैः ॥ ९४ ॥

अथ दीपनस्वरूपम्

दोलायन्त्रे स्थापयित्वा रसेन्द्रं क्षाराद्यैर्यत्पाचनं स्याद्यथायम् ।
ग्रासार्थी वा जारणे च प्रगल्भः शास्त्रज्ञैस्तद्दीपनं सम्प्रदिष्टम् ॥९५॥

अथ दीपनस्य प्रथमः प्रकारः

काशीशं मरिचं तथैव तुवरी शोभाञ्जनं काञ्जिकम् ।
सौभाग्यं पटुपञ्चकञ्च दहनो राजी समं मेलयेत् ।
निक्षिप्याथ दिनद्वयं बुधवरो दोलाख्ययन्त्रे पचेत्
ग्रासार्थी खलु जारणे च चतुरः संजायते पारदः ॥ ९६ ॥

अथ द्वितीयः प्रकारः

सौभाग्यं पटुपञ्चकञ्च मरिचं शोभाञ्जनं चासुरी
काशीशं यवजोऽनलश्च तुवरी शेफालिका सर्जिका ।
तुल्यांशैः सुविचूर्णितैर्गृहजले यन्त्रे तु दोलाह्वये
स्विन्नो यामयुगं ततो रसवरो ग्रासाभिलाषी भवेत् ॥ ९७ ॥

तृतीयः प्रकारः

स्वेदयेदासवाम्लेन सहितं याममात्रकम् ।
भिषग्वरः सूतराजं शीघ्रं वीर्यविवृद्धये ॥ ९८ ॥

चतुर्थः प्रकारः

अथवा दहनक्वाथैस्त्रिदिनं काञ्जिके पचेत् ।
एवं संस्वेदितः सूतो ग्रासार्थी जायते परम् ॥ ९९ ॥

जारणास्वरूपम्

सूते गन्धादिनिक्षेपात्तत्तद्विधिविशेषतः ।
गन्धाद्यं जार्यते यत्तु जारणं तदिहोच्यते ॥ १०० ॥

षड्गुणगन्धकजारणस्य प्रयोजनम्

वसुविधविधिसंस्कृतोऽपि सूतो रसविबुधैरिह हिङ्गुलोत्थितो वा ।
रसगुणबलिजारणाविहीनो गदगणवारणतां तु नैति नूनम् ॥१०१॥

षड्गुणबलिजारणस्य प्रथमः प्रकारः

निधाय वालुकायन्त्रे चषकं सुदृढं भिषक् ।
रसतुल्यं बलिं तस्मिन्निक्षिपेत् खलु शोधितम् ॥ १०२ ॥
बलिं तु विद्रुतं दृष्ट्वा रसेशं तत्र दापयेत् ।
अर्द्धजीर्णं बलिं ज्ञात्वा पुनर्गन्धं प्रदापयेत् ॥ १०३ ॥
आषड्गुणं क्षिपेदेवमल्पमल्पं समाहितः ।
स्वतःशीतं ततो ज्ञात्वा रसेशं तु समाहरेत् ॥ १०४ ॥

षड्गुणबलिजारणस्य द्वितीयः प्रकारः

कच्छपाख्येन यन्त्रेण रसतन्त्ररहस्यवित् ।
उक्तमार्गमनुसृत्य जारयेत् षड्गुणं बलिम् ॥ १०५ ॥

षड्गुणबलिजीर्णस्य रसराजस्य गुणाः

समे तु गन्धके जीर्णे सामान्यगदनाशनः ।
द्विगुणे तु विशेषेण महारोगविधूननः ॥ १०६ ॥
त्रिगुणे तु विशेषेणाक्षय्यपुंस्त्वप्रकाशनः ।
चतुर्गुणे महोत्साहमेधास्मृतिविवर्धनः ॥ १०७ ॥
तथा पञ्चगुणेऽशेषगदसन्तापनाशनः ।
रसेश्वरः षड्गुणे तु विविधाद्भुतकार्यकृत् ॥ १०८ ॥

इति पारदस्याष्टसंस्कारविज्ञानीयो नाम पञ्चमस्तरङ्गः ।

अथ मूर्च्छनाविज्ञानीयः षष्ठस्तरङ्गः

अथ मूर्च्छनायाः स्वरूपम्

तत्तद्विधिप्रभेदेन रसस्याव्यभिचारतः ।
व्याधिघातकता या स्यात् सा मता मूर्च्छना बुधैः ॥ १ ॥

मूर्च्छनाया द्वौ भेदौ

निर्गन्धा च सगन्धा च मूर्च्छना द्विविधा मता ।
निर्गन्धा गन्धरहिता सगन्धा गन्धसंयुता ॥ २ ॥
निर्गन्धा रसपुष्पादौ मूर्च्छना परिकीर्तिता ।
सगन्धा तु विशेषेण रससिन्दूरकादिषु ॥ ३ ॥

सगन्धाया (मूर्च्छनायाः) द्वौ भेदौ

सगन्धा मूर्च्छना ह्यत्र रसतन्त्रविचक्षणैः ।
अन्तर्धूमबहिर्धूमभेदेनापि द्विधा मता ॥ ४ ॥

अन्तर्धूममूर्च्छनायाः स्वरूपम

निरुध्यारम्भतः कूपीमुखं यद्गन्धजारणम् ।
मूर्च्छना सा भिषग्वर्यैरन्तर्धूमाभिधा मता ॥ ५ ॥
जीर्णगन्धे तु यत्कूपीवक्त्ररोधनपूर्वकम् ।
पाचनं मूर्च्छना सा तु बहिर्धूमाभिधा मता ॥ ६ ॥
सगन्धमूर्च्छितः सूतः सुचिरं परिशीलितः ।
न जातुचित् करोतीह विकारान् पारदोत्थितान् ॥ ७ ॥
निर्गन्धमूर्च्छितः सूतो गदसंक्षयकालतः ।
अनन्तरं शीलनेन विकाराञ्जनयेद्भृशम् ॥ ८ ॥

अथ मुग्धरसस्य निर्माणप्रकारः

[गीतिका]

युगतोलकप्रमाणं विमलीकृतं रसेशम् ।
द्विगुणां खटीञ्च शुद्धां निदधीत खल्वमध्ये ॥ ९ ॥

परिपेषयेत्तु तावद् विधिनैतदीयचूर्णम् ।
अवलोक्यते न यावत्खलु चन्द्रिकाविहीनम् ॥ १० ॥
हतचन्द्रिकं तु चूर्णं ह्यवबुध्य योजयेद्वै ।
विबुधैः स्मृतो रसोऽयं खलु मुग्धनामधेयः ॥ ११ ॥

मुग्धरसस्य गुणाः

उदरामयनुत् वमिहृन्नियतं सहजोत्थफिरङ्गकुरङ्गहरिः ।
शिशुरोगहरस्तु विशेषतया विबुधैरुदितः खलु मुग्धरसः ॥१२॥

मुग्धरसस्य मात्रानिरूपणम्

गुञ्जार्धतः समारभ्य सार्धगुञ्जद्वयोन्मिता ।
पूर्णमात्रा मता मुग्धरसस्य तरुणोचिता ॥ १३ ॥
गुञ्जाष्टमांशतश्चास्य गुञ्जापादांशसंमिता ।
पूर्णमात्रा मता विज्ञैर्वार्षिकस्यार्भकस्य तु ॥ १४ ॥

मुग्धरसस्य आमयिकप्रयोगः

गुञ्जैकसंमितो मुग्धरसस्तु सलिलान्वितः ।
मासमेकं द्वयं वापि यत्नतः परिशीलितः ॥ १५ ॥
गर्भिणीनां चिरोद्भूतां नवजातामथापि वा ।
फिरङ्गजनितां बाधां नाशयत्यविलम्बितम् ॥ १६ ॥
गुञ्जापादोन्मितो मुग्धरसो नीरेण शीलितः ।
शिशूनां विनिहन्त्याशु फिरङ्गं सहजोत्थितम् ॥ १७ ॥
रक्तिकाङ्घ्रिमितो मुग्धरसो वारा नियोजितः ।
विनिहन्त्याशु बालानामतीसारं सुनिश्चितम् ॥ १८ ॥
विज्ञाय रोगोपशमं प्राणाचार्यो भिषग्वरः ।
न योजयेन्मुग्धरसं रससिन्दूरवद् भृशम् ॥ १९ ॥

अथ रसपुष्पस्य नामानि

रसपुष्पं रससुमं कुसुमं रसपूर्वकम् ।
मतं निरुच्यते कैश्चित्सुधानिधिरसाख्यया ॥ २० ॥

अथ रसपुष्पस्य प्रथमो निर्माणप्रकारः

विशुद्धं रसराजन्तु पञ्चतोलकसंमितम् ।
तत्समं लवणञ्चैव काशीसं विमलं तथा ॥ २१ ॥
खल्वे सम्पेष्य यत्नेन श्लक्ष्णचूर्णञ्च कारयेत् ।
अथ चूर्णं समादाय हण्डिकायां विनिक्षिपेत् ॥ २२ ॥
मध्ये सच्छिद्रया काचलिप्तयाऽयतवक्त्रया ।
आच्छादयेद्धण्डिकया रसकर्मविशारदः ॥ २३ ॥
सन्धिन्तु वाससाच्छाद्य लेपयेत्स्वल्पया मृदा ।
न लेपयेदूर्ध्वपात्रं भानुतापेऽथ शोषयेत् ॥ २४ ॥
चुल्ल्यां निधाय विपचेदत्यल्पानलयोगतः ।
ऊर्ध्वपात्रस्थछिद्रेण बाष्पमुद्याति वेगतः ॥ २५ ॥
निर्याते जलबाष्पे तु विधिना परिपाकतः ।
खट्टीपिधानपिहितं छिद्रं खट्या प्रलेपयेत् ॥ २६ ॥
अतिमन्दानलेनैव यामद्वितयमादितः ।
विपाचयेत्प्रयत्नेन स्वाङ्गशीतमथोद्धरेत् ॥ २७ ॥
न्युब्जं कृत्वा समुत्तार्य सन्धिदेशं विलिख्य च ।
शशिप्रभं लम्बमानं रसपुष्पं समाहरेत् ॥ २८ ॥

रसपुष्पस्य द्वितीयो निर्माणप्रकारः

शुद्धं तोलकपञ्चकं रसवरं काशीसकं सैन्धवम् ।
दत्वा चैव समं समं सुमसृणे खल्वे ततः पेषयेत् ।
कूपीमध्यगतं पचेत्तु सिकतायन्त्रेऽथ यामद्वयं
नीहारप्रभमूर्ध्वभागनिचितं पुष्पं रसाद्यं हरेत् ॥ २९ ॥
जलीयबाष्पे निष्क्रान्ते पिधानेन पिधाय वै
कूपिकाकण्ठदेशस्थां वालुकामपसारयेत् ॥ ३० ॥
पुष्पवच्छोभते यस्मात्कूपीकण्ठप्रलम्बितम् ।

रसपुष्पमिदं तस्मात्प्राणाचार्यैर्निगद्यते ॥ ३१ ॥

रसपुष्पस्य तृतीयो निर्माणप्रकारः

पुष्पकासीसजं चूर्णं त्वतिमन्दाग्नियोगतः ।
किञ्चिद् भृष्टं नष्टनीरं पञ्चतोलकसंमितम् ॥ ३२ ॥
तन्मितामेव दहने पुष्पितां स्फटिकारिकाम् ।
रसेश्वरं सैन्धवं च पृथक्तुल्यं समाहरेत् ॥ ३३ ॥
खल्वे सम्पेष्य यत्नेन श्लक्ष्णचूर्णं तु कारयेत् ।
निश्चन्द्रिकं वीक्ष्य चूर्णं यन्त्रे डमरुकाह्वये ॥ ३४ ॥
अतिमन्दानलेनैव द्वियामं यत्नतः पचेत् ।
भिषग्वरो विधानज्ञः स्वाङ्गशीतमथोद्धरेत् ॥ ३५ ॥
भास्वद्विभं ततो युक्त्या शरदिन्दुमनोहरम् ।
पुष्पवल्लम्बमानं तु रसपुष्पं समाहरेत् ॥ ३६ ॥
रसतन्त्रमहाम्भोधिकर्णधारधुरन्धरैः ।
मित्रवंशावतंसैस्तु गुरुवर्यमहोदयैः ॥ ३७ ॥
श्रीमन्नरेन्द्रनाथाख्यैस्त्वयमाविष्कृतो विधिः ।
प्रकाशितः खलु मया लोकानुग्रहकाम्यया ॥ ३८ ॥

रसपुष्पस्य परीक्षणम्

महोज्ज्वले लोहपत्रे जलबिन्दुं तु विन्यसेत् ।
रसपुष्पं समादाय जलबिन्दौ विनिक्षिपेत् ॥ ३९ ॥
क्षणादूर्ध्वं जलं क्षिप्त्वा यदि कार्ष्ण्यं न लभ्यते ।
रसपुष्पं तदा शुद्धं जानीयाद्भिषजां वरः ॥ ४० ॥

रसपुष्पस्य गुणाः

रसपुष्पं पित्तहरं मूत्रलं व्रणदोषहृत् ।
परं विरेचनकरं तथा भूतविषापहम् ॥ ४१ ॥
स्वस्थीकरणमत्यन्तं जलीयांशविशोषणम् ।
पित्ताशयं तु विक्षोभ्य मलपित्तापसारकम् ॥ ४२ ॥

कृमीन् विषूचिकोद्भूतान् हिक्काश्चैव फिरङ्गकम् ।
जलोदरादिकान् रोगान् नाशयत्यविलम्बितम् ॥ ४३ ॥

रसपुष्पस्य मात्रानिरूपणम्

गुञ्जार्द्धतः समारभ्य सार्द्धगुञ्जद्वयोन्मिता ।
रसपुष्पस्य मात्रा स्यान्मात्राविन्मतसम्मता ॥ ४४ ॥
रेचनाय मता मात्रा सार्द्धगुञ्जद्वयोन्मिता ।
गुञ्जाष्टमांशप्रमिता मात्रा हिक्कामये हिता ॥ ४५ ॥
फिरङ्गरोगाय मता गुञ्जापादांशसंमिता ।
इयमेव मता मात्रा शिशूनां तु विरेचने ॥ ४६ ॥

रसपुष्पस्य आमयिकः प्रयोगः

रसपुष्पं सार्द्धगुञ्जद्वितयं स्वर्जिकान्वितम् ।
शीलितं रेचयत्येव कामं यामद्वयोत्तरम् ॥ ४७ ॥
शीलितं रसपुष्पन्तु वारिणा गुञ्जपादिकम् ।
विसूच्यास्तु समारम्भे विसूचीकृमिसङ्घनुत् ॥ ४८ ॥
रसागमपरिज्ञानविहीनो भिषगल्पधीः ।
निरन्तरं विशेषेण रसपुष्पं न योजयेत् ॥ ४९ ॥

चन्दनादिवटिका

रक्तचन्दनमथोषणं सिता कुंकुमं रससुमं लवङ्गकम् ।
तोलकैकमितमेव वै पृथक् त्वाददीत रसतन्त्रकोविदः ॥५०॥
रक्तिकैककमिता वटी कृता प्रत्यहं तु नवनीतयोजिता ।
चन्दनादिवटिकेयमुत्तमा हन्ति दुर्जयफिरङ्गजां व्यथाम्॥५१॥

अथ रसपुष्पमलहरः

रसपुष्पं चतुर्गुञ्जं मेलयेत्तोलकोन्मित ।
क्षालिते नवनीते तु शतधा विमलाम्भसा ॥ ५२ ॥
मतो मलहरोऽयन्तु रसपुष्पसमाह्वयः ।
लिप्तोऽयं नाशयत्याशु फिरङ्गव्रणजां रुजम् ॥ ५३ ॥

रसपुष्पाद्यमलहरः

रसपुष्पं चतुर्गुञ्जं सिक्थतैलञ्च तोलकम् ।
खल्वेऽतिमसृणे क्षुद्रे दत्त्वा यत्नेन मर्दयेत् ॥ ५४ ॥
ततो विशालवक्त्रायां काचकुप्यां तु विन्यसेत् ।
गदितोऽयं मलहरो रसपुष्पाद्यसंज्ञकः ॥ ५५ ॥

अस्य गुणाः

प्रलिप्तोऽयं मलहरः प्रत्यहं स्वल्पमात्रया ।
नाशयत्यचिरादेव फिरङ्गव्रणमुल्वणम् ॥ ५६ ॥
तथा पायुप्रदेशोत्थां त्वथवोपस्थदेशजाम् ।
विचर्चिकां चिरोद्भूतां नाशयत्येष निश्चितम् ॥ ५७ ॥
सिंहादिकानां हन्त्याशु तथा तत्कालसंभवम् ।
षाण्मासिकं वार्षिकं वा नखदन्तोद्भवं क्षतम् ॥ ५८ ॥

प्रसङ्गात्सिक्थतैलस्य प्रथमो निर्माणप्रकारः

भागैकं विमलं सिक्थं तैलन्तु रसभागिकम् ।
आदाय वङ्गलिप्तायां स्थालिकायां निधापयेत् ॥ ५९ ॥
पचेत्तावन्मन्दवह्नौ यावत्सिक्थं द्रवीभवेत् ।
स्थालिकामथ यत्नेन धरिण्यामवतारयेत् ॥ ६० ॥
तावत्प्रचालयेद्दर्व्या यावदेति प्रगाढताम् ।
सिक्थतैलसमायोगात्सिक्थतैलमिदं स्मृतम् ॥ ६१ ॥

द्वितीयो निर्माणप्रकारः

भागैकं विमलं सिक्थं तैलन्तु शरभागिकम् ।
पूर्वोद्दिष्टविधानेन पचेद्रसविशारदः ॥ ६२ ॥
जायते नवनीताभं यामं दर्व्या प्रचालितम् ।
रसज्ञैः कीर्तितमिदं सिक्थतैलं द्वितीयकम् ॥ ६३ ॥

अनयोः प्रयोगः

आद्यं तु शीतसमये ग्रीष्मर्तौ तु द्वितीयकम् ।

सिक्थतैलं मलहरप्रयोगेषु नियोजयेत् ॥ ६४ ॥

अथ रसकर्पूरस्य निर्माणप्रकारः

[गीतिका]

पलसंमितं प्रयत्नाद् विमलीकृतं रसेशम् ।
सपलार्द्धकं पलैकं विमलञ्च गन्धकाम्लम् ॥ ६५ ॥
चषकोपमे विशुद्धे निदधीत काचपात्रे ।
विनिधाय काचपात्रं त्वयसस्त्रिपादिकायाम् ॥ ६६ ॥
ज्वलिते सुराप्रदीपे संशोषयेज्जलांशम् ।
अथ शोषिते तु चूर्णे त्ववतार्य वै प्रदीपात् ॥ ६७ ॥
समभागिकं तु दद्याल्लवणं तु सैन्धवाख्यम् ।
परिमेल्य चूर्णमेतन्निदधीत काचकुप्याम् ॥ ६८ ॥
युगसङ्ख्यकैस्तु यामैः सिकताख्ययन्त्रसंस्थम् ।
विपचेदतिप्रयत्नात् रसतन्त्रकर्मविज्ञः ॥ ६९ ॥
अवबुध्य काचकूपीं स्वत एव शीतलाङ्गीम् ।
घनसारनामधेयं रसमाहरेद्रसज्ञः ॥ ७० ॥

अत्र रहस्यम्

जलीयबाष्पे निर्याते पिधानेन पिधापयेत् ।
कूपीकण्ठस्थितां स्वल्पां सिकताञ्चापसारयेत् ॥ ७१ ॥

रसकर्पूरस्य गुणाः

रसकर्पूरकः ख्यातो बहुभूतविषापहः ।
त्वग्रक्तदोषशमनो ग्राही रुचिविवर्द्धनः ॥ ७२ ॥
अतीसारप्रशमनो विशेषात्कृमिनाशनः ।
प्रवाहिकाहरः कामं मात्राधिक्ये विषक्रियः ॥ ७३ ॥

अपि च

स्फोटं कण्डूमपि च चिरजां मण्डलादींश्च कुष्ठान्
सर्वोत्थं वा सहजमपि वा स्पर्शजं वा

शीघ्रं नानाव्रणगणभवां हन्ति पीडां महोग्रां
कर्पूराख्यो जठरदहनोद्दीपनोऽयं रसेशः ॥ ७४ ॥
शीतले षोडशगुणे सलिले विनिपातितः ।
सर्वथा द्रवतां याति रसः कर्पूरकाभिधः ॥ ७५ ॥

रसकर्पूरस्य मात्रानिरूपणम्

आरभ्य रक्तिकायास्तु चतुःषष्ट्यंशतो भिषक् ।
द्वात्रिंशद्भागपर्यन्तं मात्रामस्य प्रयोजयेत् ॥ ७६ ॥

रसकर्पूरस्य आभ्यन्तरप्रयोगार्थं मात्रानिर्माणप्रकारः

चूलिकालवणं शुद्धं गुञ्जापञ्चकसंमितम् ।
समञ्च रसकर्पूरं षष्टितोलकसंमिते ॥ ७७ ॥
जले विनिक्षिपेत्प्राज्ञो मात्रामस्य प्रकल्पयेत् ।
बिन्दुत्रिंशकतश्चादौ षष्टिबिन्दुमितां पराम् ॥ ७८ ॥

अस्य आभ्यन्तरप्रयोगार्थं चूर्णरूपेण मात्रानिर्माणप्रकारः

श्लक्ष्णं दारुसिताचूर्णं पञ्चमाषकसंमितम् ।
गुञ्जकं रसकर्पूरं क्षिपेन्निम्बाम्लमर्दितम् ॥ ७९ ॥
रक्तिकैकमितं चूर्णं मात्रायां विनियोजयेत् ।
रक्तित्रयमिता पूर्णमात्रास्य परिकीर्तिता ॥ ८० ॥

रसकर्पूरस्य आमयिकः प्रयोगः

रसः कर्पूरसंज्ञोऽयं मात्रया परिशीलितः ।
प्राभातिकीं भुक्तमात्रोत्थिताञ्चातिसृतिं हरेत् ॥ ८१ ॥
कर्पूराख्यो रसो युक्तः मदाहं चिरकालजम् ।
द्रवपीतमलोपेतमतीसारं विनाशयेत् ॥ ८२ ॥
शीलितो रसकर्पूरो मात्रया सुचिरोत्थिताम् ।
सरक्तां सकफाञ्चैव विनिहन्ति प्रवाहिकाम् ॥ ८३ ॥

रसकर्पूरगुटिका

कुङ्कुमं मरिचं रक्तचन्दनं च लवङ्गकम् ।
जातिपत्री पृथक् सर्वं माषकप्रमितं हरेत् ॥ ८४ ॥
विशुद्धं रसकर्पूरं रक्तिकैकमितं क्षिपेत् ।
संमर्द्य निम्बुनीरेण कुर्याद् गुञ्जोन्मितां वटीम् ॥ ८५ ॥
रसकर्पूरगुटिका नामतः परिकीर्तिता ।
शीलिता नवनीतेन फिरङ्गं हन्त्यसंशयम् ॥ ८६ ॥

बाह्यप्रयोगार्थं भूतघ्नचक्रिका

रसं कर्पूरनामानं गुणपर्वतभागिकम् ।
निम्बूकाम्लञ्च विशदं वसुपावकसंमितम् ॥ ८७ ॥
समादाय विधानज्ञो मेलयेदतियत्नतः ।
चक्रिकाः कारयेद्वैद्यो गुञ्जषट्कमिताः पृथक् ॥ ८८ ॥
रसज्ञैस्तु समाख्याता नाम्ना भूतघ्नचक्रिका ।
न जातु विकृतिं याति भूतसङ्घविषापहा ॥ ८९ ॥

प्रसङ्गान्निम्बूकाम्लस्य निर्माणप्रकारः

निम्बूकलुङ्गकादीनां निर्मलं रसमाहरेत् ।
काचलिप्ते तु मृत्पात्रे हसन्त्यां क्वाथयेद्भिषक् ॥ ९० ॥
क्वथितञ्च समालोक्य मृत्पात्रमवतारयेत् ।
कठिनीचूर्णकं दद्याद् यावद्बाष्पोद्गमो भवेत् ॥ ९१ ॥
अनन्तरं गन्धकाम्लं क्षिपेत्तावच्छनैः शनैः ।
चूर्णं कुन्देन्दुसङ्काशं यावद्याति तलस्थताम् ॥ ९२ ॥
तलस्थं तं सुविज्ञाय सारयेत्पृथुवाससा ।
अवशिष्टञ्च वसने पदार्थं सन्त्यजेद् बुधः ॥ ९३ ॥
पानीयं सारितं काचपात्रे संस्थाप्य शोषयेत् ।
जायते शशिसङ्काशं चूर्णं पात्रतलस्थितम् ॥ ९४ ॥

अयमेव भिषग्वर्यैर्निम्बूकाम्ल इति स्मृतः ।
स्वजातिप्रभवास्त्वस्य गुणाः सर्वे भवन्ति हि ॥ ९५ ॥

रसकर्पूरद्रवस्य निर्माणप्रकारः

भूतघ्नचक्रिकामेकां षष्टितोलकसंमिते ।
जले क्षिपेत् विद्रुतायां द्रवं तु विनियोजयेत् ॥ ९६ ॥
रसकर्पूरमानात्तु द्विसहस्रगुणाम्भसा ।
द्रवोऽयमेवं निर्दिष्टो यथायोगं प्रयोजयेत् ॥ ९७ ॥

प्रकारान्तरेण रसकर्पूरद्रवस्य निर्माणप्रकारः

द्वात्रिंशद्गुञ्जकमितं रसं कर्पूरसंज्ञकम् ।
सार्द्धद्वितोलकमिते सारे कोहलपूर्वके ॥ ९८ ॥
द्रावयेद्रसतन्त्रज्ञः कुप्यामथ निधापयेत् ।
द्रवस्यास्य समादाय त्वष्टमांशमितं द्रवम् ॥ ९९ ॥
मेलयेत्सलिले शुद्धे षष्टितोलकसंमिते ।
द्रवोऽयमपि संवृत्तो द्विसहस्रगुणाम्भसा ॥ १०० ॥

रसकर्पूरद्रवस्य गुणाः

फिरङ्गस्फोटविषहृत् सपूयव्रणशोधनः ।
हस्तपादस्मरागारगेहादिगतभूतनुत् ॥ १०१ ॥
संक्रामकगदोत्थानभूतघ्नस्तु विशेषतः ।
रसज्ञैस्तु समाख्यातो रसकर्पूरजो द्रवः ॥ १०२ ॥

रसकर्पूरद्रवस्य प्रयोगः

फिरङ्गजानां स्फोटानां व्रणानां विविधात्मनाम् ।
क्षालनार्थं विशेषेण सहस्रगुणिताम्भसा ॥ १०३ ॥
व्रणेषु तु चिरोत्थेषु दिक्सहस्रगुणाम्भसा ।
कृतं द्रवं प्रयुञ्जीत शल्यतन्त्ररहस्यवित् ॥ १०४ ॥
हस्तपादादिकाङ्गानां गेहादीनाञ्च धावने ।
कृतं द्रवं प्रयुञ्जीत सहस्रगुणिताम्भसा ॥ १०५ ॥

योन्यादिकोमलाङ्गानां क्षालनार्थं प्रयोजयेत् ।
सहस्रपञ्चकगुणनीरनिष्पादितं द्रवम् ॥ १०६ ॥

अथ कज्जलिकायाः स्वरूपम्

अर्द्धसमानद्विगुणमिताद्या गन्धकचूर्णात् पारदकस्य ।
मर्दनजन्या मसृणकाया कज्जलरूपा कज्जलिका सा ॥ १०७ ॥

कज्जलिकायाः प्रयोगेषु विधानम

योगेषु यत्र निर्दिष्टौ समौ गन्धकपारदौ ।
तन्मानां कज्जलीं तत्र योजयेद्भिषजां वरः ॥ १०८ ॥
उक्ते पारदमात्रे तु प्रयोगेषु सुनिश्चितम् ।
योजयेद्रससिन्दूरं रसतन्त्रविशारदः ॥ १०९ ॥
गन्धः स्यादधिकः सूतात् यावान् योगेषु मानतः ।
गन्धं तावन्तमेवेह विधानज्ञो विनिक्षिपेत् ॥ ११० ॥
रसोऽधिको भवेद्यत्र गन्धकस्य प्रमाणतः ।
आदावेव विदध्यात्तु तन्मानात्तत्र कज्जलीम् ॥ १११ ॥

कज्जलिकाया गुणाः

सहपानानुपानानां वैशिष्ट्यादिह कज्जली ।
सर्वामयहरा वृष्या मता दोषत्रयापहा ॥ ११२ ॥

तस्या आमयिक प्रयोगः

कज्जली समसुगन्धनिर्मिता द्राविडीमरिचचन्द्रतोयदैः ।
देवपुष्पवदरास्थिसंयुतैश्चूर्णितैश्च मधुना वमिं हरेत् ॥११३॥
कज्जली द्विगुणगन्धनिर्मिता चन्द्रबालकमरीचशैलजैः ।
चूर्णितैस्तु ससितैश्च भक्षिता दारुणामपि तृषां वमिं हरेत् ॥११४॥
२. वरुणादिकषायेण कज्जली परिशीलिता ।
बाह्यान्तर्विद्रधिं घोरां विनिवारयति द्रुतम् ॥ ११५ ॥
द्विभागगन्धककृता कज्जली खलु भक्षिता ।

कारवेल्लीदलरसैर्वीसर्पं दारुणं हरेत् ॥ ११६ ॥

3. द्विगुणितबलियोगा कज्जली श्लक्ष्णचूर्णा
सततमिह हि लीढा शिग्रुजत्वग्रसेन ।
मधुजमधुसमेता विद्रधिं हन्ति बाह्यां
त्वपनयति तथान्तर्विद्रधिश्चातिघोराम् ॥ ११७ ॥

4 कज्जली द्विगुणगन्धनिर्मिता यष्टिकावृषकणाभयाक्षकैः ।
बर्बरीस्वरसभाविता भृशं श्वासकासतमकामयापहा ॥ ११८ ॥

समानगन्धनिर्मिता सनिम्बुकाम्लनागरा ।
कणान्विता तु कज्जली हरेदजीर्णमुद्धतम् ॥ ११९ ॥

5 एलाहिफेनकर्पूरजातीफललवङ्गकैः ।
समैः सुचूर्णिता ख्याता कज्जली स्वप्नमेहनुत् ॥ १२० ॥

शिंशपासारतैलेन नवनीतेन वानिशम् ।
लिप्ता कज्जलिका शीघ्रं जीर्णं चर्मदलं हरेत् ॥ १२१ ॥

द्विभागधूर्तपत्राढ्या कज्जली मन्थजान्विता ।
चित्रकद्रवसंपिष्टा कण्डूपामादिकं हरेत् ॥ १२२ ॥

कज्जली सैन्धवोपेता रविदुग्धेन पेषिता ।
गण्डेषु लेपनादेव नाशयेद् गण्डमालिकाम् ॥ १२३ ॥

वराकौशिकचूर्णेन समुपेता तु कज्जली ।
वातारितैलसंयुक्ता सर्वामयविनाशिनी ॥ १२४ ॥

6 कज्जली द्विगुणगन्धनिर्मिता गव्यमन्थजयुता निषेविता ।
नाशयेत्तु ह्युपदंशमुद्धतं पथ्यमत्र लवणोज्झितं मतम् ॥ १२५ ॥

समगन्धकयोगेन कृता कज्जलिका खलु ।

---

(१) मधुश्चैत्राख्यो मासस्तज्जातेन मधुना क्षौद्रेण समेतेत्यर्थः । अथवा मधुर्वसन्तः, तत्र जातेन (निष्कासितेन इति यावत्) वासन्तिकेन मधुना समेता इति योज्यम् ।

लेपनान्नवनीतेन गजचर्महरा मता ॥ १२६ ॥
कज्जली सितयोपेता धात्रीम्बरससंयुता ।
शीलिता नाशयत्याशु सर्वानेव मदात्ययान् ॥ १२७ ॥
धत्तूरबीजम्बरसपेषिता खलु कज्जली ।
सव्योषा नस्ययोगेन सन्निपातं निपातयेत् ॥ १२८ ॥

अथ कज्जलिकोदयमलहरः

वस्वाब्धितोलकमिदं सिक्थतलं तु निर्मलम् ।
श्लक्ष्णपिष्टा कज्जलिका तोलकद्वयसंमिता ॥ १२९ ॥
शुद्धं मृद्दारशृङ्गं तु युगतोलकसंमितम् ।
कम्पिल्लकञ्च विमलं वसुतोलकसंमितम् ॥ १३० ॥
माषत्रयोन्मितं चैव तुत्थकं निर्मलीकृतम् ।
आदाय खल्वे विन्यस्य पेषयेदतियत्नतः ॥ १३१ ॥
ततो विशालवक्त्रायां काचकुप्यां तु विन्यसेत् ।
मतो मलहरोऽयं तु नाम्ना कज्जलिकोदयः ॥ १३२ ॥
शोधनो रोपणश्चायं व्रणानां तु विशेषतः ।
नाडीव्रणहरश्चापि विविधव्रणनाशनः ॥ १३३ ॥
व्रणा ये न प्रशाम्यन्ति भेषजानां शतैरपि ।
अचिरादेव शाम्यन्ति भृशमस्य प्रयोगतः ॥ १३४ ॥

अथ रसपर्पटिकाया निर्माणप्रकारः

सूतं हिङ्गुलसम्भवं हृतमलं मोटोरुवृकार्द्रकैः
दैत्येन्द्रं कचरञ्जनोद्भवजलैः प्राक् सप्तधा भावितम् ।
अग्नौ कोलककोकिलोज्ज्वलशिखे सम्यग्विलाप्य द्रुतं
भृङ्गोत्थे सलिले निषिच्य विमलं तुल्यं ततः पेषयेत् ॥१३५॥
युक्त्या कज्जलिकां विधाय विबुधस्तां लोहदर्व्यां क्षिपेत्

१-मोटः-जयन्ती—मोटा जयन्त्यां चुक्रे च तथा ह्रस्वबलाक्षुपे । इति कोषः ।

निर्दिष्टैः खलु कोकिलैश्च दहनं प्रज्वाल्य दर्वीं न्यसेत् ।
सूतं पङ्कसमं विलाप्य रुचिरं पाकक्रियाकोविदः
शीघ्रं गोमयसंस्थिते तु कदलीपत्रे ततो निक्षिपेत् ॥ १३६ ॥
निक्षिप्तमात्रं कदलीपलाशैराच्छादयेद्वै सुचिरं रसज्ञः ।
यस्मादियं पर्पटतुल्यरूपा तस्मान्मता पर्पटिकाभिधेया ॥ १३७ ॥

पर्पटिकापाकस्य त्रैविध्यम्

मृदुर्मध्यः खरश्चेति पाकोऽत्र त्रिविधः स्मृतः ।
आद्यौ प्रयोजयेद्वैद्यः खरन्तु विषवत्त्यजेत् ॥ १३८ ॥

त्रिविधपाकानां स्वरूपाणि

मृदुपाके न भङ्गः स्यात्तत्सारल्यञ्च मध्यमे ।
द्वयोः सचन्द्रिकं कार्ष्ण्यं खरे चूर्णञ्च लोहितम् ॥ १३९ ॥

पर्पटिकाया गुणाः

ग्रहणीगजमर्दनदक्षतरा क्षयकासजलोदरगुल्महरा ।
अतिसारमतिभ्रमदाहहरा ज्वरशोथहरा रसपर्पटिका ॥१४०॥
अर्शोरोगं हरति सुतरां कामलां शूलकोपं
पाण्डुव्याधिं श्वयथुमहितं भस्मकञ्चातिभीष्मम् ।
कुष्ठान्यष्टादश भृशमथोत्सेधकं सर्वरूपं
प्लीहानञ्च प्रविततरुजं त्वामवातानशेषान् ॥ १४१ ॥
अम्लपित्तशमनी हरणीया वृद्धदोषदमनी रमणीया ।
कामशुक्रजननी मदनीया पर्पटी क्व न भवेत्कमनीया ॥ १४२ ॥

पर्पटीमात्रा

गुञ्जाद्वितयमेवादौ मात्रामस्य प्रकल्पयेत् ।
क्रमवृद्ध्या च वितरेद् गुञ्जादशकमन्ततः ॥ १४३ ॥

रसपर्पटिकाया आमयिकः प्रयोगः

नाकुलीबीजरजसा गुञ्जाष्टकमिताशिता ।
रसपर्पटिका साज्यमुन्मादमिह नाशयेत् ॥ १४४ ॥

ब्राह्मीरससमायुक्ता गुञ्जाष्टकमिताशिता ।
रसपर्पटिका काममपस्मारं निवारयेत् ॥ १४५ ॥
रामठेनार्धगुञ्जेन सगुञ्जाष्टकजीरका ।
रसपर्पटिका भुक्ता ग्रहणीं हन्ति दारुणाम् ॥ १४६ ॥
व्योपनिम्बुदलोपेता भक्षिता रसपर्पटी ।
सप्ताहद्वितयेनैव त्वपस्मारं विनाशयेत् ॥ १४७ ॥
वर्धमानकबीजोत्थतैलेन परिशीलिता ।
शूलं, गुग्गुलुना पाण्डुशोफं हन्यात्तु पर्पटी ॥ १४८ ॥
धूर्तबीजसमायुक्ता रसपर्पटिकाशिता ।
गुञ्जापञ्चकमात्रन्तु हन्त्युन्मादं विशेषतः ॥ १४९ ॥
गोमूत्रेण समायुक्ता रसपर्पटिकाशिता ।
मासमात्रप्रयोगेण नाशयेद्गुदजामयम् ॥ १५० ॥
निम्बपञ्चकभल्लातबाकुचीभृङ्गसंयुता ।
निहन्ति सर्वकुष्ठानि रसपर्पटिकाशिता ॥ १५१ ॥
दशमूलकषायेण शीलिता रसपर्पटी ।
विनाशयेद्विशेषेण दारुणं वातिकं ज्वरम् ॥ १५२ ॥
त्र्यूषणक्षोदसंयुक्ता रसपर्पटिकाशिता ।
विनिहन्त्याचिरादेव कासं खलु कफोत्थितम् ॥ १५३ ॥

पर्पटिकाभक्षणसमनन्तरं जलपाननिषेधः

रसबलिपर्पटिकाया भक्षणसमकालमेव दोषज्ञैः ।
नादेयं वा कौपं पानीयं नैव पानीयम् ॥ १५४ ॥

पर्पटिकायाः पथ्यानि

काकाह्वा च पटोलकं सुविशदं पूगीफलञ्चार्द्रकं,
वास्तूकं कदलीप्रसूनममलं कृष्णञ्च वातिङ्गनम् ।
सूक्ष्माश्चाथ पुरातनाः कृमिगणैर्हीनास्तथा शालयः,

पानं गोपयसः सशर्करमलं पथ्यं बुधैः कीर्तितम् ॥ १५५ ॥

प्रकारान्तरेण पथ्यानि

पुराणाः शालयः शाके वृन्ताकं वा पटोलकम् ।
गवां दुग्धन्तु सततं पथ्यमेतच्चतुष्टयम् ॥ १५६ ॥
प्रथमायामवस्थायां दुग्धं सात्म्यं न चेद्भवेत् ।
अतीसारप्रवृत्तिः स्यात्तदा तन्नैव योजयेत् ॥ १५७ ॥
लावातित्तिरिकादीनां रसं तत्र नियोजयेत् ।
अतीसारनिरोधे तु दुग्धमेव प्रदापयेत् ॥ १५८ ॥
शोथे विशेषतो हेयं पानीयं लवणन्तथा ।
तृषायां वितरेदल्पं नारिकेलोदकं भिषक् ॥ १५९ ॥
उष्णप्रधानदेशे तु रोगिमङ्गलकाम्यया ।
सशोथेऽपि भिषङ् नीरं जातु नैव विवर्जयेत् ॥ १६० ॥

रसपर्पटिकाया अपथ्यानि

नाम्लं स्नानं शिशिरसलिलैर्नापि वातादिसेवां
कोपं चिन्तामहितमतुलं नैव सेवेत चोष्णम् ।
तिक्तं निम्बादिकमिह गुडानूपमांसादिकञ्च
स्त्रीणां सम्भाषणमपि बुधैर्नैव कार्यं कदाचित् ॥ १६१ ॥

अथ रससिन्दूरस्य निर्माणप्रकारः

तोलकाष्टकमितं रसेश्वरं तन्मितञ्च विमलं बलिं हरेत् ।
खल्वके खलु विमर्द्य कज्जलीं भावयेदथ वटाङ्कुराम्बुभिः ॥१६२॥
मषीपात्रसमाकारां सुकृष्णां काचकूपिकाम् ।
सतूलकुट्टितमृदा लेपयेत् खलु यत्नतः ॥ १६३ ॥
स्थापयेत्कज्जलीं काचकुप्यां ततो यत्नतः पाचयेद्वालुकायन्त्रगाम् ।
अग्निवृद्धिक्रमैर्जीर्णगन्धे रसे रोधयेद्युक्तितः काचकूपीमुखम् ।१६४।
वालुकायन्त्रके काचकूपीमुखात् रोचनासन्निभो नैति धूमो यदा ।

सूतपाकक्रियाज्ञानदक्षैर्बुधैर्वेदितव्यस्तदा जीर्णगन्धो रसः ।१६५।
निवेश्य कुप्यां खटिकापिधानं, जलेन सम्पोषितया प्रकामम् ।
प्रलेपयेद्वै गुडचूर्णपिष्ट्या, ततः पचेद्यामयुगं रसज्ञः ॥ १६६ ॥
अवबुध्य तदङ्गशीततां खलु बालारुणसूर्यसन्निभम् ।
गलदेशविलग्नमुज्ज्वलं रससिन्दूरमिहाहरेद्बुधः ॥ १६७ ॥

रससिन्दूरस्य निर्माण प्रकारः

(गीतिका)

वसुतोलकप्रमाणं विमलीकृतं रसेशम् ।
विनिधाय खल्वमध्ये रससंमितञ्च गन्धम् ॥ १६८ ॥
दिवसद्वयं प्रयत्नादिह पेषयेद्विधिज्ञः ।
नवनीलनीरदाभां खलु कज्जलीं विदध्यात् ॥ १६९ ॥
अथ भावयेद्विधानात्तु वटाङ्कुरग्रन्थवारा ।
लघुशाल्मलीशिफोत्थैः सलिलैस्तु वा त्रिवारम् ॥ १७० ॥
मसिधानकोपमाङ्गीं मलिनां तु काचकूपीम् ।
जलतूलमृत्तिकाभिः परिलेपयेन्निकामम ॥ १७१ ॥
विनिधाय तां तु कूप्यामथ वालुकाख्ययन्त्रे ।
क्रमवृद्धवह्नियोगाद्विपचेद्रसं रसज्ञः ॥ १७२ ॥
मृदुवह्निना च पूर्वं विबुधो द्वियाममात्रम ।
विधिना विधानविज्ञः खलु जारयेत्तु गन्धम् ॥ १७३ ॥
अवलोक्य जीर्णगन्धं रसपाकावेद्रसेशम् ।
पिदधीत काचकूपीवदनं पिधानकेन ॥ १७४ ॥
गुडचूर्णवारिपिष्ट्या सुविधाय वक्त्ररोधम् ।
अथ तीव्रवह्नियोगाद्विपचेद् द्वियाममात्रम् ॥ १७५ ॥
स्वत एव शीतलाङ्गीं तु विभिद्य काचकूपीम् ।
अरुणोत्पलप्रकाशं रसमाहरेद्रसज्ञः ॥ १७६ ॥

अथ अर्द्धगन्धकजीर्णे रससिन्दूरम्

तोलकाष्टकमितो रसेश्वरः कर्षकद्वयमितश्च गन्धकः ।
नव्यसार इह कर्षसंमितः पेषयेदथ च लुङ्गवारिभिः ॥१७७॥
कूपिकागतमथ प्रबुद्धधीः सम्पचेत् सिकतयन्त्रके भिषक् ।
शास्त्रवित्खलु विभिद्य कूपिकां हिङ्गुलाभमिह सूतमाहरेत्।१७८।

अथ समानगन्धकजीर्णे रससिन्दूरम्

पामारिं खलु निर्मलं पलमितं तत्तुल्यमानं रसं
तत्पादप्रमितं नृसारममलं दत्वाऽथ सम्पेषयेत् ।
कूपीमध्यगतं विधाय सिकतायन्त्रे पचेद्युक्तितः
राजीवोपममूर्ध्वभागगरसं कूपीं विभिद्याहरेत् ॥ १७९ ॥

अथ द्विगुणगन्धकजीर्णे रससिन्दूरम्

पामारिं विमलं पलद्वयमितं सूतं पलैकोन्मितम्
सम्मर्द्याथ विभावयेद्धि कुसुमैः रक्ताभकार्पासजैः ।
कूपीमध्यगतं पचेच्च सिकतायन्त्रे त्वहोरात्रकम्
राजीवोपममूर्ध्वभागनिचितं सिन्दूरकञ्चाहरेत् ॥ १८० ॥

अथ त्रिगुणादिगन्धकजीर्णस्य रससिन्दूरस्य विधानम

अनेनैव विधानेन गन्धकं वर्द्धयन् क्रमात् ।
रसकर्मविशेषज्ञो रससिन्दूरमुद्धरेत् ॥ १८१ ॥
जीर्णगन्धे रसे जाते क्रमागतदिनक्रमैः ।
यामद्वयं ततः प्राज्ञै रसपाको विधीयते ॥ १८२ ॥

अथ षड्गुणगन्धकजीर्णे रससिन्दूरम्

पामारिर्विमलोऽङ्गसङ्ख्यकपलः सूतस्य चैकं पलं
सम्पेष्याथ विभावयेद्बुधवरो यामं कुमारीरसैः ।
कूपीमध्यगतं विधाय सिकतायन्त्रे ततः सम्पचेत्
गाढं वासरसप्तकञ्च विधिना सिन्दूरकञ्चाहरेत् ॥ १८३ ॥

अथ रससिन्दूरस्य गुणाः

प्रमेहकरिकेशरी प्रबलशूलकालानलो
भगन्दरहरः परं खलु महाज्वरेभाङ्कुशः ।
समस्तगदतस्करः सकलशोषसंशोषको
रसोऽतुलविलासदो विजयते हि सिन्दूरकः ॥ १८४ ॥
अलं मलयजानिलैः किमिह भेषजानां कुलैः
वृथैव घनशीतलैः सरसचन्दनालेपनैः ।
सखे मदनजीवनं रतिविलासलीलागृहं
प्रकामबलकान्तिदं भज रसं ससिन्दूरकम् ॥ १८५ ॥
गुल्मप्लीहहरो रतिप्रियकरो यक्ष्मेभपञ्चाननः
पाण्डुस्थौल्यविधूननो व्रणहरो रौक्ष्याग्निमान्द्यापहः ।
कुष्ठव्याधिनिषूदनो रतिकलाप्रौढाङ्गनारञ्जनः
कान्तामस्तकभूषणो रसपतिर्भूयात्सदा श्रेयसे ॥ १८६ ॥
नियमयति रसेशः पञ्चवाताम्बितान्तं
प्रसरति धमनीनां स्वक्रिया वातसाम्ये ।
द्रढयति भृशमादौ जालकं नाडिकानां
रमयति च ततोऽसौ मानसं सेवकानाम् ॥ १८७ ॥
बहिर्गमनशीला ये स्वेदविण्मूत्रमारुताः ।
निरायासं विनिर्यान्ति रसस्यास्य निषेवणात् ॥ १८८ ॥
पित्तं निःसारयत्येष न रेचयति कर्हिचित् ।
न च पित्ताशयं कोष्ठं विक्षोभयति भक्षितः ॥ १८९ ॥
स्फीततां दन्तवेष्टानां मुखपाकं क्षतादिकम् ।
लालास्रावं प्रदाहञ्च न सूते चिरसेवितः ॥ १९० ॥
विकारानीदृशानन्यान् दारुणान् पारदोत्थितान् ।
न जातु प्रकरोत्येष रसः सिन्दूरसंज्ञकः ॥ १९१ ॥

दोषत्रितयमत्यर्थप्रवृद्धं शमयत्यलम् ।
प्रकृतिं गमयत्यत्र करणानि विशेषतः ॥ १९२ ॥

अथ सहपानस्य लक्षणम्

यद्योगेन रसादीनां विभक्ताः परमाणवः ।
द्रुतमङ्गेषु सर्पन्ति सहपानं तदुच्यते ॥ १९३ ॥

अथ अनुपानस्य लक्षणम्

तत्तद्रोगघ्नभैषज्यं भेषजस्यानुपीयते ।
यच्च साहाय्यकारि स्यादनुपानं तदुच्यते ॥ १९४ ॥
सहपानानुपानाभ्यां भेषजं परिबृंहयेत् ।
येन रोगहरा शक्तिर्भवेद् गुणवती सदा ॥ १९५ ॥
अलाभेऽत्यर्थमेवात्र सहपानानुपानयोः ।
मधुना वा जलेनैव भैषज्यं वितरेद् भिषक् ॥ १९६ ॥

अथ रससिन्दूरस्य आमयिकः प्रयोगः

जातपुष्पतुलसीदलद्रवैः शृङ्गवेरजरसेन वा सदा ।
नागिनीस्वरसकेन वा भिषक् योजयेद्रसमिमं नवज्वरे ॥१९७॥
छिन्नोद्भवापर्पटधान्यकानां क्वाथेन तुर्यांशसमाहितेन ।
कान्तालललाटाभरणं रसेशं जीर्णज्वरे वैद्यवरः प्रदद्यात् ॥ १९८ ॥

मेहे गुडूचीस्वरसेन दद्यात्
यापात्प्रयामूलजतोयकैर्वा ।
असृग्दरेऽशोकबलादिकानां
क्वाथेन सिन्दूररसः प्रयोज्यः ॥ १९९ ॥
बालाभयायाः क्वाथेन बुधोऽर्शसि नियोजयेत् ।
वचारसेन तच्चूर्णं वापस्मारे प्रयुज्यते ॥ २०० ॥

कूष्माण्डस्वरसनह दद्यादुन्मादसञ्ज्ञक ।
श्वासे विभीतकक्वाथैर्वासायाः स्वरसेन वा ॥ २०१ ॥

कामलायां बुधो दद्याद् दार्वीक्काथेन संयुतम् ।
पाण्डुरोगे प्रयुञ्जीत रसज्ञो लोहभस्मना ॥ २०२ ॥
सितोपला च सूक्ष्मैला शिलाजश्च समं समम् ।
एतत्त्रितयचूर्णेन मूत्रकृच्छ्रकुलान्तकः ॥ २०३ ॥
अजीर्णे मधुना वापि मुस्तकक्काथजैर्द्रवैः ।
शूले वैद्यवरो दद्यात् त्रिफलाक्काथसंयुतम् ॥ २०४ ॥
कणाचूर्णयुतः सूतो मधुना रक्तिकोन्मितः ।
सेवितो नाशयेन्मूर्च्छां पथ्यं तोयावगाहनम् ॥ २०५ ॥
वमने बृहदेलायाः क्काथेन मधुनापि वा ।
शोथे पुनर्नवायास्तु कषायेण प्रयोजयेत् ॥ २०६ ॥
गुडूचीनिम्बखदिरपुरुहूतफलद्रवैः ।
क्काथैर्वा संयुतश्चन्द्रचातुर्जातकमिश्रितः ॥ २०७ ॥
रसः सिन्दूरसंज्ञोऽयं प्रयुक्तो रक्तिकोन्मितः ।
विस्फोटं दारुणं हन्याद्यथा सूर्यस्तमस्ततिम् ॥ २०८ ॥
काकोलीचूर्णसंयुक्तं नारिकेलोत्थतैलयुग् ।
सेवितं रससिन्दूरं हरेद्रोगं जरायुजम् ॥ २०९ ॥
मृतवङ्गसमायुक्तो रसः सिन्दूरसंज्ञकः ।
क्षौद्रेण भक्षितो हन्ति प्रमेहं त्वतिकालजम् ॥ २१० ॥
सक्षौद्रस्त्र्यूषणोपेतैर्धान्यजीरकनागरैः ।
सेवितो रससिन्दूरो वान्तिं जयति दारुणाम् ॥ २११ ॥
ब्राह्मीवचाशङ्खपुष्पीकुष्ठैलाक्काथसंयुतम् ।
रक्तिकाद्वितयं खादेदपस्मारहरं परम् ॥ २१२ ॥
धात्रीवयस्याकलिपादपानां
क्काथेन वा जन्तुरिपोः समेतः ।
नित्यं तु सिन्दूररसो रसज्ञैः

भगन्दरेऽयं विनियोजनीयः ॥ २१३ ॥
मिशिबालाभयाक्वाथैर्यवानीचूर्णकेन वा ।
बिडाख्यलवणेनैव गुल्मे वा विनियोजयेत् ॥ २१४ ॥
क्वाथेन दशमूलस्य शिरःशूले प्रयोजयेत् ।
व्रणेषु बृहतीनीरगुडूचीविश्वभेषजैः ॥ २१५ ॥
गुडूचिकाशतावरीकणारसाभयान्वितैः ।
वचाब्दविश्वभेषजैः कषायकं प्रकल्पयेत् ॥ २१६ ॥
रसोऽत्र तेन संयुतो यथाविधिप्रयोजितः ।
निहन्ति वै चिरोत्थितं प्रकाममामवातकम् ॥ २१७ ॥
शाल्मलीमूलचूर्णेन विदार्यादिगणेन वा ।
प्रयुक्तो रससिन्दूरो वाजीकरण उत्तमः ॥ २१८ ॥
भस्मना गगनस्येह काञ्चनेन मृतेन वा ।
उभाभ्यामेव वा युक्तो धातुवृद्धिकरो मतः ॥ २१९ ॥
जातीफलं देवपुष्पं कर्पूरश्चाहिफेनकम् ।
एषां चूर्णेन सहितो स्वप्नमेहहरो मतः ॥ २२० ॥
बलाक्वथिततोयेन सिन्दूररससेवनात् ।
विनश्यति चिरोद्भूतं शीर्षकम्पनमुद्धतम् ॥ २२१ ॥
जरणत्र्यूषणक्षुद्रापथ्याधानेयकैः समम् ।
निषेवितोऽयंसिन्दूरो वान्तिशान्तिकरो मतः ॥ २२२ ॥
हिङ्गुदीप्यकशुण्ठीभिश्चव्यधान्यकरुच्यकैः ।
प्रयुक्तो रससिन्दूरो द्रुतं पानात्ययं जयेत् ॥ २२३ ॥
यव्यटङ्कणसंयुक्तः शीलितो दिनसप्तकम् ।
रसः सिन्दूरसंज्ञोऽयं पक्तिशूलं विनाशयेत् ॥ २२४ ॥

१-रसा-रास्ना । रसा पृथिव्यां रास्नायां मेदायां कङ्गुधान्यके ॥ इति कोषः ॥

२-यव्यः-यवक्षारः ॥

वासाकषायसहितो लोध्रक्वाथान्वितोऽथवा ।
शीलितो रससिन्दूरो रक्तप्रदरमुद्धरेत् ॥ २२५ ॥
वराक्वाथेन वा गेहनीरेण तु ससैन्धवम् ।
शीलितो रससिन्दूरो बस्तिकुण्डलमुद्धरेत् ॥ २२६ ॥
नवज्वरे प्रतिश्याये शिशूनां सुरसारसैः ।
कासे श्वासे च वितरेत् कण्टकारीरसेन च ॥ २२७ ॥
परिच्छेदो न विज्ञेयः सहपानानुपानयोः ।
प्रकल्पयेद् यथारोगं सिद्धहस्तो भिषग्वरः ॥ २२८ ॥

अथ रससिन्दूरस्य मात्रा

एकहायनदेशीयं बालकं वीक्ष्य रोगिणम् ।
गुञ्जायाः षोडशो भागस्तत्र मात्रा प्रकल्प्यते ॥ २२९ ॥
तथा द्विवर्षदेशीये सप्तमो भाग इष्यते ।
रसहायनदेशीये तृतीयं भागमाहरेत् ॥ २३० ॥
द्वादशाब्दकदेशीये गुञ्जार्धं परिकल्पयेत् ।
गुञ्जामात्रमिता चास्य पूर्णमात्रा प्रशस्यते ॥ २३१ ॥

अथ मकरध्वजस्य निर्माणप्रकारः

स्वर्णं तोलकसंमितं मृदुदलं युक्त्या विशुद्धीकृतं
स्वर्णादष्टगुणोन्मितं रसवरं जीर्णाच्छसौगन्धिकम् ।
संस्कारैर्बहुभिर्विशोधितमथो सम्मेल्य सम्पेषयेत्
गन्धं षोडशतोलकं सुविमलं कुर्यात्ततः कज्जलीम् ॥२३२॥
शोणैः कार्पासपुष्पैरथ मृदुविशदाङ्कोटमूलत्वचाद्भिः
कन्यानीरैश्च घस्रं रसविधिचतुरो भावयेदामयज्ञः ।
सम्यक् पिष्टं सुशुष्कं त्वपि च रसवरं काचकुप्यां निदध्यात्,
बिल्वादीनाञ्च काष्ठैः सलिलविरहितैस्तापयेच्चाथ विद्वान्।२३३
पूर्वं यामद्वयं प्राज्ञः पचेन्मृद्वग्निना रसम् ।

मध्यमानलयोगाच्च ततो यामद्वयं पचेत् ॥ २३४ ॥
प्रखरेणानलेनाथ पचेद्यामद्वयं भिषक् ।
अवशिष्टद्वियामश्च पुनर्मृद्वग्निना पचेत् ॥ २३५ ॥
यन्त्रे सिकतसंज्ञे च स्वाङ्गशीतमथोद्धरेत् ।
काचकूपीं विभिद्याथ सहकारसमप्रभम् ॥ २३६ ॥
भङ्गे रक्तप्रतीकाशं पिष्टे रक्तोत्पलोपमम् ।
सौवर्णं मूर्च्छितं सूतं गृह्णीयाद्भिषजां वरः ॥ २३७ ॥
नानेन जायते यस्मान्मकरध्वजमाभिभः ।
रसज्ञैः ख्यापितस्तस्मान्नाम्नायं मकरध्वजः ॥ २३८ ॥

श्री सिद्धमकरध्वजः

पूर्वोक्तनिजमानाच्च कनकं चेच्चतुर्गुणम् ।
निर्दिष्टमानप्रमितौ भवतो रसगन्धकौ ॥ २३९ ॥
पूर्ववद्भावयित्वापि पचेत्सिकतयन्त्रके ।
एवन्तु षड्गुणं गन्धं जारयेत्क्रमशो भिषक् ॥ २४० ॥
समर्पितो यतश्चायं सिद्धेभ्यः शूलपाणिना ।
ख्यातस्ततोऽयं जगति श्रीसिद्धमकरध्वजः ॥ २४१ ॥

अथास्य गुणाः

क्षयक्षयकरः परं प्रबलकासकालानलः
प्रमेहकुलकण्डनः प्रविततान्त्रशोषान्तकः ।
समस्तगदभञ्जनः प्रमदकामिनीरञ्जनः
सदैव मकरध्वजो विजयते रसाधीश्वरः ॥ २४२ ॥

अथ सर्वाङ्गसुन्दरो रसः

रसेश्वरः पलमितो गन्धकश्चापि तन्मितः ।
भूधात्रिकाहस्तिशुण्डीद्रवेणाथ निरन्तरम् ॥ २४३ ॥
रसतन्त्रविशेषज्ञः पेषयेद्दिनसप्तकम् ।
संस्थाप्य संपुटे सूतं वालुकायन्त्रगं भृशम् ॥ २४४ ॥

मन्दानलेन सुपचेदहोरात्रं भिषग्वरः ।
जाते पाके स्वाङ्गशीतं सम्पुटं त्ववतारयेत् ॥ २४५ ॥
सम्पुटोपरि संलग्नं पीतं भस्म समुद्धरेत् ।
पूर्वाचार्य्यैः कीर्तितोऽयं नाम्ना सर्वाङ्गसुन्दरः ॥ २४६ ॥

अथास्य गुणाः

हृदयप्रीतिजननो जठरामयनाशनः ।
बलवर्णप्रदाता च ज्वरद्विरदकेशरी ॥ २४७ ॥
वातव्याधिहरश्चैव जाठराग्निप्रदीपनः ।
शूलद्विपाङ्कुशः शीघ्रं प्रकामं कामवर्द्धनः ॥ २४८ ॥
सहपानादिकश्चास्य यथारोगं भिषग्वरः ।
रससिन्दूरवन्नित्यं वीक्ष्य दोषं प्रकल्पयेत् ॥ २४९ ॥

इति मूर्च्छनाविज्ञानीयो नाम षष्ठस्तरङ्गः

अथ पारदमारणाविज्ञानीयः सप्तमस्तरङ्गः

सामान्येन मारणस्य लक्षणम्

विविधक्रमयोगेन गन्धकाद्यौषधैः सह ।
रसादीनाञ्च धातूनां रोगापनयनक्षमम् ॥ १ ॥
गन्धकादियुतं वापि यदम्बरसुधान्वितम् ।
भस्मत्वापादनं यत्तु मारणं तदिहोच्यते ॥ २ ॥

अथ मृतपारदस्य लक्षणम्

निर्धूमस्तेजसा हीनो गौरवेण समन्वितः ।
अङ्गारस्थापितो यश्च न प्रयाति विरूपताम् ॥ ३ ॥
न च लाघवमायाति चापल्यं विजहाति च ।
आधिव्याधिहरो यश्च मृतः सूतः स उच्यते ॥ ४ ॥

अथ पारदमारणस्य प्रथमः प्रकारः

सूतः पलद्वयमितः सुतरां विशुद्धः
स्याद्गन्धकश्च विशदः पलसम्मितोऽत्र ।
द्रावेण मारकगणोक्तमहौषधानां
सम्पेषयेद्दिवसमेकमिहामयज्ञः ॥ ५ ॥
मूषापुटे रसवरं विनिधाय युक्त्या
सन्धिं विलिप्य खलु वह्निमृदा च कामम् ।
मूषां निधाय विपचेत् खलु भूधराख्ये
यन्त्रे रसोऽथ नियतं मृतिमेति शीघ्रम् ॥ ६ ॥

अथ वह्निमृत्स्ना लक्षणम्

खटी लवणकिट्टाढ्या महिषीदुग्धमर्दिता ।
वह्नितापसहात्यन्तं वह्निमृत्स्ना प्रकीर्तिता ॥ ७ ॥
मूषादीनां सन्धिलेपे वह्निमृत्स्ना प्रशस्यते ।
न गन्तुं क्षमते सूतो निरुद्धो वह्निमृत्स्नया ॥ ८ ॥

अथ पारदस्य मारको गणः

विष्णुक्रान्ता देवदाली सर्पाक्षी सहदेविका ।
लाक्षा पुनर्नवा सूर्यः सूर्यभक्ता च लाङ्गली ॥ ९ ॥
चाण्डालिनीकन्दसंज्ञः काकमाची विदारिका ।
बला समन्तदुग्धा च जयन्ती हस्तिशुण्डिका ॥ १० ॥
रम्भा कोपातकी शुण्ठी शशिलेखा निशाद्वयम् ।
काकजङ्घा काकनासा सुरसा बहुपुत्रिका ॥ ११ ॥
आखुकर्णी ब्रह्मदण्डी दूर्वा च शरपुङ्खिका ।
चक्रमर्दो नीपकणा वर्षाभूः कटुतुम्बिका ॥ १२ ॥
इन्द्रवारुणिका हंसपादी च शङ्खपुष्पिका ।
जाती मूर्वा च लज्जालुः सर्षपस्तिलपर्णिका ॥ १३ ॥

वन्ध्याकर्कोटकी धूर्तो गुडूची गिरिकर्णिका ।
प्रसारणी भृङ्गराजो रामठं सोमवल्लरी ॥ १४ ॥
शोभाञ्जनः पलाशश्च मत्स्याक्षी यमचिञ्चिका ।
मण्डूकपर्णी ज्वलनः शेफाली मुसली वचा ॥ १५ ॥
पूर्वाचार्यैः कीर्तितोऽयं रसस्य मारको गणः ।
तत्तद्विधिप्रभेदेन सूतमारणसाधकः ॥ १६ ॥

अथ पारदस्य द्वितीयो मारणप्रकारः

विष्णुक्रान्तां देवदालीमारनालेन मर्दयेत् ।
तयोरेव द्रवेणाथ भावयेत् सप्तधा रसम् ॥ १७ ॥
मूर्च्छितञ्च सुविज्ञाय पारदं खर्परे न्यसेत् ।
दीप्तानलायां चुल्ल्याञ्च स्थापयेदथ खर्परम् ॥ १८ ॥
वारं वारं तयोस्तत्र द्रवं शीघ्रं विनिक्षिपेत् ।
एवं रसो दिनैकेन समुपैतीह पञ्चताम् ॥ १९ ॥

अथ पारदमारणस्य तृतीयः प्रकारः

अङ्कोलमूलसलिलैः सूतं खल्वे विमर्दयेत् ।
सूतमानोन्मितं गन्धं शुद्धं तत्र विनिक्षिपेत् ॥ २० ॥
संस्थाप्य सूतं मूषायां विदध्याद् वह्निमृत्स्नया ।
सन्धिलेपं, ततः प्राज्ञः प्रदीप्तोपलपावके ॥ २१ ॥
यन्त्रे भूधरसंज्ञे च पचेद्यामचतुष्टयम् ।
एवं रसेश्वरः शीघ्रं नियतं याति भस्मताम् ॥ २२ ॥

अथ पारदमारणस्य चतुर्थः प्रकारः

अपामार्गस्य बीजानि नूतनानि विचूर्णयेत् ।
कल्कीकृत्य पुनस्तेन मूषायुग्मं प्रकल्पयेत् ॥ २३ ॥
अरिमेदः कृमिरिपुः द्रोणपुष्पीसुमं समम् ।
सञ्चूर्ण्य चूर्णमेतेषां मूषामध्ये निधापयेत् ॥ २४ ॥

काकोदुम्बरिकादुग्धे सूतं यत्नेन मर्दितम् ।
चूर्णोपरि तु संस्थाप्य पुनश्चूर्णं प्रदापयेत् ॥ २५ ॥
प्रलिप्य रसगोलञ्च मूषायां स्थापयेत्ततः ।
सन्धिलेपं ततः कुर्यादवश्यं वह्निमृत्स्नया ॥ २६ ॥
संशोष्य चातपे मूषां पुटेद् गजपुटे भिषक् ।
एकेनैव पुटेनैवं रसो यातीह भस्मताम् ॥ २७ ॥

पारदमारणस्य पञ्चमः प्रकारः

भुजङ्गवल्लरीरसे रसेश्वरं विमर्दयेत्
ततश्च कर्कटीभवं सुपेषयेत्तु कन्दकम् ॥ २८ ॥
विधाय कल्कमुत्तमं क्षिपेद्रसं तदन्तरे
निधाय सम्पुटे पुटेत्पुटे तु वारणाह्वये ॥ २९ ॥

अथ पारदस्य (अनुभूतः) षष्ठो मारणप्रकारः

काकोदुम्बरिकादुग्धैर्भावयेद्रामठं भिषक् ।
तत्कल्केन पुनः प्राज्ञो मूषायुग्मं प्रकल्पयेत् ॥ ३० ॥
तद्दुग्धमर्दितश्चैव सूतं तत्र विनिक्षिपेत् ।
मुद्रां कृत्वा सूतगोलं मृण्मूषायां निधापयेत् ॥ ३१ ॥
सन्धिं विलेपयेद्वह्निमृत्स्नया चाथ शोषयेत् ।
पचेल्लघुपुटे सूतं स्वाङ्गशीतं समुद्धरेत् ॥ ३२ ॥
मूषासन्धिं विलिख्याथ कालाञ्जनसमप्रभम् ।
लाघवादिगुणोपेतं गृह्णीयाद् भस्मसूतकम् ॥ ३३ ॥

अथ पारदमारणस्य (अनुभूतः) सप्तमः प्रकारः

सूतं हिङ्गुलसम्भवं पलमितं तुल्यं बलिश्चाहरेद्
युक्त्या कज्जलिकां विधाय वटजक्षीरैस्ततः पेषयेत् ।
मृद्भाण्डे विनिधाय तत्र नवभूदण्डेन[1] संचालितो

(१) नवभूः—वटपादपः तस्य दण्डेन आर्द्रदण्डेन इत्यर्थः ।

मृद्वग्नौ दिनपाचितो रसवरो याति ध्रुवं भस्मताम् ॥ ३४॥

रसेश्वरं सुमसृणं कृष्णाञ्जनसमप्रभम् ।
निर्धूमादिगुणोपेतं गृह्णीयाद् भस्मतां गतम् ॥ ३५ ॥

अथ मृतपारदस्य गुणाः

ग्रहणीगजकर्षणदक्षतरं
त्वतिसारहरं क्षयशोषहरम् ।
जठरानलमान्द्यविनाशकरं
परिशीलय सूतभवं भसितम् ॥ ३६ ॥
प्रमदामदमर्दनगर्वधरं
बलवीर्यविलाससमृद्धिकरम् ।
निजसेवकरक्षणदक्षतरं
परिशीलय सूतभवं भसितम् ॥ ३७ ॥

क्षयं क्षीणक्षेत्रं क्षपयति च दीप्तिं वितनुते
स्मृतिं सूते कामं द्रढयति च देहं द्रुततरम् ।
जरां वर्षैकेन त्वपनयति संशीलितमिदं
गुणान् को वा वक्तुं प्रभवति रसेशस्य नियतम् ॥ ३८ ॥

रतिकेलिकलां भृशमुज्ज्वलयेल्ललितं ललनाकुलमाकुलयेत् ।
हृदि चोत्कलिकां कलयेत् कलितो रतिरागवतामयमेव सखा॥३९॥

शृङ्गारस्य हि सर्वस्वं सुरतस्याधिदैवतम् ।
वशीकरणमन्त्रश्च प्रमदानां मृतो रसः ॥ ४० ॥

अथ मृतसूतस्य आमयिकः प्रयोगः

पांशुमुस्तकपायेण सुरसा क्वथितेन वा ।
कणाक्वाथेन वा युक्तो मृतः सूतो हरेज्ज्वरम् ॥ ४१ ॥
लाक्षया वा हरीतक्या तथा सिंहिकयान्वितः ।

१-पांशुः-पर्पटम्—पांशुः पर्पटके धूलौ पुन्नागे शालिधान्यके । इति कोषः ।

माक्षिकेणापि वा युक्तो रक्तपित्तं व्यपोहति ॥ ४२ ॥
व्याघ्रीक्वाथेन कणया चापि कासकुलान्तकः ।
वरानिशाकषायेण पाण्डुरोगं विनाशयेत् ॥ ४३ ॥
क्षीरिवृक्षकषायेण पञ्चपल्लवजेन वा ।
क्वाथेन शृतशीतेन हन्त्यतीसारमुद्धतम् ॥ ४४ ॥
रसालजम्बूदलजद्रवेण गुडान्वितेनाथ सुपाचितेन ।
बालेन बिल्वेन सनागरेण प्रवाहिकां हन्ति मृतो रसेशः ॥४५॥
हिङ्गुना सकणेनेह विषूचीं हन्ति दारुणाम् ।
पथ्यया काञ्जिकेनापि त्वजीर्णं हरति क्षणात् ॥ ४६ ॥
तैलसैन्धवसंयुक्तपुटपाचितसूरणैः ।
अर्शांसि नाशयत्याशु दीर्घकालोद्भवान्यपि ॥ ४७ ॥
बीजपूराम्लरुचकैः हिक्कापञ्चकनाशनः ।
सितालाजजलक्षौद्रैश्छर्दिं दाहञ्च नाशयेत् ॥ ४८ ॥
अजादुग्धविपक्वेन वैदेहीपाचितेन च ।
घृतेन गन्धकेनापि सक्षतं क्षपयेत् क्षयम् ॥ ४९ ॥
गोक्षुरादिकषायेण मसूरक्वथितेन वा ।
क्षौद्रेणापि युतः सूतो मूत्रकृच्छ्रं व्यपोहति ॥ ५० ॥
सव्योषेण तिलक्वाथेनामशूलं व्यपोहति ।
शम्बूकक्षारसहितः पक्तिशूलनिवर्हणः ॥ ५१ ॥
मूत्रयुतः कटुतिक्तकविश्व-
क्वाथयुतो हरतीह हि शोफम् ।
दारुनिशात्रिफलाक्वथिताढ्यः
कामलिनां खलु मङ्गलकारी ॥ ५२ ॥
नवोद्धृतस्नुहीक्षारद्रवभावितया भृशम् ।
हरीतक्या युतः सूतो जठरामयनाशनः ॥ ५३ ॥

त्रिकटुत्रिफलामरिचप्रमितस्त्रिपुटीफलतैलयुतः पुरकः ।
मृतसूतयुतो नियतं त्वचिरात् चिरजां विनिहन्ति हि तुन्दिलताम्५४
रसोनसिद्धेन तिलोद्भवेन तैलेन सार्द्धन्तु रसो निपीतः ।
वातोद्भवानत्र बहून् विकारान् निहन्ति घोरानपि वा चिरोत्थान्५५
हरीतकी गुडूचिका जलं गुडः समं समम् ।
विचूर्णितेन योजितो हरेत्समीरशोणितम् ॥ ५६ ॥
विश्वभेषजरुवूकसंस्कृतक्षीरकेण विनियोजितो रसः ।
गृध्रसीं हरति दीर्घकालजामन्धकारपटलीं यथा रविः ॥ ५७ ॥
शशाङ्कलेखया तथा फलत्रिकेण संयुतः ।
समार्कवो मृतो रसो निहन्ति वै किलासकम् ॥ ५८ ॥
क्रमिघ्ननिम्बदाडिमत्रिपर्णचूर्णसंयुतः ।
समाक्षिकस्तु पारदो मृतो हरेत्क्रमीन् द्रुतम् ॥ ५९ ॥
राजिकानलरसोननीलिकाभृङ्गराजमृदुपल्लवैः समम् ।
वीरवृक्षफलसंयुतं पचेत्तैलमत्र पयसा समन्वितम् ॥ ६० ॥
अनेन तैलेन युतो रसेशः कुष्ठान्यशेषाणि निहन्ति शीघ्रम् ।
यथा मृगेन्द्रो वनमध्यचारी मृगानुपेतानिह निर्विशङ्कः ॥ ६१ ॥
वरीबलावाजिगन्धामोचामूलकषायकैः ।
रसेश्वरो हरेत्कार्श्यं मासद्वयनिषेवितः ॥ ६२ ॥
सौवर्चलत्र्यूषणहिङ्गुमूत्रैर्विपाचितेनेह घृतेन युक्तः ।
रसेश्वरः सप्तदिनप्रयोगात् सर्वानपस्मारगदान्निहन्ति ॥ ६३ ॥
मधूकपारावतविड्युतेन मनःशिलायाः खलु चूर्णकेन ।
रसोऽञ्जनाद्दारुणलक्षणाढ्यानुन्मादरोगान्विनिहन्ति शीघ्रम्॥६४॥
मृतं रसेशं मधुना विलिह्य क्षौद्रान्वितं कोष्णजलं पिबेद्यः ।
स्थौल्यात्तु मेदःप्रभवान्नितान्तं चिरोत्थिताच्चापि विमुच्यतेऽसौ६५
वरागिरिजतुव्योषैः भृङ्गस्वरसभावितैः ।

मृतः सूतो हरेत्सत्यं प्रमेहान् सकलानपि ॥ ६६ ॥
मूर्वास्वरससंयुक्तो मृतः सूतोऽतिदारुणाम् ।
मसूरिकां निहन्त्येव लेपनाद् भक्षणादपि ॥ ६७ ॥
कन्यामूलरसेनाथ तण्डुलीयजलेन वा ।
मृतः सूतो द्रुतं हन्याद् विषं स्थावरजङ्गमम् ॥ ६८ ॥
तण्डुलोदकसंयुक्तो यथाविधि मृतो रसः ।
नस्ये पाने विशेषेण विषार्तस्य प्रशस्यते ॥ ६९ ॥
गोपुरीषमलिलेन भावयेत् सप्तधेह घनसारमुत्तमम् ।
तद्युतः खलु मृतो रसेश्वरः स्थावरादिविषभेदनाशनः ॥ ७० ॥
नृमूत्रपिष्टेन पुनर्नवायाः बीजेन मूलेन रसान्वितेन ।
मृतो रसेशः खलु लेपनेन विषं सदा वृश्चिकजं निहन्ति ॥७१॥
वन्ध्याकर्कोटकीमूलफलेनापि समन्वितः ।
सूतः सुदारुणं हन्ति विषं स्थावरजङ्गमम् ॥ ७२ ॥
कपित्थफलसंयुतोऽथ खलु देवदालीयुतः
सभ्रममदनोऽथवा तु शरपुङ्खबीजान्वितः ।
मृतः खलु रसेश्वरो ह्यविरतं प्रलेपादिना
निहन्ति भृशदारुणं प्रमदमूषिकाणां विषम् ॥ ७३ ॥
नागिनीरसपिष्टेन नागरेणेह कांस्यके ।
समन्वितो रसो हन्याद् वृश्चिकार्तिं सुदारुणाम् ॥ ७४ ॥

अथ रसायनादौ पारदसेवनविधिः

यदाधिव्याधिविध्वंसि वयसःस्थापकन्तथा ।
मेध्यं वृष्यं तथा नेत्र्यं भैषज्यं तद्रसायनम् ॥ ७५ ॥
क्षेत्रीकृत्य निजं देहं सेवेतेह रसायनम् ।
विधिना मितपथ्याशी देहसिद्धिं हि विन्दति ॥ ७६ ॥
रसायनं यः कुरुते क्षेत्रीकरणमन्तरा ।

देहसिद्धिर्न तस्य स्यात् प्रत्युत क्लेशकृद्भवेत् ॥ ७७ ॥
सुबीजमपि संस्कृतं कृषिविधानदक्षैरिह
प्ररोहति न कर्हिचित् सुवितताप्ररोहं यथा ।
तथैव सुभिषग्वरैरकृतपञ्चकर्मक्रमे
नरे हि न रसायनं फलति जातु संयोजितम् ॥ ७८ ॥

क्षेत्रीकरणस्य स्वरूपम्

सञ्जातपञ्चकृत्यस्य जैत्रैर्यद् गदनाशनम् ।
रसायनादौ तत्प्राज्ञैः क्षेत्रीकरणमुच्यते ॥ ७९ ॥

क्षेत्रीकरणप्रक्रिया

आदौ तु पञ्चकर्माणि कारयित्वा भिषग्वरः ।
पश्चात्सिद्धौषधैर्यत्नाद्रोगशान्तिं प्रकल्पयेत् ॥ ८० ॥
यदि बालः कृशः क्षीणः स्याद्रसायनसेवकः ।
तदा तु पञ्चकर्माणि कारयेन्न भिषग्वरः ॥ ८१ ॥
समयज्ञस्तदा युक्त्या रेचनं कारयेन्नवा ।
ततस्तु सिद्धभैषज्यैर्नीरुजश्चापि कारयेत् ॥ ८२ ॥
सिद्धौषधप्रयोगाच्च रोगशान्तिर्यदा भवेत् ।
मृताभ्रमुख्ययोगांश्च तदा संयोजयेद्भिषक् ॥ ८३ ॥
क्षेत्रीकृतनिजकायः कामं शाल्योदनादिपथ्याशी ।
लब्धबलो रसभोक्ता विदधीत रसायनं प्राज्ञः ॥ ८४ ॥

रसायनोचितो रसः

हिरण्यजीर्णो घनसत्वजीर्णो
वज्रादिजीर्णोऽप्यथवा मृतश्च ।
रसायनार्थं हि रसो नितान्तं
प्रशस्यते ह्यत्र रसागमज्ञैः ॥ ८५ ॥

रसभक्षणकालः

प्रत्यूषे भक्षयेत्सूतं पथ्यं यामे तथादिमे ।

द्वितीययामे मतिमानश्नीयाद् भोजनं हितम् ॥ ८६ ॥

अथ मात्राभेदः

हिरण्यजीर्णसूतस्य गुञ्जार्धं वितरेद्भिषक् ।
जीर्णवैक्रान्तकस्यापि तथा मात्रां प्रकल्पयेत् ॥ ८७ ॥
जीर्णवज्ररसेशस्य गुञ्जापादः प्रशस्यते ।
गुञ्जैकां तु तदन्येषां मात्रां प्राज्ञः प्रकल्पयेत् ॥ ८८ ॥

अथ रसायनसेवनेऽपथ्यानि

मिथ्याहारविहारपानसलिलक्रीडातिनिद्रादिकं
कोपं दुःखमतिस्पृहामतिमुदं स्नानं तथोद्वर्तनम् ।
स्त्रीणां नित्यमतिप्रसङ्गमनिशं चिन्तामसूयां तृषां
क्षुद्रोधश्च मदं रसायनसुधासेवी सदा वर्जयेत् ॥ ८९ ॥

रससेवने पथ्यम

शृङ्गवेराज्यधानेयजीरकैः परिसंस्कृतम् ।
वातिङ्गनं पटोलञ्च तण्डुलीयंच वास्तुकम् ॥ ९० ॥
शाकं पौनर्नवञ्चापि पद्ममूलादिकन्तथा ।
पुराणाः शालयो गव्यं दुग्धं दधि घृतन्तथा ॥ ९१ ॥
गोधूमो मुद्गयूषश्च तथा हंसोदकं हिमम् ।
रसेन्द्रस्य बुधैः प्रोक्तं पथ्यमेतत्समासतः ॥ ९२ ॥

अथ रससेवनेऽपथ्यम्

कूष्माण्डं कमठः कलिङ्गकफलं कालं कुलत्थास्तथा
कर्कोटी कतकं कपित्थकफलं वै काञ्चनीयं सुमम् ।
कङ्गुः काञ्जिककारवेल्लकमलं कर्कोटकः कर्कटी
कौसुम्भश्च कपोतकः खलु गणः प्रोक्तः ककारादिकः ॥ ९३ ॥
ककारादिगणोक्तानि भेषजानि कदाचन ।
रसायनफलाकाङ्क्षी रससेवी न भक्षयेत् ॥ ९४ ॥
माषं मसूरकं तैलं कलायञ्च सुरासवान् ।

नारङ्गं नारिकेलञ्च धान्याम्लं निम्बुकादिकम् ॥ ९५ ॥
आनूपमांसं वेत्राग्रं नाश्नीयात्कुक्कुटांस्तथा ।
रम्भादले भोजनञ्च तक्रभक्तं सुवर्चलम् ॥ ९६ ॥
कांस्यपात्रे न चाश्नीयाद् गुरु विष्टम्भि भोजनम् ।
कट्वम्लतिक्तं तीक्ष्णोष्णं भोजनन्तु भृशं त्यजेत् ॥ ९७ ॥
कुङ्कुमालेपनं जह्यात् घनसारञ्च सर्वथा ।
मध्याह्ने पर्यटेन्नैव न कुर्याद् वादजल्पनम् ॥ ९८ ॥

केषाञ्चिन्मते ककाराष्टकनिषेधः

कलिङ्गं कारवेल्लञ्च कदली काकमाचिका ।
कुसुम्भिका च कर्कोटी कूष्माण्डं कर्कटी तथा ॥ ९९
ककाराष्टकमेतद्धि प्रोक्तं रसविशारदैः ।
वर्जयेद्रससेवी च नित्यमेतत्प्रयत्नतः ॥ १०० ॥

अथ रसवैकृतौ सुखाचारः

शिशिरसलिलसेकस्तापसन्तप्तकाये
मलयजघनलेपश्चोत्तमाङ्गे निकामम् ।
सुरभिहिमसमीरे मन्दमन्दप्रचारो
हिमकरकरसङ्गः काव्यगाथाप्रसङ्गः ॥ १०१ ॥
उरसि भवति तापे शीततोयावगाहो
मनसि मलिनतायामासवारिष्टपानम् ।
अनिशमिहतृषायां नारिकेलीयनीरं
त्वपि हि झटिति सेव्यं शीतलं यच्च पथ्यम् ॥१०२॥
गुडूचिकोशीरकधान्यकानां मधुस्रवापर्पटचन्दनानाम् ।
तुगासिताचूर्णयुतः कषायो रसोद्भवं तापगदं निहन्यात् ॥१०३॥
विद्रुमो रङ्गकं तुल्यमेतद् द्वयं
रङ्गपादोन्मितं काञ्चनं मौक्तिकम् ।

वंशजातन्त्रिकासत्वयुक्तं समं
भक्षयेद्वारिभिस्तत्र कूष्माण्डजैः ॥ १०४ ॥

अमूर्च्छितामृतसूतभक्षणजन्यक्लेशे गन्धकविधानम्

आज्यदुग्धौषधैः शोधितं गन्धकं
मात्रया, युक्तितो नागवल्लीरसैः ।
पारदक्लेशितो भक्षयेत्संततं
यान्ति दोषा द्रुतं शान्तिमेकान्ततः ॥ १०५ ॥

कूष्माण्डादिगणः

कूष्माण्डस्तुलसी लाक्षा खण्डश्च शतपुष्पिका ।
लवङ्गं वत्सनागश्च तण्डुलीयस्य मूलकम् ॥ १०६ ॥
कूष्माण्डादिगणो ह्येषः पूर्वाचार्यनिरूपितः ।
अमूर्च्छितामृतरसविकारकुलकण्डनः ॥ १०७ ॥
कूष्माण्डादिगणोद्दिष्टजैत्रेणैकेन गन्धकम् ।
माषद्वयं भक्षयित्वा ततो गव्यं पयः पिबेत् ॥ १०८ ॥
पारदस्य विकारा ये भेषजानां शतैरपि ।
शान्तिं न यान्ति तत्रेमं योगं दद्याद्भिषग्वरः ॥ १०९ ॥
काकमाचीरसः पीतः प्रत्यहं तोलकोन्मितः ।
निहन्ति मासमात्रेण विकारान् दुष्टसूतजान् ॥ ११० ॥
नागिनीदलकल्केन युक्तेन सुरसाद्रवैः ।
गात्रलेपाय वितरेद् गन्धं रसचिकित्सकः ॥ १११ ॥

इति पारदमारणविज्ञानीयो नाम सप्तमस्तरङ्गः

अथ गन्धकविज्ञानीयोऽष्टमस्तरङ्गः

अथ गन्धकनामानि

गन्धको गन्धपाषाणः गन्धी च रसगन्धकः ।
सुगन्धिको गन्धिकश्च गन्धः सौगन्धिकस्तथा ॥ १ ॥
पूतिगन्धोऽतिगन्धश्च पामारिः कीटनाशनः ।
बलिर्बलिवसाख्यश्च कुष्ठारिः शरभूमिजः ॥ २ ॥
शुल्वारिर्नवनीतश्च दैत्येन्द्रो गन्धमादनः ।
कीटघ्नः क्रूरगन्धश्च स एव परिकीर्तितः ॥ ३ ॥

अथ गन्धकस्वरूपम्

निर्मलस्तु रजनीसमप्रभो दीप्तिमांश्च नवनीतकोमलः ।
कीर्तितो ह्यमलसारसंज्ञको गन्धको रसरसायने वरः ॥४॥

अशोधितगन्धकदोषनिरूपणम्

अशोधितः सुगन्धिकस्तनौ तनोति तापकम् ।
भृशश्च चित्तविभ्रमं करोति रक्तजान् गदान् ॥ ५ ॥
प्रसन्नतां सुरूपतां शरीरबन्धचारुताम् ।
प्रभां बलञ्च नाशयत्यतो विशोधयेत्तु तम् ॥ ६ ॥

अथ गन्धकशोधनस्य प्रथमः प्रकारः

दीप्तानलायां सुचिरं हसन्त्यां संस्थापयेन्निर्मललोहपात्रम् ।
आज्यं विशुद्धं त्वथ गन्धतुल्यं विनिक्षिपेत्तापयेत्तु रसज्ञः ॥७॥
आज्यं सुतप्तं तु विलोक्य तस्मिन् क्षिपेत्समानं खलु गन्धचूर्णम् ।
मन्दानलेनाथ विपच्यमानं विद्रावयेद् गन्धकमामयज्ञः ॥८॥
दुग्धपूर्णोदरं पात्रं तनुवस्त्रेण रोधयेत् ।
विद्रुतं गन्धकञ्चाथ तनुवस्त्रोपरि क्षिपेत् ॥ ९ ॥
सारयेद्विधिना गन्धं दुग्धमध्ये यथा पतेत् ।
दुग्धमध्यगतं गन्धं सम्यक् प्रक्षालयेत्ततः ॥ १० ॥

एवं वारद्वयं पक्त्वा दुग्धेऽन्यस्मिन् पुनः क्षिपेत् ।
एवं त्रिवारं संशुद्धो गन्धको विमलो भवेत् ॥ ११ ॥
अनेनैव विधानेन शतवारं विशोधितः ।
गन्धको निजगन्धन्तु जहातीह न संशयः ॥ १२ ॥

द्वितीयः शोधनप्रकारः

दुग्धपूर्णोदरार्द्धे तु घृतं पात्रे विनिक्षिपेत् ।
तन्मुखं तनुवस्त्रेण त्वहतेनाथ रोधयेत् ॥ १३ ॥
चूर्णीकृतं गन्धकञ्च वसनोपरि विन्यसेत् ।
आच्छादयेच्च विधिना खर्परेणाथ गन्धकम् ॥ १४ ॥
सवस्त्रकुट्टितमृदा तयोः सन्धिं निरोधयेत् ।
आकण्ठं भाजनं गर्ते निधाय भिषजाग्रणीः ॥ १५ ॥
वन्योपलैस्तु ज्वलनं ज्वालयेद् भाण्डमूर्धनि ।
एवं तु विद्रुतो गन्धो दुग्धे पतति तत्क्षणात् ॥ १६ ॥
गन्धं शीतं सुविज्ञाय क्षालयेत्सलिलैः भृशम् ।
एवमेकेन वारेण गन्धको निर्मलो भवेत् ॥ १७ ॥

तृतीयः शोधनप्रकारः

सार्षपं तिलजं वापि कौसुम्भं तैलमुत्तमम् ।
कटाहे निक्षिपेद्युक्त्या वह्निं प्रज्वालयेदधः ॥ १८ ॥
तैलं सुतप्तं विज्ञाय तत्समं गन्धचूर्णकम् ।
तैले विनिक्षिपेत्प्राज्ञः पचेन्मन्दाग्निना बलिम् ॥ १९ ॥
विद्रुतं तु बलिं ज्ञात्वा द्रुतं क्षीरे विनिक्षिपेत् ।
प्रक्षालयेत्ततस्तोयैर्विशुद्धो जायते बलिः ॥ २० ॥

चतुर्थः शोधनप्रकारः

विधाय चूर्णं गन्धस्य द्रावयेल्लोहभाजने ।
भृङ्गराजरसे क्षिप्त्वा क्षालयेच्चाथ वारिभिः ॥ २१ ॥

अनेनैव विधानेन सप्तवारं विशोधयेत् ।
भोक्तुं पृथक् त्रिवारन्तु योगार्थं भिषजां वरः ॥ २२ ॥

पञ्चमः शोधनप्रकारः

खल्वे सौगन्धिकं क्षिप्त्वा दृढं सम्पेषयेत्ततः ।
श्लक्ष्णचूर्णं ततो ज्ञात्वा चतुष्पलमितं बलिम् ॥ २३ ॥
यन्त्रे डमरुसंज्ञे च पचेद्यामचतुष्टयम् ।
ऊर्ध्वलग्नं बलिं पीतं यत्नतो ह्यवतारयेत् ॥ २४ ॥
एवं संशोधितो गन्धः शुद्धिमायात्यनुत्तमाम् ।
पाषाणादिकदोषांश्च सर्वथा विजहात्ययम् ॥ २५ ॥

षष्ठः शोधनप्रकारः

दग्धचूर्णोपलस्येह भागमेकं समाहरेत् ।
त्रिगुणे सलिले चाथ युक्त्या निर्वापयेद् भिषक् ॥ २६ ॥
भागद्वयं गन्धकस्य त्रयोदश जलस्य च ।
भागान् संगृह्य चुल्ल्याञ्च निधाय द्रावयेद्भृशम् ॥ २७ ॥
कपिलाभं ततो ज्ञात्वा सारयेत्पृथुवाससा ।
मृत्पात्रे काचलिप्ते वा काचपात्रे निधापयेत् ॥ २८ ॥
शीतलञ्चाथ विज्ञाय लवणद्रावकं भिषक् ।
शनैः शनैः क्षिपेद्यावद् गन्धकस्तु पतत्यधः ॥ २९ ॥
अधःस्थं गन्धकं ज्ञात्वा जलांशमन्यभाजने ।
स्थापयित्वा ततो गन्धं क्षालयेत्सलिलैर्भृशम् ॥ ३० ॥
सौगन्धिकं विशोष्याथ श्लक्ष्णचूर्णं तु कारयेत् ।
एवं संशोधितं गन्धं वीतशङ्कः प्रयोजयेत् ॥ ३१ ॥

अथ सुधालवणम्

पृथक् कृतं जलांशन्तु संशोष्याथ विचूर्णयेत् ।
सुधालवणमित्युक्तं रक्तस्रावहरं परम् ॥ ३२ ॥

अथ गन्धकस्य गन्धनाशनप्रकारः

सुगन्धिकं विचूर्णितं पचेत्तु दुग्धमध्यगम् ।
यदा घनत्वमाप्नुयात्तदा सुवर्चलारसम् ॥ ३३ ॥
क्षिपेदथो पुनः पचेच्छनैः शनैर्भिषग्वरः ।
जले फलत्रिकोद्भवे विनिक्षिपेत्ततो बुधः ॥ ३४ ॥
स्वगन्धमत्र गन्धको जहात्यशेषतो द्रुतम् ।
चिराशनार्थमीदृशं बलिं नियोजयेद्भिषक् ॥ ३५ ॥

अथ विशुद्धगन्धकस्य गुणाः

गन्धः शुद्धो गरविषहरः क्षुद्रकुष्ठेभसिंहः
कासं श्वासं हरति नितरां दद्रुदावानलश्च ।
आधव्याधप्रशमनपटुः काममाम निहन्यात्
दिव्यां दृष्टिं वितरतितरां जाठराग्निं प्रसूते ॥ ३६ ॥
सुगन्धिकः सुनिर्मलः सरो रसायनोत्तमः ।
कटूष्णवीर्यपाचनो रसेन्द्रवीर्यवर्द्धनः ॥ ३७ ॥
विकारान्नाशत्याश दुष्टसूत.शनोत्थितान् ।
दुष्टाहिभक्षणोत्थांश्च शिरोदाहादिकानपि ॥ ३८ ॥

अथ शुद्धगन्धकस्य मात्रा

रक्तिकातः समारभ्य रक्तिकाष्टकसंमितम् ।
प्राणाचार्यः प्रयुञ्जीत गन्धकं तु विशोधितम् ॥ ३९ ॥

अथ शुद्धगन्धकस्य आमयिकः प्रयोगः

विशोधितः सुगन्धिको निहन्ति बाह्यलेपतः ।
प्रकाममामवातकं चिरोत्थिताञ्च गृध्रसीम् ॥ ४० ॥
सुगन्धिकः सुनिर्मलो वराकषायसंयुतः ।
हरेदिहोर्ध्वगान् गदान् तथाग्निमान्द्यनाशनः ॥ ४१ ॥
सिंहपर्णकषायेण क्षयं हन्ति नवोत्थितम् ।

क्वाथेन कण्टकार्याश्च कासं श्वासं व्यपोहति ॥ ४२ ॥
रम्भापक्वफलेनेह चर्मदोषं विनाशयेत् ।
वह्निचूर्णेन सहितो निहन्ति बलहीनताम् ॥ ४३ ॥
विशोधितं गन्धकं तु तिलचूर्णेन शीलितम् ।
गुदामयोत्थं पायुस्थं विदरं नाशयत्यलम् ॥ ४४ ॥
यष्टी खण्डः स्वर्णपत्री मिश्रेया च समं समम् ।
चूर्णेनानेन वा युक्तः पायुस्थविदरान्तकः ॥ ४५ ॥
सर्काशिकः सुगन्धिकः फलत्रिकेण संयुतः ।
द्विमासमात्रसेवितः कफोत्थरोगनाशनः ॥ ४६ ॥
ज्योतिष्काबीजतैलं खलु विधिविहितं श्लक्ष्णचूर्णं वचायाः
गव्यञ्चाज्यं नवीनं दधिभवममलं तुल्यमेतत्त्रयं स्यात् ।
पामारिनष्टगन्धस्त्रितयपरिमितः सेवितो मासमात्रम्
यक्ष्माणञ्चान्त्रशोषं हरति हि चपलं गण्डमालाञ्च भीष्माम् ॥४७॥
दिव्यादृष्टिः संततं वीर्यवृष्टिश्चित्ते तुष्टिर्निर्भरं देहपुष्टिः ।
शौर्योत्कर्षो जायते वज्रमुष्टिर्नष्टातङ्को मासमात्रप्रयोगात् ॥४८॥
मृद्दारशृङ्गं सौभाग्यं कर्पूरं गन्धकन्तथा ।
सर्वमेतत्समं ग्राह्यं चूर्णमेषां प्रकल्पयेत् ॥ ४९ ॥
नारिकेलस्य तैलेन परिलिप्ता ह्यनारतम् ।
पामा नश्यति सप्ताहाच्चिरजापि सुदारुणा ॥ ५० ॥
सौभाग्यं शालनिर्यासः स्फुटिका च सुगन्धिकः ।
सर्वं समं समादाय चूर्णयेद्भिषजाग्रणीः ॥ ५१ ॥
निम्बूकस्वरसेनाथ सततं परिलेपनात् ।
विद्रावयति दद्रूणि द्रुतं नास्तीह संशयः ॥ ५२ ॥
शाल्मलीलघुमूलस्य चूर्णेन विमलं बलिम् ।
भक्षयेन्मासमेकन्तु शौर्यं वीर्यं विवर्धयेत् ॥ ५३ ॥

विशोधितं गन्धकं तु मधुना परिशीलितम् ।
धात्रीरसानुपानेन गलत्कुष्ठं निहन्त्यलम् ॥ ५४ ॥

दद्रुविद्रावणमलहरः

सिक्थतैलं तु विमलं भानुतोलकसंमितम् ।
विशोधितं गन्धकं च तोलकैकमितं शुभम् ॥ ५५ ॥
सुपुष्पितं तु सौभाग्यं चक्रमर्दस्य बीजकम् ।
वृक्षामयरजः स्वच्छं तोलकार्द्धमितं पृथक् ॥ ५६ ॥
अतिमन्दाग्निना पक्वं शीतं कुप्यां तु विन्यसेत् ।
मतो मलहरोऽयं तु दद्रुविद्रावणाह्वयः ॥ ५७ ॥
प्रलिप्तोऽयं मलहरो दिनसप्तकमात्रतः ।
उन्मूलयति दद्रूणि समूलं नेह संशयः ॥ ५८ ॥

गन्धकाद्यमलहरः

सिक्थतैलं सुविमलं रसतोलकसंमितम् ।
गन्धकं गिरिसिन्दूरं तोलकार्द्धमितं पृथक् ॥ ५९ ॥
टङ्कणं घनसारं च पृथक् माषद्वयोन्मितम् ।
दत्वा सम्मेल्य यत्नेन काचकुप्यां निधापयेत् ॥ ६० ॥
मतो मलहरोऽयं तु गन्धकाद्यसमाह्वयः ।
विनाशयत्याशु भृशं पामामत्यर्थदारुणाम् ॥ ६१ ॥

प्रथमो गन्धककल्पः

विशोधितः सुगन्धिको वराज्यभृङ्गसंयुतः ।
समाक्षिको विधानतस्त्रिमासमात्रसेवितः ॥ ६२ ॥
निहन्ति दारुणान् गदान् चिरोत्थितानपि द्रुतम् ।
कराति लोचनद्वयं विकाशि गृध्रनेत्रवत् ॥ ६३ ॥
दुग्धं सशर्करं कोष्णं त्वोदनं षष्टिकोद्भवम् ।
शीतवीर्यं भवेद्यच्च पथ्यमेतत्समासतः ॥ ६४ ॥

द्वितीयो गन्धककल्पः

नवनीताह्वयः शुद्धश्चूर्णमामलकोद्भवम् ।
तुल्यमेतद्द्वयं ग्राह्यं सप्तवारं विधानतः ॥ ६५ ॥
रसेन भावयेद् धान्याः शाल्मल्याश्च द्रवैस्तथा ।
शर्करामधुसंयुक्तं लिहेदनु पयः पिबेत् ॥ ६६ ॥
गगनानलमासनिषेवनतः
स्थविरोऽपि मनोजशराभिहतः ।
सुरतेऽविरतं खलु विह्वलयन्
रमयेद्रमणीशतकं सरसः ॥ ६७ ॥

तृतीयो गन्धककल्पः

मापार्द्धं विमलं गन्धं कोष्णेन पयसा पुमान् ।
भक्षयेत्प्रत्यहं मासं वीर्यवृद्धिः प्रजायते ॥ ६८ ॥
षण्मासंसेवनाच्चास्य दिव्यां दृष्टिन्तु विन्दति ।
सुवर्णवर्णसंकाशां दीप्तिं संतनुते तनौ ॥ ६९ ॥

चतुर्थो गन्धककल्पः

मापार्द्धं गन्धकं शुद्धं तिलतैलेन भक्षयेत् ।
नित्यं चोष्णजलेनेह पामादीनवसेचयेत् ॥ ७० ॥
सप्ताहत्रितयादेव पामाद्याः सकला रुजः ।
हरेत् सुवर्णवर्णाभः कायःसंजायते नृणाम् ॥ ७१ ॥

पञ्चमो गन्धककल्पः

गन्धकं निर्मलं मागधीगर्भितं पथ्यया संयुतं तुल्यमेतत् त्रयम् ।
सर्पिषा माक्षिकेनेह माषद्वयं भक्षयेद् यत्नतस्तत्र मासत्रयम् ॥ ७२
भोजनादौ सदा यन्त्रणावर्जितः
शीलयेत्प्रत्यहं ब्रह्मचारी नरः ।
तप्तचामीकरोद्भासिरम्याननः
शौर्यवीर्यान्वितो दिव्यदृष्टिर्भवेत् ॥ ७३ ॥

षष्ठो गन्धककल्पः

तैलसंशोधितं गन्धकं चूर्णितं
माषकार्द्धं लिहेत् क्षौद्रमध्यस्थितम् ।
नाशयेत्सत्वरं क्षुद्रकुष्ठोत्थितां
वेदनां दारुणां दीर्घकालोत्थिताम् ॥ ७४ ॥
मरिचं गन्धकं पश्चात्तैलेनेह सुपेषयेत् ।
अपामार्गजलेनापि ततो देहं प्रलेपयेत् ॥ ७५ ॥
घर्मे संशोषयित्वाथ स्नानं कुर्यात् सुभेषजैः ।
सप्ताहद्वितयेनैव क्षुद्रकुष्ठं व्यपोहति ॥ ७६ ॥

सप्तमो गन्धककल्पः

सौगन्धिकं तु विमलं गृह्णीयाद् भिषजां वरः ।
ततो गव्येन पयसा त्रिवारं खलु भावयेत् ॥ ७७ ॥
ततः फलत्रिकेणाथ चतुर्जातद्रवैस्तथा ।
गुडूच्या भृङ्गनीरेण भृङ्गेररसेन च ॥ ७८ ॥
अष्टवारं पृथग् युक्त्या भावयेद् रसकोविदः ।
सिद्धे रसायने तुल्यां सितां संयोज्य योजयेत् ॥ ७९ ॥
प्रत्यहं सेवितो गन्धो माषमात्रप्रमाणतः ।
मासमात्रप्रयोगेण निहन्ति विविधान् गदान् ॥ ८० ॥
धातुक्षयोत्थितान् रोगान् तथा कोष्ठसमाश्रितान् ।
प्रमेहान् शीर्षजान् रोगान् शूलं कुष्ठादिकानपि ॥ ८१ ॥
क्षाराम्ललवणादीनि कोपादीन् वनितासुखम् ।
द्विदलानि च शाकानि गन्धसेवी न भक्षयेत् ॥ ८२ ॥

अष्टमो गन्धककल्पः

विशुद्धसौगन्धिकचूर्णमादौ
विभावयेद् भृङ्गरसैस्त्रिवारम् ।

ततो घृतक्षौद्रहरीतकीभिः
सेवेत नित्यं खलु माषमात्रम् ॥ ८३ ॥
विधिना मितपथ्याशी मासद्वयनिषेवणात् ।
स्थविरोऽपि स्मराक्रान्तो निर्भरं तरुणायते ॥ ८४ ॥

नवमो गन्धककल्पः

रुवूकतैलसंयुतः सकौशिको वरान्वितः ।
विशुद्धपारदान्वितः सुगन्धिको निषेवितः ॥ ८५ ॥
निहन्ति मासमात्रतो भृशं कफोत्थितान् गदान् ।
समीरजांश्च पैत्तिकान् चिरोत्थितानपि द्रुतम् ॥ ८६ ॥
दृशा खगेश्वरोपमो बलेन भीमसन्निभः ।
रविप्रभस्तु तेजसा भवेत् स वज्रविग्रहः ॥ ८७ ॥

दशमो गन्धककल्पः

फलत्रिकं भृङ्गराजो विमलश्च सुगन्धिकः ।
त्रयमेतत्समं ग्राह्यं श्लक्ष्णचूर्णं प्रकल्पयेत् ॥ ८८ ॥
दिव्यदृष्टिर्वज्रकायो मासेनैकेन जायते ।
षण्मासमात्रयोगाच्च वलीपलितनाशनः ॥ ८९ ॥

अथ गन्धकतैलम्

आवर्तमाने पयसि क्षिपेद्वै
विशुद्धसौगन्धिकजं हि चूर्णम् ।
तदुद्भवक्षीरसमुत्थमाज्यं
गन्धस्य तैलं वितरेत्प्रतप्तम् ॥ ९० ॥
सुगन्धतैलं विनिहन्ति शीघ्रं
क्षुद्राणि कुष्ठानि विशेषतो वै ।
हरेद्विसर्पादिकरोगसङ्घं
विलेपनाद्वाशनतः प्रकामम् ॥ ९१ ॥

गन्धकतैलस्य द्वितीयोनिर्माणप्रकारः

सप्तधा लेपयेदर्कदुग्धेन व
वस्त्रमच्छं पुनर्वज्रिदुग्धेन च ।
पेषयेद् गन्धकं मन्थजेन त्वथो
वस्त्रमालेपयेत्तेन युक्त्या भिषक् ॥ ९२ ॥
गन्धलिप्तं पुनर्वस्त्रमापीडयन्
वर्तिकाकारतामानयेत्कोविदः ।
दंशयन्त्रस्थितां निम्नपात्रोन्मुखीं
ज्वालयेद्वर्तिकां युक्तितो वैद्यराट् ॥ ९३ ॥
हरेत्सुगन्धतैलन्तु पतितं काचभाजने ।
क्षुद्रकुष्ठादिरोगेषु मतिमान् सम्प्रयोजयेत् ॥ ९४ ॥

गन्धकतैलस्य तृतीयो निर्माणप्रकारः

कलांशत्र्यूषणोपेतं विमलं चूर्णितं बलिम् ।
विप्रकीर्योचितं वस्त्रे ततः सूत्रेण वेष्टयेत् ॥ ९५
यामं निमज्जयेत्तैले ततः सन्दंशयन्त्रगाम् ।
वर्तिं निम्नमुखीं कृत्वा काचपात्रमधो न्यसेत् ९६
ततः प्रज्वालयेद् युक्त्या गन्धो द्रवति बिन्दुशः ।
इदं सौगन्धिकं तैलं बुधैः श्रेष्ठतरं मतम् ॥ ९७ ॥
बिन्दुत्रयमितं तैलं ताम्बूलीदलसंस्थितम् ।
तत्समं विमलं सूतं संमर्द्याथ प्रयोजयेत् ॥ ९८ ॥
दिनत्रयप्रयोगेण दीपयत्युदरानलम् ।
आमं निवारयत्येव दिनैकमपि योजितम् ॥ ९९ ॥
कासश्वासहरः कामं ग्रहणीगजकेशरी ।
आमवातादिरोगघ्नः स्नेहोऽयं गन्धसम्भवः ॥ १०० ॥

गन्धकतैलस्य चतुर्थो निर्माणप्रकारः

ब्रह्मबीजोद्भवं श्लक्ष्णचूर्णं क्षिपेच्छागदुग्धे ततः शोषयेद्युक्तितः ।
षोडशांशं बलिं तत्र सम्मेलयेत्काचकुप्यां ततो विन्यसेत्कोविदः १०१
ततः पातालयन्त्रेण तैलं ग्राह्यं भिषग्वरैः ।
सत्वभूतं गन्धकस्य गन्धतैलं महोत्तमम् ॥ १०२ ॥
रक्तिद्वयं गन्धतैलं ताम्बूलीदलमध्यगम् ।
तैलार्द्धं रसराजन्तु शुद्धं तत्र विमिश्रयेत् ॥ १०३ ॥
अङ्गुल्यग्रेण सम्मर्द्य कृत्वा कज्जलिकां चरेत् ।
ताम्बूलं शीलयेत्पश्चाद् गन्धतैलस्य सेवकः ॥ १०४ ॥
अम्लं शाकादिकञ्चैव ककाराष्टकभेषजम् ।
उष्णवीर्यं यदन्यच्च तदपथ्यमिह स्मृतम् ॥ १०५ ॥
योगेनानेन पुरुषो वृद्धोऽपि तरुणायते ।
अपूर्ववत् प्रतिदिनं रमयेत् रमणीशतम् ॥ १०६ ॥
कासश्वासहरो बल्यो वलीपलितनाशनः ।
शोषसंशोषकः कामं क्षयकुञ्जरकेशरी ॥ १०७ ॥
शूलकालानलः सत्यं मेहवर्गनिषूदनः ।
एतत्तैलसमं लोके नान्यदस्ति रसायनम् ॥ १०८ ॥

अथ गन्धकद्रावकस्य निर्माणप्रकारः

एकस्मिल्लोहपात्रे तु बलिं शतपलोन्मितम् ।
निक्षिप्य चुल्लिकायाञ्च निधायाग्निं प्रदीपयेत् ॥ १०९ ॥
अपरस्मिन् मोरकञ्च सार्द्धषट्कपलोन्मितम् ।
निधाय चुल्ल्यामारोप्य वह्निं संधुक्षयेत्ततः ॥ ११० ॥
पिधानेनानयोर्युक्त्या भृशं संरोधयेन्मुखम् ।
नालिकाद्वितयं दीर्घं पात्रयोर्योजयेत् पृथक् ॥ १११ ॥
कोष्ठाकारेऽहिपात्रे च मुखं नालिकयोर्न्यसेत् ।

बलिसोरकयोरेवं धूमं सम्मिश्रयेद्बुधः ॥ ११२ ॥
दशाधिकद्विशतकपलं सलिलमाहरेत् ।
पात्रेऽन्यस्मिंश्च संस्थाप्य वह्नौ सन्तापयेद् भृशम् ॥ ११३ ॥
नलिकामुखतो बाष्पं नागपात्रेऽथ मेलयेत् ।
बाष्पसंयोगतश्चैव शतत्रयपलोन्मितः ॥ ११४ ॥
जायते गन्धकद्रावोपीताभोऽतिमनोहरः ।

गन्धकद्रावस्य नामानि

गन्धद्रावो बलिद्रावो गन्धाम्लश्च स कीर्तितः ॥ ११५ ॥

अशुद्धगन्धकद्रावस्य दोषाः

विशुद्धो गन्धकद्रावः सुधाधिकफलप्रदः ।
अविशुद्धो दोषकारी तस्मात्तं शोधयेद्बुधः ॥ ११६ ॥

अथ गन्धकद्रावकस्य शोधनप्रकारः

गन्धकद्रावकं प्राज्ञः काचकुप्यां निधापयेत् ।
अस्यां संयोज्य नालिकां मुखमस्या नियोजयेत् ॥ ११७ ॥
अन्यस्यां काचकुप्यान्तु पचेन्मृद्वग्निना भिषक् ।
तस्य तृतीयमंशन्तु जलांशमधिकं भवेत् ॥ ११८ ॥
तस्मात्तं प्रथमं यत्नादस्मादपनयेद् भिषक् ।
विशुद्धं गन्धकं द्रावं ततः कुप्यां निपातयेत् ॥ ११९ ॥
पात्रजं नागदोषं यज्जलांशमधिकञ्च यत् ।
गन्धद्रावो जहात्येवं निर्मलश्च परं भवेत् ॥ १२० ॥

पानार्थं सजलगन्धकद्रावस्य निर्माणप्रकारः

शीतांशुभागिकं शुद्धं गन्धकद्रावकं शुभम् ।
परिस्रुते तु सलिले रविभागमिते क्षिपेत् ॥ १२१ ॥
निधाय काचकुप्याञ्च विमलायां भिषग्वरः ।
दृढेनाथ पिधानेन रोधयेत् कूपिकामुखम् ॥ १२२ ॥

ततो निर्दिष्टरोगेषु मात्रयाऽतिप्रयत्नतः ।
गन्धद्रावं प्रयुञ्जीत रसतन्त्रविशारदः ॥ १२३ ॥

सजलगन्धकद्रावस्य मात्रा

आरभ्य शरबिन्दुभ्यः खाक्षिबिन्दुमत परम् ।
सजलं गन्धकद्रावं वीतशङ्कः प्रयोजयेत् ॥ १२४ ॥

सजलगन्धद्रावस्य सहपानम्

पलं सार्द्धपलं वापि पलद्वयमितं जलम् ।
सनीरगन्धद्रावस्य सहपाने प्रयोजयेत् ॥ १२५ ॥
यवान्याः शतपुष्पायास्त्वचो देवसुमस्य च ।
पृथक् परिस्रुतं तोयं सहपाने प्रदीयते ॥ १२६ ॥

अथ गन्धद्रावस्य गुणाः

गुल्मप्लीहगजाङ्कुशः क्रिमिहरः सर्वोदरातङ्कहृत् ।
वीर्योष्णस्तु विसूचिकामयहरः सङ्कोचको निर्भरम् ॥ १२७ ॥
आध्मानज्वरवेगरोधनपटू रक्तातिसारान्तकः ।
रक्तस्रावहरोऽग्निदीप्तिजननो गन्धोद्भवो द्रावकः ॥ १२८ ॥
तृषां विसूचिकोद्भवां हरत्ययं विशेषतः ।
तथातिघर्मरोधकः सदातिसारनाशनः ॥ १२९ ॥
विकारान् दारुणान् नित्यं दुष्टनागाशनोत्थितान् ।
नाशयत्यचिरादेव, तिमिरन्तु यथा रविः ॥ १३० ॥

इति गन्धकविज्ञानीयो नाम अष्टमस्तरङ्गः

अथ हिङ्गुलविज्ञानीयो नवमस्तरङ्गः

हिङ्गुलस्य नामानि

हिङ्गुलो हिङ्गुलञ्चैव हिङ्गूलं चेङ्गुलाह्वयम् ।
म्लेच्छं रक्तं सुरङ्गश्च चित्राङ्गं चूर्णपारदम् ॥ १ ॥
रसोद्भवो रसस्थानं रञ्जनं कपिशीर्षकम् ।
रक्तकायो हंसपादो दरदश्च प्रकीर्तितम् ॥ २ ॥

हिङ्गुलस्य स्वरूपम्

जपाकुसुमवर्णाभः पेषणे सुमनोहरः ।
महोज्ज्वलो भारपूर्णो हिङ्गुलः श्रेष्ठ इष्यते ॥ ३ ॥

हिङ्गुलस्य द्वौ भेदौ

प्रथमः खनिजोऽन्यस्तु कृत्रिमो हिङ्गुलो मतः ।
खनिजः खनितो जातः कृत्रिमो रसगन्धजः ॥ ४ ॥

कृत्रिमहिङ्गुलस्य निर्माणप्रकारः

वसुभागमितं गन्धं मृतं नेत्रयुगोन्मितम् ।
मृदङ्गयन्त्रे संस्थाप्य वारङ्गं भ्रामयेत्ततः ॥ ५ ॥
तस्य सम्भ्रामणादेव श्लक्ष्णचूर्णं प्रजायते ।
व्यावर्तनपिधानञ्च सम्भ्राम्य ह्यवतारयेत् ॥ ६ ॥
चूर्णं धूसरवर्णाभं यन्त्रान्निष्कासयेत्ततः ।
सुदृढायां ततः स्थाल्यां चूर्णमेतन्निधापयेत् ॥ ७ ॥
रेखान्वितमुखी स्थाली बुधैरत्र प्रशस्यते ।
व्यावर्तनमुखीमन्यां स्थालीं तस्यां निधापयेत् ॥ ८ ॥
स्थालीं सम्भ्राम्य परितो यत्नतो रोधयेन्मुखम् ।
ततः संस्थापयेच्चुल्यां वह्निं दद्याच्छनैः शनैः ॥ ९ ॥
अधःस्थालीकण्ठसंस्थं हिङ्गुलं तु समाहरेत् ।
ऊर्ध्वस्थालीतलस्थञ्च पुनः पक्त्वा समाहरेत् ॥ १० ॥

अशुद्धहिङ्गुलस्य दोषाः

अशुद्धो हिङ्गुलो मोहं प्रमेहं चित्तविभ्रमम्
आन्ध्यं कृमं तथा क्षेण्यं कुर्यात्तस्माद्विशोधयेत् ॥ ११ ॥

अथ हिङ्गुलशोधनस्य प्रथमः प्रकारः

हिङ्गुलं चूर्णितं खल्वे शृङ्गवेराम्भसा ततः ।
सप्तधा भावयेत्प्राज्ञो निर्मलो हिङ्गुलो भवेत् ॥ १२ ॥

द्वितीयः शोधनप्रकारः

हिङ्गुलं चूर्णितं खल्वे लकुचस्याम्भसा ततः ।
विभाव्य शोषयेद्वैद्यो हिङ्गुलः शुद्धिमाप्नुयात् ॥ १३ ॥

तृतीयः शोधनप्रकारः

सुचूर्णितं हिङ्गुलन्तु मेषीदुग्धेन भावयेत् ।
सप्तवारं प्रयत्नेन शुद्धिमायात्यनुत्तमाम् ॥ १४ ॥
अम्लवर्गोक्तभैषज्यभावितः सप्तधा पुनः ।
हिङ्गुलः परमां शुद्धिमाप्नोतीति किमद्भुतम् ॥ १५ ॥

चतुर्थः शोधनप्रकारः

निम्बूकस्वरसेनेह हिङ्गुलं श्लक्ष्णचूर्णितम् ।
विभावयेत्सप्तवारं क्षालयेद्बहुशोऽम्भसा ॥ १६ ॥
ततः संशोषयेद् घर्मे रसतन्त्रविधानवित् ।
एवं विशोधितं रक्तं वीतशङ्कः प्रयोजयेत् ॥ १७ ॥

शोधितहिङ्गुलस्य गुणाः

लोचनामयहरः कफापहः पित्तजामयनिषूदनः परम् ।
दुगरकामलाहरो जाठराग्निजननोऽथ पाचनः ॥१८॥
मेहवर्गपरितापनाशनो देहकान्तिबलबुद्धिवर्द्धनः ।
आमवातगजदर्पखण्डनो हिङ्गुलो विजयते ज्वरापहः ॥१९॥

शुद्धहिङ्गुलस्य प्रयोगः

बलिजातीफलाफूककणाविश्वसमन्वितम् ।
दरदं विनिहन्त्याशु वातं शुक्रसमाश्रितम् ॥ २० ॥
पिप्पलीविषसंयुक्तं दरदं परिशीलितम् ।
मध्वार्द्रकरसेनेह हन्ति वातज्वरं द्रुतम् ॥ २१ ॥
भयोत्थितं ज्वरं वापि पित्तश्लेष्मोद्भवं ज्वरम् ।
नवज्वरायमाणं च त्वामवातोद्भवं ज्वरम् ॥ २२ ॥
जातीफलाफूकमुस्तचन्द्रेन्द्रयवसंयुतम् ।
दरदं शीलितं हन्ति ह्यामातीसारमुल्वणम् ॥ २३ ॥
जातीफललवङ्गेन्द्रयवटङ्केन्दुसंयुतम् ।
दरदं विनिहन्त्याशु रुजमामातिसारजाम् ॥ २४ ॥

हिङ्गुलाद्यमलहरः

सिक्थतैलं सुविमलं भानुतोलकसंमितम् ।
सिन्दूरं दरदश्चैव तोलकार्द्धमितं क्षिपेत् ॥ २५ ॥
विमद्य मसृणे खल्वे काचकुप्यां तु विन्यसेत् ।
हिङ्गुलाद्यो मलहरः फिरङ्गव्रणरोपणः ॥ २६ ॥

हिङ्गुलामृतमलहरः

सिक्थतैलं सुविमलं सूर्यतोलकसंमितम् ।
तोलकार्द्धमितं चैव दरदं सुविचूर्णितम् ॥ २७ ॥
मृद्दारशृङ्गं सौभाग्यं कर्पूरं रसपुष्पकम् ।
स्फटिका गिरिसिन्दूरं पृथक् माषद्वयोन्मितम् ॥ २८ ॥
सम्मेल्य मसृणे खल्वे काचकुप्यां तु विन्यसेत् ।
मतो मलहरोऽयं तु हिङ्गुलामृतसंज्ञकः ॥ २९ ॥
हिङ्गुलामृतसंज्ञोऽयं पूयनिर्हरणः परम् ।
शोधनो रोपणश्चैव विविधव्रणरोपणः ॥ ३० ॥

व्रणपूरणयोगेन नाडीव्रणनिषूदनः ।
भगन्दरहरश्चापि समाख्यातो विशेषतः ॥ ३१ ॥

अथ हिङ्गुलाद्रससिन्दूरस्य निर्माणप्रकारः

निम्बूकद्रवसंशुद्धं क्षालितश्चाथ वारिणा ।
पलोन्मितं तु दरदं शुद्धं गन्धश्च तत्समम् ॥ ३२ ॥
श्लक्ष्णचूर्णं ततः कृत्वा काचकुप्यां निधापयेत् ।
रससिन्दूरविधिना वालुकायन्त्रगं पचेत् ॥ ३३ ॥
स्वाङ्गशीतं ततो ज्ञात्वा जपासुमसमप्रभम् ।
आहरेद्रससिन्दूरं रसागमविशारदः ॥ ३४ ॥

अस्य गुणादिनिरूपणम्

गुणा मात्राप्रभेदश्च प्रयोगश्चानुपानकम् ।
पथ्यापथ्यादिकश्चापि रससिन्दूरवन्मतम् ॥ ३५ ॥

श्रीसिद्धदरदामृतः

कर्षद्वयमितं खण्डं हिङ्गुलस्य समाहरेत् ।
भृशं कार्पासमूत्रेण वेष्टयेत्परितो भिषक् ॥ ३६ ॥
निधापयेदम्बरीषे चुल्लिकाधिष्ठिते ततः ।
पलद्वयोन्मितं तत्र पलाण्डुस्वरसं क्षिपेत् ॥ ३७ ॥
कर्षकञ्च वटक्षीरं ततोऽग्निं दीपयेद् भृशम् ।
शुष्के जलांशे चुल्लीतोऽम्बरीषमवतारयेत् ॥ ३८ ॥
स्वाङ्गशीतं ततो ज्ञात्वा रक्तखण्डं समाहरेत् ।
अम्बरीषं प्रमृज्याथ चुल्लिकायां निधापयेत् ॥ ३९ ॥
कर्षोन्मितं देवपुष्पचूर्णं तत्र प्रसारयेत् ।
ततो दरदखण्डञ्च निदध्याद् युक्तितो भिषक् ॥ ४० ॥
भल्लातकफलानाञ्च सार्द्धद्वादशकर्षकम् ।
स्तूपाकारतया तस्मिन् निदध्यात्परितो भिषक् ॥४१॥

देवपुष्पस्य चूर्णेन छिद्राण्यत्र प्रपूरयेत् ।
ततः प्रज्वालयेद्वह्निं रसतन्त्रविशारदः ॥ ४२ ॥
दग्धान् भल्लातकान् प्राज्ञो मध्यतश्चापसारयेत् ।
घृतं दशगुणं रक्तात् क्रमशो निक्षिपेत्ततः ॥ ४३ ॥
दग्धे चापि घृते प्राज्ञो हिङ्गुलं त्ववतारयेत् ।
कार्पासमूत्रभस्माथ संमृज्यापनयेद्भिषक् ॥ ४४ ॥
समर्पितोऽयं सिद्धेभ्यो यतोऽयं त्रिपुरद्विषा ।
भुवनेऽसौ ततः ख्यातः श्रीसिद्धदरदामृतः ॥ ४५ ॥

अथास्य गुणाः

ऊरुस्तम्भं त्वामवातं तथा पक्षवधाह्वयम् ।
शीताङ्गसंज्ञकञ्चापि सन्निपातं सुदारुणम् ॥ ४६ ॥
प्लीहोदरं दीर्घकालजातं दोषत्रयोत्थितम् ।
क्लैब्यञ्च नाशयत्याशु श्रीसिद्धदरदामृतः ॥ ४७ ॥
वैशिष्ट्यादनुपानानां करोति विविधान् गुणान् ।
मात्रयोचितया दत्तो रोगसङ्घञ्च नाशयेत् ॥ ४८ ॥

अस्य मात्रा

गुञ्जार्धसंमिता त्वस्य पूर्णमात्रा प्रशस्यते ।
बलाबलादिकं वीक्ष्य ह्रासयेच्चाथ वर्द्धयेत् ॥ ४९ ॥

हिङ्गुलीयो माणिक्यरसः

विशोधितं हिङ्गुलञ्च तालकाष्टकसंमितम् ।
सौगन्धिकञ्च तत्तुल्यं तथा शैलूषभूषणम् ॥ ५० ॥
पलाशपुष्पस्वरसैः पेषयेद्दिनसप्तकम् ।
शोषयित्वा रसञ्चाथ विदध्यात् श्लक्ष्णचूर्णकम् ॥ ५१ ॥
काचकुप्यां निधायाथ वालुकायन्त्रमध्यगम् ।
क्रमवृद्ध्यानलेनात्र पचेद्वै दिवसत्रयम् ॥ ५२ ॥

स्वतः शीतं ततो ज्ञात्वा कूपिकाकण्ठसंस्थितम् ।
रसमिन्द्ररसङ्काशं माणिक्यरसमाहरेत् ॥ ५३ ॥

हिङ्गुलीयमाणिक्यरसस्य गुणाः

ग्रहणीगदवारणदर्पहरस्त्वतिसारनिवारणदक्षतरः ।
रुधिरोत्थितरोगविनाशकरो बलवीर्यशरीरसमृद्धिकरः ।५४।
क्षुद्रकुष्ठहरः कामं वयःस्थापनकारकः ।
माणिक्यरससंज्ञोऽयं सर्वामयहरो मतः ॥ ५५ ॥

अस्य मात्रा

यवैकतः समारभ्य यवत्रितयसंमितम् ।
युञ्जीत रसमाणिक्यं बलकालाद्यपेक्षया ॥ ५६ ॥

श्रीसिद्धहिङ्गुलेश्वरः

विशोधितं हिङ्गुलञ्च धत्तूरमूलजद्रवैः ।
विभावयेत्सप्तवारं ततः संशोषयेद्बुधः ॥ ५७ ॥
तत्तुल्यं टङ्कणं क्षिप्त्वा श्लक्ष्ण चूर्णं प्रकल्पयेत ।
रसज्ञैः कीर्तितो नाम्ना श्रीसिद्धहिङ्गुलेश्वरः ॥ ५८ ॥
विश्वमोचरसोपेतं पुरुहूतयवान्वितम् ।
गुञ्जार्द्धप्रमितं दद्याद्रसतन्त्रविशारदः ॥ ५९ ॥
ततोऽनुपाययेच्छीघ्रं धान्यशीतकषायकम् ।
दाहमूर्च्छापिपासादीन् नाशयेद्वै ह्युपद्रवान् ॥ ६० ॥
पाचनो दीपनश्चायं नाडीगतिनियामकः ।
ज्वरघ्नः कृमिसंहारी कफघ्नो मृदुधारकः ॥ ६१ ॥
कोष्ठवातप्रशमनो भृशं वातानुलोमनः ।
नैतत्समो रसो लोके ज्वरातीसारनाशनः ॥ ६२ ॥

इति हिङ्गुलविज्ञानीयो नाम नवमस्तरङ्गः

अथ अभ्रकविज्ञानीयो दशमस्तरङ्गः

अभ्रकस्य नामानि

अभ्रकं गगनं भृङ्गमभ्रं व्योमाम्बरं तथा ।
वज्रं घनञ्च गिरिजं बहुपत्रमनन्तकम् ॥ १ ॥
आकाशमम्बरं शुभ्रं त्वमलं गरजध्वजम् ।
मेघाख्यमन्तरीक्षञ्च तदेव परिकीर्तितम् ॥ २ ॥

अभ्रकस्य चातुर्विध्यम्

अभ्रं सितारुणश्यामपीतवर्णविभेदतः ।
चतुर्विधं समाख्यातं कृष्णं तत्र गदापहम् ॥ ३ ॥

कृष्णाभ्रकस्य भेदाः

पिनाकनागमण्डूकवज्राह्वयविभेदतः ।
चतुर्विधन्तु कृष्णाभ्रं मतं रसविशारदैः ॥ ४ ॥

पिनाकाभ्रकस्य लक्षणम्

अग्नौ सन्तापितं यत्तु दलानि परिमुञ्चति ।
रसतन्त्ररहस्यज्ञैस्तत् पिनाकं प्रकीर्तितम् ॥ ५ ॥

तस्य दोषाः

पिनाकाभ्रं मलं रुध्वा कुरुते मरणं ध्रुवम् ।
कुष्ठादिकान्महारोगान् जनयत्यपि निश्चितम् ॥ ६ ॥

नागाभ्रकस्य लक्षणम्

पावकोत्तापितं यत्तु फूत्कारं परिमुञ्चति ।
क्रुद्धाहिश्वासवच्छीघ्रं नागाभ्रं तदिहोच्यते ॥ ७ ॥

तस्य दोषाः

नागाभ्रं सेवितं कुर्यान्महाघोरं भगन्दरम् ।
मण्डलं वा महाकुष्ठं तद्द्वयं वा न संशयः ॥ ८ ॥

मण्डूकाभ्रस्य लक्षणम्

अग्नौ सन्तापितं यत्तु भेकवत्कुरुते रवम् ।

उत्प्लुत्योत्प्लुत्य च पतेन्मण्डूकं तदिहोच्यते ॥ ९ ॥

तस्य दोषाः

मण्डूकसंज्ञकं त्वभ्रं सततं परिशीलितम् ।
अश्मरीं जनयत्याशु शस्त्रसाध्यमसंशयम् ॥ १० ॥

वज्राभ्रकस्य लक्षणम्

पावकोत्तापितं यत्तु विकृतिं नैव गच्छति ।
तिष्ठत्यग्नौ भिदुरतां वज्राभ्रं तत्प्रकीर्तितम् ॥ ११ ॥

तस्य गुणाः

सर्वश्रेष्ठं तु वज्राभ्रं महाव्याधिहरं परम् ।
देहसिद्धिकरञ्चापि जरावैरूप्यनाशनम् ॥ १२ ॥

जात्याभ्रकस्य स्वरूपम्

नीलाञ्जनोपमं स्निग्धं भारपूर्णं महोज्ज्वलम् ।
निर्मोच्यपत्रं मृदुलं त्वभ्रं श्रेष्ठमिहोच्यते ॥ १३ ॥

देशभेदेनाभ्रकस्य वैशिष्ट्यम्

अभ्रकं हिमशैलोत्थमुत्तमं परिकीर्तितम् ।
मध्यमं पूर्वशैलोत्थं त्वधमं दक्षिणाद्रिजम् ॥ १४ ॥

अभ्रकखननविधिः

गजप्रमाणं पुरुषप्रमाणं वा खानयेद्धि खनिमामयज्ञः ।
ततो गुणाढ्यं खलु भारपूर्णं समाहरेदभ्रकमञ्जनाभम् ॥ १५ ॥

अशोधिताभ्रकस्य दोषाः

बाधां विदध्याद्विविधां शरीरे हृत्पार्श्वपीडां तनुते नितान्तम् ।
शोफं क्षयं पाण्डुगदञ्च कुष्ठं त्वशोधिताभ्रं खलु मारितं यत् ॥ १६ ॥

धान्याभ्रकरणं चैव मारणं सत्वपातनम् ।
रसतन्त्रविशेषज्ञः शुद्धमभ्रं नियोजयेत् ॥ १७ ॥

अभ्रकशोधनस्य प्रथमः प्रकारः

वह्नौ सन्ताप्य गगनं काञ्जिके निक्षिपेद्बुधः ।

सप्तवारं प्रयत्नेन, ततः खल्वे निधापयेत् ॥ १८ ॥
अम्लेन केनचिद्वापि सुदृढं पेषयेत्ततः ।
एवं दिनैकं संपिष्टं त्वभ्रकं शुद्धिमाप्नुयात् ॥ १९ ॥

द्वितीयः शोधनप्रकारः

अभ्रकं वह्निसन्तप्तं सप्तवारं निषेचितम् ।
गोदुग्धे वा वराक्काथे शुद्धिमायात्यनुत्तमाम् ॥ २० ॥

तृतीयः शोधनप्रकारः

अभ्रकं दहनोत्तप्तं सप्तवारं निषेचितम् ।
बदरीक्काथिते पश्चात् पेषितं शुद्धिमाप्नुयात् ॥ २१ ॥
धान्याभ्रकमकृत्वैव घनमेवं विशोधितम् ।
मारणाय प्रयुञ्जीत रसतन्त्रविचक्षणः ॥ २२ ॥

चतुर्थः शोधनप्रकारः

अभ्रकं वह्निसन्तप्तं गव्ये पयसि निक्षिपेत् ।
सप्तवारं प्रयत्नेन, लुङ्गाद्यम्लद्रवेण तु ॥ २३ ॥
पेषयेदथ तन्त्रज्ञस्तण्डुलीयद्रवेण च ।
एवं दिनत्रयेणैव त्वभ्रं शुद्धिमुपैत्यलम् ॥ २४ ॥

धान्याभ्रकस्वरूपम्

अभ्रं कम्बलमध्यस्थं सधान्यं परिमर्दनात् ।
धान्येभ्यो निर्गतं यस्मात्तस्माद्धान्याभ्रमुच्यते ॥ २५

धान्याभ्रकस्य निर्माणप्रकारः

पादांशधान्यसंयुक्तं गगनं कम्बलोदरे ।
निक्षिप्य रोधयेत्सम्यक् मुखं सूत्रेण बुद्धिमान् ॥ २६ ॥
दिनैकं स्थापयेन्नीरे क्लिन्नतां याति तद्यथा ।
सुक्लिन्नश्चाथ यत्नेन पाणिभ्यां मर्दयेद् दृढम् ॥ २७ ॥
तस्मिन्नेव जले त्वभ्रं यथा सर्वं परिस्रवेत् ।
संशोष्य चाथ सलिलं पुटयोगेन मारयेत् ॥ २८ ॥

अभ्रकमारणे पुटसङ्ख्यानियमः

विंशत्यादिः शतान्तस्तु पुटो रोगनिवृत्तये ।
शतादिस्तु सहस्रान्तः प्रशस्तश्च रसायने ॥ २९ ॥

अभ्रकस्य प्रथमो मारणप्रकारः

धान्याभ्रकं समादाय कासमर्दभवैर्द्रवैः ।
दिनैकं पेषयित्वाथ चक्रिकाकारतां नयेत् ॥ ३० ॥
ततो गजपुटं दद्याद् दशवारं विधानतः ।
रविक्षीरैस्ततो दद्यात्तद्वदेव पुटानि तु ॥ ३१ ॥
एवं तु विंशतिपुटैरेवाभ्रस्य मृतिर्भवेत् ।
सिन्दूरसदृशं भस्म जायते नात्र संशयः ॥ ३२ ॥

द्वितीयो मारणप्रकारः

धान्याभ्रकं समादाय नागिनीदलजैर्द्रवैः ।
तद्वद्वासारसेनापि मीनाक्ष्याः स्वरसेन च ॥ ३३ ॥
न्यग्रोधपयसा चापि तद्वदेव पुटेद्भिषक् ।
एवं विंशतिवारेण गगनं पञ्चतां व्रजेत् ॥ ३४ ॥

तृतीयो मारणप्रकारः

धान्याभ्रकं समादाय तण्डुलीयोद्भवैर्द्रवैः ।
दिनत्रयं पेषयित्वा ततश्च कृतचक्रिकम् ॥ ३५ ॥
पुटेद्गजपुटेनैव दशवारं प्रयत्नतः ।
ततः पुनर्नवानीरैस्तद्वदेव पुटेद्भिषक् ॥ ३६ ॥
वटशुङ्गकषायेण तद्वदेव पुटेत्तथा ।
एवं त्रिंशत्पुटैरेव गगनस्य मृतिर्भवेत् ॥ ३७ ॥

चतुर्थो मारणप्रकारः

धान्याभ्रं पञ्चवारं प्रथममिह पुटेन्मुस्तकक्काथयोगात् ।
रम्भानीरेण तद्वत्तदनु च सलिलैस्तण्डुलीयप्रसूतैः ॥ ३८ ॥
भृङ्गोत्थेनापि वारा तदनु खलु वरानीरपूरेण पिष्ट्वा ।

दत्त्वा गन्धञ्च तुल्यं सकृदिह पुटितो वारिदो याति मृत्युम्३९

पञ्चमो मारणप्रकारः

धान्याभ्रकं समादाय रविक्षीरैर्विमर्दयेत् ।
रविमूलद्रवैर्वापि दिनमेकं निरन्तरम् ॥ ४० ॥
ततः संशोषयेद् घर्मे गगनं कृतचक्रिकम् ।
रविपत्रैश्च संवेष्ट्य सप्तवारं विधानतः ॥ ४१ ॥
पुटेद् गजपुटेनैव रसतन्त्रविशारदः ।
ततो न्यग्रोधमूलोत्थैः क्वाथैर्दद्यात्पुटत्रयम् ॥ ४२ ॥
तद्वद्रम्भारसेनापि सप्तवारं पुटेद्भिषक् ।
एवं स्वल्पैः पुटैरेव गगनं मृतिमाप्नुयात् ॥ ४३ ॥

षष्ठो मारणप्रकारः

क्षीरत्रयं काकमाची गोक्षुरः खरमञ्जरी ।
वटप्ररोहो गोमूत्रं तुलसी कदलीशिफा ॥ ४४ ॥
एभिरभ्रं विमर्द्याथ दशवारं पृथक् पृथक् ।
पुटेत्पुटविधानज्ञः क्रमेणैव भिषग्वरः ॥ ४५ ॥
शतधा पुटनादेवं रक्तोत्पलसमप्रभम् ।
निश्चन्द्रं जायते भस्म सर्वदोषविवर्जितम् ॥ ४६ ॥

सप्तमो मारणप्रकारः

धान्याभ्रक समादाय वस्वशगुडमयुतम् ।
वर्धमानदलद्रावैर्मर्दयित्वा द्वियामकम् ॥ ४७ ॥
वेष्टयेद् वटपत्रैश्च गगनं कृतचक्रिकम् ।
ततः कार्पाससूत्रेण पत्रप्रान्तेषु रोधयेत् ॥ ४८ ॥
ततो गजपुटं दद्यात्सप्तवारं विधानतः ।
निश्चन्द्रिकं भवेद्भस्म गगनस्य न संशयः ॥ ४९ ॥

अष्टमो मारणप्रकारः

धान्याभ्रकं समादाय मूलिकाया द्रवैर्दृढम् ।

पेषयेद्दिनमेकन्तु द्विदिनम्वा भिषग्वरः ॥ ५० ॥
वेष्टयेद्वटपत्रैश्च गगनं कृतचक्रिकम् ।
एकविंशतिवाराणि पुटेदेवं प्रयत्नतः ॥ ५१ ॥
निश्चन्द्रिकं भवेद्भस्म निर्विकारं गुणोत्तरम् ।
एवं मृतं तु गगनं वीतशङ्कः प्रयोजयेत् ॥ ५२ ॥

नवमा मारणप्रकारः

वटप्ररोहक्काथन धान्याभ्रं परिपेषितम् ।
एरण्डपत्रैरावेष्ट्य पुटयेत्कृतचक्रिकम् ॥ ५३ ॥
दशवारं पुटित्वैवं पुटेत्क्षुद्राकषायतः ।
वासया कलिवृक्षस्य क्काथेन च तथा पुटेत् ॥ ५४ ॥
चत्वारिंशत्पुटैरेवं गगनं मृतिमाप्नुयात् ।
निश्चन्द्रिकं भवेद्भस्म क्षयकासादिनाशनम् ॥ ५५ ॥

मृताभ्रकस्य लक्षणम्

निश्चन्द्रश्चारुणं स्वच्छं सुसूक्ष्मं स्पर्शकोमलम् ।
अभ्रं मृतं विजानीयाद्रसतन्त्रविचक्षणः ॥ ५६ ॥

अभ्रकस्य मारको गणः

क्षीरत्रयं काकमाची मुस्ता घृतकुमारिका ।
वटप्ररोहो गोमूत्रं बिल्वमूलदले वृषः ॥ ५७ ॥
फलत्रिकमजारक्तं कण्टकारी कदम्बकः ।
अग्निमन्थः शालिपर्णी श्रीपर्णी पाटली गुडः ॥ ५८ ॥
तिलपर्णी पृश्निपर्णी गोक्षुरः खरमञ्जरी ।
शुक्लसिद्धार्थको लोध्रः बृहती हिलमोचिका ॥ ५९ ॥
धत्तूरः कासमर्दश्च मातुलानी गुडूचिका ।
मारिषस्तुलसी दूर्वा वाजिगन्धा च तिक्तका ॥ ६० ॥
मण्डूकपर्णी मदनः पिण्डी तगरमेव च ।
शङ्खपुष्पी नागवल्ली घोण्टा श्वेतपुनर्नवा ॥ ६१ ॥

आखुपर्णी सप्तपर्णः रम्भाकन्दरसस्तथा ।
भृङ्गराजो देवदारु तालमूली च मालती ॥ ६२ ॥
अगस्त्यपत्रं तालीशं चित्रकं जलकुम्भिका ।
दाडिमस्य दलञ्चैव तण्डुलीयकमेव च ॥ ६३ ॥
एरण्डमूलपत्राणि श्योनाको वस्त्ररञ्जनी ।
पालङ्क्या भद्रमुस्ता च मीनाक्षी कोकिलाक्षकः ॥ ६४ ॥
पूर्वाचार्यैः कीर्तितोऽयमभ्रस्य मारको गणः ।
यथारोगं यथालाभं भेषजैः पुटयेद् घनम् ॥ ६५ ॥

अभ्रकभस्मनो लोहितीकरणम्

गाङ्गेरुकी भद्रमुस्ता वटक्षीरन्तथैव च ।
वटमूलजलम्वापि हरिद्राया द्रवस्तथा ॥ ६६ ॥
समङ्गाक्वथितश्चैव घनमेभिःसुपेषयेत् ।
पुटद्वयं त्रयम्वापि वितरेद्भिषजां वरः ॥ ६७ ॥
निश्चन्द्रिकश्च मृदुलं रक्तोत्पलदलप्रभम् ।
गगनस्य भवेद्भस्म ततः कार्येषु योजयेत् ॥ ६८ ॥

अभ्रकभस्मनोऽमृतीकरणम्

मारितं त्वतियत्नेन दशभागिकमभ्रकम् ।
त्रिफलाक्वथितं चैव नवं षोडशभागिकम् ॥ ६९ ॥
नागभागिकमुस्राज्यं दत्वा लोहस्य भाजने ।
पाचनाज्जायते रम्यममृतीकरणं वरम् ॥ ७० ॥

द्वितीयः प्रकारः

कन्याम्बुमेघगव्याज्यं कलादिकृतपनांशकम् ।
पचेन्मन्दानलेनैतदमृतीकरणं वरम् ॥ ७१ ॥

तृतीयः प्रकारः

मृताभ्रसमितं गव्यमाज्यं दत्वाभ्रकं पचेत् ।
अमृतीकृतमेवन्तु घनं कार्येषु योजयेत् ॥ ७२ ॥

मृताभ्रकस्य गुणाः

अभ्रं स्निग्धं परमशिशिरं स्वादु चायुष्यमग्र्यं
केश्यं वर्ण्यं रुचिकरमलं दीपनं चातिबल्यम् ।
नेत्र्यं मेधां जनयतितरां स्तन्यसम्वर्द्धनञ्च
क्षेत्रे स्थैर्य्यं वितरति परं दीपनं पुष्पकेतोः ॥ ७३ ॥
क्षिप्रं घोरां दलयति महारोगसंघातभीतिं
स्वान्ते प्रीतिं जनयति परं नर्महासे च यूनोः ।
देहे शक्तिं वितरतितरां बह्वपत्यप्रदात्रीं
कार्यालस्यं हरति सुतरामभ्रकं सेव्यमानम् ॥ ७४ ॥

अथ अभ्रकस्य आमयिकः प्रयोगः

रसमिन्दूरसंयुक्तं मृताभ्रं नाशयेज्ज्वरान् ।
मक्षौद्रं सकणञ्चापि जीर्णज्वरविनाशनम् ॥ ७५ ॥
मक्षौद्रं सवरं व्योम दृष्टिशक्तिकरं परम् ।
मव्योषं सघृतञ्चैतद् ग्रहणीं नाशयेत् क्षणात् ॥ ७६ ॥
हरीतकीगुडोपेतं शर्करलासमन्वितम् ।
मृताभ्रं सेव्यमानन्तु रक्तपित्तहरं परम् ॥ ७७ ॥
मव्योषं सवरञ्चैव चातुर्जातकसंयुतम् ।
मक्षौद्रं क्षपयेदर्शः पाण्डुक्षयहलीमकान् ॥ ७८ ॥
मृताभ्रं रजनीयुक्तं कणया मधुनापि च ।
मासमेकं लिहेत्प्राज्ञो मेहरोगाद्विमुच्यते ॥ ७९ ॥
मृतकाञ्चनसंयुक्तं मृताभ्रं मासमेवितम् ।
धातुवृद्धिकरं पुंसां विशेषात्क्षयनाशनम् ॥ ८० ॥
गुडूचीसत्वसंयुक्तं मेहवर्गप्रणाशनम् ।
तारस्वर्णयुतं त्वभ्रं शुक्रसन्तानकारकम् ॥ ८१ ॥
भूधात्रिकागोक्षुरचन्द्रवालासितान्वितं गव्यघृतेन लीढम् ।

संसेव्यमानं गगनं तु तूर्णं विनाशयेद् दारुणमूत्रकृच्छ्रम् ॥८२
क्षाराष्टकयुतं त्वभ्रं मूत्राघातं विनाशयेत् ।
अश्मरीं मूत्रकृच्छ्रञ्च विशेषादग्निदीपनम् ॥ ८३ ॥
मूर्वाक्काथसमायुक्तं मृताभ्रं व्रणनाशनम् ।
पयस्यागव्यदुग्धाभ्यां परमं बलवर्द्धनम् ॥ ८४ ॥
भल्लातकान्वितं व्योम त्वर्शांसि क्षपयेद् ध्रुवम् ।
लवङ्गक्षौद्रसंयुक्तं धातुवृद्धिकरं परम् ॥ ८५ ॥
विजयास्वरसोपेतं जातीफलसमन्वितम् ।
मृताभ्रं जुषतां पुंसां शुक्रस्तम्भः प्रजायते ॥ ८६ ॥
विश्वभेषजकर्पाष्करान्वितं
विप्रयष्टितुरगीसमन्वितम् ।
सेवितं समधु मारिताभ्रकं
नाशयेज्झटिति मारुतामयम् ॥ ८७ ॥
अभ्रं कज्जलिकोपेतमर्जुनक्काथभावितम् ।
कृमिजं श्लैष्मिकं वापि विनिहन्ति हृदामयम् ॥ ८८ ॥
ससितं सचतुर्जातं त्वभ्रं पित्तामयापहम् ।
अथवा ससितं गव्यदुग्धेन परिशीलितम् ॥ ८९ ॥
पिप्पलीकट्फलक्षौद्रैर्मृताभ्रं माससेवितम् ।
अतिमात्रं निहन्त्याशु सर्वानेव कफामयान् ॥ ९० ॥

सत्वानां वैशिष्ट्य ।

योगेषूपरसादीनां प्रयोगे सत्वयोजनम् ।
गुणोत्तरं भवेद्यस्मात्तस्मात्सत्वं विशिष्यते ॥ ९१ ॥

अभ्रकसत्वपातनस्य प्रथमः प्रकारः

पादांशसौभाग्यरजःसमेतं पिष्टं मुसल्याः स्वरसेन सार्द्धम् ।
कोष्ठ्यां निधायाभ्रकमत्र गाढं त्वाध्मापितं मुञ्चति सत्वमच्छम् ।९२।

द्वितीयः सत्वपातनप्रकारः

सम्यक्पेषयेद्धनरजः खलु काञ्जिकस्थं
पश्चात्तथैव खलु सूरणकन्दतोयैः ।
रम्भार्द्रकन्दजरसैरपि भावयित्वा
तुर्यांशटङ्कणकणाल्पकमीनयुक्तम् ॥ ९३ ॥
संमेल्य सैरिभमलञ्च विधाय पिण्डान्
कोष्ठ्यां निधाय च ततः प्रधमेद् दृढाग्नौ ।
अभ्रं विमुञ्चति ततो निजसत्वमाशु
प्राज्ञः प्रयोगनिवहेषु नियोजयेद्धि ॥ ९४ ॥

तृतीयः सत्वपातनप्रकारः

वासायास्तण्डुलीयस्य काममर्दस्य च द्रवैः ।
हंसपाद्याश्च मत्स्याक्ष्याः काण्डवल्या द्रवैस्तथा ॥ ९५ ॥
पृथक् सम्पेष्य गगनं घर्मे संशोषयेद्बुधः ।
गोधूमचूर्णं सौभाग्यं क्षुद्रमीनाश्च वै पृथक् ॥ ९६ ॥
वस्त्रांशकं विनिक्षिप्य सम्यक् सम्पेषयेद्बुधः ।
पञ्चाजं पञ्चगव्यं वा घर्मे दत्वा विशोषयेत् ॥ ९७ ॥
गोलकानथ निर्माय युक्त्या संस्थापयेद्भिषक् ।
अधःपातनकोष्ठ्यान्तु ध्मात्वा सत्वं समाहरेत् ॥ ९८ ॥

अथ चतुर्थः सत्वपातनप्रकारः

सौभाग्यं देवधूपश्च गुडः सर्जरसस्तथा ।
ऊर्णा लाक्षा च पिण्याकं क्षुद्रमीनन्तथैव च ॥ ९९ ॥
छागीदुग्धेन सम्पेष्य विदध्याद् गोलकान् भिषक् ।
स्थापयेद् वज्रमूषायां गगनं कृतगोलकम् ॥ १०० ॥
कोष्ठिकायां निधायाथ तीव्राग्नौ प्रधमेद् घनम् ।
अनेन विधिना सत्वं द्रुतमेव प्रजायते ॥ १०१ ॥

अभ्रकसत्वस्य पिण्डीकरणम्

मित्रपञ्चकसंयुक्तं खसत्त्वं चूर्णसन्निभम् ।
मूषायां विनिधायाथ प्रधमेत्कोकिलानले ॥ १०२ ॥
इत्थं तीक्ष्णतरं ध्मातमेकतां याति कांस्यवत् ।
पिण्डीभूतं ततः सत्वं शोधनार्थं प्रयोजयेत् ॥ १०३ ॥

अभ्रकसत्वस्य सामान्यं शोधनम्

त्रिफलासलिले वापि वटमूलकषायतः ।
अम्लेन काञ्जिकैर्वापि खसत्वं शोधयेद्भिषक् ॥ १०४ ॥

विशेषशोधनम्

सत्वस्य गोलकं ध्मात्वा भृशं सन्तापयेद्बुधः ।
काञ्जिके चाथ निर्वाप्य लोहदण्डेन कुट्टयेत् ॥ १०५ ॥
पुनः पुनः सम्प्रताप्य यावदायाति चूर्णताम् ।
गोघृतेन त्रिधा वापि धात्रीनीरेण भर्जयेत् ॥ १०६ ॥
भर्जने भर्जने कार्यं खल्वे सत्वविमर्दनम् ।
ततः पुनर्नवानीरैः सिंहास्यस्वरसेन च ॥ १०७ ॥
काञ्जिकेनापि सम्मेल्य भृशं सम्पेषयेद्भिषक् ।
इत्थं विशोधितं व्योमसत्वं मारणसम्मतम् ॥ १०८ ॥

अभ्रकसत्वस्य मारणम्

विशोधितं व्योमसत्वं तदर्धं सूतगन्धकम् ।
निक्षिप्य मर्दयेत्खल्वे काचकूपीगतं ततः ॥ १०९ ॥
पचेत्तु वालुकायन्त्रे विधानज्ञो भिषग्वरः ।
इत्थं नातिचिरादेव खसत्वं याति पञ्चताम् ॥ ११० ॥

द्वितीयो मारणप्रकारः

द्वौ भागौ घनसत्वस्य भागश्च रसगन्धयोः ।
श्लक्ष्णपिष्टं ततः कृत्वा सप्तवारं प्रयत्नतः ॥ १११ ॥
गामयाम्ना पचत्प्राज्ञः खसत्वस्य मृतिर्भवेत्

एवं मृतं व्योमसत्वं वीतशङ्कः प्रयोजयेत् ॥ ११२ ॥

अभ्रसत्वस्य गुणाः

अभ्रसत्वं सुशिशिरं मधुरं रुचिरं परम् ।
सुस्निग्धं केश्यमायुष्यं त्रिदोषघ्नं रसायनम् ॥ ११३ ॥
प्रौढाङ्गना मदविचूर्णनचारुदक्षः
सिंहोपमप्रचुरपुत्रवृतः सुवृत्तः ।
लावण्यपूरपरिपूरितवक्त्रचन्द्रो
जीवेच्छतञ्च शरदां घनसत्वसेवी ॥ ११४ ॥
मृताभ्रसत्वादपरं भैषज्यं नास्ति पुष्टिदम् ।
विशेषात् पुंस्त्वजननं वयसः स्थापनन्तथा ॥ ११५ ॥
नास्त्यनेन समं लोके निर्विकारं गुणोत्तरम् ।
त्रिदोषघ्नञ्च भैषज्यं त्वन्यद् भैषज्यमण्डले ॥ ११६ ॥

अभ्रकसेविनां वर्जनीयानि वस्तूनि

करीरं कारवेल्लञ्च कर्कटीं कोलमम्लकम् ।
तैलं क्षारञ्च धृन्ताकं नाश्नीयादभ्रसेवकः ॥ ११७ ॥

अभ्रकस्य प्रथमः कल्पः

मृताभ्रं व्योषसंयुक्तं विडङ्गामलकान्वितम् ।
केशराजरसेनेह सलिलेनैव वा भिषग् ॥ ११८ ॥
खल्वे सम्पेषयेत्प्राज्ञः गुटिकाः कारयेत्ततः ।
छायायां शोषयित्वा च काचकुम्भे निधापयेत् ॥ ११९ ॥
एकैकां गुटिकां प्राज्ञः समश्नीयान्निरन्तरम् ।
मासषट्कं त्रिमासं वा वैद्यवाचि कृतादरः ॥ १२० ॥
दिव्यदृष्टिर्दीर्घकायो दिनेशद्युतिदीप्तिमान् ।
दृढदन्तो भवेद्रूपे द्वितीय इव दर्पकः ॥ १२१ ॥
अन्त्रशोषं त्वस्थिशोषं शोषं यक्ष्माणमुल्बणम् ।

चिरोत्थितान् पञ्चकासान् सभेदं श्वासमुद्धतम् ॥ १२२ ॥
अर्शांसि ग्रहणीं पाण्डुं कामलां कुम्भकामलाम् ।
कुष्ठान्यष्टादशात्यर्थं निहन्यादामवातकम् ॥ १२३ ॥
वातपित्तकफोद्भूतान् मृत्युकल्पानिहामयान् ।
सर्वानेव निहन्त्याशु वज्रकल्पोऽयमादिमः ॥ १२४ ॥

अभ्रकस्य द्वितीयः कल्पः

अभ्रायःसूतवलयः दिगङ्गयुगदङ्मिताः ।
भावयेत्तु वरानीरैः सप्तवारं विधानतः ॥ १२५ ॥
भृङ्गद्रावैः पृथक् तद्वत् शिग्रुतक्ताग्रजद्रवः ।
गुटिकाः कारयित्वा च स्थापयेत्काचभाजने ॥ १२६ ॥
कणया त्वथ जीर्णेन गुडेनापि समान्विताम् ।
एकैकां गुटिकां खादेदशेषानामयान् हरेत् ॥ १२७ ॥
षण्मासाज्जायते मर्त्यो भीमसेन इवापरः ।
प्रज्ञया गुरुसौदर्यश्चक्षुषा गरुडोपमः ॥ १२८ ॥

इति अभ्रकविज्ञानीयो नाम दशमस्तरङ्गः

अथ तालकादिविज्ञानीय एकादशस्तरङ्गः

अथ तालकस्य नामानि

हरितालं मतं तालं तालकं नटभूषणम् ।
नटमण्डनकञ्चापि मतं शैलूषभूषणम् ॥ १ ॥
विडालकं चित्रगन्धं पिञ्जरं वंशपत्रकम् ।
आलं पीतनकञ्चापि कथितं मल्लगन्धजम् ॥ २ ॥
तालकं जायते यस्मान्मल्लगन्धकमिश्रणात् ।
तस्माद्भिषग्वरैरेतन्मल्लगन्धजमुच्यते ॥ ३ ॥

तालकस्य द्वौ भेदौ

तालकं द्विविधं ख्यातं रससिद्धैः पुरातनैः ।
प्रथमं पत्रतालं स्याद् द्वितीयं पिण्डतालकम् ॥ ४ ॥

पत्रतालकस्य स्वरूपम्

सुवर्णवर्णं विमलं गुरु चापि महोज्ज्वलम् ।
तनुपत्राचितं स्निग्धं मतं तत्पत्रतालकम् ॥ ५ ॥

पिण्डतालस्य स्वरूपम्

निष्प्रभं स्वल्पसत्वञ्च पत्रहीनं तथा लघु ।
विशेषतः पिण्डरूपं स्मृतं तत्पिण्डतालकम् ॥ ६ ॥

पत्रपिण्डतालयोर्वैशिष्ट्यम्

पत्रतालं त्रिदोषघ्नं कुष्ठरोगहरं परम् ।
वातरक्तप्रशमनं परमेतद्रसायनम् ॥ ७ ॥
पिण्डतालं समाख्यातं भृशं स्त्रीपुष्पहारकम् ।
पत्रतालात्स्वल्पगुणं विशेषाद्धेयमेव तत् ॥ ८ ॥

कृत्रिमतालस्य निर्माणप्रकारः

विशोधितं शङ्खविषं मरुत्सङ्ख्यकभागिकम् ।
तत्वभागिकमत्यच्छं गन्धकं विमलीकृतम् ॥ ९ ॥
खल्वे निक्षिप्य यत्नेन मेलयेत्तु शनैः शनैः ।
मिलितं तु ततो ज्ञात्वा विधानज्ञो भिषग्वरः ॥ १० ॥
पचेन्मन्दानलेनैतद् यन्त्रे डमरुकाभिधे ।
स्वाङ्गशीते ततश्चोर्ध्वसंलग्नं तालकं हरेत् ॥ ११ ॥
विशुद्धमल्लगन्धाभ्यां तालकं यदि निर्मितम् ।
भिषग्वरस्तदा तालं नैवेह खलु शोधयेत् ॥ १२ ॥

अशोधिततालकस्य दोषाः

[गीतिका]

अविशोधितं तु तालं परिशीलितं प्रकामम् ।

जनयत्यनल्पदाहक्षोभप्रकम्पतोदान् ॥ १३ ॥
मलिनीकरोति गात्रं प्रकरोति कुष्ठभीतिम् ।
कमनीयतां प्रकामं विनिहन्ति कायजाताम् ॥ १४ ॥
अशुद्धं तालकं कुर्याद् रोगान् वातकफोद्भवान् ।
मृत्युशङ्काकरान् यस्माद् भिषक् तस्माद्विशोधयेत् ॥ १५ ॥

तालकशोधनस्य प्रथमः प्रकारः

[गीतिका]

सुविचूर्णितं तु तालं खलु पोट्टलीगृहस्थम् ।
नवनिम्बुकोत्थवारा त्विह दोलिकाख्ययन्त्रे ॥ १६ ॥
विपचेद्विधानविज्ञः सततं तु याममेकम् ।
गृहवारिणा च यामं विमलत्वमेति नूनम् ॥ १७ ॥
विधिना ह्यनेन यत्नाद्विमलीकृतं तु तालम् ।
विनियोजयेद्रसादौ नियतं तु वीतशङ्कः ॥ १८ ॥

द्वितीयः शोधनप्रकारः

तालकं चूर्णयित्वा तु पोट्टल्यां विनिधाय च ।
दोलायन्त्रे पचेद्यामं कूष्माण्डसलिले भिषक् ॥ १९ ॥
यामैकं चूर्णतोयेन त्रैफलेन जलेन वा ।
इत्थं यामद्वयेनैव शुद्धिमायात्यनुत्तमाम् ॥ २० ॥

तृतीयः शोधनप्रकारः

तालचूर्णन्तु पोट्टल्यां न्यस्य दोलागतं पचेत् ।
तिलक्षारजलेनैव याममात्रं भिषग्वरः ॥ २१ ॥
यामैकं स्वेदनादेवं तालं शुद्धिमवाप्नुयात् ।
इत्थं विशोधितं तालं वीतशङ्कः प्रयोजयेत् ॥ २२ ॥

चतुर्थः शोधनप्रकारः

पोट्टल्यां निहितं तालचूर्णं दोलागतं पचेत् ।
शाल्मलीमूलतोयेन याममेकं भिषग्वरः ॥ २३ ॥
यामैकं स्वेदनादेवं तालकं शुद्धिमाप्नुयात् ।
अथवा तद्द्रवेणैव दिनसप्तकभावनात् ॥ २४ ॥

पञ्चमः शोधनप्रकारः

चूर्णीकृतं पत्रतालं चूर्णनीरेण भावयेत् ।
सप्तवारं प्रयत्नेन शुद्धिमायात्यनुत्तमाम् ॥ २५ ॥

तालकमारणस्य प्रथमः प्रकारः

विमलं तालमादाय भिषक् पौनर्नवे रसे ।
दिनैकं खल्वयन्त्रे च पेषयित्वाऽथ शोषयेत् ॥ २६ ॥
घनीभूतं ततो ज्ञात्वा चक्रिकाः कारयेद्भिषक् ।
सम्यक् ताः शोषयित्वा च भस्मयन्त्रेण वै पचेत् ॥ २७ ॥
क्षारैः पौनर्नवैश्चात्र स्थाल्यर्द्धं परिपूरयेत् ।
निधाय चक्रिकाश्चाथ क्षारैस्तैरेव पूरयेत् ॥ २८ ॥
वह्निं प्रदापयेत् यत्नाद्विधानज्ञो निरन्तरम् ।
मल्लगन्धजमवेन्तु म्रियते नात्र संशयः ॥ २९ ॥

द्वितीयो मारणप्रकारः

विमलं हरितालन्तु पञ्चतोलकसंमितम् ।
पिप्पलत्वक्कषायेण वस्त्रपूतेन भावयेत् ॥ ३० ॥
एकविंशतिवाराणि कुर्यादेवं प्रयत्नतः ।
चक्रिकां कारयित्वा च भस्मयन्त्रेण पाचयेत् ॥ ३१ ॥
पिप्पलत्वग्भवेनात्र वस्त्रपूतेन भस्मना ।
स्थल्यार्द्धं पूरयित्वा च चक्रिकां स्थापयेद्भिषक् ॥ ३२ ॥
तेनैव भस्मना चाथ शेषं भागं प्रपूरयेत् ।
स्थालीं चुल्यां निधायाथ पचेद्यामचतुष्टयम् ॥ ३३ ॥

मल्लगन्धजमेवन्तु मृतिमाप्नोति निश्चितम् ।
एवं मृतं तालकन्तु वीतशङ्कः प्रयोजयेत् ॥ ३४ ॥

तृतीयो मारणप्रकारः

विमलं हरितालन्तु पञ्चतोलकसंमितम् ।
अर्कक्षीरे दशगुणे पेषयेद्भिषजां वरः ॥ ३५ ॥
चक्रिकां कारयित्वा च शोषयेदातपे पुनः ।
भस्मयन्त्रेण मतिमान् पचेद्युक्तिपुरःसरम् ॥ ३६ ॥
पलाशभस्मना चात्र वस्त्रपूतेन पूरयेत् ।
स्थाल्यर्द्धञ्च ततो मध्ये चक्रिकां स्थापयेद्भिषक् ॥ ३७ ॥
भस्मना चाथ तेनैव भागं शेषं प्रपूरयेत् ।
यामद्वयं पचेद्धीमान् श्वेतं भस्म समाहरेत् ॥ ३८ ॥

चतुर्थो मारणप्रकारः

विमलं पत्रतालन्तु तत्तुल्या मृतशुक्तिका ।
खल्वे सम्पेषयेद्यामं कुमारीस्वरसेन वै ॥ ३९ ॥
निर्माय चक्रिकां तस्य शोषयेदातपे भिषक् ।
शरावसम्पुटे न्यस्य ततो गजपुटे पचेत् ॥ ४० ॥
स्वाङ्गशीतं ततो ज्ञात्वा भस्म निश्चन्द्रिकं हरेत् ।
इत्थं मृतं तालकन्तु कुष्ठरोगहरं परम् ॥ ४१ ॥

पञ्चमो मारणप्रकारः

विमलं पत्रतालन्तु त्रिवारं भावयेद्भिषक् ।
पलाशमूलजैः क्वाथैर्घनीभूतैर्विधानतः ॥ ४२ ॥
माहिषेण च मूत्रेण भावयेच्च ततः परम् ।
कपोताख्यपुटेनैव पचेत्तालं भिषग्वरः ॥ ४३ ॥
एवं पुटैर्द्वादशभिस्तालकं मृतिमाप्नुयात् ।
इत्थं मृतं तालकन्तु वीतशङ्कः प्रयोजयेत् ॥ ४४ ॥

षष्ठो मारणप्रकारः

विमलं पत्रतालन्तु कन्यकाद्भिर्विमर्दयेत् ।
चक्रिकां कारयित्वा च शोषयेदातपे भिषक् ॥ ४५ ॥
विधाय गोमये गर्तं तस्मिन् डिण्डीरचूर्णकम् ।
तालोन्मितं तु विन्यस्य चक्रिकां स्थापयेत्ततः ॥ ४६ ॥
पुनस्तेनैव चूर्णेन सम्यगाच्छाद्य चक्रिकाम् ।
पुटेन्महापुटेनैव भूमौ गर्तेऽथवा भिषक् ॥ ४७ ॥
स्वाङ्गशीतं ततो ज्ञात्वा गोमयान्यपसारयेत् ।
शरदिन्दुनिभं पश्चान्मृतं तालं समाहरेत् ॥ ४८ ॥
तालं सञ्चूर्ण्य खल्वे च काचकुप्यां तु विन्यसेत् ।
इत्थं मृतं तालकन्तु नाशयेद्विषमज्वरम् ॥ ४९ ॥
तण्डुलैकमितं दद्यादेकवारं तु वासरे ।
श्रीमन्नरेन्द्रनाथाख्यैः गुरुवर्यमहोदयैः ॥ ५० ॥
आविष्कृतोऽनुभूतश्च सुगमोऽयं विधिर्वरः ।
प्रकाशितः खलु मया लोकानुग्रहकाम्यया ॥ ५१ ॥

मृततालकस्य गुणाः

मृतं तालं हरेद् घोरं फिरङ्गं सुचिरोत्थितम् ।
वातरक्तं विसर्पञ्च विपादीञ्च विचर्चिकाम् ॥ ५२ ॥
विविधानि च कुष्ठानि ह्यर्शांसि विषमज्वरम् ।
रोगं फिरङ्गजं हन्यादपस्मारं भगन्दरम् ॥ ५३ ॥
व्रणं नाडीव्रणञ्चापि विस्फोटमतिदारुणम् ।
वातरक्तभवान् रोगानन्यानपि हरेद्भृशम् ॥ ५४ ॥

शुद्धतालकस्य गुणाः

विमलं तालकं स्निग्धं भूतज्वरविनाशनम् ।
त्वच्यं कुष्ठादिशमनं कथितं च रसायनम् ॥ ५५ ॥

हरितालस्य मात्रा

पादांशतो रक्तिकाया रक्तिकार्द्धमितं परम् ।
विमलं च मृतं तालं प्रयुञ्जीत भिषग्वरः ॥ ५६ ॥

मृततालकस्य परीक्षणम्

काचपात्रे क्षिपेत्तोयं लवणद्रावकान्वितम् ।
तस्मिञ्जले तु गुञ्जैकं मृतं तालं विनिक्षिपेत् ॥ ५७ ॥
सन्तापयेत्ततस्तोयं विधानज्ञो भिषग्वरः ।
पीतवर्णं यदा चूर्णं पतन् पात्रतलं विशेत् ॥ ५८ ॥
मृतं तालकमेवेदं जानीयात्तु तदा भिषक् ।
अन्यथाऽन्यस्य धात्वादेर्भस्मेदमिति निर्दिशेत् ॥ ५९ ॥

अथ तालकस्य आमयिकः प्रयोगः

वासायाः कण्टकार्या वा रसेन परिशीलितम् ।
तालकं नाशयेत्कासं श्वासं परमदारुणम् ॥ ६० ॥
आम्रगन्धहरिद्राया स्वरसेन च शीलितम् ।
सर्वरक्तविकाराणां तालकं परमौषधम् ॥ ६१ ॥
वचाजीरकचूर्णाभ्यामपस्मारहरं परम् ।
पञ्चतिक्तकषायेण कुष्ठरोगं विनाशयेत् ॥ ६२ ॥
देवदालीद्रवेणेह तालकं परिशीलितम् ।
वातरक्तकृतान् रोगान् सर्वानेव विनाशयेत् ॥ ६३ ॥
वन्ध्याकर्कोटकीद्रावैर्विसर्पं दारुणं हरेत् ।
कुमारीस्वरसेनेह त्वग्रोगानाशु नाशयेत् ॥ ६४ ॥
चेतकीचूर्णयोगेन हरेदर्शांसि सत्वरम् ।
हरिद्रास्वरसेनाशु पाण्डुरोगं विनाशयेत् ॥ ६५ ॥
गुडूचीसत्वसंयुक्तं तालं वातास्रनाशनम् ।
ताम्बूलेन क्षयं हन्यात्प्रमेहं सुरसारसैः ॥ ६६ ॥
अजामूत्रेण संयुक्तं हरेत्तूर्णं जलोदरम् ।

पिप्पलीमधुसंयुक्तं वह्निमान्द्यं विनाशयेत् ॥ ६७ ॥
मरीचकज्जलीयुतं विषान्वितं च तालकम् ।
समं विमर्द्य वारिणा वटी तु गुञ्जसंमिता ॥ ६८ ॥
कृता निषेविता ततः प्रलापमोहसंयुतम् ।
निहन्ति दुर्जलज्वरं ज्वरं च सान्निपातिकम् ॥ ६९ ॥
सतुत्थशङ्खतालकं यथोत्तरं विवर्द्धितम् ।
सहारसेन पेषितं विपाचितं विधानतः ॥ ७० ॥
यवोन्मितं तु सेवितं यथानुपानयोगतः ।
निहन्ति दुर्जलज्वरं ज्वरं च भूतसङ्गजम् ॥ ७१ ॥
सताम्रकज्जलीयुतं तु तालकं विशोधितम् ।
विभाव्य निम्बवारिणा नवेन चेन्द्रवारकम् ॥ ७२ ॥
निषेवितं तु गुञ्जकं ज्वरस्य यामपूर्वकम् ।
निहन्ति भूतषङ्गजं ज्वरं परं सुदारुणम् ॥ ७३ ॥
नवमादरचूर्णेन तालकं परिपेषितम् ।
लेपेन नाशयत्येव वृश्चिकार्तिं सुदारुणाम् ॥ ७४ ॥
लवङ्गचोचकर्पूरसंयुक्तं शुक्रमेहहृत् ।
जातिपत्रीकुङ्कुमाभ्यां प्रतिश्यायं व्यपोहति ॥ ७५ ॥
अपामार्गशिफाक्षारयुतं तु हरितालकम् ।
प्रलिप्तं चिरमज्ञातं हन्ति लिङ्गार्शसं द्रुतम् ॥ ७६ ॥
सव्योपताम्रं तालं तु वातशूलहरं परम् ।
जातीफलसमायुक्तं बलवृद्धिकरं मतम् ॥ ७७ ॥

तालकोदयमलहरः

सिक्थतलं तु विमलं त्रिंशत्तोलकसंमितम् ।
द्वितोलकमितं तालं कूष्माण्डद्रवशोधितम् ॥ ७८ ॥
श्लक्ष्णपिष्टा कज्जलिका निशा खदिरसारकम् ।

गैरिकं गौरसिन्दूरं पृथक् तोलकसंमितम् ॥ ७९ ॥
मनःशिला च विमला तोलकार्द्धमिता तथा ।
सम्मेल्य खल्वे यत्नेन काचकुप्यां तु विन्यसेत् ॥ ८० ॥
मतो मलहरोऽयं तु तालकोदयसंज्ञकः ।
नानादोषसमुद्भूतव्रणवर्गनिषूदनः ॥ ८१ ॥
विचर्चिकादद्रुकुष्ठपामाविस्फोटनाशनः ।
नाडीव्रणहरश्चैव समाख्यातो विशेषतः ॥ ८२ ॥

प्रथमं रसमाणिक्यम्

द्विकर्षं पत्रतालन्तु कूष्माण्डसलिलेन वै ।
विभावयेत्सप्तवारं त्रिवारं वा विधानतः ॥ ८३ ॥
ततो दध्नाऽथवाम्लेन तथैव तु विभावयेत् ।
प्रक्षालयेत्ततस्तोयैः प्रतप्तैस्तु भिषग्वरः ॥ ८४ ॥
मध्येऽभ्रपत्रयोर्न्यस्य शरावे विन्यसेद्भिषक् ।
शरावेणापरेणेह छादयेद्यत्नतः पुनः ॥ ८५ ॥
बदरीपत्रकल्केन विदध्यात्सन्धिलेपनम् ।
आतपे चाथ संशोष्य वालुकायन्त्रगं पचेत् ॥ ८६ ॥
मध्यमेनाग्निना यत्नात् होरात्रितयसंमितम् ।
स्वाङ्गशीतं समुद्धृत्य माणिक्याभं हरेद्रसम् ॥ ८७ ॥
मात्रा रक्तिद्वयमिता रसो माणिक्यसंज्ञितः ।
वातरक्तं हरेद् घोरं फिरङ्गश्चातिदारुणम् ॥ ८८ ॥
विविधानि च कुष्ठानि तथा नाडीव्रणं हरेत् ।
नासास्यप्रभवान् रोगान् नाशयेन्नात्र संशयः ॥ ८९ ॥

द्वितीयं रसमाणिक्यम्

विमलं पत्रतालन्तु द्रवैः कूष्माण्डसम्भवैः ।
विभावयेत्सप्तवारं दध्ना चाम्लेन वा तथा ॥ ९० ॥

प्रक्षाल्य तप्ततायन यत्नतश्चूर्णयेद्भिषक् ।
माषद्वयोन्मितं तालं न्यसेन्मध्येऽभ्रपत्रयोः ॥ ९१ ॥
अङ्गाराग्नौ निधायाथ वङ्कनालेन धुक्षयेत् ।
माणिक्याभं भवेद्यावत् पचेत्तावत्प्रयत्नतः ॥ ९२ ॥
अङ्गारानपसार्याथ रसमाणिक्यमुद्धरेत् ।
वारं वारं ततश्चैवं कृत्वा माणिक्यमाहरेत् ॥ ९३ ॥

तालकसत्वपातनस्य प्रथमः प्रकारः

तालं पलद्वयमितं सौभाग्यं तत्समं हरेत् ।
भावयेन्मेषिकादुग्धैः कूष्माण्डसलिलैस्ततः ॥ ९४ ॥
कुमारीस्वरसेनाथ निम्बूकस्य द्रवेण च ।
ततः समन्तदुग्धायाः पयसा तु विभावयेत् ॥ ९५ ॥
विभाव्य च रविक्षीरै रुवुतैलेन पेषयेत् ।
मध्वाज्येनापि सम्पेष्य वटकान् कारयेत्ततः ॥ ९६ ॥
काचकुप्यां निधायाथ वालुकायन्त्रमध्यगम् ।
मन्दाग्निनैव नियतं पचेद्दिनचतुष्टयम् ॥ ९७ ॥
स्वतःशीतं समुद्धृत्य विमलं कुलिशप्रभम् ।
ऊर्ध्वलग्नं तालसत्वं कूपीं भित्त्वा समाहरेत् ॥ ९८ ॥

द्वितीयः सत्वपातनप्रकारः

कूष्माण्डरससंशुद्धं तालं पलचतुष्टयम् ।
कुमारीस्वरसेनेह भावयेद्दिनसप्तकम् ॥ ९९ ॥
आतपे त्वथ संशोष्य चूर्णयेद्भिषजां वरः ।
काचकुप्यां निधायाथ वालुकायन्त्रगं पचेत् ॥ १०० ॥
दिनानि सप्त नियतं विधानज्ञो भिषग्वरः ।
ऊर्ध्वलग्नं तालसत्वं पीताभं तु समाहरेत् ॥ १०१ ॥
भागोऽष्टमस्तु गुञ्जायाः प्रयोक्तव्यो विधानतः ।
कुष्ठादौ योजयेद्धीमान् श्वित्रकुष्ठे विशेषतः ॥ १०२ ॥

तालकविकारे भैषज्यम्

सासितं जीरकक्षोदं कूष्माण्डस्वरसन्तु वा ।
अश्नीयात्तालविकृतौ त्रिवारं त्वेकवासरे ॥ १०३ ॥

अथ मनःशिलाया नामानि

मनःशिला रोगशिला शिला नैपालिका तथा ।
मनोगुप्ता मनोज्ञा च मनोह्वा नागजिह्विका ॥ १०४ ॥
कुनटी कुलटी गोला नागमाता च सा मता ।
कल्याणिका च सैवेह कथिता रसनेत्रिका ॥ १०५ ॥

शोधनोचितशिलायाः स्वरूपम्

मनःशिला शिलाखण्डशून्या रक्तोत्पलप्रभा ।
भारे गुरुतरा दीप्ता शोधनार्हा मता बुधैः ॥ १०६ ॥

अशोधितमनःशिलाया दोषाः

मनःशिला त्वशोधिता प्रमादतस्तु शीलिता ।
हरेद्बलं हि, चारुता विनश्यतीह त्वग्गता ॥ १०७ ॥
अशोधिता रोगशिला मलविष्टम्भकारिणी ।
मूत्ररोधकरी कामं मूत्रकृच्छ्रप्रवर्तिनी ॥ १०८ ॥

मनःशिलायाः प्रथमः शोधनप्रकारः

सुधोदके निपातिता मनःशिला तु चूर्णिता ।
दिनत्रयाद्विनिर्गता भवेत्तु दोषवर्जिता ॥ १०९ ॥

द्वितीयः शोधनप्रकारः

भृङ्गराजरसेनेह दोलायन्त्रे विपाचिता ।
चतुर्यामं रोगशिला शुद्धिमायात्यनुत्तमाम् ॥ ११० ॥

तृतीयः शोधनप्रकारः

बीजपूररसेनेह भाविता तु मनःशिला ।
सप्तवारं विधानेन विशुध्यति न संशयः ॥ १११ ॥

चतुर्थः शोधनप्रकारः

जयन्तीस्वरसेनेह दोलायन्त्रे विपाचिता ।
चतुर्यामं विधानेन विशुध्यति मनःशिला ॥ ११२ ॥

पञ्चमः शोधनप्रकारः

अगस्त्यपत्रस्वरसैर्भावयेत्सप्तवारकम् ।
मनःशिलां प्रयत्नेन, शुद्धिमायात्यनुत्तमाम् ॥ ११३ ॥

षष्ठः शोधनप्रकारः

आर्द्रकस्वरसेनेह मनोगुप्तां तु भावयेत् ।
सप्तवारं विधानेन शुद्धिमाप्नोति सर्वथा ॥ ११४ ॥

अथ मनःशिलाया गुणाः

मनःशिला कटुस्तिक्ता स्निग्धोष्णा लेखनी गुरुः ।
कासश्वासहरा कामं भूतोपद्रवनाशिनी ॥ ११५ ॥
अग्निमान्द्यक्षयानाहहन्त्री कण्डूतिनाशिनी ।
रसायनी ज्वरहरा वर्ण्या कामं विषापहा ॥ ११६ ॥

विशुद्धमनःशिलाया मात्रा

अंशांशतः समारभ्य कलांशप्रमितां शिलाम् ।
प्राणाचार्यः प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ११७ ॥

मनः शिलाया आमयिकः प्रयोगः

वासकस्वरसापता त्र्यूषणक्षारसंयुता ।
मनःशिला शीलिता तु कासं श्वासं व्यपोहति ॥ ११८ ॥
पिप्पलीमरिचोपेता वारिणाञ्जनयोगतः ।
नैपालिका तु नियतं नाशयेद्विषमज्वरान् ॥ ११९ ॥
वैदेही निम्बबीजोत्थचूर्णोपेता मनःशिला ।
कारवेल्लीरसैर्लीढा त्रिदोषज्वरहारिणी ॥ १२० ॥
सैन्धवमरिचमनोज्ञाशङ्खैः क्रमवृद्धभागसंमिश्रैः ।
अपनयतीह निकामं नेत्रगदान् विधिवदुपयुक्ता ॥ १२१ ॥

रसाञ्जनान्विता शिला कपोतगूथसंयुता ।
शिलासुपेषिताञ्जनात्त्वपस्मृतिं विनाशयेत् ॥ १२२ ॥
रजनीद्वयमञ्जिष्ठाक्षारक्षोदान्विता शिला ।
घृतक्षौद्रैः प्रलेपात्तु वर्ण्या त्वग्दोषनाशिनी ॥ १२३ ॥
पिप्पलीनागरोपेता कपित्थरससंयुता ।
लाजान्विता तु मधुना लीढा छर्दिं विनाशयेत् ॥ १२४ ॥

अशुद्धमनःशिलाविकारे भैषज्यम्

शिलाविकारोपहतः पिबेत्क्षीरं दिनत्रयम् ।
मधुना पथ्यसंयुक्तो वान्त्यादिभ्यो विमुच्यते ॥ १२५ ॥

मनःशिलाया निर्माणप्रकारः

विशोधितं शङ्खविषं मरुद्धागमितं तथा ।
विशुद्धं गन्धपाषाणं कलाभागिकमाहरेत् ॥ १२६ ॥
खल्वे निक्षिप्य यत्नेन चूर्णयेद्भिषजां वरः ।
चूर्णितञ्चाथ विज्ञाय यन्त्रे डमरुकाभिधे ॥ १२७ ॥
पचेत्ततः स्वतःशीते कुनटीमूर्ध्वगां हरेत् ।
प्रयोजयेद्विधानेन मात्रा सर्षपसंमिता ॥ १२८ ॥

मनःशिलायाः सत्वपातनम्

गुडगुग्गुलुकिट्टाज्यैस्त्वष्टमांशेन वै पृथक् ।
शिला मूषागता कोष्ठ्यां ध्माता सत्वं विमुञ्चति ॥ १२९ ॥

अथ शङ्खविषस्य नामानि

शङ्खमूषं शङ्खविषं गौरीपाषाणकं तथा ।
दारुमूषं दारुमूषा दारुमोचश्च मल्लकः ॥ १३० ॥
फेनाश्मभस्मसंज्ञश्च सोमलः सम्बलं तथा ।
आखुपाषाणकं चैव रसज्ञैः परिकीर्तितम् ॥ १३१ ॥

शङ्खविषस्य द्वैविध्यम्

मल्लस्तु द्विविधः प्रोक्तः श्वेतोऽन्यो रक्तकस्तथा ।

कृत्रिमः श्वेतमल्लस्तु रक्तश्चाकरसंभवः ॥ १३२ ॥

अथ शङ्खविषस्य शोधनम्

सुचूर्णितं शङ्खविषं दृढं वस्त्रेण रोधयेत् ।
मेघनादरसेनैव दोलायन्त्रे विपाचयेत् ॥ १३३ ॥
मृद्वग्निना दिनैकन्तु शुद्धिमायात्यनुत्तमाम् ।
इत्थं विशोधितं शङ्खविषं यत्नेन योजयेत् ॥ १३४ ॥

मल्लशोधनस्य द्वितीयःप्रकारः

मल्लचूर्णं क्षारजलैर्दोलायन्त्रे विपाचयेत् ।
दिनैकन्तु विधानज्ञो मल्लः शुद्धिमवाप्नुयात् ॥ १३५ ॥

तृतीयः शोधनप्रकारः

कारवेल्लीरसेनेह दोलायन्त्रे द्वियामकम् ।
विपाचितं शङ्खविषं शुद्धिमायात्यनुत्तमाम् ॥ १३६ ॥

चतुर्थः शोधनप्रकारः

विपाचितं शङ्खविषं यत्नतष्टङ्कणाम्भसा ।
गव्यदुग्धेन वा यामं शुद्धिमायात्यनुत्तमाम् ॥ १३७ ॥

विशुद्धमल्लस्य गुणाः

गौरीपाषाणकः स्निग्धो दोषघ्नो रसबन्धकृत् ।
कफवातामयहरः वृश्चिकादिविषप्रणुत् ॥ १३८ ॥
मासमात्रप्रयोगेण श्वासं परमदारुणम् ।
त्रिविधानि च कुष्ठानि नाशयेन्नैव संशयः ॥ १३९ ॥
श्लीपदोत्थज्वरध्वंसी प्रकामं कामवर्धनः ।
सन्धिवातगदद्वेषी फिरङ्गकरिकेशरी ॥ १४० ॥
अग्निमान्द्यहरः कामं विषमज्वरनाशनः ।
कान्तिप्रदः परं जीर्णपाण्डुरोगनिषूदनः ॥ १४१ ॥
श्वासं प्रतमकं हन्ति चिरोत्थं त्वतिदारुणम् ।
द्रुतमारम्भवेलायां यक्ष्माणमपि नाशयेत् ॥ १४२ ॥

हृच्छूलजं ज्वरोत्थञ्च हृद्दौर्बल्यं द्रुतं हरेत् ।
अतीसारं निहन्त्याशु भुक्तमात्रसमुत्थितम् ॥ १४३ ॥
मल्लो बाह्यप्रयोगेण क्षारकर्मकरः परम् ।
शोथसन्तापशैथिल्यकरश्च परिकीर्तितः ॥ १४४ ॥

शङ्खविषस्य मात्रानिरूपणम्

खनेत्रेन्दुमिताद् भागाद् रक्तेरारभ्य यत्नतः ।
खवह्निभागप्रमितं शङ्खमूषं नियोजयेत् ॥ १४५ ॥

अन्यः प्रकारः

आरभ्य दशमांशात्तु सर्षपस्य प्रयत्नतः ।
तृतीयभागपर्यन्तं मात्रां मल्लस्य योजयेत् ॥ १४६ ॥

शङ्खविषस्य मात्रानिर्माणविधिः

गुञ्जोन्मितं शङ्खविषं तिथिमाषकसंमिते ।
मरीचचूर्णे निक्षिप्य शृङ्गवेराम्भसा ततः ॥ १४७ ॥
खल्वमध्ये निधायाथ मर्दयेत्तु दिनत्रयम् ।
निर्मापयेत्ततो युक्त्या वटिका रक्तिकोन्मिताः ॥ १४८ ॥
एकैकां वटिकाञ्चाथ सायम्प्रातस्ततो भिषक् ।
वीतशङ्कः प्रयुञ्जीत तत्तद्दोषापनुत्तये ॥ १४९ ॥
अनेनैव तु मानेन प्रयोगोद्दिष्टभेषजैः ।
एतत्सम्मेल्य निर्माय वटिकादीन् प्रयोजयेत् ॥ १५० ॥

मात्रानिर्माणे सावधानता

रक्तसंमितमल्लस्य भक्षणात् पुरुषो यतः ।
यमालयं प्रयातीह सावधानतया ततः ॥ १५१ ॥
देशकालादिकं वीक्ष्य रोगिणश्च बलाबलम् ।
मात्रां प्रकल्पयेद्धीरो रसायनचिकित्सकः ॥ १५२ ॥

शङ्खविषस्य आमयिकः प्रयोगः

वासासत्वेन वा व्याघ्रीचूर्णेन परिशीलितः ।

मल्लश्चिरोत्थितश्चातिदारुणं श्वासमुद्धरेत् ॥ १५३ ॥
पञ्चतिक्तस्य सत्वेन चूर्णेनाप्यथवाशितः ।
मल्लो विनाशयत्याशु कुष्ठानि विविधानि तु ॥ १५४ ॥
गुडूच्यर्कशिफाचूर्णैर्यत्नतः परिशीलितः ।
मल्लः सुनिर्मलस्तूर्णं निहन्ति श्लीपदज्वरम् ॥ १५५ ॥
करञ्जबीजचूर्णेन सेवितो सम्बलोऽमलः ।
शीतज्वरं निहन्त्याशु दिनैकेन न संशयः ॥ १५६ ॥
शुण्ठीपुनर्नवाचूर्णैर्मल्लस्त्रिदिनसेवनात् ।
आमवातं हरेद्घोरं ज्वरश्चापि तदुद्भवम् ॥ १५७ ॥
विशोधितं शङ्खविषं सलोहं परिशीलितम् ।
नाशयत्यचिरादेव पाण्डुरोगं चिरोत्थितम् ॥ १५८ ॥
जातिपत्रीलवङ्गाभ्यां मल्लः संसेवितोऽमलः ।
नाशयत्याशु नियतं फिरङ्गमतिदारुणम् ॥ १५९ ॥
रससिन्दूरलोहाभ्यां यक्ष्माणं नाशयेद् ध्रुवम् ।
शङ्खिनीचूर्णसंयुक्तं हृद्दौर्बल्यं विनाशयेत् ॥ १६० ॥
शुण्ठीमरिचचूर्णेन श्वेतमल्लो निषेवितः ।
भुक्तमात्रसमुद्भूतमतीसारं विनाशयेत् ॥ १६१ ॥
जलेन लेपयेद्यत्नात् मल्लं वृश्चिकदंशने ।
नाशयेद् घटिकार्धेन वृश्चिकार्तिं सुदारुणाम् ॥ १६२ ॥

अथ शङ्खविषादयरसः

गुञ्जोन्मितं शङ्खविषं यत्नतो विमलीकृतम् ।
मरिचं रससिन्दूरं पृथक् माषत्रयोन्मितम् ॥ १६३ ॥
स्वर्णबीजं कणा शुण्ठी पृथक् माषद्वयोन्मितम् ।
आदाय खल्वे संमर्द्य त्रिदिनं निम्बुकाम्बुना ॥ १६४ ॥
निर्मापयेन्निजान्वक्षं वटिका रक्तिकोन्मिताः ।

एकैकां वटिकां दद्याद् द्विवारं दिवसे भिषक् ॥ १६५ ॥
नामतस्तु समाख्यातो रसः शङ्खविषोदयः ।
भूतज्वरहरः कामं सन्निपातकुलान्तकः ॥ १६६ ॥

अथ चण्डेश्वरो रसः

गुञ्जोन्मितं शङ्खविषं यत्नतो विमलीकृतम् ।
अमृतं सुमृतं ताम्रं पृथक् माषद्वयोन्मितम् ॥ १६७ ॥
श्लक्ष्णपिष्टा कज्जलिका कलामाषकसंमिता ।
भावयेत्सप्तवारं तु शृङ्गवेरोत्थवारिणा ॥ १६८ ॥
निर्गुण्डीस्वरसेनाथ तथैव खलु भावयेत् ।
निर्मापयेन्निजान्वक्षं वटिका रक्तिकोन्मिताः ॥ १६९ ॥
रसज्ञैः कीर्तितोऽयं तु नाम्ना चण्डेश्वरो रसः ।
विशेषतः समाख्यातो विविधज्वरनाशनः ॥ १७० ॥

अथ सुराष्ट्रजाया नामानि

सौराष्ट्रदेशसम्भूता मृत्तिका तुवरी मता ।
सुराष्ट्रजा च सौराष्ट्री सैव सौराष्ट्रमृत्तिका ॥ १७१ ॥

अथ स्फटिकारिकाया नामानि

स्फटिकारिः स्फुटी चैव स्फटिका स्फटिकारिका ।
स्फुटिका स्फटिका चैव शुभ्रा काङ्क्षी च रङ्गदा ॥ १७२ ॥
दृढरङ्गा रङ्गदृढा तथैव दृढरङ्गदा ।
तुवरी रङ्गदात्री च कथिता भिषजां वरैः ॥ १७३ ॥

स्फुटिकारिकायाः परिचयः

सौराष्ट्रमृत्तिकैवेह निर्भरं निर्मलीकृता ।
तच्छोधकैर्जनैर्लोके कथिता स्फुटिकारिका ॥ १७४ ॥

अस्या गुणाः

काङ्क्षी कषाया कटुका च तिक्ता
ख्याता तथोष्णा विषदोषहन्त्री ।

वीसर्पकण्डूतिहरा च केश्या
श्वित्रापहा वै व्रणरोपणी च ॥ १७५ ॥
स्फटी त्रिदोषशमनी लोचनामयनाशिनी ।
रतिमन्दिरसङ्कोचकारिणी व्रणहारिणी ॥ १७६ ॥
ग्राहिणी लेखनी स्निग्धा रुधिरस्रावरोधिनी ।
मुखरोगहरा चैव दन्तदार्ढ्यकरा मता ॥ १७७ ॥

अस्या आमयिकः प्रयोगः

मृद्दारशृंगसंयुक्तां चूर्णितां स्फुटिकारिकाम् ।
व्रणेऽवचूर्णयेन्नित्यं रोपणं जायते परम् ॥ १७८ ॥

माषकद्वयमितां तु रङ्गदां
निक्षिपेद् द्विपलसंमिते जले ।
क्षालयेदथ मनोजमन्दिरं
नाशयेच्छिथिलतां क्षणादलम् ॥ १७९ ॥
स्फटिका गव्यपयसा शीलिता नस्ययोगतः ।
निहन्ति रुधिरस्रावं नासिकायाः सुदारुणम् ॥ १८० ॥
सौभाग्यचूर्णसंयुक्तां स्फटिकां निक्षिपेज्जले ।
द्रवीभूतां ततो ज्ञात्वा क्षालयेत्तेन वारिणा ॥ १८१ ॥
विचर्चिकां चिरोद्भूतां स्राविणीमपि निर्भरम् ।
दिनसप्तकमात्रेण नाशयेदिह निश्चितम् ॥ १८२ ॥
माषोन्मिता स्फटी तूर्णं चूर्णिता त्ववचूर्णिता ।
रोधयेद्रुधिरस्रावं सद्यःक्षतसमुद्भवम् ॥ १८३ ॥
स्फटीं रक्तित्रयमितां पञ्चतोलकसंमिते ।
सलिले द्रावयित्वाथ यत्नादुत्तरवस्तिना ॥ १८४ ॥
गुरुदर्शितमार्गेण व्रणमेहमुपाचरेत् ।

व्रणमेहव्रणं हन्ति पूयस्रावञ्च दारुणम् ॥ १८५ ॥
सितान्विता रक्तिमिता चूर्णिता स्फुटिकारिका ।
अशिता नाशयत्याशु रक्तपित्तं सुदारुणम् ॥ १८६ ॥
स्फटीं गुञ्जाषट्कमितां पञ्चतोलकसंमिते ।
जले संद्राव्य युञ्जीत यत्नाद्वस्तिविधानतः ॥ १८७ ॥
गुदाङ्कुरान् चिरोद्भूतान् सङ्कोचयति सत्वरम् ।
रक्तं च रोधयत्यत्र गुदभ्रंशञ्च नाशयेत् ॥ १८८ ॥
तरुण्या रक्तपुष्पायाः सलिले तु परिस्रुते ।
पञ्चकोलोन्मिते काङ्क्षीं चतुर्गुञ्जमितां क्षिपेत् ॥ १८९ ॥
तस्याम्भसस्तु नयने द्वित्रिर्बिन्दून् विनिक्षिपेत् ।
अभिष्यन्दं निहन्त्याशु शोथपाकादिसंयुतम् ॥ १९० ॥
स्फटिकां तोलकमितां पञ्चाशत्तोलकोन्मिते ।
जले विद्राव्य युञ्जीत यत्नेनोत्तरवस्तिना ॥ १९१ ॥
गर्भाशयं प्रसूतायाः सव्यथं स्थानविच्युतम् ।
सङ्कोचयत्याशु तथा रक्तस्रावं रुणद्धि च ॥ १९२ ॥
योनिश्च शिथिलीभूता स्वस्थानन्तु प्रपद्यते ।
कण्डूतिकां हन्ति तथा श्वेतप्रदरजां रुजम् ॥ १९३ ॥
रससिन्दूरसंयुक्ता स्फटी गुञ्जोन्मिताशिता ।
अधोगमूर्ध्वगं वापि रक्तपित्तं हरेद् भृशम् ॥ १९४ ॥
रक्तिद्वयमितां काङ्क्षीं भक्षयेत्सितया समम् ।
अपक्वनागाशनजं शूलं हरति दारुणम् ॥ १९५ ॥
वकुलत्वग्भवक्षोदयुक्ता तु स्फटिकारिका ।
घर्षिता दन्तमूलेषु दन्तदार्ढ्यकरी मता ॥ १९६ ॥
स्फटी शक्रयवोपेता गुञ्जाद्वितयसंमिता ।
अशिता नाशयत्याशु त्वतिसारं सुदारुणम् ॥ १९७ ॥

लवङ्गैलासितोपेता चूर्णिता स्फटिकारिका ।
दन्तेषु घर्षिता कामं नाशयेद् दन्तशर्कराम् ॥ १९८ ॥
सैन्धवं तोलकमितं स्फटिका कर्षसंमिता ।
दन्तेषु घर्षणादेव दन्तपैच्छिल्यमुद्धरेत् ॥ १९९ ॥
पञ्चतोलोन्मिते तोये रक्तिपञ्चकसंमिताम् ।
स्फटिकां द्रावयित्वाथ कुर्वीत कवलग्रहम् ॥ २०० ॥
नाशयेद्दन्तपैच्छिल्यं मुखपाकञ्च दारुणम् ।
कण्ठशुण्डीञ्च चिरजामधिजिह्वाञ्च शोथिनीम् ॥ २०१ ॥

अथ खटिकाया नामानि

खटिका खटिनी चैव खटी लेखनमृत्तिका ।
कठिनी वै कठिनिका वर्णिका वर्णलेखिका ॥ २०२ ॥

खटिकाया भेदौ

खटिका द्विविधा ख्याता खटी गौरखटी तथा ।
खटी तु मलिना चान्या श्वेता मृदुशिलोपमा ॥ २०३ ॥

खटिकायाः शोधनम्

खटीचूर्णं शुद्धपात्रे निधाय विमलैर्जलैः ।
प्रक्षालयेद्विधानज्ञो विशुध्यति न संशयः ॥ २०४ ॥

खटिकाया गुणाः

खटिका शिशिरा तिक्ता मधुरा शोथनाशिनी ।
पित्तप्रशमनी कामं विविधव्रणरोपणी ॥ २०५ ॥
कफदाहास्रदोषघ्नी नेत्रामयनिषूदनी ।
हरिद्वर्णातिसारघ्नी स्वेदातिस्रावहारिणी ॥ २०६ ॥

खटिकाया आमयिकः प्रयोगः

माषोन्मितं खटीचूर्णं भक्षितं शीतवारिणा ।
प्रवाहिकाञ्च पित्तास्रं ग्रहणीञ्च विनाशयेत् ॥ २०७ ॥

खटी शुद्धा मधुरिकातोयेन सितयान्विता ।
शीलिता विनिहन्त्याशु त्वतीसारं सुदारुणम् ॥ २०८ ॥

अथ चूर्णस्य नामानि

चूर्णं चूर्णश्चूर्णकन्तु सुधा सौधविलेपनम् ।
तदेव च समाख्यातं शिलाक्षारं भिषग्वरैः ॥ २०९ ॥

चूर्णोदकस्य निर्माणप्रकारः

रक्तिद्वयोन्मितं चूर्णं पञ्चतोलकसंमिते ।
जले विनिक्षिपेत्प्राज्ञस्त्रियामं स्थापयेद्बुधः ॥ २१० ॥
ततः सारकपत्रेण सारयेत्काचपात्रके ।
चूर्णोदकमिति ख्यातं तथैव च सुधोदकम् ॥ २११ ॥
चूर्णोदकं दृढहरित्काचकुप्यां निधापयेत् ।
तथातिसंयतेनेह पिधानेन निरोधयेत् ॥ २१२ ॥

चूर्णोदकस्य गुणाः

चूर्णोदकं क्रिमिहरमतीसारहरं परम् ।
अम्लपित्तप्रशमनं विशेषाद्दुग्धपाचनम् ॥ २१३ ॥
शूलं ग्रहणिकां हन्ति खटीवद् गुणकारकम् ।
द्रावकाशनसम्भूतां निहन्ति च विषक्रियाम् ॥ २१४ ॥

चूर्णोदकस्य मात्रा

आरभ्य त्रिंशद्बिन्दुभ्यः षष्टिबिन्दुमितं परम् ।
चूर्णोदकं प्रयुञ्जीत वार्षिकैकस्तनन्धये ॥ २१५ ॥
चूर्णोदकस्य सुखदा तोलकद्वयसंमिता ।
पूर्णमात्रा समाख्याता रसतन्त्रविशारदैः ॥ २१६ ॥

चूर्णोदकस्य आमयिकः प्रयोगः

यत्नादिह हि बस्त्युक्तविधानेन सुधोदकम् ।
योजितं विनिहन्त्याशु कृमीन् क्षुद्रान्त्रसंस्थितान् ॥२१७॥
नवसादरसंयुक्तं चूर्णं लिप्तं तु वारिणा ।

व्यथां वृश्चिकदंशोत्थां नाशयेदविलम्बितम् ॥ २१८ ॥
विषपीते सुधातोयं योजितं त्वविलम्बितम् ।
मल्लभक्षणसंभूतां विनिहन्ति विषक्रियाम् ॥ २१९ ॥
सुधोदकं दुग्धयुतं प्रत्यहं परिशीलितम् ।
अम्लपित्तं निहन्त्याशु विशेषादविलम्बितम् ॥ २२० ॥
कवलग्रहमार्गेण योजितं तु सुधोदकम् ।
विनिहन्त्यचिरादेव मुखपाकक्षतादिकम् ॥ २२१ ॥
चूर्णोदकं कर्षमितं काचपात्रे निधापयेत् ।
तन्मितश्चातसीतैलं दत्वा काचशलाकया ॥ २२२ ॥
क्षणं प्रचाल्य मतिमान् काचकुप्यां तु विन्यसेत् ।
अग्निदग्धोत्थदाहघ्नं परमेतद्विलेपनात् ॥ २२३ ॥

अथ दुग्धपाषाणस्य नामानि

दुग्धपाषाणको दुग्धी दुग्धपाषाणिका तथा ।
दुग्धा दुग्धशिला चैव क्षीरी क्षीरक्षवश्च सः ॥ २२४ ॥
वज्राभो दीप्तिकश्चापि सौधो गोमेदसन्निभः ।
दुग्धोपलो दुग्धदृषद् भिषग्भिः परिकीर्तितः ॥ २२५ ॥

दुग्धपाषाणस्य गुणाः

दुग्धोपलस्तु मधुरस्त्वीषदुष्णो ज्वरापहः ।
पित्तप्रशमनः कामं त्वग्दाहाध्माननाशनः ॥ २२६ ॥
हृदामयहरो रुच्यः पित्तशूलविनाशनः ।
कासश्वासहरश्चैव समाख्यातो भिषग्वरैः ॥ २२७ ॥

अस्य आमयिकः प्रयोगः

दुग्धपाषाणिका शुभ्रा यवक्षारसमन्विता ।
प्रलेपिता तु सततं कुष्ठं सिध्माभिधं हरेत् ॥ २२८ ॥
दुग्धपाषाणजं चूर्णं शीलितं गुञ्जसंमितम् ।

हन्ति ज्वरं मन्दवेगं सायंकालसमुत्थितम् ॥ २२९ ॥
दुग्धपाषाणजं चूर्णं यत्नतस्त्ववचूर्णितम् ।
रक्तस्रावं निहन्त्याशु त्वभिघातव्रणोद्भवम् ॥ २३० ॥

अथ गोदन्तस्य नामानि

गोदन्तिका च गोदन्ता गोदन्तं कथ्यते बुधैः ।
तत्तु पाषाणजातीयं सौम्यं तालसमं न तत् ॥ २३१ ॥

गोदन्तस्य स्वरूपम्

पत्राचितं सुमसृणं शरदिन्दुसुनिर्मलम् ।
दीप्तप्रभं तु गोदन्तं ग्राह्यमत्र प्रकीर्तितम् ॥ २३२ ॥

गोदन्तस्य शोधनम्

गोदन्तं निम्बुनीरेण द्रोणपुष्पीरसेन वा ।
यामार्द्धेनैव सुस्विन्नं विशुद्ध्यति न संशयः ॥ २३३ ॥

गोदन्तस्य मारणम्

शरावसम्पुटान्तस्थं गोदन्तं सुविशोधितम् ।
म्रियते पुटितं भस्म जायते शशिसुन्दरम् ॥ २३४ ॥

गोदन्तस्य गुणाः

गोदन्तं सुमृतं शीतं पित्तज्वरनिषूदनम् ।
जीर्णज्वरहरं बल्यं दीपनं श्वासकासनुत् ॥ २३५ ॥

गोदन्तस्य मात्रा

गुञ्जैकतः समारभ्य गुञ्जात्रयमितं परम् ।
गोदन्तं विनियुञ्जीत बलकालाद्यपेक्षया ॥ २३६ ॥

इति तालकादिविज्ञानीयो नाम एकादशस्तरङ्गः

अथ शङ्खादिविज्ञानीयो द्वादशस्तरङ्गः

अथ शङ्खस्य नामानि

शङ्खस्तु शङ्खकः कम्बुस्त्रिरेखश्च समुद्रजः ।
सुनादो दीर्घनादश्च कम्बोजश्च प्रकीर्तितः ॥ १ ॥

ग्राह्यशङ्खस्य स्वरूपम्

वृत्तः स्निग्धः सूक्ष्ममुखो निर्मलश्चेन्दुसुन्दरः ।
दीर्घकायो गुरुश्चापि शङ्खः श्रेष्ठः प्रकीर्तितः ॥ २ ॥

शङ्खस्य द्वौ भेदौ

शङ्खस्तु द्विविधः प्रोक्तो रसतन्त्रविचक्षणैः ।
प्रथमो दक्षिणावर्तो वामावर्तोऽपरो मतः ॥ ३ ॥
दक्षिणावर्तशङ्खस्तु प्रशस्तो देवपूजने ।
त्रिदोषघ्नो निधिश्चापि स्मृतो दारिद्र्यनाशनः ॥ ४ ॥
वामावर्ताभिधः शङ्खः सर्वत्र सुलभो मतः ।
अतः स एव वैद्यैस्तु मारणार्थं प्रयुज्यते ॥ ५ ॥

अथ शङ्खस्य प्रथमः शोधनप्रकारः

शङ्खन्तु खण्डशः कृत्वा पोट्टल्यां स्थापयेद्भिषक् ।
दोलायन्त्रे चतुर्यामं पचेज्जम्बीरवारिणा ॥ ६ ॥
प्रक्षालयेच्छङ्खखण्डान् प्रतप्तेनाम्भसा ततः ।
इत्थं नातिचिरादेव शङ्खः शुद्धिमवाप्नुयात् ॥ ७ ॥

द्वितीयः शोधनप्रकारः

जयन्त्याः स्वरसेनैव शङ्खं दोलागतं पचेत् ।
यामैकं पाचनादेव शुद्धिमायात्यनुत्तमाम् ॥ ८ ॥

तृतीयः शोधनप्रकारः

तण्डुलीयद्रवेणेह शङ्खं दोलागतं पचेत् ।
यामैकं पाचनादेव शुद्धिमायात्यनुत्तमाम् ॥ ९ ॥

चतुर्थः शोधनप्रकारः

काञ्जिकेन पचेच्छङ्खं दोलायन्त्रे भिषग्वरः ।
क्षालयेच्चोष्णतोयेन शङ्खः शुद्धिमवाप्नुयात् ॥ १० ॥

पञ्चमः शोधनप्रकारः

निम्बूकाम्लसमायुक्तवारा दोलाख्ययन्त्रके ।
यामार्द्धं पाचितः शङ्खः शुद्धिमायात्यनुत्तमाम् ॥ ११ ॥

विशुद्धशङ्खस्य प्रयोगाः

त्रिरेखवार्तिका

मांपकप्रमिता कृष्णा मरिचं माषकद्वयम् ।
शिला मरीचद्विगुणा शङ्खो माषाष्टकोन्मितः ॥ १२ ॥
सम्पेष्य वर्तिकां कृत्वा लोचने विधिनाञ्जयेत् ।
तिमिरं नाशयेद्धारा मस्तुना चार्बुदं हरेत् ॥ १३ ॥
पिच्चटं मधुना हन्यान्नारीस्तन्येन चार्जुनम् ।
त्रिरेखवर्तिका ह्येषा नेत्रामयनिषूदिनी ॥ १४ ॥

अर्जुनहरशङ्खचूर्णम्

विशोधितं शङ्खचूर्णं क्षौद्रेण तु समाञ्जितम् ।
अर्जुनं नाशयत्याशु भास्करस्तिमिरं यथा ॥ १५ ॥

शङ्खवर्तिः

शङ्खसैन्धवडिण्डीरैः शिग्रुबीजैश्च निर्मिता ।
वर्तिर्नेत्रेऽञ्जनादेव शुक्रादीन्नाशयत्यलम् ॥ १६ ॥

अथ शङ्खस्य मारणम्

शुद्धशङ्खस्य खण्डानि शरावे स्थापयत्सुधीः ।
शरावेण पिधायाथ यत्नात्सन्धिं प्रलेपयेत् ॥ १७ ॥
आतपे त्वथ संशोष्य पुटेद्गजपुटे भिषक् ।
स्वतःशीतं समुद्धृत्य खल्वे सञ्चूर्णयेद्भिषक् ॥ १८ ॥
चूर्णितञ्चाथ विज्ञाय सम्पुटस्थं ततः पुटेत् ।

एवं पुटद्वयेनैव शङ्खको मृतिमाप्नुयात् ॥ १९ ॥

अथ मृतशङ्खस्य गुणाः, मात्रा च

शङ्खः सुशीतलः क्षारस्त्वम्लपित्तविनाशनः ।
अग्निमान्द्यहरो बल्यो ग्राही ग्रहणिकाहरः ॥ २० ॥
परिणामोत्थशूलघ्नस्तारुण्यपिटिकापहा ।
विषदोषहरो वर्ण्यो मात्रा गुञ्जद्वयोन्मिता ॥ २१ ॥

मृतशङ्खस्य आमयिकः प्रयोगः

निम्बूकस्वरसेनेह मृतः शङ्खस्तु शीलितः ।
अतिसारं हरेत्तूर्णं ग्रहणीञ्चातिदारुणाम् ॥ २२ ॥
सव्यूषणो मृतः शङ्खस्त्वग्निमान्द्यं व्यपोहति ।
धात्रीचूर्णेन संयुक्तस्त्वम्लपित्तं विनाशयेत् ॥ २३ ॥
यवक्षारत्रिकटुना गुल्मरोगहरः परम् ।
शूलं त्रिदोषजं हन्याद् व्योषसैन्धवहिङ्गुना ॥ २४ ॥
पुरातनगुडोपेतस्त्वथवा व्योषसंयुतः ।
सपञ्चलवणः शङ्खः परिणामोत्थशूलनुत् ॥ २५ ॥
भार्ङ्गीचूर्णान्वितः शङ्खः श्वासं हन्ति सुदारुणम् ।
विश्वभेषजचूर्णेन जाठराग्निप्रदीपनः ॥ २६ ॥
मुस्तजातीफलाफूकटङ्कणैर्गुञ्जकोन्मितः ।
शीलितस्तत्क्षणादेव सर्वातीसारनाशनः ॥ २७ ॥
सनिशश्च सपूगश्च मृतः शङ्खस्तु शीलितः ।
विनाशयेद्विशेषेण वान्तिं खलु सुदारुणाम् ॥ २८ ॥
मूलकभसितोपेतं शङ्खं सुमृतं प्रलेपनतः ।
हन्ति कफार्बुदमचिरात् कामं च विशेषतो ग्रन्थीन् ॥२९॥

अथ शङ्खस्य कल्पः

कज्जली तत्समा चैव मृता खलु वराटिका ।

पूर्वतो द्विगुणः शङ्खः सर्वतुल्या च पिप्पली ॥ ३० ॥
निम्बूकस्वरसेनेह पेषयित्वा प्रयत्नतः ।
निर्मापयेत्प्रयत्नेन वटिका रक्तिकोन्मिताः ॥ ३१ ॥
एकैकां वटिकां खादेन्मरिचाज्यसमन्विताम् ।
ग्रहणीं चिरसञ्जातां नाशयेत्पक्षसेवितः ॥ ३२ ॥
गात्रवृद्धिं करोत्येव साज्यखण्डेन शीलितः ।
चित्रकेण हरेच्छूलं गुल्मश्चापि विशेषतः ॥ ३३ ॥
अन्यानपि बहून् रोगान् तत्तत्पथ्यप्रयोगतः ।
नियतं नाशयत्याशु शङ्खकल्पोऽयमुत्तमः ॥ ३४ ॥

प्रथमः शङ्खद्रावकः

शङ्खचूर्णञ्च सौभाग्यं स्फुटिका यावशूकजम् ।
सर्जिक्षारं नृसारञ्च तथा लवणपञ्चकम् ॥ ३५ ॥
समं समं समादाय यत्नतश्चूर्णयेद्भिषक् ।
मृल्लिप्तजठरायां तु काचकुप्यां न्यसेत्ततः ॥ ३६ ॥
कूपीं चुल्ल्यां निधायाथ तिर्यङ् नालं निवेशयेत् ।
अन्यस्यां काचकुप्यां तु तोयस्थायां विधानतः ॥ ३७ ॥
पचेन्मन्दानलेनैव विधानज्ञो भिषग्वरः ।
द्रावितं तोयरूपन्तु द्रावकं जायते तदा ॥ ३८ ॥
शङ्खशुक्तिवराटादीन् यामार्द्धेनैव निश्चितम् ।
द्रावयत्येष तु यतः शङ्खद्रावस्ततः स्मृतः ॥ ३९ ॥

अस्य गुणाः

अग्निमान्द्यं हरत्येष विषूचीश्चातिदारुणाम् ।
ग्रहणीं मूत्रकृच्छ्रञ्च गुल्मप्लीहोदराणि च ॥ ४० ॥
शूलमष्टविधं हन्ति तथार्शांसि विनाशयेत् ।
भोजनान्ते बिन्दुमात्रं पिबेत्प्रचुरवारिणा ॥ ४१ ॥

भुक्त्वाकण्ठ पुनर्भोक्तुमिच्छत्यस्य प्रयोगतः ।
कृमीनुन्मूलयत्याशु छर्दिश्चापि सुदारुणाम् ॥ ४२ ॥

द्वितीयः शङ्खद्रावकः

स्फुटिका तोलकमिता सैन्धवश्चापि तन्मितम् ।
यावशूकजकश्चापि तोलकद्वयसंमितम् ॥ ४३ ॥
विमलो नव्यसारश्च तोलकद्वितयोन्मितः ।
कर्षद्वयं सुराक्षारं काशीशश्चापि तत्समम् ॥ ४४ ॥
काचकुप्यां निधायाथ चुल्लिकायां निधापयेत् ।
तिर्यङ् निवेशयेत्तत्र नलिकां काचनिर्मिताम् ॥ ४५ ॥
अन्यकाचघटीलग्नां, पचेन्मन्दाग्निना ततः ।
अग्निवीर्यं तोयरूपं जायते द्रावकं शुभम् ॥ ४६ ॥
शङ्खशुक्तिसुवर्णादीन् यस्माद् द्रावयतीह वै ।
तस्माद्रसायनाचार्यैः शङ्खद्रावः प्रकीर्तितः ॥ ४७ ॥

अस्य गुणाः

गुल्मप्लीहहरः कामं सर्वोदरविनाशनः ।
शूलश्च वातिकं हन्ति वह्निमान्द्यादिकानपि ॥ ४८ ॥

तृतीयः शङ्खद्रावकः

चूलिकालवणं चैव सैन्धवं यावशूकजम् ।
पृथक् पलोन्मितं चैव सुराक्षारं पलद्वयम् ॥ ४९ ॥
स्फुटी कर्षद्वयमिता काशीसं कर्षसंमितम् ।
सर्वमेकत्र सम्मेल्य काचकुप्यां न्यसेत्ततः ॥ ५० ॥
तिर्यङ् नालादिकं दत्वा विधानज्ञो भिषग्वरः ।
पचेन्मन्दानलेनैव चुल्यान्तु खदिरेन्धनैः ॥ ५१ ॥
द्रावितं वह्निवीर्यन्तु सलिलाभं महोत्तमम् ।
शङ्खद्रावं भवेत् सर्वधातूनां द्रावकं परम् ॥ ५२ ॥

चतुर्थः शङ्खद्रावकः

सार्द्धैकभागप्रमितः सोरकद्रावकस्तथा ।
लवणद्रावकश्चापि भागद्वितयसंमितः ॥ ५३ ॥
परिस्रुतश्च सलिलं सार्द्धद्वादशभागिकम् ।
सर्वं सम्मेल्य यत्नेन जायते त्वतिशोभनः ॥ ५४ ॥
शङ्खस्वर्णादिधातूनां द्रावकः परमोत्तमः ।
शङ्खद्रावो वह्निवीर्यो गुल्मप्लीहादिभस्मकृत् ॥ ५५ ॥

चतुर्थशङ्खद्रावकस्य मात्रा

आरभ्य शरबिन्दुभ्यः कलाबिन्दुमितं परम् ।
शङ्खद्रावं प्रयुञ्जीत पलसंमितवारिणा ॥ ५६ ॥

अथ क्षुद्रशङ्खस्य नामानि

क्षुद्रशङ्खः शङ्खनकः शम्बूकः स्वल्पशङ्खकः ।
क्षुल्लको नखशङ्खश्च नामान्येतानि शङ्खके ॥ ५७ ॥

क्षुद्रशङ्खस्य शोधनम्

अम्लेन केनचिद्वापि कामं स्थालीगतं पचेत् ।
यामार्द्रेनैव शम्बूकः शुद्धिमायात्यनुत्तमाम् ॥ ५८ ॥

क्षुद्रशङ्खस्य मारणम्

शङ्खवन्मारणं त्वस्य करणीयं भिषग्वरैः ।
कुमारीस्वरसेनैव सम्पुटस्थं पुटेत्तु वा ॥ ५९ ॥

क्षुद्रशङ्खस्य गुणाः

क्षुद्रशङ्खस्तु शूलघ्नो नेत्रामयनिषूदनः ।
रक्तातिसारशमनो दीपनः पाचनस्तथा ॥ ६० ॥

अस्य आमयिकः प्रयोगः

क्षुद्रशङ्खविभूतिस्तु शीलिता तप्तवारिणा ।
परिणामोद्भवं शूलमचिरादेव नाशयेत् ॥ ६१ ॥
मरीचपञ्चलवणैर्भूतिः शम्बूकजाशिता ।

भोजनादौ तदन्ते वा पक्तिशूलं व्यपोहति ॥ ६२ ॥
समसैन्धवसंयुक्ता भूतिः शम्बूकजाशिता ।
मधुना त्वचिरादेव वातग्रहणिकां हरेत् ॥ ६३ ॥

अथ शुक्तेर्नामानि

शुक्तिश्च शुक्तिका चापि मुक्तामाता तथैव च ।
मुक्तागृहं महाशुक्तिः मौक्तिकप्रसवा च सा ॥ ६४ ॥
मुक्ताशुक्तिस्तथा मुक्तागेहं मौक्तिकमन्दिरम् ।

शुक्तिकायाः प्रथमः शोधनप्रकारः

जयन्त्याः स्वरसेनैव शुक्तिं दोलागतां पचेत् ॥ ६५ ॥
यामैकेनैव नियतं शुक्तिः शुद्धिमवाप्नुयात् ।

द्वितीयः शोधनप्रकारः

अम्लेन केनचिद्वापि दोलायन्त्रेण यत्नतः ॥ ६६ ॥
शुक्तिकां पाचयेद्धीमान् शुद्धिमायात्यनुत्तमाम् ।

शुक्तेर्मारणम्

शुक्तिकां खण्डशः कृत्वा सम्पुटस्थां ततः पुटेत् ॥ ६७
हिमकुन्देन्दुसङ्काशां शुक्तेर्भूतिं समाहरेत् ।

शुक्तेर्गुणाः, मात्रा च

शक्तिका शूलशमनी हृदामयविनाशिनी ॥ ६८ ॥
स्निग्धा रुच्या श्वासहरा दीपनी मधुरा मता ।
इष्टिकावर्णसङ्काशां नाशयेन्मूत्रशर्कराम् ॥ ६९ ॥
प्लीहानं नाशयत्याशु तथा च जठरामयान् ।
रक्तिद्वयमिता मात्रा मुक्तागेहस्य कीर्तिता ॥ ७० ॥

अस्या आमयिकः प्रयोगः

वरामधुकचूर्णेन समेन त्र्यूषणेन वा ।
शुक्तिका शीलिता शीघ्रं शूलं नाशयति ध्रुवम् ॥ ७१ ॥
धात्रीचूर्णान्विता शुक्तिः काकमाचीरसेन वै ।

शीलिता त्वचिरादेव विनिहन्ति हृदामयम् ॥ ७२ ॥
त्र्यूषणक्षौद्रसंयुक्ता वासारससमन्विता ।
श्वासं विनाशयत्याशु दिनसप्तकसेवनात् ॥ ७३ ॥
कटुत्रिकानलोपेता यवक्षारविमिश्रिता ।
शुक्तिका मधुना लीढा वह्निसन्दीपनी मता ॥ ७४ ॥
तृणपञ्चकमूलस्य कषायेण तु शीलिता ।
शुक्तिका नाशयत्याशु चिरजां मूत्रशर्कराम् ॥ ७५ ॥
व्योषत्रिक्षारसंयुक्ता लवणद्वयमिश्रिता ।
शुक्तिका मधुना हन्ति प्लीहानमतिदारुणम् ॥ ७६ ॥
शिलाजतुसमायुक्ता वङ्गसर्जरसान्विता ।
शुक्तिः कन्यारसैर्लीढा श्वेतप्रदरनाशिनी ॥ ७७ ॥
यावशूकजसंयुक्ता तथा सैन्धवसंयुता ।
गोदध्ना शुक्तिका पीता जठरामयनाशिनी ॥ ७८ ॥

अथ जलशुक्तेर्नामानि

जलशुक्तिस्तथा क्षुद्रशुक्तिका तोयशुक्तिका ।
कृमिशुक्तिश्च शम्बूका पुष्टिका ह्रस्वशुक्तिका ॥ ७९ ॥

जलशुक्तिकायाः शोधनं मारणञ्च

शुक्तिवच्छोधनं तस्या मारणञ्चापि कीर्तितम् ।
अङ्गारागौ तु वा न्यस्य मारयेद्वारिशुक्तिकाम् ॥ ८० ॥

अस्या गुणाः

जलशुक्तिः शूलहरा कटुः स्निग्धा च दीपनी ।
बल्या गुल्महरा रुच्या विषदोषहरा मता ॥ ८१ ॥

अथ वराटकस्य नामानि

वराटको वराटश्च वराटी च वराटिका
कपर्दकः कपर्दश्च कपर्दी च कपर्दिका ॥ ८२ ॥

बालक्रीडनकश्चापि चरो वर्यश्चराचरः ।
वराटकं वराटं च कपर्दं च निगद्यते ॥ ८३ ॥

वराटकस्य भेदाः

वराटिका त्रिधा प्रोक्ता पीता श्वेता च धूसरा ।
पीतोत्तमा मध्यमा तु श्वेतान्या त्वधमा मता ॥ ८४ ॥

ग्राह्यवराटिकायाः स्वरूपम्

दीर्घवृन्ता स्वर्णवर्णा पृष्ठे च ग्रन्थिला तथा ।
सार्द्धैकशाणप्रमिता वराटी कथितोत्तमा ॥ ८५ ॥
शाणोन्मिता मध्यमा स्याच्छाणार्द्धप्रमिताधमा ।
रसज्ञैरुत्तमैवेह भस्मकर्मणि शस्यते ॥ ८६ ॥

वराटिकायाः शोधनम्

दोलायन्त्रे तु यामैकं काञ्जिकेन वराटिका ।
स्विन्ना प्रक्षालिता चोष्णवारिणा शुद्धिमाप्नुयात् ॥ ८७ ॥

द्वितीयः शोधनप्रकारः

दोलायन्त्रे तु यामैकं कुलत्थक्वथिताम्भसा ।
स्विन्ना वराटिका शीघ्रं शुद्धिमायात्यनुत्तमाम् ॥ ८८ ॥

तृतीयः शोधनप्रकारः

अम्लेन केनचिद्वापि दोलायन्त्रे विपाचिता ।
वराटी याममात्रेण विशुद्ध्यति न संशयः ॥ ८९ ॥

चतुर्थः शोधनप्रकारः

निम्बूकाम्लद्रवोपेता दोलायन्त्रे वराटिका ।
परिस्विन्ना तु यामैकं शुद्धिमायात्यनुत्तमाम् ॥ ९० ॥

वराटिकाया मारणम्

वराटकांस्तु विमलान् शरावे स्थापयेद्भिषक् ।
शरावेणापरेणाथ सम्यगाच्छादयेत्ततः ॥ ९१ ॥
सन्धिलेपं ततः कृत्वा शोषयेदातपे पुनः ।

करीषाग्नौ पचेत्कामं यत्नतस्तु भिषग्वरः ॥ ९२ ॥
स्वाङ्गशीतं समुद्धृत्य खल्वे सञ्चूर्णयेत्ततः ।
शरदिन्दुनिभं भस्म सर्वयोगेषु योजयेत् ॥ ९३ ॥

अपरः प्रकारः

वराटिका विशोधिता त्वलातकानले स्थिता ।
यदा भवेत्प्रफुल्लिता मृता तदाशनोचिता ॥ ९४ ॥

अस्या गुणाः, मात्रा च

वराटी दीपनी चोष्णा नयनातङ्कहारिणी ।
कर्णस्रावहरात्यर्थं वह्निमान्द्यविनाशिनी ॥ ९५ ॥
पक्तिशूलादिशमनी ग्रहणीगजसिंहिका ।
क्षयस्फोटापहा वृष्या मात्रा रक्तिद्वयोन्मिता ॥ ९६ ॥

वराटिकाया आमयिकः प्रयोगः

समुद्रफेनसंयुक्ता श्लक्ष्णपिष्टा वराटिका ।
ध्माता श्रुतिपुटेऽत्यर्थं पूयस्रावं व्यपोहति ॥ ९७ ॥
कटुत्रिकसमायुक्ता वह्निमान्द्यं विनाशयेत् ।
वासकस्वरसोपेता वराटी कासनाशिनी ॥ ९८ ॥
निम्बूकाम्लसमायुक्ता कटुत्रिकसमन्विता ।
वराटी शीलिता शीघ्रं नाशयेच्छूलमुद्धतम् ॥ ९९ ॥
मृद्दारशृंगसंयुक्ता श्लक्ष्णपिष्टा वराटिका ।
अवचूर्णनयोगेन विस्फोटान् विविधान् हरेत् ॥ १०० ॥
शङ्खत्र्यूषणसंयुक्ता मृता खलु वराटिका ।
दिनसप्तकमात्रेण ग्रहणीं नाशयेद् ध्रुवम् ॥ १०१ ॥
रससिन्दूरसंयुक्ता मृता खलु वराटिका ।
घृतोदुम्बरतोयेन रक्तपित्तं विनाशयेत् ॥ १०२ ॥

अथ मृगशृङ्गस्य नामानि

मृगशृङ्गं त्वेणशृङ्गं तथा मृगविषाणकम् ।
हरिणशृङ्गकश्चैव समाख्यातं भिषग्वरैः ॥ १०३ ॥

ग्राह्यमृगशृङ्गस्य स्वरूपम्

कीटानुपहतं दीर्घं भाराढ्यं सुदृढं तथा ।
अनेकशृङ्गसंयुक्तं मृगशृङ्गं वरं मतम् ॥ १०४ ॥

मृगशृङ्गस्य मारणम्

मृगशृङ्गं समादाय करपत्रेण कर्तयेत् ।
खण्डशः कारयित्वा च त्वङ्गाराग्नौ दहेत्ततः ॥ १०५ ॥
सुदग्धश्चाथ विज्ञाय खल्वे सञ्चूर्णयेद्भिषक् ।
रविदुग्धेन सम्पेष्य चक्रिकाः कारयेत्ततः ॥ १०६ ॥
शरावसम्पुटान्तःस्थं पुटेत्तीव्राग्निना भिषक् ।
त्रिवारं पुटनादेणविषाणं मृतिमाप्नुयात् ॥ १०७ ॥

अस्य आमयिकः प्रयोगः

मृगशृङ्गसमुद्भूता विभूतिर्गव्यसर्पिषा ।
विनाशयेत् क्षणादेव हृच्छूलमतिदारुणम् ॥ १०८ ॥
हरिणविषाणसमुत्था भूतिः क्षौद्रेण रक्तिमिता ।
अपहरतीह निकामं हृच्छूलं पार्श्वशूलञ्च ॥ १०९ ॥

अथ समुद्रफेनस्य नामानि

समुद्रफेनः फेनश्च सुफेनः फेनकस्तथा ।
अब्धिफेनश्च फेनश्च डिण्डीरोऽब्धिककौ मतः ॥ ११० ॥

समुद्रफेनस्य शोधनम्

पृष्ठास्थीन्यब्धिफेनस्य विलिख्यापनयेत्ततः ।
खल्वे सम्पेष्य यत्नेन श्लक्ष्णचूर्णञ्च कारयेत् ॥ १११ ॥
निम्बूकस्वरसेनाथ भावयेदेकवारकम् ।

एवमब्धिकफः शीघ्रं शुद्धिमायात्यनुत्तमाम् ॥ ११२ ॥

अस्य गुणाः, मात्रा च

समुद्रफेनः शिशिरो लेखनः पाचनः सरः ।
चक्षुष्यो दीपनश्चैव श्रुतिस्रावहरः परम् ॥ ११३ ॥
विषदोषप्रशमनः कषायः कफनाशनः ।
कुष्ठरोगहरोऽत्यर्थं मात्रा रक्तिद्वयोन्मिता ॥ ११४ ॥

अस्य आमयिकः प्रयोगः

समुद्रफेनचूर्णन्तु सितया श्लक्ष्णपिष्टया ।
नेत्रशुक्रं निहन्त्याशु चिरजातमपि ध्रुवम् ॥ ११५ ॥
शङ्खसैन्धवसंयुक्तः सुफेनोऽर्कशलाकया ।
नेत्रयोरञ्जनादाशु शुक्रादीन् शस्त्रवल्लिखेत् ॥ ११६ ॥
पिप्पलीसैन्धवोपेतः फेनको मधुनाञ्जनात् ।
विनाशयेच्छुक्रदोषं दृशोश्चिरसमुत्थितम् ॥ ११७ ॥
तुत्थषड्गुणितः फेनः पथ्यया तुत्थतुल्यया ।
वर्तिः कृताञ्जनाद्वारा पोथक्यादिविनाशिनी ॥ ११८ ॥
गालसैन्धवरसाञ्जनान्वितः फेनकस्तु वटकीकृतोऽञ्जनात् ।
क्लिन्नवर्त्मविनिवारणः परं पक्ष्मरोहणकरश्च कीर्तितः ॥११९
चूर्णितं त्वब्धिफेनं तु प्रध्मातं श्रुतिसम्पुटे ।
विनाशयेच्छ्रुतिस्रावं चिरजातमपि द्रुतम् ॥ १२० ॥
सूतगन्धकसंयुक्तस्त्वथवा हिङ्गुलान्वितः ।
समुद्रफेनस्त्वशनात्कफपित्तज्वरापहः ॥ १२१ ॥
मृद्दारशृंगसंयुक्तं त्वब्धिफेनं सुचूर्णितम् ।
मधुना व्रणसंलेपादुत्तमं व्रणरोपणम् ॥ १२२ ॥
कोकिलाक्षककालेयकट्फलोशीरकेक्षुकैः ।
शृतैर्वा चूर्णितैर्लीढो डिण्डीरः शुक्रशोधनः ॥ १२३ ॥

अब्धिफेनस्य उत्पत्तिस्थानम्

समुद्रे वर्तुलः क्षुद्रो दशहस्तसमन्वितः ।
मीनजातिसमुत्पन्नो जन्तुरेको विलक्षणः ॥ १२४ ॥
भीषणाक्षः कूर्मपृष्ठः स यदा विजहात्यसून् ।
तत्पृष्ठास्थि विशुष्कन्तु फेनाभं दृश्यते तदा ॥ १२५ ॥
अब्धिमध्ये तरत्येतत्तरङ्गैराहतं मुहुः ।
यतोऽब्धौ फेनवत्तारि त्वब्धिफेनं ततः स्मृतम् ॥ १२६

इति शङ्खादिविज्ञानीयो नाम द्वादशस्तरङ्गः

अथ क्षारत्रिकविज्ञानीयस्त्रयोदशस्तरङ्गः

अथ यवक्षारस्य नामानि

यवक्षारो यवापत्यं यवजो यवशूकजः ।
यव्यो यवाग्रजश्चैव यवाह्वो यवनालजः ॥ १ ॥
यवशूको यावशूकः शूकजो यावशूकजः ।
याव्यस्तथैव पाक्यश्च समाख्यातो भिषग्वरैः ॥ २ ॥

यवक्षारस्य निर्माणप्रकारः

यवशूकभवं भस्म समादाय भिषग्वरः ।
सलिलेऽष्टगुणे क्षिप्त्वा विमले भाजने ततः ॥ ३ ॥
सप्तवारं प्रयत्नेन स्रावयेत्पृथुवाससा ।
स्रावितं सलिलञ्चाथ चुल्यां तीव्राग्निना पचेत् ॥ ४ ॥
निःशेषं सलिलं ज्ञात्वा पाकपात्रतलस्थितम् ।
यवक्षारं प्रयत्नेन गृह्णीयात्पाण्डुरप्रभम् ॥ ५ ॥

यवक्षारस्य गुणाः

यवक्षारो लघुः स्निग्धोदीपनः पाचनः परम् ।

गुल्मप्लीहामयहरः कफहा वातनाशनः ॥ ६ ॥
शूलानाहोदराध्मानमूत्रकृच्छ्रप्रणाशनः ।
कण्ठामयहरो हृद्यो विषदोषहरः सरः ॥ ७ ॥
अम्लपित्तहरः स्निग्धो मूत्ररेचनकारकः ।
स्वेदप्रवर्तकश्चैव कथितो रसकोविदैः ॥ ८ ॥

यवक्षारस्य मात्रा

आरभ्य रक्तित्रितयाद् दशरक्तिकसंमितम् ।
यवक्षारं प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ९ ॥

यवक्षारस्य आमयिकः प्रयोगः

चूर्णितो यवजक्षारो निपीतस्तूष्णवारिणा ।
सर्पिषा वा समाख्यातो मक्कलाभिधशूलनुत् ॥ १० ॥
जरणत्र्यूषणोपेतो यवक्षारस्तु शीलितः ।
भोजनादौ तदन्ते च दीपनः पाचनः स्मृतः ॥ ११ ॥
रोहीतकक्षोदयुतस्त्वथवा शरपुङ्खया ।
शीलितस्तु यवक्षारो गुल्मप्लीहनिकृन्तनः ॥ १२ ॥
मरीचनागरोपेतो यवजस्तूष्णवारिणा ।
द्वित्रिर्वारप्रयोगेण वातशूलं हरेद् भृशम् ॥ १३ ॥
एलासितोपलोपेतः शीलितो यवशूकजः ।
मूत्रकृच्छ्रं निहन्त्याशु दाहशोथादिसंयुतम् ॥ १४ ॥
गोक्षुरक्काथसंयुक्तो यवक्षारस्तु शीलितः ।
शकृद्विघातजं शीघ्रं मूत्रकृच्छ्रं विनाशयेत् ॥ १५ ॥
तक्रेण तु यथाकामं यवक्षारस्तु शीलितः ।
अश्मरीं नाशयत्याशु मूत्रकृच्छ्रञ्च दारुणम् ॥ १६ ॥
शर्करासंयुतो यव्यः कूष्माण्डस्वरसेन वै ।
निपीतो नाशयत्याशु मूत्रकृच्छ्रादिकान् गदान् ॥ १७ ॥
अजमोदात्रिकटुककणोपेतो यवोद्भवः ।

क्षारस्तु भक्षणादाशु वातोत्थोदररोगनुत् ॥ १८ ॥
हिङ्गुत्रिकटुकोपेतः सकुष्ठश्च ससैन्धवः ।
बीजपूररसैः पीतः प्लीहशूलहरः परम् ॥ १९ ॥
यवक्षारस्तु निम्बूकरसेन परिशीलितः ।
मूत्रलः स्वेदजनकः स्मृतश्च ज्वरनाशनः ॥ २० ॥
शङ्खभस्मयुतो यव्यः सव्योषश्च ससैन्धवः ।
उष्णोदकेन सम्पीतो हन्ति शूलं त्रिदोषजम् ॥ २१ ॥
वासकस्वरसोपेतो यवशूकसमुद्भवः ।
क्षारस्तु शीलितोऽत्यर्थं बहुमूत्रं निवारयेत् ॥ २२ ॥
बब्बूलस्वरसेनापि तन्निर्यासेन वाशितः ।
यवजः स्वल्पकालेन त्वौपसर्गिकमेहनुत् ॥ २३ ॥
शिग्रुक्वाथयुतः पीतः सक्षौद्रो यवशूकजः ।
पार्श्वशूलं बस्तिशूलं हृच्छूलञ्चैव नाशयेत् ॥ २४ ॥
यवक्षारस्तु सततं कटुतैलेन लेपितः ।
कुष्ठं सिध्माभिधं हन्ति मासमात्रप्रयोगतः ॥ २५ ॥
यवजः श्वेतवर्षाभूस्वरसेन निषेवितः ।
उरस्तोयाख्यहृद्रोगजनितां हन्ति वै रुजम् ॥ २६ ॥
यवजो निम्बुकद्रावैस्तिलक्षारयुतोऽशितः ।
बस्तिशूलं निहन्त्याशु मूत्ररोधञ्च नाशयेत् ॥ २७ ॥
शुण्ठीगोक्षुरवरुणक्वाथनिपीतो यवक्षारः ।
सगुडक्षेपं त्वचिरान्नियतं वाताश्मरीं जयति ॥ २८ ॥
कूष्माण्डस्वरसोपेतं सगुडं यवशूकजम् ।
शीलितं नाशयेन्मूत्राघातं शुक्राश्मरीं तथा ॥ २९ ॥
पाषाणभेदवरुणगोक्षुरक्वाथसंयुतम् ।
शीलितं यवजं हन्ति बस्तिशूलं तथाश्मरीम् ॥ ३० ॥

सारिवाक्वाथसंयुक्तो यवक्षारस्तु शीलितः ।
औपसर्गिकमेहोत्थां बाधामाशु विनाशयेत् ॥ ३१ ॥
दशमूलकषायेण यवक्षारः ससैन्धवः ।
गुल्मं शूलं च हृद्रोगं कासं श्वासञ्च नाशयेत् ॥ ३२ ॥

अथ निम्बूकाम्लीययवजस्य नामानि

निम्बुकाम्लीययवजो निम्बूकाम्लीयशूकजः ।
निम्बूकाम्लीययवक्षारः स एव परिकीर्तितः ॥ ३३ ॥

अस्य निर्माणप्रकारः

काचपात्रे यवक्षारं चतुर्विंशतिभागिकम् ।
द्रावयेच्छीतसलिले रसज्ञः समभागिके ॥ ३४ ॥
निम्बूकाम्लं सुविमलं त्वथ विंशतिभागिकम् ।
द्रावयेदन्यपात्रस्थं जले तु समभागिके ॥ ३५ ॥
पात्रे काचादिलिप्ते तु मेलयेदनयोर्द्रवम् ।
चुल्ल्यां निधायाथ पचेत्तोयांशं परिशोषयेत् ॥ ३६ ॥
घनसारप्रभं चूर्णं रसविज्ञः समाहरेत् ।
विबुधैः कीर्तितोऽयं तु निम्बूकाम्लीयशूकजः ॥ ३७ ॥

अस्य गुणाः

निम्बूकाम्लीययवजो मूत्रलः श्लेष्मभेदनः ।
ज्वरघ्नः स्वेदजनको जलोदरहरः परम् ॥ ३८ ॥
वृक्कशोथप्रशमनो विशेषाद् वृक्कशूलनुत् ।
मूत्ररोधहरः कामं तथा श्लैष्मिककासनुत् ॥ ३९ ॥

निम्बूकाम्लीययवजस्य मात्रा

आरभ्य पञ्चगुञ्जातो दशगुञ्जोन्मितं परम् ।
निम्बूकाम्लीययवजं प्राणाचार्यः प्रयोजयेत् ॥ ४० ॥

१—काचादिलिप्ते—आदिशब्दाद्वङ्गादिलिप्ते पित्तलपात्रेऽपीति ज्ञेयम् ।

अस्य आमयिकः प्रयोगः

तत्तद्रोगविशेषेषु सालेलाद्यनुपानतः ।
निम्बूकाम्लीययवजं योजयेन्मात्रया भिषक् ॥ ४१ ॥

अथ सर्जिक्षारस्य नामानि

स्वर्ज्जिकः स्वर्ज्जिका स्वर्ज्जिः स्वर्जः स्वर्ज्जी सुवर्चिका ।
स्वर्ज्जका स्वर्जिकाक्षारः सर्जिः सर्जी च सर्जिका ॥ ४२ ॥
सुवर्चकः सुवर्चिश्च सुवर्चोऽथ सुवर्चिकः ।
सुखोर्जिकः कपोतश्च सुखवर्चः सुखार्जिकः ॥ ४३ ॥
रुचकं सृजिकाक्षारः स्वर्जिक्षारस्तथैव च ।
सौवर्चलं सुवर्ची च समाख्यातो भिषग्वरैः ॥ ४४ ॥

सर्जिक्षारस्य निर्माणप्रकारः

उष्ट्रप्रियाक्षुपं[1] दग्ध्वा यत्नात् क्षारं समाहरेत् ।
तोयेऽष्टगुणिते क्षिप्त्वा भाजने विमले ततः ॥ ४५ ॥
सप्तकृत्वः प्रयत्नेन स्रावयेत्पृथुवाससा ।
स्रावितं सलिलञ्चाथ पचेद् गाढं भिषग्वरः ॥ ४६ ॥
निःशेषे सलिले तत्र स्थालिकातलसंस्थितम् ।
हिमकुन्देन्दुसङ्काशं सर्जिक्षारं समाहरेत् ॥ ४७ ॥

सर्जिक्षारस्य गुणाः

सर्जिक्षारः स्मृतस्तीक्ष्णः कटुरुष्णश्च पाचनः ।
समीरणहरः कामं कासश्वासनिवारणः ॥ ४८ ॥
अग्निदीप्तिकरश्चैव गुल्माध्मानविनाशनः ।
व्रणोदरामयहरः कृमिघ्नश्च प्रकीर्तितः ॥ ४९ ॥

१-उष्ट्रप्रिया-क्षुद्रदुरालभा, सा हि मरुप्रदेशे विशेषेण जायते । पञ्चनद-देशे "लाना" इतिनाम्ना प्रसिद्धा । "अन्या क्षुद्रदुरालम्भा मरुस्था मरुसम्भवा । विशारदाऽजभक्षा स्यादजादन्युष्ट्रभक्षिका" ॥ इति राजनिघण्टुः ॥

सर्जिक्षारस्य मात्रा

आरभ्य रक्तित्रितयाद् रविरक्तिकसंमितम् ।
सर्जिक्षारं प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ५० ॥

सर्जिक्षारस्य आमयिकः प्रयोगः

कणाजरणचूर्णेन सर्जिका परिशीलिता ।
रक्तित्रयमितात्यर्थं दीपनी पाचनी मता ॥ ५१ ॥
सर्जिका मधुना लीढा वासासत्वसमन्विता ।
वातिकं श्लैष्मिकञ्चापि कासं श्वासञ्च नाशयेत् ॥ ५२ ॥
सर्जिक्षारश्चतुर्गुञ्जः शीलितः शीतवारिणा ।
अम्लपित्तं निहन्त्याशु त्वम्लोद्गारांश्च निर्भरम् ॥ ५३ ॥
यवानिकाव्यूषणचूर्णयुक्ता
सुवर्चिका वै त्रिदिनोपयुक्ता ।
आध्मानयुक्तान् गुदमार्गजातान्
कृमीन् निहन्यात् कृमिजांश्च रोगान् ॥ ५४ ॥
केतकीक्षारसंयुक्ता सकुष्ठा खलु सर्जिका ।
तैलेन पीता त्वचिराद् वातगुल्मं विनाशयेत् ॥ ५५ ॥
सर्जिक्षारो गुडोपेतः शीलितस्तूष्णवारिणा ।
नाशयेदचिरादेव गुल्मपीडां नवोत्थिताम् ॥ ५६ ॥
बीजपूरद्रवोपेता स्वर्जिका स्वल्पमात्रया ।
कर्णक्षिप्ता हन्ति कर्णस्रावं दाहं रुजादिकम् ॥ ५७ ॥

अथ निम्बूकाम्लीयसर्जिकाया निर्माणप्रकारः

विध्वब्धिभागप्रमितां सर्जिकान्तु समाहरेत् ।
द्विगुणे शीतसलिले द्रावयेद्भिषजां वरः ॥ ५८ ॥
खनेत्रभागप्रमितं निम्बूकाम्लं समाहरेत् ।
तुल्ये तोये चान्यपात्रे तथैव द्रावयेद्भिषक् ॥ ५९ ॥

पात्रे काचप्रलिप्ते तु मेलयेदुभयोर्द्रवम् ।
मृद्वग्निना चुल्लिकायां पचेत्तोयञ्च शोषयेत् ॥ ६० ॥
निःशेषं सलिलं ज्ञात्वा शुभ्रं चूर्णं समाहरेत् ।
भिषग्वरैः समाख्याता निम्बूकाम्लीयसर्जिका ॥ ६१ ॥

निम्बूकाम्लीयसर्जिकाया गुणाः

क्षीरच्छर्दिप्रशमनी वह्निमान्द्यापहारिणी ।
आध्मानशूलविष्टम्भहारिणी कान्तिकारिणी ॥ ६२ ॥
ग्राहिणी शिशिरा चैव विशेषाद् दुग्धपाचनी ।
पिपासानाशिनी चेयं निम्बूकाम्लीयसर्जिका ॥ ६३ ॥

अस्या बालकोचिता मात्रा

गुञ्जैकतः समारभ्य गुञ्जाद्वितयसंमिताम् ।
प्राणाचार्यः प्रयुञ्जीत निम्बूकाम्लीयसर्जिकाम् ॥ ६४ ॥

पूर्णमात्रा

आरभ्य पञ्चगुञ्जातो दशगुञ्जोन्मितां परम् ।
रसविद्विनियुञ्जीत निम्बूकाम्लीयसर्जिकाम् ॥ ६५ ॥

अस्या आमयिकः प्रयोगः

रक्तिद्वयमितेयं तु निम्बूकाम्लीयसर्जिका ।
पलद्वयमितेनेह गव्यदुग्धेन योजिता ॥ ६६ ॥
निपीता प्रत्यहं त्वेवं निम्बूकाम्लीयसर्जिका ।
क्षीरच्छर्दिहरा चैव वह्निमान्द्यापहा मता ॥ ६७ ॥
आध्मानक्षोभशमनी त्वतीसारोदरापहा ।
कान्तिप्रदा विशेषेण देहपुष्टिकरी मता ॥ ६८ ॥
कृशानां मातृहीनानां शिशूनामत्यजीर्णिनाम् ।
क्षीरं छर्दयताञ्चैतद् विशेषात्परमौषधम् ॥ ६९ ॥
निर्दिष्टमात्रयैवेह निम्बूकाम्लीयसर्जिकाम् ।
शिशुभ्यः क्षीरपायिभ्यः प्रयुञ्जीत भिषग्वरः ॥ ७० ॥

दुग्धपानभवेऽजीर्णे यूनां वर्षीयसामपि ।
रसवैद्यैः प्रशस्तेयं निम्बूकाम्लीयसार्जिका ॥ ७१ ॥

अथ टङ्कणस्य नामानि

टङ्कणष्टङ्कनश्चैव टङ्कष्टङ्गश्च टङ्गणः ।
द्रावकष्टङ्कणक्षारष्टङ्कक्षारश्च कथ्यते ॥ ७२ ॥
रङ्गक्षारस्तथा रङ्गो रङ्गदो लोहशोधनः ।
लोहश्लेषणकश्चापि कीर्तितः स्वर्णशोधनः ॥ ७३ ॥
सौभाग्यञ्च सितक्षारः श्वेतक्षारश्च टङ्गकः ।
क्षारराजश्च कथितो रसायनविशारदैः ॥ ७४ ॥

टङ्कणस्य निर्मलीकरणम

टङ्कणं चूर्णितं तोये तत्वगङ्ग्यगुणे भिषक् ।
संद्राव्य वस्त्रपूतञ्च कृत्वा चुल्यां निधापयेत् ॥ ७५ ॥
तीव्राग्निना पचेत्कामं नीरं च परिशोषयेत् ।
स्वल्पनीरांशशेषे च टङ्कणं निर्मलं हरेत् ॥ ७६ ॥

टङ्कणस्य शोधनम्

सुचूर्णितं टङ्कणं तु खलु पञ्चपलोन्मितम् ।
समुज्ज्वलोदरे [illegible]कटाहे विन्यसेत्ततः ॥ ७७ ॥
चुल्लिकायां निधायाथ पचेद् दर्व्या प्रचालयन् ।
सुपुष्पितं नष्टनीरं शुद्धिमायाति टङ्कणम् ॥ ७८ ॥

अस्य गुणाः

टङ्कणः कटुरुष्णश्च रूक्षस्तीक्ष्णश्च मारकः ।
कफविश्लेषणो हृद्यो वातामयनिषूदनः ॥ ७९ ॥
कासश्वासहरः कामं स्थावरादिविषापहा ।
अग्निदीप्तिकरश्चापि भृशमाध्माननाशनः ॥ ८० ॥
स्त्रीपुष्पजननो बल्यो विविधव्रणनाशनः ।

पित्तकृच्च समाख्यातो मूढगर्भप्रवर्तकः ॥ ८१ ॥

अस्य आमयिकः प्रयोगः

कट्फलत्र्यूषणोपेतः सिंही यवजसंयुतः ।
टङ्कणो मधुना लीढः कफविश्लेषणः परम् ॥ ८२ ॥
टङ्कणस्त्र्यूषणोपेतस्तुल्यजैपालसंयुतः ।
मृदुरेचनकृच्चैव सर्वोदरविनाशनः ॥ ८३ ॥
तत्वसङ्ख्यगुणे तोये द्रावितः कवलग्रहैः ।
टङ्कः सूतविकारोत्थं लालास्रावं विनाशयेत् ॥ ८४ ॥
सबोलष्टङ्कणो युक्त्या मुहुर्मृद्वघर्षितः ।
विनाशयेत् क्षतं घोरं दन्तवेष्टसमुत्थितम् ॥ ८५ ॥
विमलष्टङ्कणक्षारश्चूषितस्तु शनैः शनैः ।
स्वरावरोधं कण्ठस्य नाशयेदतिसत्वरम् ॥ ८६ ॥
सत्र्यूषणष्टङ्कणस्तु मधुना परिशीलितः ।
विनाशयेत् क्षणेनैव त्वाध्मानमतिदारुणम् ॥ ८७ ॥
सरामठः सयवजष्टङ्कणः परिशीलितः ।
सन्ध्याद्वये सप्तदिनं नाशयेत् स्नायुकामयम् ॥ ८८ ॥
लवङ्गशुण्ठीमरिचसमुपेतस्तु टङ्कणः ।
मयूरक्षारसंयुक्तो भुक्तमांसादिजारणः ॥ ८९ ॥
सुचूर्णितष्टङ्कणस्तु व्रणेषु त्वग्वचूर्णनात् ।
निहन्ति रुधिरस्रावं सद्य एव सुदारुणम् ॥ ९० ॥
टङ्कणं वह्निसम्भृष्टं मधुना सह लेपयेत् ।
मुखपाकं निहन्त्याशु दाहशोथादिसंयुतम् ॥ ९१ ॥
सुचूर्णितं टङ्कणन्तु द्रावयेद्विमले जले ।
योनौ बस्तिप्रयोगेण पिडकादिरुजं हरेत् ॥ ९२ ॥
पुरातनगुडोपेतष्टङ्कणस्तु विचूर्णितः ।

अवचूर्णनयोगेन प्रशस्तो व्रणरोपणे ॥ ९३ ॥
सौभाग्यं वह्निसम्भृष्टं श्वेतचन्दनपङ्कयुक् ।
लेपेन नाशयत्याशु सिध्मरोगं न संशयः ॥ ९४ ॥
काकमाचीद्रवोपेतं टङ्कणं परिशीलितम् ।
विनिहन्त्यचिरादेव वर्मिं खलु सुदारुणाम् ॥ ९५ ॥

टङ्कणामृतमलहरः

सुपुष्पितं टङ्कणं तु तोलकद्वयसंमितम् ।
सिक्थतैलं च विमलं भानुतोलकसंमितम् ॥ ९६ ॥
तोलकार्द्धमिता चैव सर्जिका विमलीकृता ।
विशुद्धं पुष्पकाशीसं सर्जिकासमभागिकम् ॥ ९७ ॥
माषद्वयमितः क्षारः पिप्पलत्वक्समुत्थितः ।
सर्वं सम्मेल्य यत्नेन काचकुप्यां निधापयेत् ॥ ९८ ॥
मतो मलहरोऽयं तु टङ्कणामृतसंज्ञकः ।
प्रशस्यते विशेषेण कठिनव्रणदारणे ॥ ९९ ॥

टङ्कणाम्लस्य नामानि

टङ्काम्लष्टङ्कणाम्लश्च टङ्काम्लष्टङ्कणाम्लकः ।
सुभगाम्लश्च कथितो रसतन्त्रविचक्षणैः ॥ १०० ॥

टङ्कणाम्लस्य निर्माणप्रकारः

चूर्णितं टङ्कचूर्णन्तु तदर्धेऽत्युष्णवारिणि ।
द्रावयित्वा प्रयत्नेन काचपात्रे निधापयेत् ॥ १०१ ॥
वह्नौ सन्ताप्य च ततो लवणद्रावकं क्षिपेद् ।
द्रावप्रक्षेपणादूर्ध्वं पात्रं भूमौ तु विन्यसेत् ॥ १०२ ॥
शीतीभूते तु सलिलं शनैः खल्वपसारयेत् ।
पृथक् कुर्वीत टङ्काम्लं त्वधःपतितमुत्तमम् ॥ १०३ ॥
टङ्कणाम्लं पुनस्तूष्णे त्रिगुणे सलिले भिषक् ।

द्रावयित्वा पुनस्तद्वत् सलिलं त्वपसारयेत् ॥ १०४ ॥
समाहरेत् टङ्कणाम्लं तलस्थमतिनिर्मलम् ।
संशोष्य च ततो वैद्यः प्रयोगेषु प्रयोजयेत् ॥ १०५ ॥

अस्य गुणाः

टङ्कणाम्लस्तु भूतघ्नो नेत्राभिष्यन्दनाशनः ।
अग्निदग्धव्रणहरो मूत्रलः क्षतरोपणः ॥ १०६ ॥
औपसर्गिकमेहोत्थव्रणबाधानिवर्हणः ।
श्वेतासृग्दरहृच्चैव श्रुतिस्रावहरो मतः ॥ १०७ ॥

टङ्कणाम्लस्य मात्रा

आरभ्य रक्तिद्वितयाद्रक्तिकाष्टकसंमितम् ।
टङ्कणाम्लं प्रयुञ्जीत बलकालाद्यपेक्षया ॥ १०८ ॥

टङ्कणाम्लस्य आमयिकः प्रयोगः

त्रिगुञ्जटङ्कणाम्लस्तु वारिणा परिशीलितः ।
पूतिगन्धयुतं मूत्रस्रावं नाशयति द्रुतम् ॥ १०९ ॥
टङ्कणाम्लो गुञ्जमितो मधुनाऽष्टगुणेन तु ।
माषोन्मितेन धौतेन नवनीतेन योजितम् ॥ ११० ॥
स्तनक्षतं निहन्त्याशु तथा कर्णविचर्चिकाम् ।
अग्निदग्धव्रणश्चैव विविधानि व्रणानि च ॥ १११ ॥

टङ्कणाम्लमलहरः

सिक्थतैलं सुविमलं ग्रहतोलकसंमितम् ।
तोलकैकमितं चैव टङ्कणाम्लकमुत्तमम् ॥ ११२ ॥
सम्मेल्य खल्वे यत्नेन काचकुप्यां तु विन्यसेत् ।
मतो मलहरोऽयं तु टङ्कणाम्लसमाह्वयः ॥ ११३ ॥

अस्य गुणाः

टङ्काम्लीयो मलहरो विशेषाद् व्रणशोधनः ।
अग्निदग्धव्रणहरो भूतघ्नश्च परं स्मृतः ॥ ११४ ॥

टङ्कणाम्लद्रवस्य निर्माणप्रकारः

दशगुञ्जापरिमितं टङ्कणाम्लं समाहरेत् ।
क्षिपेत् परिस्रुते तोये पञ्चतोलकसंमिते ॥ ११५ ॥

विद्रुतं सपिधानायां काचकुप्यां तु विन्यसेत् ।
टङ्कणाम्लद्रवोऽयं तु नाम्नाख्यातो भिषग्वरैः ॥ ११६ ॥

अस्य आमयिकः प्रयोगः

टङ्कणाम्लद्रवोऽयं तु क्षालने विनियोजितः ।
विनाशयेच्चिरोद्भूतं नेत्राभिष्यन्दमुद्धतम् ॥ ११७ ॥

उक्तमानकृतेनैव टङ्कणाम्लद्रवेण तु ।
प्रत्यहं विधिना दद्यात् बस्तिमुत्तरपूर्विकाम् ॥ ११८ ॥

इत्थं बस्तिप्रयोगेण दिनसप्तकमात्रकम् ।
श्वेतप्रदरजा बाधा चिरजापि विनश्यति ॥ ११९ ॥

सुभगाम्लद्रवोऽयन्तु योजितः कर्णधावने ।
सान्द्रं व्रणं तु चिरजं कर्णस्रावञ्च नाशयेत् ॥ १२० ॥

उक्तमानकृतेनैव टङ्कणाम्लद्रवेण तु ।
नासाप्रक्षालनाद्युक्त्या पीनसात्परिमुच्यते ॥ १२१ ॥

भागिकष्टङ्कणाम्लस्तु जलञ्च शतभागिकम् ।
लिङ्गे बस्तिप्रयोगेण बस्तिशोथं व्यपोहति ॥ १२२ ॥

इति क्षारत्रिकविज्ञानीयो नाम त्रयोदशस्तरङ्गः

अथ क्षारविशेषादिविज्ञानीयश्चतुर्दशस्तरङ्गः

अथ नवसारस्य नामानि

नवसारो नव्यसारस्तथैव नवसादरः ।
नृसादरो नृसारश्च नरसारश्च कीर्तितः ॥ १ ॥
किट्टक्षारो निगदितस्तथैव नरसादरः ।
चूलिकालवणं ख्यातं चुल्लिकालवणञ्च तत् ॥ २ ॥

नवसादरस्य शोधनम्

नवसारन्तु सलिले त्रिगुणे द्रावयेद्भिषक् ।
वस्त्रपूतं ततः कृत्वा भाजने स्थापयेत्ततः ॥ ३ ॥
चुल्लिकायां निधायाथ पचेत्तीव्राग्निना भृशम् ।
जले शुष्के तलस्थञ्च नृसारं विमलं हरेत् ॥ ४ ॥

नवसादरस्य गुणाः

नवसारस्त्रिदोषघ्नः स्निग्धः सूक्ष्मो लघुस्तथा ।
पाचकः सारकस्तीक्ष्णो जठराग्निप्रदीपनः ॥ ५ ॥
उष्णः प्लीहप्रशमनो मांसाजीर्णनिवारणः ।
गुल्माध्मानप्रहरणः कफविश्लेषणः परम् ॥ ६ ॥
वृश्चिकोत्थविषघ्नश्च लोहद्रावणकस्तथा ।
हृदामयहरो नेयः श्वित्रकुष्ठहरस्तथा ॥ ७ ॥

नवसादरस्य मात्रा

द्विगुञ्जतश्चाष्टगुञ्जमितं तु नवसादरम् ।
प्राणाचार्यः प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ८ ॥

नवसादरस्य आमयिक प्रयोगः

जरणत्र्यूषणोपेतो नरसारो विशोधितः ।
दिनसप्तकमात्रेण जाठराग्निप्रदीपनः ॥ ९ ॥
रामठत्र्यूषणोपेतो नरसारो विशोधितः ।

प्लीहोदरं निहन्त्याशु चिरजञ्चातिदारुणम् ॥ १० ॥
शुक्तिकाक्षारसंयुक्तो विमलो नवसादरः ।
प्लीहानं नाशयत्याशु यकृद्दोषं तथैव च ॥ ११ ॥
मरीचसैन्धवमिसियुक्तः शुद्धो नृसादरः ।
आध्मानाजीर्णशमनो भुक्तमांसादिजारणः ॥ १२ ॥
अनन्तमूलक्वथितनीरेण नवसादरः ।
निपीतो नियमादाशु यकृद्वृद्धिहरो मतः ॥ १३ ॥
मधुयष्टिवचाव्याघ्रीकषायेण नृसादरः ।
सेवितो ह्यचिरादेव कफविश्लेषणः परम् ॥ १४ ॥
यकृद्दोषसमुद्भूते जलोदरगदे भिषक् ।
अपामार्गकषायेण नरसारं प्रयोजयेत् ॥ १५ ॥
नृसारः काञ्जिकेनेह निपीतः स्वल्पमात्रया ।
रक्तस्रावं फुप्फुसोत्थं द्रुतमेव निरोधयेत् ॥ १६ ॥
नृसारं तोलकमितं दशतोलकसंमिते ।
जले संद्राव्य तद्द्वारा वस्त्रमार्द्रीकृतं ततः ॥ १७ ॥
व्रध्नशोथे निबध्नीयाज्ज्वरशूलादिसंयुते ।
दिनसप्तकमात्रेण व्रध्नशोथं निवारयेत् ॥ १८ ॥
यवक्षारयुतो नव्यसारो रक्तित्रयोन्मितः ।
शारिवाक्वथितैः पीतो व्रणमेहं निवारयेत् ॥ १९ ॥

नवसारस्य सत्वपातनम्

विमलं कठिनीचूर्णं तोलकत्रितयोन्मितम् ।
विशुद्धं नवसारश्च चतुस्तोलकसंमितम् ॥ २० ॥
खल्वे सम्पेष्य यन्त्रे तु पचेद्डमरुकाभिधे ।
नृसारसत्वं विशदमूर्ध्वलग्नं समाहरेत् ॥ २१ ॥

अस्य गुणाः

नृसारसत्वं रुचिदं त्वम्लपित्तहरं परम् ।
कफविश्लेषणकरं हृद्दौर्बल्यविनाशनम् ॥ २२ ॥
वामकं सारकश्चापि तथा फुफ्फुसशोथहृत् ।
पाचनं दीपनश्चैव घ्रातं मूर्च्छाहरं मतम् ॥ २३ ॥

अस्य मात्रा

गुञ्जैकतः समारभ्य गुञ्जापञ्चकसंमिता ।
नवसादरसत्वस्य मात्रा शस्ता भिषग्वरैः ॥ २४ ॥
सपादमाषकमिता मात्रा वमनकारिणी ।
नवसादरसत्वस्य भिषग्भिः परिकीर्तिता ॥ २५ ॥

अथ सत्वस्य प्रयोगविधिः

नव्यसारभवं सत्वं सलिले तु परिस्रुते ।
द्रावयित्वाऽथ निर्दिष्टरोगेषु तु नियोजयेत् ॥ २६ ॥

अथ सोरकस्य नामानि

सोरकः सोरकश्चैव सोरा सैवेह सोरका ।
सूर्यक्षारोऽथ मृत्क्षारो वह्निक्षारश्च कीर्तितः ॥ २७ ॥

सोरकस्य गुणाः

सोरकः कटुकस्तीक्ष्णो विशेषाल्लवणः सरः ।
वह्निप्रदीपकोऽत्युष्णस्त्वाग्नेयास्त्रार्थसिद्धिकृत् ॥ २८ ।

सोरकस्य निर्मलीकरणम्

पलोन्मितं सोरकन्तु शीतले सलिले भिषक् ।
चतुष्पलमिते क्षिप्त्वा वस्त्रपूतं पचेत्ततः ॥ २९ ॥
स्वल्पशेषं जलं ज्ञात्वा पात्रमुत्तारयेत्ततः ।
विमलं चूर्णसङ्काशं सोरकन्तु समाहरेत् ॥ ३० ॥
स्वल्पशेषेऽपि सलिले यदि वह्निः प्रदीयते ।
जले निःशेषतां याते सोरकं दह्यते स्वयम् ॥ ३१ ॥

तस्माद्रसायनाचार्यः सावधानतया सदा ।
सोरकं निर्मलीकुर्यान्न स्याद् द्रव्यक्षतिर्यथा ॥ ३२ ॥

सोरकस्य सुकरं निर्मलीकरणम्

अत्युष्णं सलिलं स्वच्छं सोरकस्यार्द्धभागिकम् ।
आदाय विमले पात्रे निक्षिपेत्तु भिषग्वरः ॥ ३३ ॥
निक्षिप्य सोरकं वस्त्रपूतञ्च शीततां नयेत् ।
शलाकाकारतां यातं सोरकन्तु समाहरेत् ॥ ३४ ॥

अथ सोरकस्य शोधनम्

सोरकं चूर्णितं खल्वे त्वेलातोयेन भावयेत् ।
त्रिधारं भावनादेव शुद्धिमायात्यनुत्तमाम् ॥ ३५ ॥

शुद्धसोरकस्य गुणाः

सोरकः कटुकस्तीक्ष्णो विदग्धाजीर्णनाशनः ।
अश्मरीमूत्रकृच्छ्राग्निमान्द्यपाण्डुप्रमेहनुत् ॥ ३६ ॥

सोरकस्य मात्रा

द्विगुञ्जतः समारभ्य दशगुञ्जोन्मितं परम् ।
सोरकं विनियुञ्जीत बलकालाद्यपेक्षया ॥ ३७ ॥

सोरकस्य आमयिकःप्रयोगः

गोक्षुरस्य कषायेण शोधितः सोरकोऽशितः ।
मूत्रकृच्छ्रं निहन्त्याशु त्वश्मरीं दारुणामपि ॥ ३८ ॥
स्फटिकारिकयोपेतः सोरकः परिशीलितः ।
आध्मानं मूत्रकृच्छ्रं च नाशयेदाशु निर्भरम् ॥ ३९ ॥
रविमूलस्य चूर्णेन तण्डुलक्वथितेन वा ।
निपीतः सोरकः काममामवातं विनाशयेत् ॥ ४० ॥
विडाजमोदामिशिकाधात्रीचूर्णेन सोरकः ।
भक्षितो निम्बुनीरेण विदग्धाजीर्णकं जयेत् ॥ ४१ ॥

सोरकं द्रावयेत्तोये तेन सिञ्चेत्तु कागदम् ।
तद्धूमपानयोगेन श्वासमाशु विनश्यति ॥ ४२ ॥
सुरानृसारकोपेतं सोरकं द्रावयेत् जले ।
तत्सिक्तवस्त्रं शीर्षस्थं प्रलापं ज्वरजं जयेत् ॥ ४३ ॥
ससितं सोरकं वारा गुञ्जापञ्चकसंमितम् ।
ज्वरदाहतृषार्तैस्तु रोगिभिः परिशीलितम् ॥ ४४ ॥
जनयेत्स्वेदमत्यर्थं मूत्ररोधञ्च नाशयेत् ।
दाहतृषादिकञ्चापि हत्वा कामं ज्वरं जयेत् ॥ ४५ ॥
सोरकं वटपर्णञ्च संपिष्टन्तु शिलातले ।
बस्तिप्रदेशे लेपेन मूत्ररोधं विनाशयेत् ॥ ४६ ॥

अथ सोरकद्रावकस्य नामानि

कथितः सोरकद्रावः सोरकद्रावकस्तथा ।
सोराद्रावश्च गदितो रसशास्त्रविशारदैः ॥ ४७ ॥

सोरकद्रावस्य निर्माणप्रकारः

विशोधिते सोरके तु सोरकस्यार्द्धभागिकम् ।
बलिद्रावन्तु निक्षिप्य काचकुप्यां निधापयेत् ॥ ४८ ॥
सुराप्रदीपे विन्यस्य नलिकां काचनिर्मिताम् ।
तोयस्थकाचघटिकालग्नां तस्यां निवेशयेत् ॥ ४९ ॥
पचेन्मन्दानलेनैव ततस्तिर्यङ् निपातितम् ।
सञ्चितं बाष्परूपेण तोयाभं द्रावकं हरेत् ॥ ५० ॥

सजलसोरकद्रावस्य निर्माणप्रकारः

षड्भागसंमितं तत्र सोरकद्रावकं हरेत् ।
काचपात्रे निधायाथ क्षिपेत्तत्र शनैः शनैः ॥ ५१ ॥
परिस्रुतञ्च सलिलं पञ्चविंशतिभागिकम् ।
सजलः सोरकद्रावो जायते खलु शोभनः ॥ ५२ ॥

सोरकद्रावकस्य गुणाः

सोरकद्रावकः प्रोक्तो वह्निवीर्यः प्रदाहकः ।
विभिन्नदुष्टविक्लिन्नव्रणशोधनरोपणः ॥ ५३ ॥
फिरङ्गस्यादिमे घोरे व्रणे च परिशस्यते ।
सर्पकुक्कुरकादीनां विषदोषनिबर्हणः ॥ ५४ ॥

सजलसोरकद्रावस्य गुणाः

सोरकद्रावको बल्यो यकृद्दोषनिवर्हणः ।
वह्निमान्द्यहरः कामं मूत्रदोषनिषूदनः ॥ ५५ ॥
मधुमेहे प्लीहवृद्धौ चौपदंशिकविकृतौ ।
कामलायां पाण्डुरोगे विशेषेण प्रशस्यते ॥ ५६ ॥
विनाशयेच्चिरोद्भूतं कासं सातिकफोद्भवम् ।
अतीसारहरश्चैव पित्तघ्नश्च प्रकीर्तितः ॥ ५७ ॥

सजलसोरकद्रावकस्य मात्रा

आरभ्य शरबिन्दुभ्यस्त्रिंशद्बिन्दुमितं परम् ।
सजलं सोरकद्रावं नियुञ्जीत पलाम्बुना ॥ ५८ ॥

अथ सामान्येन क्षारनिर्माणप्रकारः

क्षारवृक्षस्य काष्ठानि दग्ध्वा भूतिं समाहरेत् ।
विमले भाजने न्यस्य सलिलन्तु चतुर्गुणम् ॥ ५९ ॥
प्रक्षिप्य मर्दयेत्सम्यक् याममात्रं भिषग्वरः ।
त्रिगुणीकृतवस्त्रेण स्रावयेत्सलिलं ततः ॥ ६० ॥
स्रावितं सलिलञ्चाथ वह्नौ सन्तापयेत्ततः ।
निःशेषं सलिलं ज्ञात्वा निर्मलं क्षारमाहरेत् ॥ ६१ ॥

सामान्येन क्षाराणां गुणाः

क्षारास्तीक्ष्णा महोष्णाश्च दाहकर्मकराः परम् ।
गुल्मार्शोग्रहणीप्लीहमूत्रकृच्छ्राश्मरीहराः ॥ ६२ ॥

कृमिघ्नाः पाचनाश्चैव दारणाश्च विसर्पिणः ।
शोधना रोपणाश्चैव मूत्रलाश्च प्रकीर्तिताः ॥ ६३ ॥

सामान्येन क्षाराणां मात्रा

द्विगुञ्जतः समारभ्य रक्तिकाष्टकसंमितान् ।
क्षारांस्तु विनियुञ्जीत साधारणतया भिषक् ॥ ६४ ॥

अथ अपामार्गक्षारस्य नामानि

अपामार्गक्षार उक्तो मयूरक्षारकस्तथा ।
खरमञ्जरिकाक्षारः किणिक्षारश्च कीर्तितः ॥ ६५

अस्य गुणाः

खरमञ्जरिकाक्षारस्तीक्ष्णः श्वासनिबर्हणः ।
गुल्मशूलादिरोगघ्नः कामं बाधिर्यनाशनः ॥ ६६ ॥

अपामार्गक्षारस्य आमयिकः प्रयोगः

मयूरक्षारकः कामं मधुना परिशीलितः ।
विनाशयेच्चिरोद्भूतं श्वासं परमदारुणम् ॥ ६७ ॥

खरमञ्जरिकाक्षारचूर्णेन परिसाधितम् ।
तैलं कर्णे निषेकेण बाधिर्यं त्वाशु नाशयेत् ॥ ६८ ॥
सत्र्यूषणः किणिक्षारो यवानीचूर्णसंयुतः ।
निहन्ति शूलं त्वचिरादाध्मानञ्चातिदारुणम् ॥ ६९ ॥
खरमञ्जरिकाक्षारः सतालः परिलेपनात् ।
लिङ्गार्शसं निहन्त्याशु चिरोद्भूतं सुदारुणम् ॥ ७० ॥

अपामार्गक्षारचूर्णं सशिलं परिलेपितम् ।
गोमूत्रेणाचिरेणैव श्वित्रकुष्ठं विनाशयेत् ॥ ७१ ॥
अपामार्गक्षारचूर्णं यवाग्रजसमन्वितम् ।
शीलितं नाशयेदाशु मूत्रकृच्छ्रं तथाश्मरीम् ॥ ७२ ॥
खरमञ्जरिकाक्षारः सव्योषश्च ससैन्धवः ।

शीलितो नाशयेद् गुल्मं प्लीहानञ्चातिदारुणम् ॥ ७३ ॥

अथ अर्कक्षारस्य नामानि

अर्कक्षारो रविक्षारो भास्करक्षारकस्तथा ।
खर्ज्जूघ्नक्षारकश्चाथ मित्रक्षारश्च कीर्तितः ॥ ७४ ॥

अर्कक्षारस्य गुणाः

अर्कक्षारः स्मृतस्तीक्ष्णो गुल्मप्लीहादिनाशनः ।
पाचनो दीपनश्चापि कासश्वासप्रणाशनः ॥ ७५ ॥

अर्कक्षारस्य आमयिकः प्रयोगः

अर्कक्षारः सलवणो नरसारसमन्वितः ।
अजीर्णं नाशयेदाशु जाठराग्निञ्च दीपयेत् ॥ ७६ ॥
मसैन्धवं त्वर्कपत्रं त्वन्तर्धूमं दहेद्भिषक् ।
क्षारः स मस्तुना पीतो गुल्मप्लीहोदराञ्जयेत् ॥ ७७ ॥
सत्र्यूषणो रविक्षारो मधुना परिशीलितः ।
विनाशयेद्विशेषेण कासं श्वासञ्च दारुणम् ॥ ७८ ॥
मित्रक्षारः सलवणो यावशूकजसंयुतः ।
शीलितो ह्यचिरादेव यकृद्वृद्धिहरो मतः ॥ ७९ ॥

अथ तिलक्षारस्य नामानि

तिलक्षारः समाख्यातस्तिलभूतिस्तथैव च ।
होमधान्यविभूतिश्च पवित्रक्षारकस्तथा ॥ ८० ॥

तिलक्षारस्य गुणाः

तिलक्षारः स्मृतस्तीक्ष्णो मूत्ररोधनिवर्हणः ।
अश्मरीनाशनश्चैव प्लीहघ्नो व्रणदारणः ॥ ८१ ॥

अस्य आमयिकः प्रयोगः

सत्र्यूषणस्तिलक्षारः सैन्धवेन समन्वितः ।
शीलितो ह्यचिरादेव जाठराग्निप्रदीपनः ॥ ८२ ॥
अङ्कोलक्षारसंयुक्तस्तिलक्षारस्तु शीलितः ।

मधुनान्ते तोयपानान्मूत्ररोधं विनाशयेत् ॥ ८३ ॥
तिलक्षारः सयवजः शीलितो निम्बुकाम्बुना ।
वृक्कशूलं निहन्त्याशु भास्करस्तिमिरं यथा ॥ ८४ ॥
तिलक्षारः सयवजः कदलीक्षारमिश्रितः ।
शीलितो मधुना काममश्मरीमाशु नाशयेत् ॥ ८५ ॥
तिलभूतिर्माषमिता रुचकेन समन्विता ।
तक्रेण मधुना वापि शीलिता त्वश्मरीं जयेत् ॥ ८६ ॥
होमधान्यविभूतिस्तु धात्रीक्षारसमन्विता ।
गोक्षुरक्काथसंयुक्ता नाशयेन्मूत्रशर्करम् ॥ ८७ ॥
पवित्रक्षारचूर्णन्तु यवजेन प्रलेपितम् ।
व्रणशोथे करोत्याशु दारणं परमोत्तमम् ॥ ८८ ॥
होमधान्यविभूतिस्तु शीलिता माषकोन्मिता ।
मांसाशनभवाजीर्णनाशिनी परिकीर्तिता ॥ ८९ ॥
शरपुङ्खक्षारयुतस्तिलक्षारस्तु शीलितः ।
माषकप्रमितं तूर्णं गुल्ममुन्मूलयेद्भृशम् ॥ ९० ॥

अथ स्नुहीक्षारस्य नामानि

स्नुहिक्षारः स्नुहीक्षारः स्नुक्क्षारश्च तथा मतः ।
वज्रक्षारोऽथ सेहुण्डक्षारश्च परिकीर्तितः ॥ ९१ ॥

अस्य गुणाः

स्नुहीक्षारः स्मृतस्तीक्ष्णः सर्वोदरविनाशनः ।
गुल्मप्रशमनो वह्निदीपनः शोफनाशनः ॥ ९२ ॥
विषूचिकाहरोऽजीर्णनाशनः शूलसूदनः ।
यकृद्दोषप्रशमनः श्वासातङ्कप्रभञ्जनः ॥ ९३ ॥

अस्य आमयिकः प्रयोगः

स्नुहीक्षारः शङ्खभूतिसर्जिकायवजान्वितः ।

विषूचिकां निहन्त्याशु त्वजीर्णञ्चातिदारुणम् ॥ ९४ ॥
चिरोत्थितानां गुल्मानां पञ्चतां पञ्चतां नयेत् ।
ग्रहणीं नाशयेदाशु तथा शूलञ्च दारुणम् ॥ ९५ ॥
स्नुहीक्षारस्त्रिलवणक्षारत्रिकसमन्वितः ।
निहन्ति शोफं प्लीहानमुदराणि च नाशयेत् ॥ ९६ ॥
सत्र्यूषणः स्नुहीक्षारो मधुना परिशीलितः ।
नाशयेदचिरादेव श्वासं परमदारुणम् ॥ ९७ ॥
स्नुहीक्षारो वरोपेतः सैन्धवाग्निसमन्वितः ।
निहन्ति वह्निमान्द्यं तु यकृत्प्लीहोदराणि च ॥ ९८ ॥

अथ पलाशक्षारस्य नामानि

पलाशक्षारकश्चैव किंशुकक्षारकस्तथा ।
पर्णक्षारश्च कथितस्त्रिपर्णक्षारकस्तथा ॥ ९९ ॥

अस्य गुणाः

पर्णक्षारोऽग्निजननो गुल्मप्लीहादिनाशनः ।
यकृद्वृद्धिप्रशमनो मूत्रकृच्छ्राश्मरीहरः ॥ १०० ॥

अस्य आमयिकः प्रयोगः

पर्णक्षारस्तु मधुना कणाचूर्णसमन्वितः ।
वह्निदीप्तिकरः कामं गुल्मप्लीहोदरापहः ॥ १०१ ॥
पलाशक्षारसलिलैर्गव्यमाज्यं विपाचितम् ।
शीलितं नाशयत्याशु रक्तगुल्मं सुदारुणम् ॥ १०२ ॥
कदलीक्षारसंयुक्तः पर्णक्षारस्तु शीलितः ।
अश्मरीं नाशयत्याशु दारुणं मूत्रशर्कराम् ॥ १०३ ॥
किंशुकक्षारतोयेन घृतं गव्यं विपाचितम् ।
निहन्ति शुक्रदोषन्तु ग्रन्थिभूतामिधं द्रुतम् ॥ १०४ ॥
यवक्षाररजोयुक्तः क्षारः खलु पलाशजः ।

निषेवितो निहन्त्याशु प्लीहानमतिदारुणम् ॥ १०५ ॥
मयूरक्षारसंयुक्तो पर्णक्षारस्तु शीलितः ।
अग्रमांसं सुकठिनीभूतं प्रशमयत्यलम् ॥ १०६ ॥

अथ चिञ्चाक्षारस्य नामानि

चिञ्चाक्षारोऽम्लिकाक्षारश्चिञ्चिकाक्षारकस्तथा ।
अम्लीकाक्षारकश्चैव चिञ्चाभूतिश्च कथ्यते ॥ १०७ ॥
चिञ्चिकाभसितञ्चैव चिञ्चाभस्म तथैव च
अम्लिकाभसितञ्चापि तिन्तिडीभसितं तथा ॥ १०८ ॥

अस्य गुणाः

अम्लिकाक्षारकः प्रोक्तो वह्निमान्द्यविनाशनः ।
शूलगुल्महरश्चापि मूत्रकृच्छ्राश्मरीहरः ॥ १०९ ॥

अस्य आमयिकः प्रयोगः

स्नुगर्कक्षारसहितो मृतशङ्खसमन्वितः ।
चिञ्चाक्षारोऽशनादाशु नाशयेत्तु विषूचिकाम् ॥ ११० ॥
शूलमुन्मूलयेत्कामं वह्निमान्द्यविनाशनः ।
अजीर्णं क्षपयत्येव गुल्मबाधां विशेषतः ॥ १११ ॥
पटुपञ्चकसंयुक्तो जरण-यूषणान्वितः ।
शीलितस्त्वम्लिकाक्षारो हरेद् ग्रहणिकारुजम् ॥ ११२ ॥
अरोचकं निहन्त्याशु तथा शूलं सुदारुणम् ।
आध्मानं पक्तिशूलञ्च विष्टब्धाजीर्णकं तथा ॥ ११३ ॥
चिञ्चिकाभसितं द्राक्षाशर्कराभ्यां समन्वितम् ।
अवलीढं विशेषेण त्वरोचकहरं परम् ॥ ११४ ॥
अम्लिकाभसितं व्योषचूर्णेन परिशीलितम् ।
वह्निमान्द्यं निहन्त्याशु वाताजीर्णञ्च दारुणम् ॥ ११५ ॥
चिञ्चाक्षारः समरिचः शङ्खभूतिसमन्वितः ।

अतिसारे ग्रहण्याञ्च शिशूनान्तु प्रशस्यते ॥ ११६ ॥

अथ सैन्धवस्य नामानि

सैन्धवः सिन्धुलवणं सिन्धूत्थं सिन्धुदेशजम् ।
सिन्धूपलं सिन्धुभवं सैन्धवं सिन्धुमन्थजम् ॥ ११७ ॥
शीतशीवं शीतशिवं नादेयञ्च शिलात्मकम् ।
शिवं सितशिवञ्चैव वशिरञ्च निगद्यते ॥ ११८ ॥

अस्य गुणाः

सैन्धवं लवणं हृद्यं वृष्यं नेत्र्यं रुचिप्रदम् ।
पाचनं दीपनञ्चैव त्रिदोषशमनं परम् ॥ ११९ ॥
व्रणदोषहरं शीतं स्निग्धं लघु विबन्धजित् ।
मृदुवीर्यं पित्तहरं विबुधैः परिकीर्तितम् ॥ १२० ॥

सैन्धवस्य उत्पत्तिस्थानम्

पञ्चाम्बुवर्तिनः सिन्धोः पूर्वभागे विशेषतः ।
शिलोच्चयखनौ सिन्धूपलं समुपलभ्यते ॥ १२१ ॥

अस्य आमयिकः प्रयोगः

सैन्धवं खलु धत्तूरशिफया परिपेषितम् ।
उष्णीकृत्य प्रलिप्तं तु व्रणशोथहरं परम् ॥ १२२ ॥

नारिकेललवणः

सुविपक्वं ससलिलं नारिकेलं समाहरेत् ।
अपनीय जटां वृद्धिपत्रेण स्फोटयेद् दृशम् ॥ १२३ ॥
जातरन्ध्रान्नारिकेलान्नीरं सर्वं परित्यजेत् ।
सुचूर्णितं सैन्धवन्तु दशतोलकसंमितम् ॥ १२४ ॥
निक्षिप्य रन्ध्रमार्गेण ततो रन्ध्रं निरोधयेत् ।
वसनेन समाच्छाद्य परितो लेपयेन्मृदा ॥ १२५ ॥
रौद्रयन्त्रे विशोष्याथ पुटयेत्त महापुटे ।

तद्गोलकं स्वाङ्गशीतं प्रयत्नेन समाहरेत् ॥ १२६ ॥
सैन्धवं कज्जलीवर्णं कपालांशोज्झितं हरेत् ।
लवणो नारिकेलाख्यः समाख्यातो भिषग्वरैः ॥ १२७ ॥

अस्य गुणाः

लवणो नारिकेलाख्यः पाचनः पित्तनाशनः ।
अम्लपित्तहरः कामं पित्तशोषजशूलनुत् ॥ १२८ ॥
वातजं पित्तजं वापि श्लेष्मजं सन्निपातजम् ।
शूलञ्च परिणामोत्थं नाशयेदविकल्पतः ॥ १२९ ॥

अस्य आमयिकः प्रयोगः

लवणो नारिकेलाख्यो माषकद्वयसंमितः ।
नृसारयवजोपेतः पित्तशोषजशूलनुत् ॥ १३० ॥

अर्कलवणम्

सुचूर्णितं सैन्धवन्तु समार्कदलसंयुतम् ।
अन्तर्धूमं पचेद्धीमान् स्वाङ्गशीतमथोद्धरेत् ॥ १३१ ॥
जायते खल्वसम्पिष्टं लवणं मलिनप्रभम् ।
आयुर्वेदाचार्यवर्यैर्नाम्नार्कलवणं मतम् ॥ १३२ ॥

अस्य गुणाः

यकृत्प्लीहोदरहरं रुचिरं मलभेदनम् ।
विशेषतः समाख्यातं तन्त्रेऽर्कलवणं बुधैः ॥ १३३ ॥

अस्य आमयिकः प्रयोगः

माषकार्द्धमितं त्वर्कलवणं कोष्णवारिणा ।
पथ्याशिभिस्तु पुरुषैः सततं परिशीलितम् ॥ १३४ ॥
वातिकं श्लैष्मिकं वापि सज्वरं वापि विज्वरम् ।
सकोष्ठबद्धं व्यथया चीत्कारयुतयापि वा ॥ १३५ ।

१-पित्ताशयगतं पित्तं शुष्कं मारुतकोपतः ।
कुर्यात् शूलादिकं घोरं पित्तशोषं तदुच्यते ॥

संयुक्तं कठिनस्पर्शं ह्यतीसारादिवर्जितम् ।
यकृद्दाल्युदरं नूत्नं प्लीहोदरमलं हरेत् ॥ १३६ ॥

अथ सामुद्रलवणस्य नामानि

सामुद्रं लवणं ख्यातं समुद्रजलसम्भवम् ।
समुद्रजं सागरजं मतं सामुद्रकञ्च तत् ॥ १३७ ॥

अस्य गुणाः

समुद्रलवणं हृद्यं रुच्यं स्निग्धञ्च दीपनम् ।
सक्षारं भेदि वातघ्नं नात्युष्णं नातिशीतलम् ॥ १३८ ॥

सामुद्रलवणस्य परिचयः

समुद्रजलसंशोषाल्लवणं जायते तु यत् ।
सामुद्रं लवणं तत्तु समाख्यातं भिषग्वरैः ॥ १३९ ॥

अथ बिडलवणस्य नामानि

बिडं कृत्रिमकञ्चैव सुपाक्यं द्राविडन्तथा ।
आसुरञ्च विटञ्चाथ धूर्तञ्च कृतकं मतम् ॥ १४० ॥

अस्य गुणाः

बिडं रुच्यञ्च तीक्ष्णोष्णं सूक्ष्मं लघु च दीपनम् ।
सक्षारं हृद्यमूर्ध्वाधः कफवातानुलोमनम् ॥ १४१ ॥
अजीर्णानाहविष्टम्भहरं शूलविबन्धजित् ।
हृद्गौरवप्रशमनं वातघ्नञ्च प्रकीर्तितम् ॥ १४२ ॥

बिडलवणस्य प्रथमो निर्माणप्रकारः

वस्वक्षिसेरकमितं लवणं रोमकाभिधम् ।
पञ्चाशत्तोलकमितं चूर्णमामलकोद्भवम् ॥ १४३ ॥
समादाय भिषग्वर्यस्ततः सम्मेलयेद्दृशम् ।
ततः खल्वस्य चूर्णस्य चतुर्थांशं विधानवित् ॥ १४४ ॥
मृल्लिप्तायां क्षुद्रकण्ठ्यां हण्डिकायां तु विन्यसेत् ।

चुल्लिकायां निधायाथ विधानज्ञो भिषग्वरः ॥ १४५ ॥
प्रज्वाल्य तीव्रज्वलनं पचेद्घोराद्वयं भिषक् ।
हण्डिकाया मध्यभागो यावदायाति रक्तताम् ॥ १४६ ॥
क्षिपेत्ततः क्रमेणेह शेषं चूर्णं भिषग्वरः ।
प्रखरेणानलेनाथ यामद्वितयमात्रकम् ॥ १४७ ॥
विपाचयेदविरतं रसतन्त्रविधानवित् ।
स्वतः शीते च लवणं विडाख्यन्तु समाहरेत् ॥ १४८ ॥
चतुर्विंशतिसङ्ख्याकमेरकप्रमितं शुभम् ।
ततः सर्वेषु योगेषु योजयेद्भिषजां वरः ॥ १४९ ॥

विडलवणस्य द्वितीयो निर्माणप्रकारः

अशीतितोलकमितं लवणं रोमकाभिधम् ।
चूर्णमामलकोद्भूतं दशतोलकसंमितम् ॥ १५० ॥
मृल्लिप्तहण्डिकायां तु विन्यस्य प्रखराग्निना ।
यामद्वयं विपाच्याथ स्वाङ्गशीतमथोद्धरेत् ॥ १५१ ॥
विडाभिधं तु लवणं रसतन्त्रविधानवित् ।
अनुभूतोऽतिसुगमः प्रकारोयम्प्रकाशितः ॥ १५२ ॥

अथ सौवर्चललवणस्य नामानि

सौवर्चलं च रुचकं रुच्यकं हृद्यगन्धकम् ।
अक्षञ्च कृष्णलवणं वै काललवणं स्मृतम् ॥ १५३ ॥

अस्य गुणाः

सौवर्चलं मतं हृद्यं पाचनं दीपनं परम् ।
रोचनं भेदनञ्चापि विशदं वातनाशनम् ॥ १५४ ॥
सस्नेहं लघु गुल्मघ्नं तूर्ध्ववातानुलोमनम् ।
विबन्धानाहशूलघ्नं जन्त्वरोचकनाशनम् ॥ १५५ ॥

सौवर्चललवणस्य निर्माणप्रकारः

विशुद्धं स्वर्जिकाक्षारं चतुष्पलमितं हरेत् ।

द्रावयेदथ यत्नेन तोयेऽष्टपलसंमिते ॥ १५६ ॥
यातीह द्रवतां यावान् तावन्तं सैन्धवं ततः ।
मार्जिकाया द्रवे यत्नान्निक्षिपेद्भिषजां वरः ॥ १५७ ॥
ततः सुविमले पात्रे न्यस्य चुल्ल्यां निधापयेत् ।
पचेत्तीव्राग्निना कामं तोयञ्च परिशोषयेत् ॥ १५८ ॥
निःशेषं सलिलं ज्ञात्वा किञ्चित्कालं पुनः पचेत् ।
पाकशेषे च लवणं रुचकाख्यं समाहरेत् ॥ १५९ ॥

अथ रोमकलवणस्य नामानि

रोमकं रोमलवणं रौमञ्च रौमकं मतम् ।
शाकम्भरीयञ्च गडं साम्भरं सम्भरोद्भवम् ॥ १६० ॥

रोमकस्य-उत्पत्तिस्थानं-निर्वचनञ्च

यस्माज्जज्ञे विशेषेण रोमानद्यन्तिके पुरा ।
तस्माद्भिषग्वरैरेतद्रोमकं परिकीर्तितम् ॥ १६१ ॥
शाकम्भरह्रदाद्भूतजलाद्यस्मात्प्रजायत ।
तस्मादेतद्भिषग्वर्यैर्मतं शाकम्भरीयकम् ॥ १६२ ॥

अस्य गुणाः

साम्भरं लवणं ख्यातं भेदनं दीपनं परम् ।
अत्युष्णं लघु तीक्ष्णञ्च कटुपाकि च पित्तलम् ॥ १६३ ॥
मलदोषहरं सूक्ष्ममर्शोघ्नं वातनाशनम् ।
कफप्रणाशनञ्चैव विशदं कोष्ठशोधनम् ॥ १६४ ॥

अथ लवणद्रावकस्य नामानि

लवणद्रावकः ख्यातो लवणाम्लसमाह्वयः ।
पटुद्रावश्च कथितः पटुकद्रावकस्तथा ॥ १६५ ॥

लवणद्रावस्य निर्माणप्रकारः

सुचूर्णितं सैन्धवन्तु भाजने भर्जयेद्भिषक् ।
जलीयांशे विनिष्क्रान्ते चुल्लीतस्त्ववतारयेत् ॥ १६६ ॥

षड्भागसंमितञ्चाथ भृष्टचूर्णितसैन्धवम् ।
काचकुप्यां निधायाथ विधानज्ञो भिषग्वरः ॥ १६७ ॥
रुद्रभागमितञ्चात्र गन्धकद्रावकं शुभम् ।
शनैः शनैस्तु निक्षिप्य चुल्लिकायां निधापयेत् ॥ १६८ ॥
ततोऽस्यां काचनलिकामुखमेकं निवेशयेत् ।
अपरञ्च मुखं तस्यास्तोयपूर्णोदरार्द्धके ॥ १६९ ॥
नीरपूरितपात्रस्थे काचकुम्भेऽपरे न्यसेत् ।
अतिमन्दानलेनाथ पचेत्खलु विधानवित् ॥ १७० ॥
तिर्यङ्निपातितं चाथ बाष्परूपेण सञ्चितम् ।
तोयाभं लवणद्रावं रसवैद्यः समाहरेत् ॥ १७१ ॥

सजललवणद्रावकस्य निर्माणप्रकारः

नयन-पवनमित्र-प्राप्तसङ्ख्याप्रमाणं ।
सलिलममलमादौ काचपात्रे निदध्यात् ॥ १७२ ॥
तदनु खलु बिहायोयामिनीरत्नतुल्यं ।
विमललवणकाम्लं निक्षिपेद्वैद्यवर्यः ॥ १७३ ॥
अयमेव समाख्यातस्त्वायुर्वेदविशारदैः ।
सजलो लवणद्रावो विविधातङ्कनाशनः ॥ १७४ ॥

सजललवणद्रावकस्य गुणाः

लवणद्रावकस्तीक्ष्णो जाठराग्निप्रदीपनः ।
मूत्रदोषहरो बल्यो यकृद्दोषनिकृन्तनः ॥ १७५ ॥

सजललवणद्रावकस्य मात्रा

आरभ्य पञ्चबिन्दुभ्यो कलाबिन्दुमितं परम् ।
युञ्जीत लवणद्रावं प्रचुरेणाम्भसा भिषक् ॥ १७६ ॥

अस्य आमयिकः प्रयोगः

अन्नस्यामाशयस्थस्य विपाके तु द्वितीयके ।
लवणाम्लविहीनत्वाद् यदजीर्णं प्रजायते ॥ १७७ ॥

तस्मिन्नजीर्णे मतिमान् रोगिणं कृतभोजनम् ।
दशबिन्दुमितं युक्त्या पटुद्रावन्तु पाययेत् ॥ १७८ ॥
पानमात्रेण गात्राणां गौरवञ्चाप्यजीर्णकम् ।
नाशयित्वा बुभुक्षान्तु जनयत्याशु निर्भरम् ॥ १७९ ॥
लवणद्रावकाधिक्यादामाशयसमुद्भवे ।
अजीर्णे लवणद्रावं भोजनादौ प्रयोजयेत् ॥ १८० ॥
सक्षारे खलु प्रस्रावे क्षारमेहे च युक्तितः ।
शीलितो लवणद्रावो निर्दिष्टातङ्कनाशनः ॥ १८१ ॥
शीलितस्तु पटुद्रावः शुष्कजिह्वं हतस्वरम् ।
मृदुप्रलापसहितं हृद्दौर्बल्यसमायुतम् ॥ १८२ ॥
अस्पष्टनाडिकं चैव कदाचिद् द्रुतनाडिकम् ।
मूत्रणे प्रस्रवद्गूथं नाशयत्यान्त्रिकज्वरम् ॥ १८३ ॥
सततं लवणद्रावो मात्रया परिशीलितः ।
अफूकसेवनोद्भूतं दौर्बल्यं हन्ति निश्चितम् ॥ १८४ ॥
सजलस्तु पटुद्रावः शीलितः प्रचुराम्भसा ।
अरुचिं वह्निमान्द्यं च नाशयत्यविकल्पतः ॥ १८५ ॥

इति क्षारविशेषादिविज्ञानीयो नाम चतुर्दशस्तरङ्गः

अथ सुवर्णविज्ञानीयः पञ्चदशस्तरङ्गः

धातुपदस्य निर्वचनम्

खालित्यमथ पालित्यं कार्श्यं वार्द्धक्यमेव च ।
अपनीय दधत्येते देहं तद्धातवः स्मृताः ॥ १ ॥

धातूनां नामपरिगणनम्

स्वर्णं तारं तथा ताम्रं वङ्गं सीसकमेव च ।
यशदं च तथा लोहं सप्तैते धातवः स्मृताः ॥ २ ॥
सुवर्णचन्द्रलोहार्कवङ्गाहियशदायसम् ।
लोहसप्तकमाख्यातं सप्तलोहञ्च तन्मतम् ॥ ३ ॥

धातूनां सामान्यः प्रथमः शोधनप्रकारः

सूचीवेध्यानि पत्राणि धातूनान्तु समाहरेत् ।
यावद्वह्निप्रभाणि स्युस्तावद्वह्नौ प्रतापयेत् ॥ ४ ॥
स्नपयेत्तप्ततप्तानि काञ्जिके तु त्रिधा त्रिधा ।
तक्रे कुलत्थक्वथिते गोमूत्रतिलतैलयोः ॥ ५ ॥
एवं विशुद्धिमायान्ति स्वर्णाद्याः सप्तधातवः ।
समासतः समाख्यातमिदं सामान्यशोधनम् ॥ ६ ॥

द्वितीयः शोधनप्रकारः

प्रतप्तानि तु लोहानि रम्भामूलजले भिषक् ।
निषेचयेत्सप्तवारं विशुद्ध्यन्ति न संशयः ॥ ७ ॥

धातूनां सामान्यो मारणप्रकारः

मनःशिलागन्धकसूर्यदुग्धैः
संमर्द्य खल्वे खलु सप्तलोहम् ।
वन्योत्पलाग्नौ पुटितं प्रयत्ना-
दनुत्तमां यान्ति मृतिं ह्यवश्यम् ॥ ८ ॥

अथ स्वर्णस्य नामानि

स्वर्णं सुवर्णं द्रविणं हिरण्यं
कल्याणकं काञ्चनमाग्नवणम् ।
मनोहरं हेम च भूषणार्हं
तथाग्निबीजं कनकञ्च कौन्तम् ॥ ९ ॥
भृङ्गारमाङ्गल्यकजाम्बवानि
जाम्बूनदं भर्म च जातरूपम् ।
चाम्पेयकं लोहवरञ्च रुक्मं
चामीकरं हाटकसंज्ञमुक्तम् ॥ १० ॥

ग्राह्यसुवर्णस्य लक्षणम्

बालारुणारुणमलं ज्वलनप्रतप्तं
शाणोपले घुसृणचूर्णसमानवर्णम् ।
नाराचिकाधृतमलं गुरुतामुपेयात्
स्निग्धं तदेव कनकं कथितं तु जात्यम् ॥ ११ ॥

अपरं लक्षणम्

कोमलं रक्तपीताभं स्निग्धं शुल्वेन्दुवर्जितम् ।
गुरु चाखिलधातुभ्यो जात्या तत्स्वर्णमुत्तमम् ॥ १२ ॥

अग्राह्यसुवर्णस्य स्वरूपम्

कठिनं लघु रूक्षञ्च कपे च्छेदेऽनले सितम् ।
तारताम्रसमायुक्तं स्वर्णं हेयं स्मृतं बुधैः ॥ १३ ।

सुवर्णशोधनस्य प्रयोजनम्

यस्मादशोधितं स्वर्णं हन्ति बुद्धिबलादिकम् ।
करोति च बहून् रोगान् तस्मात्स्वर्णं विशोधयेत् ॥ १४ ॥

सुवर्णस्य प्रथमः शोधनप्रकारः

विततानि विशालानि कर्षैकप्रमितानि तु ।
सूचीवेध्यानि पत्राणि सुवर्णस्य समाहरेत् ॥ १५ ॥

ततः खल्वम्लपिष्टेन मृत्तिकापञ्चकेन वै ।
तानि पत्राणि संलिप्य कपोताख्यपुटे पुटेत् ॥ १६ ॥
स्वर्णं सप्तपुटैरेवं शुद्धिमायात्यनुत्तमाम् ।
श्यामिका हीयते चापि तारताम्रादियोगजा ॥ १७ ॥

द्वितीयः शोधनप्रकारः

कपोन्मितानीह दलानि हेम्नः खल्वम्लपिष्टेन ससैन्धवेन ।
वन्योपलोत्थेन तु भस्मना वै प्रलेपयेल्लेपविधानदक्षः ॥ १८ ॥
लेपं प्रशुष्कं प्रसमीक्ष्य वैद्यः शरावसंस्थानि तु कोकिलाग्नौ ।
पुटेत्पुटे कुक्कुटसंज्ञके तु स्वर्णं भवेच्छोडशवर्णतुल्यम् ॥ १९ ॥

तृतीयः शोधनप्रकारः

सूचीविध्यानि पत्राणि सुवर्णस्य समाहरेत् ।
कर्तर्या कर्तयेच्चाथ कणान् सूक्ष्मांस्तु कारयेत् ॥ २० ॥
मृल्लिप्ते काचपात्रे च न्यसेत्स्वर्णकणांस्ततः ।
त्रिपादिकायां विन्यस्य सुरादीपाग्निना पचेत ॥ २१ ॥
लवणद्रावकं तत्र निक्षिपेत्तु शनैः शनैः ।
सोरकद्रावकश्चाथ पूर्वद्रावस्य पादिकम् ॥ २२ ॥
विधिज्ञो निक्षिपेद्यावद् द्रवतां याति काञ्चनम् ।
किञ्चित्कालं पचेच्चाथ द्रावाधिक्यनिवृत्तये ॥ २३ ॥
सलिलञ्चाथ निक्षिप्य पचेदथ विधानवित् ।
सजलं चणकाम्लञ्च तावत्तत्र विनिक्षिपेत् ॥ २४ ॥
यावत् खलु सुवर्णस्य चणकाम्लस्य योगतः ।
अतिसूक्ष्मकणं चूर्णं पात्राधः पतितं भवेत् ॥ २५ ॥
विनश्यत्यम्लता यावत् तावत्प्रक्षालयेज्जलैः ।
संशोष्य चाथ मतिमान् विशुद्धं स्वर्णमाहरेत् ॥ २६ ॥

विशुद्धस्वर्णस्य प्रयोगक्रमः

विशोधितं सुवर्णन्तु रसतन्त्रविचक्षणः ।
घृष्ट्वा च मण्डलीकृत्य तत्र तत्र प्रयोजयेत् ॥ २७ ॥

घृष्टस्य विशुद्धस्वर्णस्य गुणाः

विशुद्धं कनकं घृष्टं विषबाधाविनाशनम् ।
मधुरं शीतलं नेत्र्यं गर्भस्थापनमुत्तमम् ॥ २८ ॥
पित्तामयप्रशमनं हृद्दौर्बल्यहरं परम् ।
अन्यभेषजमाहात्म्यात् करोति विविधान् गुणान् ॥ २९ ॥

सुवर्णमण्डलस्य नामानि

सुवर्णमण्डलं स्वर्णमण्डलं स्वर्णपत्रकम् ।
सुवर्णपटलं स्वर्णदलञ्चापि प्रकीर्तितम् ॥ ३० ॥

सुवर्णमण्डलस्य गुणाः

स्वर्णमण्डलमायुष्यं वह्निमान्द्यविनाशनम् ।
आक्षेपशमनं नेत्र्यं वीर्यवृद्धिकरं परम् ॥ ३१ ॥
अम्लपित्तापहं हृद्यं विपाके स्वादुशीतलम् ।
हिक्कानाहविषश्लेष्मक्षयशूलव्रणापहम् ॥ ३२ ॥

सुवर्णपटलस्य प्रयोगविधिः

सुवर्णपटलं सम्यक् मितया परिपेषितम् ।
तत्तद्रोगघ्नभेषज्ययुतं तत्तद्गदापहम् ॥ ३३ ॥

अथ सुवर्णलवणस्य नामानि

सुवर्णलवणं स्वर्णलवणञ्चापि तन्मतम् ।
हिरण्यलवणञ्चैव समाख्यातं भिषग्वरैः ॥ ३४ ॥

सुवर्णलवणस्य निर्माणप्रकारः

विशोधितं पावकभागिकन्तु
स्वर्णं तु सत्काचशरावसंस्थम् ।
सुराप्रदीपे विनिधाय चाथ

मन्दानलेनेह पचेद्रसज्ञः ॥ ३५ ॥
शनैः शनैः संततमल्पमल्पं
तुर्यांशसोराम्लकमिश्रितन्तु ।
क्षिपेद्विशुद्धं लवणाम्लमारा-
द्यावत्सुवर्णं द्रवतामुपैति ॥ ३६ ॥
द्रुतं सुवर्णन्तु विलोक्य शुद्धं
दिग्भागिकं सिन्धुभवं क्षिपेच्च ।
नारङ्गरङ्गन्तु जले विशुष्के
सुवर्णपूर्वं लवणं हरेद्वै ॥ ३७ ॥
ततः सुवर्णलवणं काचकुप्यां निधापयेत् ।
अथ निर्दिष्टकार्येषु जले संद्राव्य योजयेत् ॥ ३८ ॥

सुवर्णलवणस्य गुणाः

सुवर्णलवणं वृष्यं दोषत्रितयकोपजित् ।
तुवरं स्वादु तिक्तञ्च सलिले च द्रवीभवेत् ॥ ३९ ॥
पुष्पावरोधं मधुमेहबाधां चिरन्तनञ्चापि फिरङ्गरोगम् ।
अपस्मृतिं श्वासमथोग्रवेगं क्लैब्यं तथोन्मादमलं निहन्यात् ।४०।

सुवर्णलवणस्य मात्रा

खशरांशाद्रक्तिकाया विंशांशप्रमितं शुभम् ।
युञ्जीत स्वर्णलवणं बलकालाद्यपेक्षया ॥ ४१ ॥

अस्य प्रयोगक्रमः

सुवर्णलवणं गुञ्जोन्मितं खलु समाहरेत् ।
सार्द्रकोलद्वयमिते जले संद्रावयेद्भिषक् ॥ ४२ ॥
तस्माज्जलाद्भिषग्वर्यो बिन्दून् भास्करसंख्यकान् ।
तत्तन्निर्दिष्टरोगेषु विधानज्ञः प्रयोजयेत् ॥ ४३ ॥
भिषक् सुवर्णलवणं त्वासवादौ प्रयोजयेत् ।

रसौषधेषु च प्राज्ञो न कदाचित् प्रयोजयेत् ॥ ४४ ॥

अथ सुवर्णमारणस्य प्रथमः प्रकारः

कर्षोन्मितं शोधितमग्निबीजं न्यसेत्कुमुद्यां भिषजां वरेण्यः ।
संद्रावयेच्चाथ हि कोकिलाग्नौ सद्वङ्कनालानिलसुप्रदीप्ते ॥४५॥
द्रुतं सुवर्णन्तु ततो विलोक्य क्षिपेत्समं तत्र मृतं रसेशम् ।
लुङ्गद्रवेणाथ विमर्द्य सम्यक् सुश्लक्ष्णचूर्णञ्च ततो विदध्यात्।४६
ततः सुवर्णप्रमितं विशुद्धं क्षिपेद्विधिज्ञो रसगर्भचूर्णम् ।
पुटेत्पुटे कुक्कुटसंज्ञके च मार्तण्डवारं भिषगप्रमत्तः ॥ ४७ ॥
एवं नातिचिरादेव काञ्चनं याति पञ्चताम् ।
सुश्लक्ष्णं कुङ्कुमच्छायं निश्चन्द्रञ्च भवत्यलम् ॥ ४८ ॥

द्वितीयो मारणप्रकारः

विशुद्धस्वर्णपत्राणि कर्षैकप्रमितानि च ।
समादाय समं सूतं दत्त्वा संमर्दयेद् दृढम् ॥ ४९ ॥
निम्बुद्रवेण सम्पेष्य सम्यक् प्रक्षालयेत्ततः ।
हिङ्गुलं गन्धकञ्चाथ शिलाञ्च नवसादरम् ॥ ५० ॥
पृथक् पृथक् कर्षमितं निक्षिप्याम्लेन मर्दयेत् ।
संशोष्य चातपे सम्यक् श्लक्ष्णचूर्णञ्च कारयेत् ॥ ५१ ॥
पुटेत्तावत्प्रयत्नेन यावन्निश्चन्द्रिकं भवेत् ।
इत्थं स्वल्पपुटैरेव काञ्चनं याति पञ्चताम् ॥ ५२ ॥

तृतीयो मारणप्रकारः

स्वर्णपत्राणि शुद्धानि समादाय भिषग्वरः ।
कर्तर्या कर्तयेच्चाथ कणान् सूक्ष्माँस्तु कारयेत् ॥ ५३ ॥
स्वर्णतुल्यं रसं दत्त्वा खल्वे सम्मर्दयेद् दृढम् ।
निम्बुद्रवेण सम्मर्द्य बहुशः क्षालयेद्भिषक् ॥ ५४ ॥
कुनटीं रससिन्दूरं स्वर्णतुल्यं विनिक्षिपेत् ।

सुवर्णपादिकञ्चैव मृतं कनकमाक्षिकम् ॥ ५५ ॥
रविदुग्धेन सम्पेष्य श्लक्ष्णचूर्णञ्च कारयेत् ।
पुटैस्तावद्विधानज्ञो यावन्निश्चन्द्रिकं भवेत् ॥ ५६ ॥
एवं स्वल्पपुटैरेव कनकं मृतिमाप्नुयात् ।
निश्चन्द्रिकञ्च मसृणं स्वर्णभस्म भवेच्छुभम् ॥ ५७ ॥
द्वितीयादिपुटेष्वत्र मृतं कनकमाक्षिकम् ।
न निक्षिपेद्विधानज्ञो रहस्यमिदमीरितम् ॥ ५८ ॥

चतुर्थो मारणप्रकारः

शुद्धेषु स्वर्णपत्रेषु समानं शुद्धपारदम् ।
दत्त्वा सम्पेषयेदम्लैः सुचिरं क्षालयेत्ततः ॥ ५९ ॥
संशोष्य गन्धकं दत्त्वा पुटेत्पुटविधानवित् ।
एवं चतुर्दशपुटैः सुवर्णं मृतिमाप्नुयात् ॥ ६० ॥
षोडशांशं प्रतिपुटं रसेशं ह्रासयेद्बुधः ।
अन्यथा पञ्चतां नैति रहस्यमिति दर्शितम् ॥ ६१ ॥

पञ्चमो मारणप्रकारः

सूचीवेध्यानि पत्राणि सुवर्णस्य समाहरेत् ।
रसेशं तत्समं दत्त्वा मर्दयेत्तु दिनत्रयम् ॥ ६२ ॥
निम्बूनीरेण सम्मर्द्य वारिणा क्षालयेद्रसम् ।
श्वेतपाषाणचूर्णञ्च स्वर्णार्द्धं तत्र निक्षिपेत् ॥ ६३ ॥
जम्बीरस्य द्रवं दत्त्वा पेषयेच्च दिनत्रयम् ।
शोषयित्वा द्रवं सम्यक् विदध्यात् श्लक्ष्णचूर्णकम् ॥ ६४ ॥
शुद्धगन्धकचूर्णञ्च ततः स्वर्णोन्मितं क्षिपेत् ।
शरावसम्पुटे न्यस्य विदध्यात्सन्धिरोधनम् ॥ ६५ ॥
पुटैर्लघुपुटेनैव यावन्निश्चन्द्रिकं भवेत् ।
एवं स्वल्पपुटैरेव काञ्चनं याति पञ्चताम् ॥ ६६ ॥

श्रीमत्परमपूज्येन धन्वन्तरिमहर्षिणा ।
भिषग्धिताय सुगमः प्रकारोऽयं निरूपितः ॥ ६७ ॥

मृतसुवर्णस्य गुणाः

मृतं सुवर्णं मधुरञ्च वृष्यं हृद्यञ्च नेत्र्यं परमञ्च मेध्यम् ।
रसायनं पुंसवनोपयोगि विषापहं कान्तिकरञ्च शस्तम् ॥ ६८ ॥

अपि च

स्वर्णं स्निग्धं मधुरमधुरं वृष्यमायुष्यमग्र्यं
वर्ण्यं बल्यं विषगरहरं त्वन्त्रशोषक्षयघ्नम् ।
रुच्यं पुण्यं पवनशमनं दीपनञ्चातिकेश्यं
हन्यादेतन्नियतमचिरादेव रोगानशेषान् ॥ ६९ ॥

विशिष्टा गुणाः

मृतं सुवर्णं शिशिरं वयःस्थापनमुत्तमम् ।
स्मृतिप्रदं परञ्चैव त्रिदोषज्वरनाशनम् ॥ ७० ॥
सौन्दर्यं मुखलावण्यं ललनानां विवर्धयेत् ।
चित्तहारित्वमङ्गेषु जनयेच्च विशेषतः ॥ ७१ ॥
मृतं सुवर्णं सुस्निग्धं वाग्विशुद्धिकरं परम् ।
चिन्ताशोकभयक्रोधसम्भूतामयनाशनम् ॥ ७२ ॥
शिरोदेशे प्रवृद्धान्तु रक्तमञ्चरणक्रियाम् ।
आत्मघाताभिलाषां च प्राबल्येन समुत्थिताम् ॥ ७३ ॥
अस्थिक्षतं त्वस्थिशोथं तथा जङ्घास्थिवेदनाम् ।
फिरङ्गजां मुष्कमांसवृद्धिञ्चापि चिरन्तनीम् ॥ ७४ ॥
उन्मादमथ वैचित्यं योषापस्मारकं तथा ।
चित्तोद्वेगं भ्रमं ग्लानिं नाशयेदविकल्पतः ॥ ७५ ॥
हृद्वेपनप्रशमनं मुष्कशोथप्रणाशनम् ।
अस्थिशोषहरं चैव मूर्छायपरिकृन्तनम् ॥ ७६ ॥

कासश्वासप्रशमन परमाजाववद्धनम् ।
अतीसारग्रहणिकापाण्ड्वामयनिषूदनम् ॥ ७७ ॥

अपि च

मृतं सुवर्णं शमयेन्नितान्तं प्रसादसंज्ञं पवनं प्रवृद्धम् ।
क्षीणं तथैनं परिबृंहयेच्च समं समं पोषयतीह काये ॥ ७८ ॥
प्रक्षीणमेधास्मृतिपाटवानां प्रशुष्यदाम्लानकलेवराणाम् ।
प्रमुह्यतां शास्त्रगतौ च नित्यं यूनां शिशूनाञ्च परं प्रशस्तम ॥७९

सुवर्णभस्मनो मात्रानिरूपणम्

समारभ्याष्टमाद् भागाद् रक्तिकाया भिषग्वरः ।
योजयेत्तुर्यभागान्तं मृतं स्वर्णं तु कालवित् ॥ ८० ॥

अस्य आमयिकः प्रयोगः

बिल्वत्वक्स्वरसोपेतं रससिन्दूरसंयुतम् ।
सुवर्णं शीलितं यत्नान्नाशयेद्वातिकज्वरम् ॥ ८१ ॥
पर्पटस्वरसोपेतं रससिन्दूरमिश्रितम् ।
शीलितं तपनीयन्तु नाशयेत्पैत्तिकं ज्वरम् ॥ ८२ ॥
तुलसीरससंयुक्तं ससिन्दूरं निषेवितम् ।
काञ्चनं ह्यचिरादेव कफज्वरमपोहति ॥ ८३ ॥
मक्षौद्रं साभ्रकं स्वर्णं मृतं खलु निषेवितम् ।
अचिरादेव चिरजं जीर्णज्वरमपोहति ॥ ८४ ॥
बिल्वपेशिकया युक्तं सुवर्णन्तु सजीरकम् ।
शीलितं नाशयेत्तूर्णमतीसारमसंशयम् ॥ ८५ ॥
रसपर्पटिकोपेतं सुवर्णं परिशीलितम् ।
ग्रहणीं चिरसञ्जातां नाशयेदविकल्पतः ॥ ८६ ॥
गुडूचिकासत्त्वरजोविमिश्रं
स्वर्णं सलोहं परिशीलितन्तु ।

नवोत्थितं वा सुचिरोत्थितं वा
पाण्ड्वामयं नातिचिराभिहन्यात् ॥ ८७ ॥
साभ्रकं वा ससिन्दूरं समौक्तिकमथापि वा ।
सुवर्णं नाशयेत्तूर्णं राजयक्ष्माणमुल्बणम् ॥ ८८ ॥
क्षीरकाकोलिकोपेतं चोपचीनीसमन्वितम् ।
सुवर्णं शोधयेत्तूर्णं गर्भाशयमसंशयम् ॥ ८९ ॥
गुञ्जाचिकाकुङ्कुमसारिवाद्यैर्वनौषधैः शोणितशोधनीयैः ।
स्वर्णं प्रयुक्तं रसपुष्पयुक्तं हरेत्फिरङ्गं चिरजन्तु तूर्णम् ॥९०॥
शठ्यादिभिः श्वासहरैर्द्रव्यैस्तु चरकोदितैः ।
स्वर्णं नातिचिरादेव नाशयेच्छ्वासमुल्बणम् ॥ ९१ ॥
धात्रीचूर्णसमायुक्तं सुवर्णं खलु शीलितम् ।
अम्लपित्तं निहन्त्याशु चिरोत्थमपि दारुणम् ॥ ९२ ॥
सिन्दूराभ्रसमायुक्तं सुवर्णं शङ्खिनीयुतम् ।
अपस्मारं निहन्त्याशु योषापस्मारकं तथा ॥ ९३ ॥
रससिन्दूरसंयुक्तं सुवर्णं परिशीलितम् ।
बलाक्वाथेन नियतं शीर्षवेपथुनाशनम् ॥ ९४ ॥
पुनर्नवाकज्जलिकायुक्तं सुमृतकाञ्चनम् ।
गोमूत्रेण प्रयुक्तं तु मुष्कशोथं विनाशयेत् ॥ ९५ ॥
द्राक्षाकणाकट्फलयष्टिकाभिः
सुवर्णचूर्णस्य निषेवणेन ।
वाणी जयत्याशु रुतं विशेषात्
पुंस्कोकिलानां मधुमादितानाम् ॥ ९६ ॥
रक्ताङ्गतुङ्गोत्पलयष्टिकाभिः
सितासमङ्गारुधिरादिभिर्वा ।
स्वर्णं प्रयुक्तं खलु सुन्दरीणां

लावण्यवृद्धिं प्रकरोत्यनल्पाम् ॥ ९७ ॥
विश्वालवङ्गमरिचैः सक्षौद्रैस्तु निषेवितम् ।
सुवर्णं नाशयेत्तूर्णमुन्मादन्तु त्रिदोषजम् ॥ ९८ ॥
धात्रीचूर्णयुतं स्वर्णं गायत्रीरसभावितम् ।
शीलितं चरमे काले हन्ति रिष्टान्यशेषतः ॥ ९९ ॥
सुवर्णचूर्णं परिशीलितन्तु
वचामृताविश्वशतावरीभिः ।
षण्मासमात्रं तु निषेवणेन
मेधाभिवृद्धिं जनयेन्नितान्तम् ॥ १०० ॥
मृतं सुवर्णं परिशीलयन्तः
स्थिराविदारीवरदाजराभिः ।
मामत्रयेणैव कृशाः पुमांसः
प्रपुष्टदेहाश्च बहुप्रजाः स्युः ॥ १०१ ॥
सुवर्णचूर्णं परिशीलयन्तो
धात्रीस्थिराविश्वपुनर्नवाभिः ।
अधृष्यदेहा बलिभिर्भवन्ति
तारुण्यलावण्यविलासपूर्णाः ॥ १०२ ॥
जीवनीयगणोद्दिष्टभेषजैः परिशीलितम् ।
सुवर्णं सर्वदा पुंसां जीवनीयं परं स्मृतम् ॥ १०३ ॥
नागकेशरचूर्णेन सुवर्णं परिशीलितम् ।
ऋतौ सीमन्तिनीनान्तु गर्भधारणमुत्तमम् ॥ १०४ ॥
काकोल्यादिगणोद्दिष्टैर्यथासम्भवयोजितैः ।
भेषजैर्भक्षितं स्वर्णं स्तन्यसम्वर्द्धनं परम् ॥ १०५ ॥

१–स्थिरा–शालिपर्णी, विदारी–स्वनामख्यातः शुक्लकन्दः, वरदा–अश्वगन्धा, अजरा–कपिकच्छू ।

सताप्यभसितं स्वर्णं सितया सुविमिश्रितम् ।
नानायोगसमुद्भूतां विषबाधां व्यपोहति ॥ १०६ ॥
निर्विषीचूर्णसंयुक्तं तपनीयं निषेवितम् ।
अचिरादेव नियतं विषबाधां व्यपोहति ॥ १०७ ॥
पाटलाफलनीरेण सक्षौद्रं मृतकाञ्चनम् ।
निषेवितं निहन्त्याशु हिक्का दोषत्रयोद्भवाः ॥ १०८ ॥
सितापलासमायुक्त सुवर्ण पारशालितम् ।
अस्थिशोषं त्वस्थिशोथं तथैवास्थिगतक्षतम् ॥ १०९ ॥
स्तनन्धयानां बालानां विशेषादस्थिवक्रताम् ।
दारुणामस्थिपीडां च नाशयत्यविकल्पतः ॥ ११० ॥

गीतिका

जाटलारजाविमिश्रं परिशीलितं सुवर्णम् ।
विनिहन्ति शीर्षदेशे विततं प्रसादवातम् ॥ १११ ॥
त्रिगुणाभ्रलोहमिश्रं वरुणाम्भसा सुवर्णम् ।
विनिहन्ति वृक्करोगं खलु दाहशोथयुक्तम् ॥ ११२ ॥
गिरिजत्वयोविमिश्रं रजतान्वितं सुवर्णम् ।
श्वयथुं जरायुसंस्थं विनिहन्ति सोपसर्गम् ॥ ११३ ॥
गगनायसा समेतं परिशीलितं सुवर्णम् ।
जठरस्थितं मलाख्यं विनिहन्ति वातमारात् ॥ ११४ ॥
रजनीपुनर्नवाढ्यं खलु शृङ्गवेरवारा ।
विनियोजितं सुवर्णं विनिहन्ति मुष्कशोथम् ॥ ११५ ॥

इति सुवर्णविज्ञानीयो नाम पञ्चदशस्तरङ्गः

अथ रजतविज्ञानीयः षोडशस्तरङ्गः

रजतस्य नामानि

रजतं रुचिरं रौप्यं तारं सौधञ्च शुभ्रकम् ।
चन्द्रलोहं चन्द्रहासं रूपकं चन्द्रसंज्ञकम् ॥ १ ॥

ग्राह्यरजतस्य स्वरूपम्

छेदे निकाषफलके दहने प्रकामं
रम्यञ्च शारदकलाधरमण्डलाभम् ।
नाराचिकाधृतमलं गुरुतामुपेयात्
स्निग्धं तदेव कथितं रजतन्तु जात्यम् ॥ २ ॥

त्याज्यरजतस्य स्वरूपम

दाहेऽतिमलिनं पीतं रक्तं रूक्षं लघु स्फुटम् ।
कठिनं सदलञ्चैव रजतं त्याज्यमुच्यते ॥ ३ ॥

प्रकारान्तरेण जात्यरजतस्य स्वरूपम्

निर्मलं पिच्छिलं स्निग्धं मृदुलं निर्दलं घनम् ।
शरदिन्दुनिभं यच्च रजतं जात्यमुच्यते ॥ ४ ॥

रजतशोधनस्य प्रयोजनम्

तारं विवर्द्धयति सर्गजगात्रतापं
वीर्यं विनाशयति हन्ति शरीरपुष्टिम् ।
विड्बन्धनं रचयतीह तथाङ्गसादं
ईषन्मृतं त्वपि मृतं यदि शुद्धिहीनम् ॥ ५ ॥

रजतस्य प्रथमः शोधनप्रकारः

पत्रीकृतं तु रजतं ज्वलने प्रतप्तं
निर्वापयेन्मुनितरोः स्वरसे त्रिवारम् ।
इत्थं विशुद्धममलं खलु चन्द्रलोहं
संयोजयेन्मृतिविधौ भिषजां वरेण्यः ॥ ६ ॥

द्वितीयः शोधनप्रकारः

प्रदीप्य वह्निं खलु चुल्लिकायां
तस्यां कटाहञ्च ततो निदध्यात् ।
तदन्तरे चाथ वनोपलोत्थ-
भूत्यालवालं परितो विदध्यात् ॥ ७ ॥
अथालवालस्य तु मध्यदेशे
रौप्यं क्षिपेद्वै भिषजां वरेण्यः ।
तारोन्मितं शोधितसीसकञ्च
निक्षिप्य दर्व्या परिचालयेच्च ॥ ८ ॥
द्रुतन्तु तारं त्वथ सीसकञ्च
विलोक्य टङ्कं प्रददीत कामम् ।
सीसं मृतं धूमविवर्जितञ्च
समाहरेद्रौप्यमलं विशुद्धम् ॥ ९ ॥

तृतीयः शोधनप्रकारः

पत्तलीकृतपत्राणि राजतानि भिषग्वरः ।
वह्नौ प्रतापयेत्कामं वङ्कनालप्रदीपिते ॥ १० ॥
ततो निम्बूकजद्रावे चाङ्गेरीस्वरसेऽपि वा ।
स्नपयेत्तप्ततप्तानि भूयो भूयः प्रयत्नतः ॥ ११ ॥
यावद्राजतपत्राणि मार्दवं यान्ति निर्भरम् ।
वीतशङ्कस्ततो वैद्यो मारणाय प्रयोजयेत् ॥ १२ ॥

अथ रजतदलस्य नामानि

चन्द्रलोहदलं चैव स्मृतं रजतमण्डलम् ।
तदेव तारपटलं मतं तारदलञ्च तत् ॥ १३ ॥

अस्य गुणाः

चन्द्रलोहदलं शीतं तुवराम्लरसं सरम् ।
विपाकमधुरं बल्यं स्निग्धं रुच्यञ्च लेखनम् ॥ १४ ॥

प्रमेहहरमायुष्यं वयःस्थापनमुत्तमम् ।
वृष्यं मेध्यं विशेषेण वातपित्तप्रणाशनम् ॥ १५ ॥

रजतपटलानां प्रयोगः

ताम्बूलवीटिकादौ वा मिष्टान्नेषु विशेषतः ।
साम्प्रतं विनियुज्यन्ते चन्द्रलोहदलानि तु ॥ १६ ॥

रजतस्य प्रथमो मारणप्रकारः

कर्षद्वयमितं तारं विशुद्धन्तु समाहरेत् ।
रसेश्वरं तारतुल्यं निर्मलञ्च हरेद्भिषक् ॥ १७ ॥
खल्वे सम्पेष्य यत्नेन पिष्टिकां कारयेत्ततः ।
निम्बूकस्वरसं दत्त्वा दिनमेकं सुपेषयेत् ॥ १८ ॥
ततः प्रक्षालयेत्कामं सलिलेन भिषग्वरः ।
शुद्धं सौगन्धिकं तुल्यं तथैव नटभूषणम् ॥ १९ ॥
निक्षिप्य चाथ सम्पेष्य श्लक्ष्णचूर्णञ्च कारयेत् ।
शरावसम्पुटे न्यस्य पुटेत्स्वल्पपुटे ततः ॥ २० ॥
एवं पुटत्रयेणैव रजतं मृतिमाप्नुयात् ।
भस्म सञ्जायते चैवं रक्तोत्पलसमप्रभम् ॥ २१ ॥

द्वितीयो मारणप्रकारः

रौप्यपत्राणि शुद्धानि समादाय भिषग्वरः ।
कर्तर्या कर्तयेच्चाथ कणान् सूक्ष्मांस्तु कारयेत् ॥ २२ ॥
रौप्यपत्रामितञ्चाथ तालं गन्धञ्च शोधितम् ।
निक्षिपेच्चाथ सम्पेष्य शरावद्वयसम्पुटे ॥ २३ ॥
निधाय पुटयेद्यत्नात्पुटे कुक्कुटसंज्ञके ।
एवं पुटत्रयेणैव तारं यात्याशु पञ्चताम् ॥ २४ ॥
भस्म सञ्जायते चैवं कालाञ्जनसमप्रभम् ।
एवं मृतं चन्द्रलोहं वीतशङ्कः प्रयोजयेत् ॥ २५

तृतीयो मारणप्रकारः

पत्तलीकृतपत्राणि राजतानि समाहरेत् ।
कर्तर्या कर्तयित्वा च कणान् सूक्ष्माँस्तु कारयेत् ॥ २६ ॥
तारपत्रसमं सूतं गन्धञ्च विमलं हरेत् ।
कुमारीस्वरसं दत्त्वा सम्यक् सम्पेषयेद् बुधः ॥ २७ ॥
शरावसम्पुटे न्यस्य करीषाग्नौ पुटेद्भिषक् ।
एवं स्वल्पपुटैरेव रौप्यं याति हि पञ्चताम ॥ २८ ॥

चतुर्थो मारणप्रकारः

पत्रीकृतं शुद्धतारं चतुस्तोलकसंमितम् ।
द्वितोलकमितं चैव सुमृतं स्वर्णमाक्षिकम् ॥ २९ ॥
सुधादुग्धेन सम्पेष्य पेषयेद्याममात्रकम् ।
आतपे चाथ संशोष्य श्लक्ष्णचूर्णञ्च कारयेत् ॥ ३० ॥
शरावसम्पुटस्थञ्च पुटेद्धन्योपलैर्भिषक् ।
एवं स्वल्पपुटैरेव रजतं मृतिमाप्नुयात् ॥ ३१ ॥
द्वितीयादिपुटेष्वत्र रसतन्त्रविचक्षणः ।
माक्षिकं न प्रयुञ्जीत रहस्यमिति कीर्तितम् ॥ ३२ ॥

पञ्चमो मारणप्रकारः

शुद्धानि तारपत्राणि समादाय भिषग्वरः ।
विशोधितं हिङ्गुलं तु क्षिपेत्तारमितं भिषक् ॥ ३३ ॥
तथैव सुमृतं ताप्यं क्षिप्त्वा सम्पेषयेद् बुधः ।
निम्बूकस्वरसं दत्त्वा शुष्कचूर्णञ्च कारयेत् ॥ ३४ ॥
सम्पुटस्थं ततः कृत्वा पुटयेत्तु प्रयत्नतः ।
एवं स्वल्पपुटैरेव रजतं मृतिमाप्नुयात् ॥ ३५ ॥
द्वितीयादिपुटेष्वत्र रसतन्त्रविचक्षणः ।
माक्षिकं न प्रयुञ्जीत रहस्यमिह कीर्तितम् ॥ ३६ ॥

षष्ठो मारणप्रकारः

समाहरेत्सुविमलतारपत्रकणोच्चयम् ।
निम्बूकद्रवसंशुद्धं निरम्लीकृतमिङ्गुलम् ॥ ३७ ॥
तारद्विगुणितं दत्त्वा पिष्ट्वा चूर्णञ्च कारयेत् ।
ऊर्ध्वपातनयन्त्रेण पचेत्पाकविधानवित् ॥ ३८ ॥
भूयोभूयः पचेद्यावद्रजतं मृतिमाप्नुयात् ।
अधःस्थं सुमृतं तारं रक्ताभमतिसुन्दरम् ॥ ३९ ॥
आहरेदूर्ध्वसंस्थन्तु रसेशञ्चातिनिर्मलम् ।
एवं मृतं चन्द्रलोहं तत्तद्योगेषु योजयेत् ॥ ४० ॥

सप्तमो मारणप्रकारः

राजतानि विशुद्धानि पत्राणीह समाहरेत् ।
रसेश्वरं समं दत्त्वा पिष्टिकां कारयेत्ततः ॥ ४१ ॥
गौरीपाषाणचूर्णञ्च समं निक्षिप्य मर्दयेत् ।
आतपे चाथ संशोष्य शुष्कचूर्णञ्च कारयेत् ॥ ४२ ॥
सम्पुटस्थं ततः कृत्वा पुटेद् गजपुटेन तु ।
पुटमेकं प्रदायाथ खल्वे सञ्चूर्णयेत्ततः ॥ ४३ ॥
हिङ्गुलं विमलञ्चैव तत्तुल्यं मेलयेद्बुधः ।
एवं पुटद्वयं दद्याद्रसतन्त्रविचक्षणः ॥ ४४ ॥
एवं पुटत्रयेणैव रजतं मृतिमाप्नुयात् ।
एवं मृतन्तु रजतं वीतशङ्कः प्रयोजयेत् ॥ ४५ ॥

मृतरजतस्य गुणाः

तारं मृतं सुशिशिरं तुवरञ्च रुच्यं
स्निग्धं विपाकमधुरं परमञ्च मेध्यम् ।
वर्ण्यं परं पवनहारि कफप्रणाशि
त्वम्लं सरं परमलेखनकञ्च वृष्यम् ॥ ४६ ॥

सुमृतं चन्द्रलोहन्तु वयःस्थापनमुत्तमम् ।
बल्यं परं दाहहरं स्मृतिकान्तिविवर्द्धनम् ॥ ४७ ॥
तृष्णाशोषप्रशमनं परमञ्च रसायनम् ।
भ्रमहारि विशेषेण गर्भाशयविशोधनम् ॥ ४८ ॥
पित्तामयप्रशमनं प्रमेहाद्यामयापहम् ।
आयुष्यञ्च विशेषेण विष्टब्धाजीर्णनाशनम् ॥ ४९ ॥
मदात्ययात्ययकरं वह्निमान्द्यप्रणाशनम् ।
विषघ्नं ज्वरहृच्चैव प्लीहोदरविनाशनम् ॥ ५० ॥
क्षयक्षयकरं नाडीशूलापस्मृतिनुत् परम् ।
हृद्यं खलु विशेषेण जाठरामयनाशनम् ॥ ५१ ॥

विशिष्टा गुणाः

मृतन्तु तारं शमयेन्नितान्तं
प्रकोष्ठगं वातमतिप्रवृद्धम् ।
शाखाश्रयं पित्तमलं विवृद्धं
जत्रूर्ध्वसंस्थञ्च कफं मलाख्यम् ॥ ५२ ॥
प्रक्षीणबुद्धिस्मृतिसाहसानां
शिरोभ्रमेणातिविमोहितानाम ।
अध्यापनादौ सुचिरं रतानां
यूनां शिशूनाञ्च परं प्रशस्तम ॥ ५३ ॥

मृतरजतस्य मात्रानिरूपणम्

रक्तिकायास्तुरीयांशाद्रक्तिकैकामितं परम् ।
मृतं तारं नियुञ्जीत बलकालाद्यपेक्षया ॥ ५४ ॥

अस्य आमयिक प्रयोगः

यवानिकादेवपुष्पचूर्णेन रजतं मृतम् ।
शीलितं नाशयत्याशु कोष्ठवातं चिरोत्थितम् ॥ ५५ ॥

एलाचूर्णयुतं तारं सततं परिशीलितम् ।
अजीर्णरोगजनितं हृदयस्पन्दनं हरेत् ॥ ५६ ॥
एलासितोपलाचूर्णयुतं तारं तु शीलितम् ।
सूर्यापवर्तं च तथा निहन्त्यर्धावभेदकम् ॥ ५७ ॥
रससिन्दूरलोहाढ्यं सशिलाजतुताप्यकम् ।
शीलितं चन्द्रलोहं तु वरावारा विशेषतः ॥ ५८ ॥
वामडिम्बाशयोद्भूततीव्रवेदनयान्वितम् ।
गर्भाशयच्युतिं घोरां नाशयत्यविलम्बितम् ॥ ५९ ॥
टङ्काभ्ररससिन्दूरसंयुक्तं चन्द्रलोहकम् ।
युक्तं बलावराक्वाथैस्तीव्रोरुव्यथयान्वितम् ॥ ६० ॥
वामडिम्बाशयोद्भूतव्यथया ह्युपलक्षितम् ।
विनिहन्ति विशेषेण त्वण्डाधारभवामयम् ॥ ६१ ॥
रससिन्दूरसौभाग्यसंयुतं चन्द्रलोहकम् ।
शीलितं रजनीवारा सप्ताहद्वितयोन्मितम् ॥ ६२ ॥
क्षतान्वितं चातिमात्रं पूतिस्रावसमायुतम् ।
गर्भाशयस्य सङ्कोचं नाशयत्यविकल्पतः ॥ ६३ ॥
तारं सलोहं माक्षीकरससिन्दूरसंयुतम् ।
यवानीचित्रकक्वाथयुतं तु परिशीलितम् ॥ ६४ ॥
गृध्रसीं चैव विश्वार्चां तथैव त्रिकवेदनाम् ।
विविधस्थानसंभूतं नाडीशूलं व्यपोहति ॥ ६५ ॥
पर्पटोशीरधान्यादिपित्तघ्नक्वाथसंयुतम् ।
चन्द्रलोहं निहन्त्याशु पित्तं शाखासमाश्रितम् ॥ ६६ ॥
राजावर्तसमायुक्तं रजतं परिशीलितम् ।
मदात्ययात्ययकरं समाख्यातं विशेषतः ॥ ६७ ॥
चोपचीनीसमायुक्तं रजतं परिशीलितम् ।

आध्मानं चिरसञ्जातं नाशयत्याशु निश्चितम् ॥ ६८ ॥
सितोपलायुतं रौप्यं यत्नतः परिशीलितम् ।
सत्वरं नाशयत्येव दाहं शाखाश्रितं ध्रुवम् ॥ ६९ ॥
सिताघृतैलासंयुक्तं रजतन्तु निषेवितम् ।
उन्मादं नाशयत्येव ह्यचिरादेव दारुणम् ॥ ७० ॥
त्रिजातकसमायुक्तं रजतं परिशीलितम् ।
प्रमेहादिकरोगांश्च द्रुतमेव निवारयेत् ॥ ७१ ॥
क्षीरकाकोलिकोपेतं चोपचीनीसमन्वितम् ।
रसासिन्दूरसंयुक्तं रजतं परिशीलितम् ॥ ७२ ॥
गर्भाशयाज्जायमानं सशूलं ससुमोद्भवम् ।
श्लैष्मिकन्तु कलास्रावं द्रुतमेव विनाशयेत् ॥ ७३ ।
स्थिरात्मगुप्ताशतमूलिकाभि-
निषेवितं वै खलु चन्द्रलोहम् ।
मासद्वयेनैव निहन्ति कार्श्यं
बल्यञ्च वृष्यञ्च परं प्रदिष्टम् ॥ ७४ ॥
कृमिघ्नभल्लातकविश्वरक्तै-
र्यत्नेन तारं परिशीलितन्तु ।
मासैकयोगेन हि सुन्दरीणां
सौन्दर्यवृद्धिं जनयेन्नितान्तम् ॥ ७५ ॥

अथ सोरकाम्लीयरजतस्य निर्माणप्रकारः

सूचीवेध्यानि पत्राणि रजतस्य समाहरेत् ।
कर्तर्या कर्तयेच्चाथ कणान् सूक्ष्मांस्तु राजतान् ॥ ७६
निधाय काचचषके विशुद्धं सोरकाम्लकम् ।
बिन्दुशो निक्षिपेत्तारं यावन्न द्रुतिमाप्नुयात् ॥ ७७ ॥

सोरकद्रावसम्पाते धूमोऽत्युग्रोऽभिजायते ।
अतो द्रावं क्षिपन् वक्त्रमन्यतः परिवर्तयेत् ॥ ७८ ॥
सताम्रं चेद्भवेत्तारं तदा नीलो भवेद् द्रवः ।
निर्मलं चेद्भवेत्तारं द्रवः शुक्लस्तदा भवेत् ॥ ७९ ॥
द्रवेऽस्मिन्नथ वै तीक्ष्णं लवणद्रावकं क्षिपेत् ।
यावत्तत्र किलाटाभं तारं विनिपतत्यधः ॥ ८० ॥
निवृत्ते तु किलाटाभवस्तुपाते तु निश्चितम् ।
न क्षिपेल्लवणद्रावं रसायनविधानवित् ॥ ८१ ॥
अल्पकालावसानेऽथ जलीयांशं तदूर्ध्वगम् ।
निपातयेत्प्रयत्नेन किलाटाभपदार्थतः ॥ ८२ ॥
पीताश्वघ्नसुमाकारप्रणाल्यां सारकं दलम् ।
विन्यस्य चेमं रजतं क्षालयेद्विमलाम्भसा ॥ ८३ ॥
जलं सारकपत्रान्तर्निर्यातं तलपात्रगम् ।
परीक्षेत प्रयत्नेन रसायनविधानवित् ॥ ८४ ॥
आदायैतज्जलं प्राज्ञः शरावे स्वल्पमात्रकम् ।
नृसारबाष्पसंयुक्तं द्रवं किञ्चिद्विनिक्षिपेत् ॥ ८५ ॥
नृसारबाष्पसंयुक्तद्रवक्षेपेण चेदिदम् ।
जलं नीलत्वमायाति तदा धौतं तु रौप्यकम् ॥ ८६ ॥
सताम्रमधुनापीति व्यवस्येद्रसकोविदः ।
तारं प्रक्षालयेद्यावन्न जहाति हि नीलताम् ॥ ८७ ॥
ताम्रांशरहितं रौप्यं काचपात्रे ततो न्यसेत् ।
जलेनाप्लाव्य स्वल्पं तु लवणद्रावकं क्षिपेत् ॥ ८८ ॥
यशदस्य च पत्राणि स्वल्पानीह क्षिपेत्तथा ।
अल्पकालावसानेऽथ रौप्यं ताम्रादिवर्जितम् ॥ ८९ ॥
भस्मप्रभं काचपत्रतलगं जायते ध्रुवम् ।

ततः खलु व्यतिक्रान्ते सप्ताहे वा दिनाष्टके ॥ ९० ॥
रौप्यं रक्षन् जलीयांशं प्रयत्नेनापसारयेत् ।
ततः सारकपत्रेण रौप्यं भस्मप्रभं पुनः ॥ ९१ ॥
वार्षिकेणाम्भसा विज्ञः क्षालयेदविलम्बितम् ।
ततः सारकपत्रान्तर्निर्यातं सलिलं पुनः ॥ ९२ ॥
प्रयत्नेन परीक्षेत रसायनविशारदः ।
आदायेतज्जलं स्वल्पं काचपात्रे तु विन्यसेत् ॥ ९३ ॥
नृसारबाष्पसंयुक्तं जलं किञ्चिद्विनिक्षिपेत् ।
नृसारबाष्पसंयुक्तजलक्षेपेण चेदिदम् ॥ ९४ ॥
जलं शुक्लत्वमायाति तदा तारन्तु निश्चितम् ।
सद्रावमधुनापीति व्यवस्येद्रसकोविदः ॥ ९५ ॥
तावत्प्रक्षालयेद्यावत्तन्न त्यजति शुक्लताम् ।
द्रावकांशोज्झितं तारं ततः काचशरावके ॥ ९६ ॥
न्यस्याथ सोरकद्रावं दत्त्वा संद्रावयेत्सुधीः ।
ततः सुराप्रदीपाग्नौ पचेद्यत्नेन कोविदः ॥ ९७ ॥
यथा नोत्प्लवते तोयं तथा संशोषयेद् द्रवम् ।
क्षीणे जले भवेच्छुक्लं शलाकाकारचूर्णम् ॥ ९८ ॥
सोरकाम्लीयरजतमेतदुक्तं भिषग्वरैः ।
ततो निधापयेन्नीलकाचकुप्यां विधानवित् ॥ ९९ ॥
इदं विनिहितं शुक्लकाचकुप्यामिनांशुभिः ।
स्पृष्टं कृष्णत्वमायाति तस्मात्संरक्षयेत्तथा ॥ १०० ॥

प्रसङ्गान्नवसादरबाष्पद्रवस्य निर्माणप्रकारः

सुदग्धं चूर्णपाषाणं वारा निर्वापितं भृशम् ।
द्विभागिकं शुष्कचूर्णं, भागिकं नवसादरम् ॥ १ १ ॥
चूर्णीकृतं प्रयत्नेन काचकुप्यां तु विन्यसेत् ।
त्रिपादिकायां विन्यस्य कूपीं, कूपीमुखे ततः ॥ १०२ ॥

मेलयेत्काचनलिकामुखमेकं प्रयत्नतः ।
अपरं च मुखं त्वस्या विन्यसेज्जलपूरिते ॥ १०३ ॥
अन्यस्मिन्काचकूपे तु तोयमञ्जनपूर्वकम् ।
ततस्त्रिपादिकाधस्तात्सुरादीपं प्रदीपयेत् ॥ १०४ ॥
रसायनविधानज्ञस्तावन्मन्दाग्निना पचेत् ।
नृसारबाष्पं द्रवतां याति यावज्जले भृशम् ॥ १०५ ॥
संजायते स्वच्छजलप्रकाशो
द्रवः सुतीव्रः खलु चातिरम्यः ।
समीरितोऽयं भिषजां वरेण्यै
र्नृसारबाष्पद्रवनामधेयः ॥ १०६ ॥

नवसादरबाष्पद्रवस्य गुणाः

नवसादरबाष्पोत्थद्रवोऽयमतिशोभनः ।
वरटीवृश्चिकादीनां विशेषाद्विषनाशनः ॥ १०७ ॥
सम्मेल्य प्रचुरं तोयं रसायनपरीक्षणे ।
द्रवोऽयं विनियोक्तव्यो रसायनविशारदैः ॥ १०८ ॥

अस्य आमयिकः प्रयोगः

सजलोऽयं द्रवो युक्त्या भृशमाघ्रापितो द्रुतम् ।
विनाशयति मूर्च्छायं तत्तदुत्थानसम्भवम् ॥ १०९ ॥

अथ सौरकाम्लीयरजतस्य गुणाः

सौरकाम्लीयरजतं द्रवशक्तिप्रभेदतः ।
अभिष्यन्दहरं कामं पोथक्यादिविकारनुत् ॥ ११० ॥
विसर्पस्फोटशमनं व्रणमेहक्षतापहम् ।
तथैव च समाख्यातं श्वेतप्रदरनाशनम् ॥ १११ ॥

सौरकाम्लीयरजतद्रवस्य निर्माणप्रकारः

परिस्रुतं तु सलिलं हरेन्सार्द्धपलद्वयम् ।

विमले काचचषके विन्यसेद्रसकोविदः ॥ ११२ ॥
सोरकाम्लीयरजतं गुञ्जाष्टकमितं क्षिपेत् ।
द्रवीभूतं ततो नीलकाचकुप्यां निधापयेत् ॥ ११३ ॥
सोरकाम्लीयरजतद्रवोऽयं भाषितो बुधैः ।
विशेषतो ह्यभिष्यन्दपोथक्याद्यक्षिरोगनुत् ॥ ११४ ॥

अस्य आमयिकः प्रयोगः

सोरकाम्लीयरजतद्रवस्यास्य निरन्तरम् ।
अक्ष्णोः सुविस्फारितयोर्नरस्योत्तानशायिनः ॥ ११५ ॥
बिन्दुक्षेपकयन्त्रेण द्वित्रिर्बिन्दुप्रयोगतः ।
पोथक्यभिष्यन्दभवा बाधा शीघ्रं प्रशाम्यति॥ ११६ ॥

द्वितीयः सोरकाम्लीयरजतद्रवः

सोरकाम्लीयरजतं द्वात्रिंशद्गुञ्जसंमितम् ।
सार्द्धद्वितोलकमिते परिस्रुतजले क्षिपेत् ॥ ११७ ॥
विज्ञाय विद्रुतं नीलकाचकुप्यां न्यसेद् द्रुतम् ।
सोरकाम्लीयरजतद्रवोऽयं स्फोटकादिनुत् ॥ ११८ ॥

अस्य प्रयोगविधिः

विसर्पशोथं परितो द्रवोऽयं खलु लेपितः ।
विनिहन्त्यचिरादेव विसर्पस्य विसर्पिताम् ॥ ११९ ॥
अनेनैव प्रकारेण विस्फोटश्वयथौ भृशम् ।
लिप्तो द्रवोऽयं हन्त्याशु विस्फोटस्य विसर्पिताम् ॥ १२० ॥

तृतीयः सोरकाम्लीयरजतद्रवः

परिस्रुते तु सलिले पञ्चतोलकसम्मिते ।
सोरकाम्लीयरजतं गुञ्जैकं वा तदर्धकम् ॥ १२१ ॥
क्षिप्त्वाथ विद्रुतं नीलकाचकुप्यां तु विन्यसेत् ।
सोरकाम्लीयरजतद्रवोऽयं प्रदरादिनुत् ॥ १२२ ॥

अस्य प्रयोगविधिः

उत्तराह्वयवस्त्युक्तरीत्या युक्तस्त्वयं द्रवः ।
निहन्ति व्रणमेहश्च श्वेतप्रदरजां रुजम् ॥ १२३

इति रजतविज्ञानीयो नाम षोडशस्तरङ्गः

अथ ताम्रविज्ञानीयः सप्तदशस्तरङ्गः

ताम्रस्य नामानि

ताम्रं शुल्वं रक्तकं म्लेच्छवक्त्रं
नेपालीयं त्र्यम्बकं सूर्यलोहम् ।
त्वाष्ट्रं त्वर्कं सूर्यपर्यायसंज्ञं
द्विष्टं द्व्यष्टं त्वम्बकं कीर्तितं तत् ॥ १ ॥
उदुम्बरश्चारविन्दं सूर्याङ्गं लोहिनायसम् ।
रविप्रियं भास्वरं च ताम्रकं च प्रकीर्तितम् ॥ २ ॥

ग्राह्यताम्रस्य स्वरूपम्

घनघातसहं सुचिक्कणं विमलश्चाथ जपासुमप्रभम् ।
मृदु चैव सदाकरोद्भवं रविलोहं खलु कीर्तितं वरम् ॥ ३ ॥

प्रकारान्तरेण जात्यताम्रस्य स्वरूपम्

स्निग्धं मृदु घनं स्वच्छं जपाकुसुमसप्रभम् ।
लोहनागादिरहितं जात्यं ताम्रं प्रकीर्तितम् ॥ ४ ॥

त्याज्यताम्रस्य स्वरूपम

सदलं पाण्डुरश्चैव कठिनं लघु भङ्गुरम् ।
समलं त्वरविन्दन्तु वर्जयेद्रसकर्मणि ॥ ५ ॥
घनघातासहं कृष्णं श्वेतं लोहादिसङ्गतम् ।
अतिस्तब्धश्च रूक्षञ्च ताम्रं त्याज्यं निगद्यते ॥ ६ ॥

ताम्रस्य द्वैविध्यम्

नेपालं म्लेच्छकं चेति ताम्रं द्विविधमुच्यते ।
नेपालं जात्यमाख्यातं म्लेच्छकं त्ववरं स्मृतम् ॥ ७ ॥

नेपालस्य लक्षणम्

घनघातसहं स्निग्धं कोमलं गुरु लोहितम् ।
निर्मलं गुणकृच्चैव नेपालं ताम्रमुच्यते ॥ ८ ॥

म्लेच्छकस्य स्वरूपम्

कृष्णच्छायं सुकठिनं सितञ्चारुणकं तथा ।
सुधौतमपि कृष्णं स्यान्म्लेच्छकं ताम्रमुच्यते ॥ ९ ॥

ताम्रशोधनस्य प्रयोजनम्

ताम्रं निहन्ति विमलां खलु कायकान्तिं
नूनं नितान्तमचिराज्जनयेच्च वान्तिम् ।
भ्रान्तिं तथा जनयतीह हि नैति शान्तिं
चेत्ताम्रकं त्वविमलं खलु मारितं स्यात् ॥ १० ॥
शुल्वं विवर्द्धयति सर्गजगात्रतापं
क्षिप्रं नयत्यपि च शोषमशेषधातून् ।
कामं विरेचयति वै जनयेच्च मूर्च्छां
संशुद्धिहीनमिह चेत्खलु मारितं स्यात् ॥ ११ ॥

ताम्रस्य प्रथमः शोधनप्रकारः

पत्रीकृतन्तु तरणिं ज्वलने प्रतप्तं
चाङ्गेरिकादलरसे स्रपयेद्विधिज्ञः ।
इत्थं विशोधितमलं खलु सूर्यलोहं
संयोजयेन्मृतिविधौ भिषजां वरेण्यः ॥ १२ ॥

द्वितीयः शोधनप्रकारः

रविलोहदलं पिठरीनिहितं

खलु शीतसहस्वरसे तु दिनम् ।
परिपाचितमत्यचिरान्नियतं
विमलत्वमुपैत्यतिवेलमिदम् ॥ १३ ॥

तृतीयः शोधनप्रकारः

नेपालशुल्बस्य दलानि सूक्ष्माण्यादाय सिन्धूत्थसमन्वितानि
संस्वेदयेन्मन्दिरवारिपूरे त्वनुत्तमां शुद्धिमिहोपयाति ॥ १४॥

चतुर्थः शोधनप्रकारः

सिन्धूत्थवज्यर्कपयःप्रलिप्तान्यादाय पत्राणि रविप्रियस्य ।
प्रताप्य वह्नावथ सिन्दुवारद्रवे निषिञ्चेत् खलु सप्तवारम् ॥१५।
अनेन तु विधानेन विशुद्धं लोहितायसम् ।
मारणाय प्रयुञ्जीत वीतशङ्को भिषग्वरः ॥ १६ ॥

पञ्चमः शोधनप्रकारः

वम्बंशसिन्धूत्थसमन्वितानि
नेपालशुल्बस्य दलानि कामम् ।
गोमूत्रयुक्तानि पचेद् द्वियामं
रविप्रियं शुद्ध्यति नात्र शङ्का ॥ १७ ॥

षष्ठः शोधनप्रकारः

क्षाराम्ललिप्तानि तु ताम्रपत्रा
ण्यग्नौ प्रताप्य स्नपयेत्तु तक्रे ।
क्वाथे कुलत्थप्रभवे च ताम्रं
प्रयाति शुद्धिं खलु निर्विशेषाम् ॥ १८ ॥

ताम्रस्य प्रथमो मारणप्रकारः

तुल्यांशसंशोधितहिङ्गुलेन सलुङ्गनीरेण रवेर्दलानाम् ।
पिष्टिं विधायाथ विशोष्य घर्मे सुश्लक्ष्णचूर्णञ्च ततो विदध्यात् १९

१–नीलपुष्पः शीतसहोनिर्गुण्डी नीलासिन्दुका–इतिधन्वन्तरिः ।

ऊर्ध्वपातनयन्त्रे च विधानज्ञस्ततः पचेत् ।
निर्विशेषविशुद्धञ्च रसराजं समाहरेत् ॥ २० ॥
एवं वारत्रयं कुर्याद्वारमेकमथापि वा
रविचूर्णसमञ्चाथ गन्धं दत्त्वा विमर्दयेत् ॥ २१ ॥
त्रिवारं पुटयेदेवं वारद्वयमथापि वा ।
इत्थं मृतं ताम्रकं स्यादमृतीकरणोचितम् ॥ २२ ॥

द्वितीयो मारणप्रकारः

पादांशसंशोधितपारदेन सुसूक्ष्मपत्राणि रवेर्विमर्द्य ।
चाङ्गेरिकापत्ररसप्रपिष्टतुल्यांशगन्धेन च पेषयेद्वै ॥ २३ ॥
विशोष्य घर्मे खलु सम्पुटस्थं पुटेत् त्रिवारं भिषगप्रमत्तः ।
इत्थं मृतं ताम्रकमामयज्ञः प्रयोजयेत्खल्वमृतक्रियायै ॥२४॥

तृतीयो मारणप्रकारः

विशुद्धशुल्बस्य दलानि निम्बुद्रवप्रपिष्टेश्वरगन्धलेपात् ।
विशोष्य घर्मे पुटितानि नूनं वारत्रयेणेह मृतिं प्रयान्ति ॥२५॥

चतुर्थो मारणप्रकारः

ताम्रं पत्रीकृतं शुद्धं भिषग् दशपलोन्मितम् ।
ताम्रद्विगुणितञ्चैव गन्धं दत्त्वा विमर्दयेत् ॥ २६ ॥
सम्पुटस्थं ततः कृत्वा मृदा सन्धिं निरोधयेत् ।
अहोरात्रं पचेद्यत्नाद् वालुकायन्त्रगं भिषक् ॥ २७ ॥
स्वाङ्गशीतन्तु विज्ञाय सम्पुटं त्ववतारयेत् ।
ताम्रोन्मितं बलिं दत्त्वा शुल्बं खल्वेऽथ पेषयेत् ॥ २८ ॥
इत्थं त्रिवारं पुटयेत्तुल्यं गन्धं विनिक्षिपन् ।
एवं मृतं ताम्रकं स्यादञ्जनादौ गुणावहम् ॥ २९ ॥

पञ्चमो मारणप्रकारः

नेपालशुल्बस्य दलानि शुद्धान्यादाय पूर्वं भिषजां वरेण्यः ।

तुल्यांशगन्धेशजकज्जलञ्च पादांशिकीं रोगशिलाञ्च शुद्धाम् ॥३०॥
दत्त्वा तदर्धं हरितालकञ्च कन्याद्रवेणेह विमर्द्य वैद्यः ।
विशोष्य घर्मे पुटयेद्विधिज्ञः प्रयाति ताम्रं मृतिमाश्वपूर्वाम् ॥३१॥

षष्ठो मारणप्रकारः

सूचीसुवेध्यं खलु ताम्रपत्रं तुल्यांशगन्धेशजकज्जलञ्च ।
समं समादाय भिषग्वरेण्यः सम्पेषयेद्वै स्वरसैः कुमार्याः ॥ ३२ ॥
विशोष्य घर्मेऽथ शरावसंस्थं पुटेद्विधिज्ञो लवणाख्ययन्त्रे ।
इत्थं दिनार्द्धं परिपाचनेन ह्यनुत्तमां याति मृतिन्तु ताम्रम् ॥३३॥

अमृतीकरणस्य प्रयोजनम्

मृतमप्यरविन्दन्तु ह्यमृतीकरणोज्झितम् ।
सेवितं दर्शयत्यष्टौ दोषानाशु विषोपमान् ॥ ३४ ॥
तस्मान्मृतस्य ताम्रस्य दोषाष्टकनिवृत्तये ।
अमृतीकरणं यत्नाद् विदध्याद्भिषजाग्रणीः ॥ ३५ ॥

दोषाष्टकनिरूपणम्

वान्तिर्भ्रान्तिश्चित्तसन्तापशोषौ
गाढोत्क्लेदश्चारुचिर्दाहमोहौ ।
इत्यष्टौ वै सूर्यलोहस्य दोषाः
पूर्वाचार्यैः क्लेशदाः सम्प्रदिष्टाः ॥ ३६ ॥

प्रथमोऽमृतीकरणप्रकारः

सुमृतं ताम्रचूर्णन्तु तदर्धं गन्धकं तथा ।
पञ्चामृतेन सम्पेष्य विधानज्ञो भिषग्वरः ॥ ३७ ॥
शरावसम्पुटे न्यस्य ताम्रं विहितचक्रिकम् ।

१–तुल्यांशौ समानभागिकौ यौ गन्धेशौ गन्धकपारदौ ताभ्यां जातं निष्पादितमिति यावत् यत् कज्जलं कज्जालिका तदित्यर्थः । तच्चानुक्तमानत्वेन ताम्रपत्र समं ग्राह्यम् ।

त्रिवारं पुटयेदेवं रसतन्त्रविचक्षणः ॥ ३८ ॥

श्लक्ष्णखल्वेऽथ सम्पेष्य काचकुप्यां तु विन्यसेत् ।
अमृतीकरणादेवं ताम्रं स्यादमृतोपमम् ॥ ३९ ॥

द्वितीयोऽमृतीकरणप्रकारः

सम्यङ्मृतं सूर्यसखस्य चूर्णम्
तदर्धसंशोधितगन्धकञ्च ।
दत्त्वा ततोऽम्लैः खलु निम्बुकोत्थैः
सम्पेषयेद् याममलं रसज्ञः ॥ ४० ॥

गोलं विधायाऽथ रविप्रियस्य
ह्युपयर्धःसूरणकन्दसंस्थम् ।
मृत्कर्पटैश्चाथ विलिप्य गोलं
पुटे गजाख्ये पुटयेद्विधिज्ञः ॥ ४१ ॥

रसागमज्ञैरनया तु रीत्यामृतक्रियायां खलु पाचितन्तु ।
वान्त्यादिकं न प्रकरोति नूनं ताम्रं निकामं त्वमृतोपमं स्यात् ।४२।

तृतीयोऽमृतीकरणप्रकारः

सम्यङ्मृतं सूर्यसखस्य चूर्णं
सम्पेषयेद्वै स्वरसे कुमार्याः ।
विशोष्य घर्मेऽथ शरावसंस्थं
पचेद् वराहाख्यपुटेऽश्ववारम् ॥ ४३ ॥

रीत्यानया वै ह्यमृतीकृतन्तु
रविप्रियं शीलितमप्यमन्दम् ।
दोषाष्टकं नैव करोति नूनं
ताम्रं निकामं त्वमृतोपमं स्यात् ॥ ४४ ॥

मृतताम्रस्य गुणाः

ताम्रं तिक्तं तुवरमधुरं पाकतश्चोष्णवीर्यं
त्वम्लं स्निग्धं खलु विषहरं सारकं लेखनञ्च ।
पित्तोद्भूतानपि च कफजान् श्लेष्मपित्तोत्थितान् वा ।
घोरान् रोगानपि हि चिरजानप्यशेषांश्च हन्यात् ॥ ४५ ॥

अपि च

ताम्रं दीपनमुत्तमं क्रिमिहरं कुष्ठामयध्वंसनं
कासश्वासविधूननं क्षयहरं पाण्ड्वामयघ्नं परम् ।
दुर्नामग्रहणीगदप्रशमनं नेत्रामयेषूत्तमं
स्थौल्यध्वंसकरं त्वलं बहुगिरा नानामयध्वंसनम् ॥ ४६ ॥
ताम्रं मृतं ज्वरहरं व्रणरोपणञ्च
रुच्यं परं गरहरं ह्युदरामयघ्नम् ।
आयुष्यमप्युभयतः परिशोधनञ्च
वैद्यैर्मतं खलु रसायनतन्त्रविज्ञैः ४७ ॥

अपि च

रविप्रियन्तु सुमृतं परं शूलनिषूदनम् ।
अम्लपित्तप्रशमनं यकृत्प्लीहोदरापहम् ॥ ४८ ॥
अपस्मारप्रशमनं विषूचीवमिनाशनम् ।
आक्षेपापहमत्यन्तं तथा खल्लीप्रणाशनम् ॥ ४९ ॥
अग्निमान्द्यहरञ्चैव परिणामाख्यशूलनुत् ।
अन्त्रशोषान्तकृच्चापि समाख्यातं भिषग्वरैः ॥ ५० ॥

विशिष्टा गुणाः

मृतन्तु ताम्रं शमयत्यवश्यं
शाखाश्रितं कोष्ठसमाश्रितम्वा ।
जत्रूर्ध्वगञ्चापि मलाभिधानं
पित्तं कफञ्चापि परं प्रवृद्धम् ॥ ५१ ॥

ताम्रस्य मात्रानिरूपणम्

अष्टमांशाद्रक्तिकाया रक्तिकार्द्धमितं परम् ।
मृतं ताम्रं प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ५२ ॥

अथ मृततास्रस्य आमयिकः प्रयोगः

समरसबलिनिम्बूद्रावपिष्ट्या विपक्वं
त्रिकटुमरिचयुक्तं रक्तिकार्द्धं तु ताम्रम् ।
अपहरति नितान्तं हस्तकम्पादिवातं
त्वपनयति च कामं पक्षघातादिरोगान् ॥ ५३ ॥

गुञ्जार्द्धमात्रं खलु सूर्यलोहं
द्विरक्तिकोशीररजोविमिश्रम् ।
मनागपुष्पं शिशिरेण वारा
पीतं हरत्येव जवेन मूर्छाम् ॥ ५४ ॥

रविप्रियं शीलितमाज्ययुक्तं
दुरालभाक्वाथविमिश्रितन्तु ।
विनाशयत्याशु गदं भ्रमाख्यं
यथा समीरः खलु मेघवृन्दम् ॥ ५५ ॥

करञ्जबीजोत्थरजोविमिश्रं
गुञ्जार्द्धमात्रं मृतसूर्यलोहम् ।
पित्तोद्भवं वापि कफोत्थितं वा
शूलं निहन्यान्नहि संशयोऽत्र ॥ ५६ ॥

कटुत्रिकाढ्य मृतशङ्खयुक्त
गुञ्जार्द्धमात्रं खलु सूर्यलोहम् ।
प्लीहानमत्युग्ररुजं समन्तात्
निहन्ति मासैकनिषेवणेन ॥ ५७ ॥

वराटभस्मसंयुतं द्विगुञ्जजीरकान्वितम् ।
रविप्रियन्तु शीलितं निहन्ति सूतिकामयम् ॥ ५८ ॥
कणाचूर्णसमायुक्तं मधुना परिशीलितम् ।
रविप्रियं समाख्यातं त्वग्निसन्दीपनं परम् ॥ ५९ ॥
धात्रीचूर्णसमायुक्तं ताम्रं गुञ्जार्धसम्मितम् ।
अम्लपित्तं निहन्त्याशु वृक्षं शक्राशनिर्यथा ॥ ६० ॥
भार्ङ्गीविभीतकोपेतं गुञ्जार्धप्रमितं मृतम् ।
ताम्रं क्षौद्रेण संलीढं कासश्वासं व्यपोहति ॥ ६१ ॥
नागपुष्पाभयामिश्रं ताम्रकं मधुसंयुतम् ।
शीलितं मासमात्रेण सर्वाण्यर्शांसि नाशयेत् ॥ ६२ ॥
अश्वत्थवल्कभस्माढ्यं रविलोहन्तु शीलितम् ।
गुञ्जापादांशमात्रेण छर्दिं जयति दारुणाम् ॥ ६३ ॥
बीजपूरद्रवोपेतं रविलोहं समाक्षिकम् ।
निषेवितं निहन्त्याशु हिक्काः पञ्च सुदारुणाः ॥ ६४ ॥
रविलोहं तु सुमृतं केवलं बलिजारितम् ।
अञ्जनाद्विनिहन्त्याशु दोषान्पटलसंश्रितान् ॥ ६५ ॥
कटुत्रिकाढ्यं खलु सूर्यलोहं कणाशिफाचूर्णयुतं तु लीढम् ।
क्षौद्रेण सप्ताहनिषेवितं तु द्रुतं यकृद्दाल्युदरं निहन्ति ॥ ६६ ॥
दुरालभाक्काथयुतं सघृतं रविलोहकम् ।
व्यपोहति विशेषेण भ्रमरोगं सुदारुणम् ॥ ६७ ॥
ताम्रं समविषं धूर्तद्रवेण परिभावितम् ।
शीलितं त्वार्द्रकद्रावैः सन्निपातं व्यपोहति ॥ ६८ ॥
आर्द्रकस्वरसोपेतं ताम्रं तु परिशीलितम् ।
नागिनीदलमध्यस्थं गुल्मरोगं व्यपोहति ॥ ६९ ॥
रसमिन्दूरसंयुक्तं रविलोहमनारतम् ।

कण्टकारीफलोद्भूतरजसा परिशीलितम् ॥ ७० ॥
सशब्दमाक्षेपयुतमानीलाननमण्डलम् ।
प्ररुद्धश्वासनिश्वासं कासं नाशयति द्रुतम् ॥ ७१ ॥
अत्यल्पमात्रया ताम्रं दग्धाश्वत्थत्वचाम्भसा ।
बर्हिपक्षविभूतिर्वा छर्दिं जयति दुर्जयाम् ॥ ७२
व्योषचित्रकणामूलमांसीभार्ङ्गीकषायतः ।
पिप्पल्यादिगणक्वाथयुतं वा रविलोहकम् ॥ ७३ ॥
तीव्रहृच्छूलसंयुक्तं तथाक्षेपसमन्वितम् ।
शीलितं नाशयत्याशु शूलं मक्कल्लसंज्ञकम् ॥ ७४ ॥
ताम्रं समस्वर्णयुतं जटामांसीरजोन्वितम् ।
शीलितं विनिहन्त्याशु त्वाक्षेपमतिदारुणम् ॥ ७५ ॥
प्रबद्धमुष्टिकं काममानीलाननमण्डलम् ।
पानाशनादिसमये घुर्घुरायितकण्ठकम् ॥ ७६ ॥
अत्यल्पकालिकं वापि दारुणं दैर्घकालिकम् ।
तथा पादोदरगतां खल्लीं खल्वतिदारुणाम् ॥ ७७ ॥
रेणुकाशुण्ठिकाकन्यासारदारुसितान्वितम् ।
अनारतं विशेषेण रविलोहं तु शीलितम् ॥ ७८ ॥
निम्नोदरे वक्षसि वा युतमाक्षेपपीडया ।
सचीत्कारं सप्रलापं दारुणव्यथयान्वितम् ॥ ७९ ॥
सवमिं वा विवमिषायुतं खल्लीसमन्वितम् ।
बाधकं वा रजोरोधं विनाशयति सत्वरम् ॥ ८० ॥
रससिन्दूरसंयुक्तं सुमृतं ह्यमृतीकृतम् ।
शीलितं रविलोहं तु मदकर्पूरसंयुतम् ॥ ८१ ॥
श्वेतातितरलात्यच्छमलां भूयस्तृषान्विताम् ।
पादयोरुदरे वापि भृशं खल्लीसमन्विताम् ॥ ८२ ॥

प्रक्षीणनाडिकां काममानीलाननमण्डलाम्
शीलितं शमयत्याशु दारुणां तु विषूचिकाम् ॥ ८३ ॥
कज्जलीरससिन्दूरयुतं ताम्रं तु शीलितम् ।
आनीलोष्ठं चातिफेनं परिभ्रान्तकनीनिकम् ॥ ८४ ॥
मक्रन्दनं सचीत्कारं वारब्धाक्षेपमुल्बणम् ।
आरटत्प्रचलद्दन्तमपस्मारं विनाशयेत् ॥ ८५ ॥
लोहस्वर्णसमायुक्तं ताम्रं गन्धकजारितम् ।
शीलितं नाशयत्याशु श्वासं परमदारुणम् ॥ ८६ ॥
प्रचुराक्षेपसंयुक्तमानीलमुखमण्डलम् ।
आश्वासपथसङ्कोचक्रियाप्रत्ययकारिणम् ॥ ८७ ॥
तिक्तामृतापर्पटककिराताब्दकपायतः ।
ताम्रं तु शीलितं हन्ति पुनरावर्तकज्वरम् ॥ ८८ ॥
पुनर्नवानिशामेषशृङ्गीद्रवविभावितम् ।
ताम्रं गन्धहतं ख्यातं व्रणशोधनरोपणम् ॥ ८९ ॥
रविलोहं बलिहतं तोलकैकमितं शुभम् ।
तोलकाष्टमितं चैव सुघृष्टं रक्तचन्दनम् ॥ ९० ॥
भावितं भृङ्गनीरेण तत्ववारं प्रयत्नतः ।
मधुनाञ्जनतः ख्यातं तिमिरापहमुत्तमम् ॥ ९१ ॥
तारताप्ययुतं ताम्रं चित्रकद्रवभावितम् ।
सूर्यावर्तादिकान् घोरान् शिरोरोगान् विनाशयेत् ॥ ९२ ॥
यवजाऽऽलसमायुक्तं रसगन्धकजारितम् ।
शीलितं रविलोहं तु मतं कुष्ठापहं परम् ॥ ९३ ॥

रावणाण्डवरसः

पत्रीकृतं सुविमलं पलैकं रावलोहकम् ।
सूतद्विगुणगन्धाश्मकृतकज्जलिकां समाम् ॥ ९४ ॥

दत्त्वा कुमारीतायेन पषयेत्तु दिनत्रयम् ।
विधाय गोलकमथ शोषयेदातपे भृशम् ॥ ९५ ॥
सम्पुटस्थं ततः कृत्वा हण्डिकायां निधापयेत् ।
आपूर्य भस्मनाऽऽकण्ठं चुल्लिकायां तु विन्यसेत् ॥ ९६ ॥
प्रखरेणानलेनाथ पचेद् यामत्रयं ततः ।
स्वाङ्गशीतमथोद्धृत्य रविलोहं समाहरेत् ॥ ९७ ॥
निम्बूद्रवेण सम्पेष्य पुटयेत्सप्तधा ततः ।
म्रियते रविलोहं तु भस्म स्यात्कपिशं शुभम् ॥ ९८ ॥

अस्य गुणः

रविलोहमिदं ख्यातं रविताण्डवसंज्ञकम् ।
परं भगन्दरहरं विशेषात्परिकीर्तितम् ॥ ९९ ॥

हृदयार्णवरसः

कज्जलीद्विगुणं ताम्रं ह्यमृतीकृतमुत्तमम् ।
वरावारा काकमाचीद्रवेण परिमर्दयेत् ॥ १०० ॥
वटिकाः कारयेद्द्वयो रक्तिकापादसंमिताः ।
हृदयार्णवसंज्ञोऽयं रसो हृद्रोगनाशनः ॥ १०१ ॥

त्र्यम्बकेश्वररसः

सूक्ष्मपत्रीकृतं ताम्रं त्रिधा गोमूत्रशोधितम् ।
समाहरेद्विपञ्चर्यस्तोलकाष्टकसंमितम् ॥ १०२ ॥
रसेश्वरं च विमलं पलपञ्चकसंमितम् ।
पेषयेदतियत्नेन निम्बूकद्रवयोगतः ॥ १०३ ॥
चत्वारिंशत्तोलमितं गन्धकं विमलीकृतम् ।
दत्त्वा तु नागिनीवारा पेषयेद् दिवसद्वयम् ॥ १०४ ॥
विधाय गोलकमथो सम्पुटस्थं तु कारयेत् ।
सन्धिलेपं ततः कृत्वा त्वतिमन्दाग्नियोगतः ॥ १०५ ॥

पचेद्भूधरयन्त्रेण यत्नतो यामपञ्चकम् ।
स्वाङ्गशीतमथोद्धृत्य मृतं ताम्रं समाहरेत् ॥ १०६ ॥
रविलोहमिदं ख्यातं सव्योषं वह्निमान्द्यहृत् ।
परमर्द्धाङ्गवातघ्नं कम्पवातहरं परम् ॥ १०७ ॥

सूर्यावर्तरसः

सुमृतं रविलोहं तु तोलकाष्टकसंमितम् ।
सूतार्धगन्धककृतकज्जलीं ताम्रसंमिताम् ॥ १०८ ॥
दत्त्वा कुमारीनीरेण पेषयेदतियत्नतः ।
विधाय गोलकं सम्यगातपे परिशोषयेत् ॥ १०९ ॥
सम्पुटस्थं ततः कृत्वा वालुकायन्त्रगं पचेत् ।
स्वाङ्गशीतमथोद्धृत्य रविलोहं समाहरेत् ॥ ११० ॥
सूर्यावर्तरसो ह्येष समाख्यातस्तु नामतः ।
विशेषेण मतश्चैतत्खलु श्वासनिषूदनम् ॥ १११ ॥

शूलभंकशरीरसः

पलकप्रामत ताम्रं पारदं विमलं समम् ।
द्विपलं गन्धपाषाणं त्रिपलं शुद्धतालकम् ॥ ११२ ॥
सम्मेल्य सर्वं यत्नेन पेषयेत्प्रहरद्वयम् ।
विशोष्य घर्मे च ततः सम्पुटस्थं तु कारयेत् ॥ ११३
अजापयःपिष्टटङ्कपिष्टया सन्धिं प्रलेपयेत् ।
ऊर्ध्वाधो लवणं दत्त्वा हण्डिकायां तु विन्यसेत् ॥ ११४ ॥
प्रखरेणानलेनाथ वारणाख्यपुटे पुटेत् ।
एवमेकपुटेनैव म्रियते रविलोहकम् ॥ ११५ ॥

अस्य गुणः

समाख्यातो रसोऽयं तु नाम्ना शूलभंकेशरी ।
अमोघास्त्रमिह ख्यातं शूलनिर्मूलने परम् ॥ ११६ ॥

सप्तदशस्तरङ्गः

अथ भूनागसत्वपातनप्रकारः

वर्षतो[1] भूभुजंगान् उर्णायूद्दीपगुडैः[2] ।
सौभाग्यालक्तझषैः[3] पिण्याकक्षोदयुतैः[4] ॥ ११७ ॥
सम्पेष्य प्राज्ञवरो मूषास्थं वै प्रधमेत् ।
ताम्राभं सत्वमथो मुञ्चति क्षिप्रतरम् ॥ ११८ ॥

भूनागसत्वस्य मारणम्

भूनागसत्वं पलसंमितन्तु
रसेश्वरं द्व्यक्षमितञ्च शुद्धम् ।
पलोन्मितं शुद्धसुगन्धचूर्णं
दत्त्वा पुटेद् वन्यकरीषवह्नौ ॥ ११९ ॥
भूनागसत्वं पुटितं त्रिधैवं
त्वनुत्तमां याति मृतिं निकामम् ।
रसागमाम्भोनिधिकर्णधारः
प्रयोजयेत्ताम्रविधानरत्न्या ॥ १२० ॥

अस्य गुणाः

भूनागसत्वं सुमृतं तुवरं कुष्ठनाशनम् ।
विषघ्नञ्च विशेषेण ताम्रवद्रूणकारकम् ॥ १२१ ॥

अस्य आमांथकप्रयाग.

भूनागसत्वं मतिमान् ताम्रवद्विनियोजयेत् ।
ताम्रवच्चानुपानानि सहपानानि चादिशेत् ॥ १२२ ॥

१–भूभुजगाः–भूनागाः ।

२–ऊर्णायुः–ऊर्णनाभिः (मकड़ी का जाला इति हिन्दीभाषायाम्)
उद्दीपः–गुग्गुलुः ।

३–सौभाग्यं टंकणम्, अलक्तम् लाक्षा, झषो मत्स्यः ।

४–पिण्याकक्षोदः–तिलकिट्टचूर्णमिति यावत् ॥

अथ मयूरपक्षस्य सत्वपातनम्

भूनागसत्वमार्गेण सत्वं मायूरपक्षजम् ।
निपातयेन्मारयेच्च रसतन्त्रविचक्षणः ॥ १२३ ॥
भूनागसत्ववच्चास्य गुणान् खलु समादिशेत् ।
आमयेषु च यत्नेन ताम्रवद्विनियोजयेत् ॥ १२४ ॥

इति ताम्रविज्ञानीयो नाम सप्तदशस्तरङ्गः

अथ वङ्गविज्ञानीयोऽष्टादशस्तरङ्गः

अथ वङ्गस्य नामानि

वङ्गश्च वङ्गकं रङ्गं रङ्गकं शुक्रलोहकम् ।
कुरूप्यं त्रपुसञ्चैव त्रपुषं त्रपु कीर्तितम् ॥ १ ॥

वङ्गस्य द्वैविध्यम

खुरकं मिश्रकं चेति वङ्गकं द्विविधं मतम् ।
खुरकं श्रेष्ठमाख्यातं मिश्रकं त्ववरं स्मृतम् ॥ २ ॥

खुरकस्य लक्षणम

मृदुलं निर्मलञ्चैव चन्द्रलोहसमप्रभम् ।
द्रुतद्रावञ्च निःशब्दं खुरकं समुदीरितम् ॥ ३ ॥

मिश्रकस्य लक्षणम्

द्रावेऽतिकठिनं रूक्षं त्वन्यधातुविमिश्रितम् ।
धूसरं कठिनञ्चैव मिश्रकं वङ्गमुच्यते ॥ ४ ॥

वङ्गस्य ग्राह्याग्राह्यत्वनिरूपणम्

खुरकाख्यं शुक्रलोहं मारणाय प्रशस्यत ।
मिश्रकं हेयमाख्यातं रसतन्त्रविचक्षणैः ॥ ५ ॥

वङ्गशोधनस्य प्रयोजनम्

विशुद्धिहीनं खलु शुक्रलोहं
निषेवितं वाप्यमृतं तु नूनम् ।
निहन्ति सर्वां खलु कायकान्तिं
कुष्ठं किलासञ्च परं विदध्यात् ॥ ६ ॥
गुल्मप्रमेहक्षयपाण्डुशोथश्लेष्मज्वरादींश्च भगन्दरञ्च ।
शुक्राश्मरीं रक्तविकारजातान् रोगाननेकान् जनयेच्च नूनम्॥७॥

अथ वङ्गशोधनस्य प्रथमः प्रकारः

खुराभिधानं खलु शुक्रलोहं
निधाय दर्व्यां भिषजां वरेण्यः ।
चुल्लीगतश्चाप्यथ गालयित्वा
विशुद्धचूर्णोदकपूर्णगर्भे ॥ ८ ॥
गाढन्तु सच्छिद्रपिधानकेन
क्षिपेत्समाच्छन्नमुखे तु कुम्भे ।
इत्थं निषिक्तं भिषजाश्ववारं
वङ्गं विशुद्धिं समुपैति नूनम् ॥ ९ ॥

द्वितीयः शोधनप्रकारः

वङ्गकं गालितं लोहदर्वीगतं
सूर्यदुग्धे भृशञ्चैव निर्वापयेत् ।
पूर्वमार्गेण वै शेषकर्माचरेत्
सत्वरं वङ्गकं याति शुद्धिं पराम् ॥ १० ॥

१–पूर्वमार्गेण–अव्यवहितप्रदर्शितेन वङ्गशोधनस्य प्रथमप्रकारोक्तमार्गेण शेषकर्म–इहानुक्तमवशिष्टं कर्म (कुम्भस्य अर्कदुग्धेन गर्भदेशपर्यन्तापूरणम्, सच्छिद्रसुदृढपाषाणपिधानकेन तन्मुखस्याच्छादनम्, गालितवङ्गस्य परिषेकसमये समुत्प्लवननिरासार्थं पाषाणेष्टकादिभिः स्थिरीकरणादिकञ्च) विदध्यादिति प्रवक्तृाभिप्रायः ।

तृतीयः शोधनप्रकारः

वङ्गकं द्रावितं सिन्दुवारद्रवे
रात्रियुक्ते त्रिधा चेह निर्वापयेत् ।
शेषकर्माचरेत् पूर्वमार्गेण वै
शुक्रलोहं द्रुतं याति शुद्धिं पराम् ॥ ११ ॥

द्रावितस्य तु वङ्गस्य द्रवादौ परिषेचने ।
औचित्येनाचरेन्नोचेदुत्प्लुत्योत्प्लुत्य निर्दहेत् ॥ १२ ॥

चतुर्थः शोधनप्रकारः

वङ्गं प्रद्राव्य यत्नेन लोहदर्वीगतं ततः ।
निर्वापयेदम्लतक्रे पूर्वोक्तविधिना भिषक् ॥ १३ ॥
ततः कुमारिकाद्रावे तद्वदेव निषेचयेत् ।
अनेन विधिना वङ्गं शुद्धिमायाति सर्वथा ॥ १४ ॥

अथ वङ्गमारणस्य प्रथमः प्रकारः

विशुद्धं वङ्गमादाय कटाहे चुल्लिकास्थिते ।
विनिक्षिपेद् भिषग्वर्यश्चुल्लिकाग्निं प्रदीपयेत् ॥ १५ ॥
वंगात् कलांशिकं सूतं विशुद्धं तत्र निक्षिपेत् ।
विशुद्धं हरितालञ्च स्वल्पं स्वल्पं मुहुर्मुहुः ॥ १६ ॥
निक्षिप्य वनकार्पासदण्डेन परिचालयेत् ।
यावद्भस्म भवेत्तावत्तालचूर्णं समापयेत् ॥ १७ ॥
ततः शरावेणाच्छाद्य पचेत्तीव्राग्निना भिषक् ।
अनेन विधिना वङ्गं पञ्चतां यात्यनुत्तमाम् ॥ १८ ॥

द्वितीयो मारणप्रकारः

विमलं वङ्गमादाय चुल्लिकोपरिसंस्थिते ।
विनिक्षिपेत् कटाहे तु ततो वह्निं प्रदीपयेत् ॥ १९ ॥
विद्रुतं वङ्गकं ज्ञात्वा रसकर्मविशारदः ।

पादांशापामार्गचूर्णं स्वल्पं स्वल्पं मुहुर्मुहुः ॥ २० ॥
निक्षिप्य लोहदण्डेन यत्नतः परिचालयेत् ।
वङ्गभस्म भवेद्यावच्चूर्णं तावत्समापयेत् ॥ २१ ॥
राशीकृत्य ततो भस्म शरावेण पिधापयेत् ।
ततो यामैकपर्य्यन्तं तथा वह्निं प्रदीपयेत् ॥ २२ ॥
ज्वलदङ्गारवर्णं स्याद् वङ्गभस्म यथा ध्रुवम् ।
स्वतःशीतं ततो ज्ञात्वा वङ्गभस्म समाहरेत् ॥ २३ ॥
शङ्खकुन्देन्दुधवलं वङ्गभस्म भवेद् ध्रुवम् ।
इत्थं मृतं वङ्गकन्तु वीतशङ्कः प्रयोजयेत् ॥ २४ ॥

तृतीयो मारणप्रकारः

विशुद्धं वङ्गमादाय कटाहे गालयेद्भिषक् ।
पादांशिकं विशुद्धञ्च तत्र सूतं विनिक्षिपेत् ॥ २५ ॥
दत्त्वा सम्मर्द्य यत्नेन द्रुतमेवावतारयेत् ।
वङ्गार्द्धं तालकं दत्त्वा खल्वे सम्पेषयेत्ततः ॥ २६ ॥
श्लक्ष्णचूर्णं ततः कृत्वा रविदुग्धेन मर्दयेत् ।
पिप्पलत्वक्समुत्थाच्छक्षारमध्यगतं भिषक् ॥ २७ ॥
शरावसम्पुटे न्यस्य लावकाख्यपुटे पुटेत् ।
इत्थं पुटद्वयेनैव वङ्गं तु मृतिमाप्नुयात् ॥ २८ ॥

चतुर्थो मारणप्रकारः

विशुद्धं वङ्गमादाय कटाहे गालयेद्भिषक् ।
शुष्कपिप्पलवल्कोत्थं चूर्णं तुल्यं विनिक्षिपेत् ॥ २९ ॥
स्वल्पं स्वल्पं मुहुश्चैव लोहदर्व्या प्रचालयेत् ।
वङ्गभस्म भवेद्यावच्चूर्णं तावत्समापयेत् ॥ ३० ॥
राशीकृत्य ततो भस्म शरावेण पिधापयेत् ।
ज्वलदङ्गारवर्णं स्याद् वङ्गभस्म यथा चिरम् ॥ ३१ ॥

तथा प्रदीपयेदग्निं याममेकं भिषग्वरः ।
स्वतःशीतं ततो ज्ञात्वा सुमृतं वङ्गमाहरेत् ॥ ३२ ॥
बहुशः क्षालयेत्तोयैः क्षारहीनं यथा भवेत् ।
ततः सर्वप्रयोगेषु वीतशङ्कः प्रयोजयेत् ॥ ३३ ॥

प्रसङ्गात् क्षारशून्यत्वपरीक्षणम्

क्षारशून्यत्वविज्ञानं भिषजां स्यात्कथं त्वतः ।
रसायनोक्तमार्गेण सर्वं तदुपदिश्यते ॥ ३४ ॥
रक्तं वर्णकपत्रं[1] चेद्भावनाम्भसि संस्थितम् ।
सर्वथा नीलतां नैति क्षारशून्यं ततो वदेत् ॥ ३५ ॥

पञ्चमो मारणप्रकारः

वङ्गं विशुद्धं प्रद्राव्य मृदुपत्राणि कारयेत् ।
ततोऽर्कदुग्धपिष्टेन तालेन परिलेपयेत् ॥ ३६ ॥
घर्मे संशोष्य यत्नेन वङ्गपत्राणि वै पृथक् ।
चिञ्चात्वक्क्षारमध्यस्थानीह कृत्वा पुटेद्भिषक् ॥ ३७ ॥
एवं पुटत्रयेणैव वङ्गकं याति पञ्चताम् ।
इत्थं मृतं वङ्गकन्तु वीतशङ्कः प्रयोजयेत् ॥ ३८ ॥

सुमृतवङ्गस्य गुणाः

वङ्गं मृतं लघु सरं शिशिरञ्च रूक्षं
मेध्यं सतिक्ततुवरं लवणञ्च किञ्चित् ।
मेदोहरं रुचिकरञ्च रसायनञ्च
श्लेष्मामयप्रशमनं खलु सम्प्रदिष्टम् ॥ ३९ ॥

१–रक्तं वर्णकपत्रं (आङ्गलभाषायां Red Litmus Paper इति नाम्नाप्रसिद्धम्) वङ्गभस्मभावनाम्भसि निक्षिप्तं चेन्नीलवर्णतां नोपेयात्तदा वङ्गभस्म क्षारशून्यं सञ्जातमिति जानीयात् । अन्यथा सक्षारमिति व्यवस्येत् ।

वङ्गं वान्तिहरं परं व्रणहरं सर्वप्रमेहापहं
चक्षुष्यं सुमतिप्रदं क्षयहरं शुक्रैकसम्वर्द्धनम् ।
श्वेतासृग्दरनाशनं व्रणहरं जन्त्वामयध्वंसनं
कामं कामविवर्द्धनं धृतिकरं वर्ण्यं निकामं तथा ॥ ४० ॥
वङ्गं कामं मदनजननं स्वप्नमेहामयघ्नं
कासश्वासप्रशमनपटु प्रीणनं कार्श्यभाजाम् ।
वृष्यं बल्यं पवनशमनं पाण्डुहृच्चातिवेलं
वाग्जालैः किं भवति नितरां सौख्यदं देहभाजाम् ॥४१॥
गर्भाशयच्युतिहरं श्वासकृच्छ्रप्रणाशनम् ।
शोषोद्भूतनिशास्वेदोल्बणश्लेष्महरं परम् ॥ ४२ ॥

विशिष्टा गुणाः

मृतन्तु वङ्गं परिशीलितन्तु विनाशयेन्नातिचिरेण नूनम् ।
चिरोत्थितं श्वासनलीविलग्नं कफं प्रवृद्धं मलनामधेयम् ॥४३॥

अपि च

मृतन्तु वङ्गं परिशीलितं वै निवारयेन्नातिचिरेण कामम् ।
सर्वाङ्गगं मानसवैकृतोत्थं प्रसादसंज्ञं पवनं प्रवृद्धम् ॥ ४४ ॥

वङ्गस्य औष्ण्यशैत्यजनने हेतुः

वङ्गं गन्धादियोगेन मारितं तूष्णतां व्रजेत् ।
क्षारादिना मृतश्चेह शीततां याति निर्भरम् ॥ ४५ ॥

अस्य मात्रानिरूपणम्

रक्तिकातः समारभ्य रक्तिद्वितयसंमिताम् ।
पूर्णमात्रां प्रयुञ्जीत मृतवङ्गस्य कोविदः ॥ ४६ ॥

१–प्रसादनामधेयं प्रवृद्धं पवनं शमयतीति ज्ञेयम् ।

अस्य आमयिकः प्रयोगः

गुडूचिकासत्वरजोविमिश्रं मृतन्तु वङ्गं मधुनावलीढम् ।
विनाशयेन्नातिचिरेण मेहान् मत्तद्विपानत्र यथा मृगेन्द्रः॥४७
वङ्गं शिलाजतुयुतं मधुनावलीढं,
मासं निषेवितमलं विनिहन्ति मेहान् ।
क्षीणाल्पशुष्ककृशदूषितरेतसाञ्च,
वीर्याभिवर्द्धनविशुद्धिविधौ च शस्तम् ॥ ४८ ॥
साज्यं वङ्गं शीलितन्तु द्रुतं पाण्ड्वामयं हरेत् ।
सौभाग्यचूर्णसंयुक्तं गुल्मञ्चापि विनाशयेत् ॥ ४९ ॥
पिप्पलीचूर्णसंयुक्तं वङ्गन्तु परिशीलितम् ।
अग्निमान्द्यं निहन्त्याशु त्वजीर्णं पूगसंयुतम् ॥ ५० ॥
हरिद्रया निषेवितं मृतन्तु वंगमुद्धरेत् ।
निकाममूर्ध्वमारुतं तथैव रक्तपित्तकम् ॥ ५१ ॥
रससिन्दूरसंयुक्तं वङ्गं तु परिशीलितम् ।
काममार्द्रनिशावारा व्रणमेहं व्यपोहति ॥ ५२ ॥
वरुणादिगणोद्दिष्टभेषजक्वाथयोगतः ।
शीलितं वङ्गभसितं मतं व्रणहरं परम् ॥ ५३ ॥
चम्पकस्वरसोपेतं सकर्पूरमथापि वा ।
वंगं निषेवितं हन्यान्मुखदौर्गन्ध्यमुल्बणम् ॥ ५४ ॥
वङ्गं कस्तूरिकोपेतं वीर्यस्तम्भकरं परम् ।
जातीफलक्षौद्रयुतं शुक्रपुष्टिकरं परम् ॥ ५५ ॥
खदिरक्वथितेनेह वङ्गं चर्मामयं हरेत् ।
समुद्रफेनसंयुक्तं दुष्टं शुक्रं विशोधयेत् ॥ ५६ ॥
अपामार्गस्य चूर्णेन वङ्गन्तु परिशीलितम् ।
रक्तिद्वयमितं यत्नात् षाण्ढ्यमाशु विनाशयेत् ॥ ५७ ॥

शाल्मलीमूलसंयुक्तं वङ्गं रक्तिद्वयोन्मितम् ।
सक्षौद्रं सहरिद्रञ्च वीर्यवृद्धिकरं परम् ॥ ५८ ॥
लघुशाल्मलिमूलोत्थचूर्णेन परिशीलितम् ।
साभ्रकं शुक्रलोहन्तु शुक्रसञ्जननं परम् ॥ ५९ ॥
वङ्गन्तु शर्करोपेतं पित्तघ्नं समुदाहृतम् ।
निम्बूकस्वरसोपेतं देहदाहहरं मतम् ॥ ६० ॥
तुलसीदलसंयुक्तं वङ्गं मेहान् निवारयेत् ।
नागिनीस्वरसोपेतं विबन्धं नाशयेद् ध्रुवम् ॥ ६१ ॥
लोहशुक्तिकयोपेतं वङ्गं तु परिशीलितम् ।
त्रिगुञ्जरालसहितं श्वेतप्रदरनाशनम् ॥ ६२ ॥
वङ्गं शशासृजा वापि निशाकुङ्कुमचन्दनैः ।
महिषीक्षीरसंपिष्टं मुखच्छायां व्यपोहति ॥ ६३ ॥
रससिन्दूरसंयुक्तं वंगन्तु परिशीलितम् ।
नाशयत्यचिरादेव प्रमेहं क्षीणशुक्रताम् ॥ ६४ ॥
तालमूलिकयोपेतं वंगन्तु परिशीलितम् ।
मासमात्रप्रयोगेण शुक्रतारल्यहृत्परम् ॥ ६५ ॥
नृपावर्तायसयुतं रससिन्दूरसंयुतम् ।
चन्दनक्वाथसंपीतं जीर्णज्वरमपोहति ॥ ६६ ॥
ताप्यतारसमायुक्तं वंगं तु परिशीलितम् ।
ऊर्ध्वजत्रुसमुद्भूतं नाडीशूलं व्यपोहति ॥ ६७ ॥

अथ स्वर्णवङ्गस्य प्रथमो निर्माणप्रकारः

कर्षत्रयमितं वंगं दर्व्या न्यस्यानले न्यसेत् ।
विद्रुते तत्समं सूतं द्रुतं तत्र विनिक्षिपेत् ॥ ६८ ॥
द्रुतं निक्षिप्य खल्वे च पेषयेदतियत्नतः ।
अम्लेन केनचिद्वापि सह सम्मर्दयेत्ततः ॥ ६९ ॥

विमर्द्य सैन्धवं दत्त्वा बहुशः क्षालयेत्ततः ।
विशुद्धं गन्धकञ्चाथ दद्यादीश्वरसंमितम् ॥ ७० ॥
चूलिकालवणञ्चैव बलितुल्यं विनिक्षिपेत् ।
सम्पेष्य चातियत्नेन श्लक्ष्णचूर्णन्तु कारयेत् ॥ ७१ ॥
सवस्त्रमृत्तिकालिप्तकाचकुप्यां ततो न्यसेत् ।
यत्नतः सिकतायन्त्रे चतुर्यामं पचेत्ततः ॥ ७२ ॥
निर्धूमे जायमाने च काचकूपीमुखे भिषक् ।
सन्दंशेन गृहीत्वा च कूपीं भूमौ तु विन्यसेत् ॥ ७३ ॥
काचकूपीं विभिद्याथ कूपिकातलसंस्थितम् ।
स्वर्णवर्णं स्वर्णवङ्गं भिषग्रत्नः समाहरेत् ॥ ७४ ॥
कूपीभेदनकाले तु सूक्ष्मदर्शी भिषग्वरः ।
सूक्ष्मान् काचकणान् सम्यङ् निरीक्ष्य परिवर्जयेत् ॥ ७५ ॥
वङ्गं सञ्जायते यस्मात् कीर्णं स्वर्णकणैरिव ।
तस्माद्रसायनाचार्यैः स्वर्णवङ्गं प्रकीर्तितम् ॥ ७६ ॥

द्वितीयो निर्माणप्रकारः

वङ्गं सूर्यमितं द्रुतं रसमितं सूतञ्च सम्पेषयेत् ।
प्रक्षाल्याम्लरसैः क्षिपेद् बुधवरो नागोन्मितं गन्धकम् ।
अंगांशं नवसादरञ्च विमलं सम्पेष्य यत्नात्पचेत्
कूपीस्थं सिकताख्ययन्त्रविधिना कूपीं ततस्त्वाहरेत् ॥ ७७ ॥
कूपीं विभिद्य यत्नेन रसतन्त्रविचक्षणः ।
स्वर्णरम्यं स्वर्णवर्णं स्वर्णवंगं समाहरेत् ॥ ७८

१–सूर्यमितं द्वादशभागिकं द्रुतं वङ्गं, रसमितं षड्भागिकं सूतं सम्मेल्य-सम्पेषयेत् ।

२–नागोन्मितं अष्टभागिकं गन्धकम् । तच्च प्रागुक्तपञ्चमविधिविशुद्धं ग्राह्यम् ।

३–अङ्गांशं षड्भागिकञ्च नवसादरं दत्त्वा सम्पेष्य कुप्यां निधाय पचेत् ।

आयुर्वेदमहाम्भोभिकर्णधारधुरन्धरैः ।
मित्रवंशावतंसैस्तु गुरुवर्यमहोदयैः ॥ ७९ ॥
श्रीमन्नरेन्द्रनाथाख्यैस्त्वयमाविष्कृतो विधिः ।
प्रकाशितः खलु मया लोकानुग्रहकाम्यया ॥ ८० ॥

अस्य गुणाः

सुवर्णवंगं शिशिरञ्च रूक्षं
सरं सतिक्तं लवणञ्च साम्लम् ।
रसायनं मेहहरञ्च मेध्यं
बल्यञ्च नेत्र्यं परमं प्रदिष्टम् ॥ ८१ ॥
लावण्यदं वह्निविवर्धनञ्च
श्लेष्मामयघ्नं परमञ्च वृष्यम् ।
मेदोहरं शुक्रकरं निकामं
सुवर्णवंगं कथितं रसज्ञैः ॥ ८२ ॥

अस्य मात्रानिरूपणम्

गुञ्जैकतः समारभ्य गुञ्जाद्वितयसंमितम् ।
सुवर्णवंगं युञ्जीत बलकालाद्यपेक्षया ॥ ८३ ॥

अस्य आमयिकः प्रयोगः

स्वर्णवंगं विशेषेण वंगोक्तैरनुपानकैः ।
तत्तद्रोगेषु नियतं प्रयुञ्जीत भिषग्वरः ॥ ८४ ॥

[गीतिका]

बहुलारजोविमिश्रं त्वपि नागकेशराढ्यम् ।
यशदोत्थभूतियुक्तं सुविभं सुवर्णवंगम् ॥ ८५ ॥
परिशीलितं सपथ्यं दिनसप्तकं प्रयत्नात् ।
विनिवारयेद्धि शुक्लप्रदरोत्थितां तु बाधाम् ॥ ८६ ॥
परिशीलितं तथेदं खलु मासमात्रयोगात् ।
विनिहन्ति शुक्रमेहं सुचिरोत्थितं प्रकामम् ॥ ८७ ॥

सममाधवोचिताढ्यं[1] सुविभं सुवर्णवंगम् ।
परिशीलितं द्विगुञ्जं व्रणमेहहृत्प्रदिष्टम् ॥ ८८ ॥
मधुना सुवर्णवंगं रजनीरसप्रगाढम् ।
अशितं ह्यमोघशस्त्रं व्रणमेहनाशनाय ॥ ८९ ॥
सितसारिवाश्रृतेन ह्यशितं सुवर्णवंगम् ।
व्रणमेहमुग्रवेगं खलु नाशयेन्निकामम् ॥ ९० ॥
ससुरप्रियोत्थचूर्णं[2] ह्यशितं सुवर्णवंगम् ।
विनिवारयेद्विशेषाद् द्रुतमेव रात्रिमेहम् ॥ ९१ ॥
लघुशाल्मलीशिफाया रजसा समन्वितन्तु ।
ह्याशितं सुवर्णवंगं बलवीर्यदं प्रदिष्टम् ॥ ९२ ॥

अपि च

प्रतनुमधुविमिश्रं मासमेकं सपथ्यं
मृतयशदसमेतं शीलितं स्वर्णवंगम् ।
अपनयति विशेषाच्छुक्रतारल्यमारा-
ज्जनयति बलवृद्धिं भूयसीं भावुकानाम् ॥ ९३ ॥
समभागिकसिन्दूररससम्मिश्रितं तथा ।
सुवर्णवंगं मधुना वासरे तु द्विवारकम् ॥ ९४ ॥
सततं मासमात्रेण शीलितं पथ्यभोजिभिः ।
अवश्यं नाशयत्याशु शुक्रदौर्बल्यमुल्बणम् ॥ ९५

अथ सुवर्णवङ्गपञ्चकरसायनम

सुवर्णवंगमुज्ज्वलं तु तोलकद्वयोन्मितम् ।
विशोधितं शिलामयं सुवर्णवंगसंमितम् ॥ ९६ ॥
मृतं तु तीक्ष्णलोहकं शिलामयार्द्धभागिकम् ।

१-माधवोचितम्-कंकोलम् (शीतलचीनी-हिन्दी) कंकोलकं कृतफलं कोलकं कटुकं फलम् । चूर्णं कन्दफलं द्वीपं मारीचं माधवोचितम् ॥ धन्वन्तरीयनिघण्टुः ॥
२-सुरप्रियम्-कंकोलम् ।

सुशोभनं तथाभ्रकं मतं तु तोलकार्द्धकम् ॥ ९७
स्मरध्वजाङ्कपूर्वकं ध्वजाह्वयं तथा रसम्[1] ।
विमर्द्य खल्वके भृशं वटीं त्रिगुञ्जसंमिताम् ॥ ९८ ॥
विधाय काचकूपके न्यसेत्ततो भिषग्वरः ।
यथानुपानयोगतो द्विवारमेकवासरे ॥ ९९ ॥
प्रयोजयेद्विशेषविद्बलाबलाद्यपेक्षया ।
रसायनं मतं त्विदं सुवर्णवंगपञ्चकम् ॥ १०० ॥
वङ्गीयैः श्रीरमानाथसेनवैद्यमहोदयैः ।
विचार्याविष्कृतमिदं सुरम्यन्तु रसायनम् ॥ १०१ ॥
प्रकाशितं खलु मया लोकानुग्रहकाम्यया ।
अमोघास्त्रमिदं ख्यातं शुक्रमेहस्य नाशने ॥ १०२ ॥
बलवर्णकरं वृष्यं परं बुद्धिविवर्द्धनम् ।
समाख्यातं विशेषेण शुक्रतारल्यनाशनम् ॥ १०३ ॥
सितासराज्यसयुतप्रतप्तदुग्धयागतः ।
सुवर्णवंगपञ्चकं निषेवितं द्विमासकम् ॥ १०४ ॥
निहन्ति वै चिरोत्थितं तु शुक्रमेहमुल्बणम् ।
तथा करोति कामिनीमदापनाशनक्षमम् ॥ १०५ ॥

इति वंगविज्ञानीयो नाम अष्टादशस्तरङ्गः

१–स्मरः–कामदेवस्तस्य ध्वजांकं ध्वजाचिन्हं, मकरः, तत्पूर्वकं मकरपूर्वक ध्वजाह्वयं रसं मकरध्वजसंज्ञकरसं (अभ्रतुल्यं) दद्यादिति शेषः ।

अथ सीसकादिविज्ञानीय एकोनविंशस्तरङ्गः

अथ सीसकस्य नामानि

सीसकं शीषकं सीसं नागकं नागनामकम् ।
कुवङ्गकं कुरङ्गश्च तथा सिन्दूरकारणम् ॥ १ ॥

ग्राह्यसीसकस्य स्वरूपम्

सुगौरवं मृदु स्निग्धं छेदने मलिनोज्ज्वलम् ।
बहिःश्यामं द्रुतद्रावं सीसकं जात्यमादिशेत् ॥ २ ॥

अग्राह्यसीसकस्य स्वरूपम्

बहिः शुक्लं भारहीनं रूक्षं छेदे च निष्प्रभम् ।
समलं कठिनद्रावं सीसकं हेयमादिशेत् ॥ ३ ॥

सीसकशोधनस्य प्रयोजनम्

सीसं निहन्ति विमलां तु शरीरशोभां
कुष्ठं किलासकमलं जनयेच्च नूनम् ।
सन्धीन् प्रपीडयाति पक्षवधं प्रकुर्यात्
संशुद्धिहीनमिह चेत् खलु मारितं स्यात् ॥ ४ ॥
शुद्धिपाकविहीनन्तु सीसकं परिशीलितम् ।
गुल्मं प्रमेहमानाहं श्वयथुञ्च भगन्दरम् ॥ ५ ॥
वह्निमान्द्यं त्वंसशोथं बाह्वोर्निश्चेष्टतां तथा ।
शूलं क्षयादिकान् रोगान् जनयत्यविकल्पतः ॥ ६ ॥

सीसकस्य प्रथमः शोधनप्रकारः

सीसकं दर्विकासंस्थं चुल्लिकायां निधापयेत् ।
विद्रुतञ्चाथ विज्ञाय रसतन्त्रविचक्षणः ॥ ७ ॥
सिन्दुवारशिफाजातस्वरसापूरितोदरे ।
क्षिपेद् घटे तु सच्छिद्रपिधानपिहितास्यके ॥ ८ ॥
निर्वापयेत्सप्तवारं विधानज्ञो भिषग्वरः ।

इत्थं विशोधितं सीसं मारणाय प्रयोजयेत् ॥९॥

द्वितीयः शोधनप्रकारः

सीसकं द्रावयेल्लोहदर्वीगतं
स्वच्छचूर्णोदके चाथ निर्वापयेत् ।
पूर्वमार्गेण[1] वै शेषकर्माचरेत्
सीसकं सत्वरं याति शुद्धिं पराम् ॥१०॥

अथ सीसकस्य प्रथमो मारणप्रकारः

सीसकं शुद्धमादाय कटाहे गालयेद्भिषक् ।
विशुष्काश्वत्थवल्कोत्थं समं चूर्णं विनिक्षिपेत् ॥११॥
स्वल्पं स्वल्पं मुहुश्चाथ लोहदर्व्या प्रचालयेत् ।
सीसभस्म भवेद्यावच्चूर्णं तावत्समापयेत् ॥१२॥
राशीकृत्य ततो भस्म शरावेण पिधापयेत् ।
ज्वलदङ्गारवर्णं स्यात्सीसभस्म यथा चिरम् ॥१३॥
स्वाङ्गशीतं ततो ज्ञात्वा मृतं सीसं समाहरेत् ।
बहुशः क्षालयेत्तोयैः क्षारहीनं यथा भवेत् ॥१४॥
सीसतुल्यां रोगशिलां विमलां तत्र निक्षिपेत् ।
निम्बूकवारिणा वापि काञ्जिकेनाथ पेषयेत् ॥१५॥
सम्पुटस्थं ततःकृत्वा पुटयेदतियत्नतः ।
इत्थं त्रिभिः पुटैरेव सीसकं मृतिमाप्नुयात् ॥१६॥
द्वितीयादिपुटे वैद्यस्तुल्यामेव शिलां क्षिपेत् ।
इत्थं मृतं सीसकन्तु वीतशङ्कः प्रयोजयेत् ॥१७॥
भस्म सञ्जायते श्लक्ष्णं विशदं कज्जलप्रभम् ।
पक्षाघातादिकान् नागदोषान् नैव करोति च ॥१८॥

(१) पूर्वमार्गेण अव्यवहितप्रदर्शितेन सीसकशोधनोक्तप्रथममार्गेण शेषकर्म कुम्भे स्वच्छचूर्णोदकस्य प्रक्षेपणम्, सच्छिद्रसुदृढपिधानकेन कुम्भमुखस्य आच्छादनमित्यादिकमिहानुक्तं कर्म समाचरेदिति भावः ।

द्वितीयो मारणप्रकारः

विशुद्धं सीसमादाय कटाहे तु निधापयेत् ।
चुल्लिकायां निधायाथ वह्निं प्रज्वाल्य गालयेत् ॥१९॥
सीसकं विद्रुतं ज्ञात्वा स्वल्पं स्वल्पं मुहुर्मुहुः ।
विशुद्धकुनटीचूर्णं तुल्यं दत्त्वा विमर्दयेत् ॥२०॥
सीसभस्म भवेद् यावच्चूर्णं तावत्समापयेत् ।
स्वतः शीतं ततो ज्ञात्वा सीसभस्म समाहरेत् ॥२१॥
भस्मतुल्यं बलिं दत्त्वा निम्बूनीरेण मर्दयेत् ।
घर्मे विशोष्य यत्नेन सम्पुटस्थं ततः पुटेत् ॥२२॥
इत्थं त्रिभिः पुटैरेव सीसकं मृतिमाप्नुयात् ।
इत्थं मृतं सीसकन्तु वीतशङ्कः प्रयोजयेत् ॥२३॥

तृतीयो मारणप्रकारः

नागं विशुद्धन्तु कटाहसंस्थं प्रद्रावयेत्तीव्रतरानलेन ।
द्रुतन्तु विज्ञाय भिषग्वरेण्यो मयूरचूर्णं क्रमशः क्षिपेद्वै ॥२४॥
वासां विशुष्कां च समान्तु दत्त्वा सञ्चालयेद्वै वृषदण्डदर्व्या ।
सुचूर्णितञ्चाथ विलोक्य वैद्यः प्रक्षालयेदच्छजलेन कामम् ।२५
चूर्णं समादाय ततो रसज्ञस्तुल्यां मनोज्ञां विमलां तु दत्त्वा ।
वासारसेनाथ विमर्द्य सम्यक् पुटेत् त्रिवारं रसतन्त्रवैद्यः॥२६।
भस्म संजायते श्लक्ष्णं विशदं कज्जलप्रभम् ।
पक्षाघातादिकान् नागदोषान् नैव करोति च ॥ २७ ॥
सुचिरं सेवनेनापि विकारान्नैव दर्शयेत् ।
अतो रसायनाचार्यो वीतशङ्कः प्रयोजयेत् ॥ २८ ॥

चतुर्थो मारणप्रकारः

नागं विशुद्धन्तु निधाय दर्व्यां प्रद्रावयेत्तीव्रतरानलेन ।
द्रुतं समालोक्य भिषग्वरेण्यः पादांशमीशं द्रुतमेव दद्यात् ॥२९

द्रुतन्तु भूमाववतार्य खल्वे सम्पेषयेत्सत्वरमेव यत्नात् ।
प्रक्षाल्य साम्लेन जलेन नूनं विशोष्य नीरं विदधीत चूर्णम् ।३०
निक्षिप्य सीसाद् द्विगुणन्तु गन्धं सम्पेषयेद्यामयुगं प्रयत्नात् ।
विलोक्य चूर्णं खलु कज्जलाभं निधापयेद्वैद्यवरः शरावे ॥३१॥
शरावसम्पुटास्थितं पुटेन्महापुटे ततः ।
स्वतः सुशीततां गते शरावमाहरेद्भिषक् ॥ ३२ ॥
विभिद्य सम्पुटात्ततः शुभं सुकज्जलप्रभम् ।
मृतन्तु सीसमाहरेद्रसायनागमार्यमा ॥ ३३ ॥

पञ्चमो मारणप्रकारः

चूर्णैर्मयूरादिसमुत्थितैस्तु चूर्णीकृतं सीसकमग्नियोगात् ।
प्रक्षाल्य च क्षारहतिं विधाय सीसार्द्धमानं विमलालचूर्णम् ॥३४॥
दत्त्वाथ सम्पेष्य शरावसंस्थं पुटेत्प्रमाणार्हपुटै रसज्ञः ।
स्वतः सुशीतन्तु विलोक्य विद्वान् समाहरेत्सम्पुटकं प्रयत्नात् ॥३५॥
रीत्यानया नातिचिरेण नूनमनुत्तमां याति मृतिन्तु सीसम् ।
विलुप्तशङ्को भिषजां वरेण्यः प्रयोजयेद् भूतिमिमां रसेषु ॥३६॥

षष्ठो मारणप्रकारः

नागं कटाहनिहितं द्रावयेद् वह्नियोगतः ।
ततः शुद्धशिलाचूर्णं स्वल्पं स्वल्पं मुहुर्मुहुः ॥ ३७ ॥
समांशेन तु निक्षिप्य लोहदर्व्या प्रचालयेत् ।
नागभस्म भवेद्यावच्चूर्णं तावत्समापयेत् ॥ ३८ ॥
ततः सीसोन्मितां शुद्धां शिलां दत्त्वा भिषग्वरः ।
रविदुग्धेन सम्पेष्य पुटयेदतियत्नतः ॥ ३९ ॥
एवं नातिचिरादेव नागकं मृतिमाप्नुयात् ।
इत्थं मृतं नागकन्तु सर्वयोगेषु योजयेत ॥ ४० ॥

सप्तमो मारणप्रकारः

सीसकं द्रावयेत्सत्कटाहस्थितं
विद्रुतं वीक्ष्य वै वैद्यविद्याचणः ।
निक्षिपेत् चूर्णितं शुद्धसौगन्धिकं
सीसकं सर्वथा याति यावन्मृतिम् ॥ ४१ ॥
वीक्ष्य सम्यङ् मृतं सीसकं कोविदः
स्वाङ्गशीते सति त्वाददीत द्रुतम् ।
सीसमेवं मृतं वीतशङ्को भिषक्
योजयेत्सर्वथा बाह्ययोगेऽनिशम् ॥ ४२ ॥

अथ मृतसीसकस्य गुणाः

मृतन्तु सीसं मधुरञ्च तिक्तं स्निग्धं तथोष्णं गुरु लेखनञ्च ।
सरं तथा वह्निविवर्द्धनञ्च रसागमज्ञैः खलु सम्प्रदिष्टम् ॥ ४३ ॥

अपि च

प्रमेहकरिकेशरी पवनरोगकालानलः
ग्रहण्यतिनिशारुणः खलु गुदाङ्कुरेभाङ्कुशः ।
बलासगदतस्करो व्रणगणैकसङ्कर्षणः ।
परं विजयतेतरां गदहरो भुजङ्गो मृतः ॥ ४४ ॥

अपि च

नागस्तु नागसमतां द्रुतमातनोति
गुल्मद्विपं दलयतीह चिरप्रमत्तम् ।
घोरं हरेत्प्रदरमाशु हि रक्तपूर्वं
तूर्णन्तु रोगनिवहान् विनिहन्ति नूनम् ॥ ४५ ॥

मृतसीसकस्य मात्रा

पादांशतो रक्तिकाया रक्तिकैकमितं शुभम् ।
मृतं सीसं प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ४६ ॥

अथ मृतसीसकस्य आमयिकः प्रयोगः

गुञ्जैकप्रमितं सीसं निशामलकसंयुतम् ।
मधुना शीलितं तूर्णं प्रमेहं विनिवारयेत् ॥ ४७ ॥
अशोकक्काथसंयुक्तं मृतं सीसन्तु शीलितम् ।
अचिरादेव चिरजं रक्तप्रदरमुद्धरेत् ॥ ४८ ॥
गुञ्जैकप्रमितं सीसं नागकेशरसंयुतम् ।
रक्तार्शसं निहन्त्याशु वृक्षमिन्द्राशनिर्यथा ॥ ४९ ॥
गुडूचिकासत्वरजोविमिश्रं मृतन्तु सीसं मधुनावलीढम् ।
विनाशयेन्नातिचिरेण नूनं बलासवातप्रभवन्तु मेहम् ॥ ५० ॥
सुवर्णरससिन्दूरताम्राढ्यं खलु सीसकम् ।
शीलितं विनिहन्त्याशु त्वन्त्रशोथं सुदारुणम् ॥ ५१ ॥
आत्मगुप्ताबलामूलमांसीक्काथेन सीसकम् ।
वृक्कशोथसमुद्भूतमाक्षेपं नाशयत्यलम् ॥ ५२ ॥
रससिन्दूरताम्राढ्यं सीसकं परिशीलितम् ।
सर्वाङ्गकम्पनारब्धं हन्ति पक्षवधामयम् ॥ ५३ ॥
प्रसारणीबलारास्नाकपिकच्छूकषायतः ।
मतारयशदं सीसं सुमृतं परिशीलितम् ॥ ५४ ॥
अङ्गप्रसारणीपेशीगतदोषसमुत्थितम् ।
विनिहन्ति विशेषेण पक्षाघातं सुदारुणम् ॥ ५५ ॥

अन्त्रशोषान्तक रसः

शिलया निहतं सीसं तोलकद्वयसंमितम् ।
कान्तपाषाणभसितं सीसकप्रमितं शुभम् ॥ ५६ ॥
निश्चन्द्रिकं सुवर्णं तु तथा यशदकारणम् ।
गगनं रविलोहं च पृथक् तोलकसंमितम् ॥ ५७ ॥
सर्वार्द्धं गन्धकं दत्त्वा पेषयेत्कन्यकाम्भसा ।
त्रिधा वराहाख्यपुटे पुटयेद्भिषजां वरः ॥ ५८ ॥

खल्वे सञ्चूर्ण्य च ततो काचकुप्यां तु विन्यसेत् ।
समाख्यातो रसोऽयं तु ह्यन्त्रशोषान्तकाभिधः ॥ ५९ ॥
श्रीमद्भिर्गुरुवर्यैस्तु ह्ययमाविष्कृतो रसः ।
प्रकाशितः खलु मया लोकानुग्रहकाम्यया ॥ ६० ॥

अस्य गुणाः

अन्त्रशोषापहरणो ग्रहणीविनिवारणः ।
जीर्णाजीर्णप्रहरणो यक्ष्मलक्ष्मनिवर्हणः ॥ ६१ ॥
अरोचकाद्युपगतं दारुणं दीर्घकालजम् ।
अतीसारं निहन्त्याशु कामं यक्ष्मसमाश्रयम् ॥ ६२ ॥
आध्मानापहमत्यन्तं गुल्मप्लीहनिषूदनम् ।
जीर्णज्वरप्रशमनं बलसञ्जननं परम् ॥ ६३ ॥
गुञ्जार्द्धतः समारभ्य गुञ्जैकप्रमितं परम् ।
प्राणाचार्यः प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ६४ ॥

अथ आरनालीयसीसकस्य नामानि

काञ्जिकाम्लीयसीसञ्च त्वारनालीयसीसकम् ।
तदेव च समाख्यातं काञ्जिकाम्लीयनागकम् ॥ ६५ ॥

आरनालीयसीसस्य निर्माणप्रकारः

चत्वारिंशद्भागिकन्तु सुतीव्रं काञ्जिकाम्लकम् ।
परिस्रुतञ्च विमलं जलं विंशतिभागिकम् ॥ ६६ ॥
मृद्दारशृंगचूर्णन्तु चतुर्विंशतिभागिकम् ।
काचपात्रे सुविमले स्थापयेद्भिषजां वरः ॥ ६७ ॥
चुल्लिकायां निधायाथ कामं मन्दाग्निना पचेत् ।
द्रवीभूतं ततो ज्ञात्वा चुल्लीतस्त्ववतारयेत् ॥ ६८ ॥
ततः सारकपत्रेण स्रावयेदातियत्नतः ।
पुनर्मन्दानलेनैव स्रावितं सलिलं पचेत् ॥ ६९ ॥

किञ्चिज्जलांशशेषे च पात्रमाश्ववतारयेत् ।
स्वाङ्गशीत समालोक्य ततः पात्रतलस्थितान् ॥७०॥
आरनालीयसीसस्य हिमकुन्देन्दुसन्निभान् ।
सूक्ष्मान् कणान् निपतितान् भिषग्रत्नः समाहरेत् ॥७१॥

अथ आरनालीयकसीसद्रवस्य निर्माणप्रकारः

आरनालीयसीसन्तु निर्मलं शरभागिकम् ।
सार्द्धत्रिभागिकञ्चैव शुद्धं मृद्दारशृंगकम् ॥७२॥
परिस्रुतञ्च विमलं जलं विंशतिभागिकम् ।
सम्मेल्य काचपात्रे च चुल्लिकायां निधापयेत् ॥७३॥
पचेन्मन्दाग्निना तावत् यावदेति द्रुतिं पराम् ।
यावज्जलं प्रशुष्येत द्रुतिपर्यन्तमग्निना ॥७४॥
विनिक्षिपेज्जलं तावद्रसतन्त्रविचक्षणः ।
काचकुप्यां निधायाथ भिषग्रत्नः प्रयोजयेत् ॥७५॥

प्रसङ्गात् सुतीव्रकाञ्जिकाम्लस्य निर्माणप्रकारः

अत्यम्लं निर्मलं शुक्तं गृहनीरमथापि वा ।
समाहरेद्भिषग्वर्यो रससेरकसंमितम् ॥७६॥
काचलिप्ते तु मृत्पात्रे नाडिकायन्त्रयोगतः ।
पचेन्मन्दाग्निना तावत्पञ्चसेरकसंमितम् ॥७७॥
यावत्तु गृहनीरस्थं जलांशं न परिस्रवेत् ।
परिस्रुताम्बुसन्त्यक्तं जायते तीव्रकाञ्जिकम् ॥७८॥

अथ सजलारनालीयकसीसद्रवस्य निर्माणप्रकारः

आरनालीयकाहेस्तु द्रवे शुभ्रांशुभागिके ।
निक्षिपेद्रसतन्त्रज्ञस्तन्मितां निर्मलां सुराम् ॥ ७९ ॥

१—अत्र "अल्पार्थे कन्" इत्यल्पार्थे कन् प्रत्ययो विहितः ।
तेनाङ्गलभाषाप्रसिद्ध-Sul-इत्युपसर्गप्रत्ययक इत्यवधेयम् ।

परिस्रुतञ्च सलिलं शुद्धं वस्त्रश्वभागिकम् ।
दत्त्वा सम्मेलयेद्वैद्यः काचकुप्यां निधापयेत् ॥ ८० ॥
अयमेव समाख्यातो रसायनविचक्षणैः ।
द्रवः खलु ससलिलः काञ्जिकीयकसीसजः ॥८१॥

अथ सजलारनालीयकसीसद्रवस्य प्रयोगक्रमः

आरनालीयकाह्युत्थं द्रवन्तु सजलं भिषक् ।
सलिले सप्तगुणिते सम्मेल्य विनियोजयेत् ॥८२॥

अस्य आमयिकः प्रयोगः

जलाभस्राविणां दाहवतां पूयवतामपि ।
व्रणानां धावनार्थन्तु विधानज्ञः प्रयोजयेत् ॥८३॥
मेढ्रमार्गेण चेन्नृणां व्रणमेहस्य हेतुना ।
स्रावो जायेत मतिमान् बस्तिकर्मविचक्षणः ॥८४॥
आरनालीयकाह्युत्थं द्रवन्तु सजलं तदा ।
जलेनोद्दिष्टमानेन युञ्जीतोत्तरबस्तिना ॥८५॥
रक्तिद्वयमितं सारं त्वहिफेनसमुद्भवम् ।
षष्टिबिन्दुमितञ्चैव काञ्जिकाम्लीयकाहिजम् ॥८६॥
द्रवन्तु सजलञ्चाथ सार्द्धकोलद्वयं जलम् ।
सम्मेल्य भिषजांवर्यस्त्वक्शोफे तु विसर्पजे ॥८७॥
अभिघातोत्थशोथे च घृष्टसंपिचितास्थिषु ।
धावनार्थं प्रयुञ्जीत सर्वथैव विधानतः ॥८८॥
अभिघातोत्थितं दाहं कण्डूतिञ्च हरेद् ध्रुवम् ।
योनिपायुप्रदेशोत्थां कण्डूतिञ्चापि नाशयेत् ॥८९॥
नागद्रवं त्वन्तराले मणिशिश्नाग्रचर्मणोः ।
काचबस्तिप्रयोगेण शल्यवित्तु प्रदापयेत् ॥९०॥
फिरङ्गजं महाघोरं शोथदाहरुजान्वितम् ।

नाशयेदाशु योगोऽयं निरुद्धप्रकशामयम् ॥९१॥

अस्य प्रयोगनिषेधः

अक्ष्णोर्नाञ्जीत मतिमान् खलु द्रवमिमं भिषग्ः ।
अञ्जनेन भवेदान्ध्यं व्रणशुक्रमथापि वा ॥९२॥

अथ अशुद्धामृतसीसकसेवनविकृतौ विधानम्

अविशुद्धामृताद्युत्थविकारपरिशान्तये ।
विशुद्धगन्धचूर्णन्तु योजयेद् भिषजां वरः ॥९३॥

अथ यशदस्य नामानि

यशदं यसदञ्चैव जशदं जसदं तथा ।
रीतिहेतुः खर्परजं समाख्यातं भिषग्वरैः ॥९४॥

ग्राह्ययशदस्य स्वरूपम्

छेदे समुज्ज्वलं स्निग्धं मृदुलं निर्मलं तथा ।
द्रुतद्रावं महाभारं यशदं ग्राह्यमुच्यते ॥९५॥

अग्राह्ययशदस्य स्वरूपम्

कठिनं कठिनद्रावं रूक्षं रूक्षप्रभं लघु ।
मलिनं यशदं यत्तु तदग्राह्यं प्रकीर्तितम् ॥९६॥

अथ यशदशोधनस्य प्रयोजनम्

विशुद्धिहीनं यशदं मृतञ्चेद्
विशोधितं वाप्यमृतं त्वविज्ञैः ।
निषेवितं वै जनयेद् विकारान्
गुल्मप्रमेहक्षयकुष्ठकादीन् ॥९७॥

यशदस्य प्रथमः शोधनप्रकारः

जात्यं यशदमादाय लोहदर्व्यान्तु विन्यसेत् ।
तीव्राग्निना तु विद्राव्य चूर्णवारिप्रपूरिते ॥९८॥
सच्छिद्रेण पिधानेन पिहितास्ये घटे क्षिपेत् ।
सप्तवारं प्रयत्नेन यशदं शुद्धिमाप्नुयात् ॥९९॥

द्वितीयः शोधनप्रकारः

यशदं द्रावितं यत्नात् सप्तवारं विधानतः ।
सिन्दुवारशिफाद्रावे स्नपयेद्भिषजां वरः ॥१००॥
रीत्यानया तु यशदं शुद्धिमायात्यनुत्तमाम् ।
एवं शुद्धन्तु यशदं मारणाय प्रयोजयेत् ॥१०१॥

तृतीयः शोधनप्रकारः

यशदं द्रावितं यत्नाद् गोदुग्धे स्नपयेद्भिषक् ।
त्रिसप्तवारं यत्नेन यशदं शुद्धिमाप्नुयात् ॥१०२॥

चतुर्थः शोधनप्रकारः

प्रद्राव्य यशदं वैद्यः सुधादुग्धे निषेचयेत् ।
सप्तवारं प्रयत्नेन शुद्धिमायात्यनुत्तमाम् ॥१०३॥

अथ यशदस्य प्रथमो मारणप्रकारः

शुद्धं यशदमादाय कटाहे तीव्रवह्निना ।
प्रद्राव्य भिषजां वर्यः समपारदगर्भके ॥१०४॥
खल्वे विनिक्षिपेद्यत्नात्ततः सम्पेषयेद् द्रुतम् ।
पिष्टिं विधाय यत्नेन क्षालयेन्निम्बुवारिणा ॥१०५॥
यशदप्रमितं गन्धं दत्त्वा सञ्चूर्णयेत्ततः ।
शरावसम्पुटस्थन्तु पुटयेदथ यत्नतः ॥१०६॥
रीत्यानया तु यशदं मृतिमायात्यनुत्तमाम् ।
इत्थं मृतन्तु यशदं सर्वयोगेषु योजयेत् ॥१०७॥

द्वितीयो मारणप्रकारः

[गीतिका]

यशदं विशुद्धमादौ विनिधाय वै कटाहे ।
अतितीव्रवह्नियोगात् खलु गालयेन्निकामम् ॥१०८॥
दृढनिम्बदण्डदर्व्या परिचालयेत्प्रयत्नात् ।
सुमृतं ततो विलोक्य त्ववतारयेत्कटाहम् ॥१०९॥

विमलं प्रदाय तालं चरणांशिकं रसज्ञः ।
खलु पेषयेत्प्रयत्नात् पुटवित् पुटेत् पुटस्थम् ॥११०॥
रीत्यानया तु यशदं मृतिमेति निर्विशेषाम् ।
विविधानुपानयोगाद् वितरेत्तु वीतशङ्कः ॥१११॥

तृतीयो मारणप्रकारः

यशदं विमलं न्यस्य कटाहे गालयेद्भिषक् ।
अपामार्गस्य चूर्णञ्च स्वल्पं स्वल्पं मुहुर्मुहुः ॥११२॥
विनिक्षिपेद् भिषग्वर्यो लोहदर्व्याथ चालयेत् ।
भस्म यावद् भवेत्सम्यक् चूर्णं तावत् समापयेत् ॥११३॥
राशीकृत्य ततो भस्म शरावेण पिधापयेत् ।
ज्वलदङ्गारवर्णं स्याद्यशदं तु यथा चिरम् ॥११४॥
तथा प्रदीपयेदग्निं याममेकं भिषक्तमः ।
स्वतःशीतं ततो ज्ञात्वा यशदं मृतमाहरेत् ॥११५॥

चतुर्थो मारणप्रकारः

कटाहसंस्थं यशदं विमलन्तु शनैः शनैः ।
विघट्टयँल्लोहदर्व्या पचेत्तीव्राग्निना भिषक् ॥११६॥
यशदं चूर्णतां यातं वस्त्रपूतन्तु कारयेत् ।
स्थूलांशञ्च पुनः कामं कटाहस्थं विपाचयेत् ॥११७॥
एवं नातिचिरादेव यशदं मृतिमाप्नुयात् ।
कुन्देन्दुधवलं भस्म जायते चातिशोभनम् ॥११८॥
रीत्यानया खलु मृतं यशदन्तु विधानतः ।
नावनाञ्जनकार्यादौ योजयेद्भिषजां वरः ॥११९॥

अथ सुमृतयशदस्य गुणाः

यशदं तुवरं शिशिरं कटुकं
परमं नयनामयनाशकरम् ।
कफपित्तसमुत्थितरोगहरं

बलवीर्यविवेकसमृद्धिकरम् ॥१२०॥
यशदं पाण्डुशमनं बहुमेहनिषूदनम् ।
कासश्वासप्रशमनं निशाखेदनिवर्हणम् ॥१२१॥
यशदं परमं श्लेष्मकलासंकोचकृन्मतम् ।
समाख्यातं विशेषेण व्रणसंस्रावरोधनम् ॥१२२॥
श्रमावसादशमनं रजःस्रावनिषूदनम् ।
कम्पवातापहं चैव विशेषात्परिकीर्तितम् ॥१२३॥

यशदस्य विशिष्टो गुणः

संशीलितं वै यशदं मृतन्तु
विनाशयेदाशु भृशं विशेषात् ।
प्रसादसंज्ञं पवनं प्रवृद्ध-
मेकाङ्गगं वै सकलाङ्गगं वा ॥१२४॥

मृतयशदस्य मात्रा

गुञ्जार्द्धतः समारभ्य गुञ्जैकप्रमितं मृतम् ।
यशदं विनियुञ्जीत बलकालाद्यपेक्षया ॥१२५॥

अथ यशदस्य आमयिकः प्रयोगः

एलादारुसितापत्रचूर्णेन परिशीलितम् ।
यशदं सुमृतं यत्नात् त्रिदोषं नाशयेद् ध्रुवम् ॥१२६॥
अग्निमन्थशिफावल्कचूर्णेन यशदं मृतम् ।
शीलितं ह्यचिरादेव दीपयेज्जठरानलम् ॥१२७॥
पुराणेन तु गव्येन सर्पिषा परिशीलितम् ।
भक्षितं यशदं यत्नात् द्रुतं दृष्टिं विवर्धयेत् ॥१२८॥
रक्तिकार्द्धमितं शुभ्रं यशदं वह्निजारितम् ।
सघृतं नस्ययोगेन प्रत्यहं मासमात्रकम् ॥१२९॥
पुनः पुनः समुद्भूतप्रतिश्यायसमुत्थितम् ।

नासिकाश्लैष्मिककलादौर्बल्यं विनिहन्त्यलम् ॥१३०॥
प्रवालभस्मसहितं यशदं परिशीलितम् ।
निहन्यादचिरादेव निशास्वेदं क्षयोत्थितम् ॥१३१॥
लिप्ता यशदविभूतिर्गव्येनाज्येन चात्र सप्ताहम् ।
नाशयतीह निकामं चिरजामपि विचर्चिकामचिरात् ॥१३२॥
मृतगगनसमेतं शीलितं क्षौद्रयुक्तं
सुमृतयशदचूर्णं रक्तिकैकप्रमाणम् ।
हरति झटिति कासं श्वासकञ्चोग्रवेगं
व्यपनयति विशेषाद् राजरोगोत्थकासम् ॥१३३॥
आर्द्रकस्वरसोपेतं सक्षौद्रं यशदं मृतम् ।
शीलितं नाशयत्याशु श्वासं परमदारुणम् ॥१३४॥
आत्मगुप्ताशिफारास्नाबलैरण्डकषायतः ।
कम्पयुक्तं पक्षवधं यशदं हन्ति शीलितम् ॥१३५॥
लोहाभ्रकसमायुक्तं यशदं परिशीलितम् ।
कणाक्षौद्रेण हन्त्याशु श्वासं प्रतमकाभिधम् ॥१३६॥
स्वर्णवङ्गसमायुक्तं यशदं परिशीलितम् ।
चित्तावसादसंयुक्तं स्वप्नमेहं व्यपोहति ॥१३७॥
अशोकत्वक्कषायेण यशदं परिशीलितम् ।
त्रिचतुर्मासससम्भूतरजोरोधसमुत्थितम् ॥१३८॥
अतिप्रबलवेगेन जायमानं सुदारुणम् ।
तीव्रवेदनयोपेतं रजःस्रावं निवारयेत् ॥१३९॥
लोहसर्जरसोपेतं यशदं परिशीलितम् ।
निहन्ति शुक्लप्रदरं रजोरोधसमुत्थितम् ॥१४०॥
यशदं रससिन्दूरयुतं कर्पूरसंयुतम् ।

(१) प्रवालभस्म गुञ्जार्धम्, मृतं यशदं गुञ्जैकमेतद् द्वयं सम्मेल्य मधुना प्राशयेदिति सम्प्रदायः ॥

सप्रलापं कम्पवातं हन्ति वै सान्निपातिकम् ॥१४१॥
टङ्काभ्रवंशजायुक्तं यशदं परिशीलितम् ।
श्वासं निवारयत्याशु सकष्टकफनिर्गमम् ॥१४२॥
यशदं रससिन्दूरयुतं क्षौद्रेण शीलितम् ।
हन्ति मस्तिष्कदौर्बल्यं विषादश्रमसंयुतम् ॥१४३॥
सुवर्णभस्मसंयुक्तं यशदं परिशीलितम् ।
समाख्यातं विशेषेण योषापस्मारनाशनम् ॥१४४॥
सतारताप्यं यशदं चित्रकक्काथयोगतः ।
अर्धावभेदकं सूर्यापवर्तं नाशयत्यलम् ॥१४५॥

अथ यशदामृतमलहरः

त्रिकर्षं सिक्थतैलन्तु पूर्वोक्तविधिसाधितम् ।
तोलकैकमितं दद्याद् यशदं वह्निजारितम् ॥ १४६ ॥
खल्वेऽतिमसृणे क्षुद्रे मर्दयेदतियत्नतः ।
समाख्यातो मलहरो यशदामृतसंज्ञकः ॥ १४७ ॥

अस्य गुणाः

मतो मलहरोऽयं तु विविधव्रणरोपणः ।
विचर्चिकाहरः काममग्निदग्धव्रणापहः ॥ १४८ ॥

अथ गन्धकाम्लीययशदस्य निर्माणप्रकारः

विमलयशदचूर्णं काचपात्रे तु पूर्वं
विशदविपुलबुद्धिः स्थापयेद्वैद्यवर्य्यः ।
तदनु खलु सनीरं गन्धकाम्लं क्षिपेद्वै
द्रवति यशदचूर्णं यावता द्रावकेण ॥ १४९ ॥
ततः सारकपत्रेण सारयेत्तु विधानतः ।
काचपात्रे निधायाथ पचेन्मन्दाग्निना भिषक् ॥ १५० ॥
जलांशं शोषयेद्यत्नाद्रसकर्मविचक्षणः ।
किञ्चिज्जलांशशेषे च पात्रं भूमौ निधापयेत् ॥ १५१ ॥

समुज्ज्वलं सुधवलं काचपात्रतलस्थितम् ।
गन्धकाम्लीययशदचूर्णं शुद्धं समाहरेत् ॥ १५२ ॥

गन्धकाम्लीययशदस्यगुणाः

गन्धकाम्लीययशदचूर्णं पूयघ्नमुत्तमम् ।
व्रणसंस्रावशमनं नेत्राभिष्यन्दनाशनम् ॥ १५३ ॥
व्रणमेहहरं चैव श्वेतप्रदरकप्रणुत् ।
सङ्कोचकृद्विशेषेण कीर्तितं रसवेदिभिः ॥ १५४ ॥
शुष्कं गन्धाम्लयशदं क्षारकर्मकरं परम् ।
क्षारकर्मप्रयोगार्थमतस्तद् विनियुज्यते ॥ १५५ ॥
गन्धकाम्लीययशदं शुष्कं प्रायो न युज्यते ।
योजयेद्विधिना वैद्यो द्रवीकृत्य विधानतः ॥ १५६

अथ गन्धकाम्लीययशदद्रवस्य प्रथमो निर्माणप्रकारः

गन्धकाम्लीययशदं रक्तिकैकमितं शुभम् ।
मार्द्धद्वितोलकमिते सलिले तु परिस्रुते ॥ १५७ ॥
सद्राव्य खलु यत्नेन काचकुप्यां निधापयत् ।
गन्धकाम्लीययशदद्रवोऽयं नामतो मतः ॥ १५८ ॥

अस्य गुणाः

गन्धकाम्लीययशदद्रवोऽयं व्रणमेहहृत् ।
नेत्राभिष्यन्दशमनो रोपणो भूतनाशनः ॥ १५९ ॥

अस्य आमयिकः प्रयोगः

बिन्दुक्षेपकयन्त्रेण द्रवोऽयं लोचनार्पितः ।
विनिहन्त्यचिरादेव नेत्राभिष्यन्दजां रुजम् ॥ १६० ॥
मेढ्रमूलं दृढं बध्वा स्फीतकेन विधानतः ।
यत्नादुत्तरबस्त्युक्तविधानेन ह्यनारतम् ॥ १६१ ॥
गन्धकाम्लीययशदद्रवोऽयं विनियोजितः ।
सप्ताहद्वितयेनैव व्रणमेहं व्यपोहति ॥ १६२ ॥

गन्धकाम्लीययशद्द्रवस्य द्वितीयो निर्माणप्रकारः

गन्धकाम्लीययशदं षट्त्रिंशद्रक्तिकोन्मितम् ।
परिस्रुते तु सलिले षष्टितोलकसंमिते ॥ १६३ ॥
संद्राव्य खलु यत्नेन काचकुप्यां निधापयेत् ।
गन्धकाम्लीययशदद्रवोऽयं भाषितो बुधैः ॥ १६४ ॥

अस्य गुणाः

गन्धकाम्लीयशदद्रवोऽयं व्रणरोपणः ।
सङ्कोचकृद्विशेषेण श्वेतप्रदरनाशनः ॥ १६५ ॥

अस्य प्रयोगविधिः

यत्नादुत्तरबस्त्युक्तरीत्या तु विनियोजितः ।
द्रवोऽयं नाशयत्याशु श्वेतप्रदरमुल्बणम् ॥ १६६ ॥

अथ यशदामृतद्रवस्य निर्माणप्रकारः

गन्धकाम्लीययशदं युगरक्तिकसंमितम् ।
टङ्कणाम्लद्रवे रम्ये पञ्चतोलकसंमिते ॥ १६७ ॥
निक्षिप्य खलु यत्नेन काचकुप्यां तु विन्यसेत् ।
समाख्यातो द्रवोऽयं तु यशदामृतसंज्ञकः ॥ १६८ ॥

अस्य गुणाः

यशदामृतसंज्ञोऽयं द्रवः शोथप्रणाशनः ।
शिशिरश्चैव रक्तार्माभिष्यन्दादिनिषूदनः ॥ १६९ ॥

अस्य आमयिकः प्रयोगः

बिन्दुक्षेपकयन्त्रेण द्रवोऽयं नेत्रयोजितः
विनिहन्त्याशु रक्तार्माभिष्यन्दाद्यक्षिगामयान् ॥ १७० ॥

इति सीसकादिविज्ञानीयो नाम एकोनविंशस्तरङ्गः ॥

अथ लोहादिविज्ञानीयो विंशस्तरङ्गः

अथ लोहस्य भेदास्तेषां वैशिष्ट्यञ्च

मुण्डं तीक्ष्णं तथा कान्तं लोहं त्रिविधमुच्यते ।
मुण्डात्तीक्ष्णं ततः कान्तं प्रशस्तं परिकीर्तितम् ॥ १ ॥

मुण्डलोहस्य नामानि

मुण्डं तथा मुण्डलोहं कृपिलोहं शिलात्मजम् ।
कृष्णायसं दृपत्सारमायसञ्च निगद्यते ॥ २ ॥

तीक्ष्णलोहस्य नामानि

लोहो लोहं लोहकञ्च शस्त्रलोहञ्च तीक्ष्णकम् ।
सारलोहं काललोहं त्वयश्च तदिहोच्यते ॥ ३ ॥

कान्तलोहस्य नामानि

कान्तलोहं तथा कान्तं त्वयस्कान्तञ्च तन्मतम् ।
कान्तायसं महालोहं तदेव विनिगद्यते ॥ ४ ॥

मुण्डलोहादीनां परिचयः

कटाहपिष्टपचनखल्वादीनां विशेषतः ।
निर्माणाय, मुण्डलोहं साम्प्रतं विनियुज्यते ॥ ५ ॥
कृपाणादिविनिर्माणे तीक्ष्णलोहं प्रयुज्यते ।
कान्तलोहञ्च कथितं बुधैः परमदुर्लभम् ॥ ६ ॥

मारणोचितं लोहम्

समलं मुण्डलोहं तु मारणाय न योजयेत् ।
तीक्ष्णलोहं कान्तलोहं यथालाभं प्रयोजयेत् ॥ ७ ॥

तीक्ष्णलोहस्य लक्षणम्

उज्ज्वलं लोहफलकं धात्रीकाशीसलेपितम् ।
गिरिशृङ्गाङ्कितं यत्स्यात्तीक्ष्णलोहं तदुच्यते ॥ ८ ॥

कान्तलोहस्य लक्षणम्

कान्तपाषाणजं लोहं कान्तलोहं प्रकीर्तितम् ।

आध्मातकान्तपाषाणसत्वभूतं तु तन्मतम् ॥ ९ ॥

लोहशोधनस्य प्रयोजनम्

हृदामयं पापरुजञ्च शूलं दाहं गुरुत्वं खलु षण्ढभावम् ।
प्रगाढविट्कत्वमथाश्मरीञ्च त्वशुद्धलोहं जनयत्यवश्यम् ॥१०॥

शोधनाय ग्राह्यलोहनिरूपणम्

तीक्ष्णलोहस्य फलकान्यादाय भिषजां वरः ।
रेतयेल्लोहकारैस्तच्चूर्णं शुद्ध्यै प्रयोजयेत् ॥ ११ ॥

अथवा

कृपाणादिविनिर्माणमुख्ययन्त्रालयादितः ।
सुरेतितं तीक्ष्णलोहचूर्णं शुद्ध्यै नियोजयेत् ॥ १२ ॥

अपि वा

सूक्ष्मकण्टकवेधीनि पत्राणि खलु कारयेत् ।
लोहस्य लोहकारैस्तु तानि शुद्ध्यै नियोजयेत् ॥ १३ ॥

शोधनाय लोहपरिमाणम

एकसेटकतस्तीक्ष्णं समारभ्य भिषग्वरः ।
सेटकत्रयपर्यन्तं शोधयेन्मारयेत्तथा ॥ १४ ॥

अथ लोहशोधनस्य प्रथमः प्रकारः

तीक्ष्णलोहोत्थितं सूक्ष्मसूक्ष्मं रजो
दर्विकासंस्थितं वह्निसन्तापितम् ।
सप्तधा स्नापितं त्रैफलेनाम्भसा
लोहमेवं द्रुतं याति शुद्धिं पराम् ॥ १५ ॥

अत्र जलक्वाथ्यनिषेच्यानां परिमाणम

त्रैफलं वल्कलं वै कलाभागिकं
नामनेत्रक्षपानाथभागं जलम् ।
पाचितं शेषितं वेदभागोन्मितं
सेचनीयं त्वयः पञ्चभागोन्मितम् ॥ १६ ॥

द्वितीयः शोधनप्रकारः

आतप्तसूक्ष्मरजस्त्वयसो ज्वलने
परितप्तमलं मुनिवारामह ।
कदलीनवमूलजले नियतं
विमलत्वमुपैति निषेचनतः ॥ १७ ॥

तृतीयः शोधनप्रकारः

वराकषायसंयुते समे गवान्तु मूत्रके ।
निषेचितं तु सप्तधा त्वयो विशुद्धिमाप्नुयात् ॥ १८ ॥

चतुर्थः शोधनप्रकारः

शशासृजा प्रलेपितं त्वयोऽर्कदुग्धतोऽपि वा ।
वराजले निषेचनाद् विशुद्धिमेत्यनुत्तमाम् ॥ १९ ॥

अथ लोहशुद्ध्यनन्तरं तत्पाकक्रमः

प्रथमं भानुपाकेन स्थालीपाकात्ततः परम् ।
पुटपाकेन पक्वञ्च लोहं सुमृतिमाप्नुयात् ॥ २० ॥

तत्रादौ भानुपाकलक्षणम्

वराक्वाथयुतं लोहं भानोः प्रखरभानुभिः ।
शुष्यन् विपच्यते यस्माद् भानुपाकस्ततः स्मृतः ॥ २१ ॥

अथ भानुपाकविधानम्

विमलं खलु लोहन्तु सलिलक्षालितं भिषक् ।
त्रिफलाक्वाथसंयुक्तं ततः खल्वे निधापयेत् ॥ २२ ॥
निदाघे तु निधायाथ भानोः प्रखरभानुभिः ।
शोषयेद्भिषजां वर्यः कुर्यादेवं तु सप्तधा ॥ २३ ॥
भानुपाके लोहतुल्या त्रिफला द्विगुणं जलम् ।
पादावशेषितञ्चाथ वराक्वाथं प्रयोजयेत् ॥ २४ ॥

स्थालीपाकस्य लक्षणम्

त्रिफलाक्वथितोपेतं लोहं स्थाल्यां खराग्निना ।
शुष्यन् विपच्यते यस्मात् स्थालीपाकस्ततः स्मृतः ॥ २५ ॥

स्थालीपाकविधानम्

भानुपाकविपक्वन्तु लोहं प्रक्षालयेदलम् ।
ततः स्थाल्यां तु विन्यस्य चुल्लिकायां निधापयेत् ॥ २६ ॥
वराक्वाथेन सुपचेदतिवेलं खराग्निना ।
शोषयेत्सलिलं यत्नात् लोहकर्मविचक्षणः ॥ २७ ॥
स्थालीपाके त्रिगुणिता वरा, षोडशिकं जलम् ।
अष्टभागावशिष्टश्च क्वाथमानं विधीयते ॥ २८ ॥
शतमूलीभृङ्गराजहस्तिकर्णशिफोत्थितैः ।
रसैः समैर्वापि भिषक् स्थालीपाकं समाचरेत् ॥ २९ ॥
यथादोषौषधेनापि स्वरसं वा कषायकम् ।
आदाय क्वाथमानज्ञः स्थालीपाकं समाचरेत् ॥ ३० ॥

पुटपाकस्य स्वरूपम्

रसादिभिर्भेषजानां खल्वे लोहं विमर्दितम् ।
पुटस्थं पच्यते यस्मात् पुटपाकस्ततः स्मृतः ॥ ३१ ॥

पुटपाकविधानम्

स्थालीपाकविपक्वन्तु लोहं प्रक्षालयेत्ततः ।
यथादोषौषधोत्थेन रसेन क्वथितेन वा ॥ ३२ ॥
लोहखल्वे सुसम्पेष्य चक्रिकाः कारयेत्ततः ।
आतपे खलु संशोष्य मृच्छरावे तु विन्यसेत् ॥ ३३ ॥
शरावेण पिधायाथ दृढं सन्धिं प्रलेपयेत् ।
वनानीतैः करीषैर्वा ह्यल्पलैर्हस्तपिण्डितैः ॥ ३४ ॥

पुटेद्गजपुटेनेह पुटपाकक्रियापटुः ।
स्वाङ्गशीतं ततो ज्ञात्वा सम्पुटन्तु समाहरेत् ॥ ३५ ॥
पुनः पूर्ववदेवेह दत्त्वा क्वाथादिकं पुनः ।
सम्पेष्य सम्पुटे कृत्वा पुटेत्पुटविधानवित् ॥ ३६ ॥
सहस्रवारमथवा शतवारमथापि वा ।
षष्टिवारं पुटेद्वापि लोहं गुणविवृद्धये ॥ ३७ ॥
गुणोदयो भवत्येवं पुटनादुत्तरोत्तरम् ।
एवं पुटविपक्वन्तु लोहं सुमृतिमाप्नुयात् ॥ ३८ ॥

पुटपाके भेषजानां परिमाणम्

पुटपाक वरादीनि यथादोषौषधानि तु ।
लोहतुल्यानि गृह्णीयात् पुटपाककलापटुः ॥ ३९ ॥
यथा यथा पुटान्यत्र दीयन्ते सुविधानतः ।
भवेत्तथा तथावश्यमतिवेलं गुणोदयः ॥ ४० ॥
न चैवं जनयत्येतल्लोहजां कोष्ठबद्धताम् ।
खरविट्कत्वमपि वा सुचिरं त्वपि सेवनात् ॥ ४१ ॥

लोहमारको गणः

त्रिफला शतमूली च सिंहिका तालमूलिका ।
नीलोत्पलञ्च ह्रीवेरं दशमूलं पुनर्नवा ॥ ४२ ॥
वृद्धदारकमूलञ्च भृङ्गं विश्वं विडंगकम् ।
करञ्जशिग्रुनिर्गुण्डीसुरसैरण्डमूलकम् ॥ ४३ ॥
हस्तिकर्णपलाशश्च पर्पटश्चन्दनं बला ।
समाख्यातो गणोऽयन्तु लोहमारकसंज्ञकः ॥ ४४ ॥

अथ वातहरो गणः

एरण्डमूलं रास्नाथ दशमूलं प्रसारणी ।
मुद्गपर्णी माषपर्णी शतमूली पुनर्नवा ॥ ४५ ॥

अश्वगन्धामृता मांसी बला नागबला तथा ।
गणो वातहरोऽयन्तु वातामयहरः परम् ॥ ४६ ॥

पित्तनाशको गणः

उशीरनीरसिंहिकाकिरातभूरिपुत्रिकाः ।
पटोलचन्दनामृतासरोजतालमूलिकाः ॥ ४७ ॥
सुतिक्तशाल्मलीशिफासितामहीरुहामयाः ।
गणस्तु पित्तनाशको ह्ययं तु पित्तरोगहृत् ॥ ४८ ॥

कफनाशको गणः

रास्ना मरीचं चविका नागिनी विश्वभेषजम् ।
एरण्डः पिप्पलीमूलं तुलसी शृंगवेरकम् ॥ ४९ ॥
भार्ङ्गी रक्तार्ककुसुमं मूर्वा शिग्रु विभीतकम् ।
परं बलासगदजित् गणोऽयं कफनाशकः ॥ ५० ॥

अथ लोहमारकगणे विशेषवक्तव्यम्

तत्तद्रोगघ्नभैषज्यैस्तत्तद्रोगापनुत्तये ।
यथालाभं पुटेत्कामं प्राणाचार्यो विचक्षणः ॥ ५१ ॥
पुटितस्यायसोऽभावे तत्तद्रोगघ्नभेषजैः ।
त्रिफलापुटितं लोहं सर्वत्र विनियोजयेत् ॥ ५२ ॥

अथ लोहस्य द्वितीयो मारणप्रकारः

निर्मलं त्वायसं तत्समं हिङ्गुलं
कन्यकावारिणा निर्भरं पेषयेत् ।
घर्मसंशोषितश्चाथ चूर्णीकृतं
वारणाख्ये पुटे सम्पुटस्थं पुटेत् ॥ ५३ ॥
स्वाङ्गशीते पुनः खाक्षिसंख्यांशकं
हिंगुलं मेलयेत् त्रैफलेनाम्भसा ।
भृङ्गवाराथवा पेषयेदायसं

पूर्ववद्वै पुटेत् वृत्तसच्चक्रिकम् ॥ ५४ ॥
इत्थमेवायसं खाब्धिसंख्यैः पुटै-
र्निश्चितं जायते रक्तपद्मप्रभम् ।
तीक्ष्णकं कान्तकञ्चापि लोहद्वयं
यात्यवश्यं मृतिं त्वाशु चात्युत्तमाम् ॥ ५५ ॥

तृतीयो मारणप्रकारः

[गीतिका]

विमलीकृतन्तु लोहं खलु सेटंककमानम् ।
विनिधाय खल्वमध्ये सममिङ्गलीयचूर्णम् ॥ ५६ ॥
अथ निम्बुकोत्थवारा खलु पेषयेद् द्विघस्रम् ।
अथ पिष्टितां प्रयातं कृतचक्रिकञ्च लोहम् ॥ ५७ ॥
परिशोषयेन्निदाघे रसतन्त्रकर्मविज्ञः ।
विधिना त्रिवारमेवं पुटयेत्तु सम्पुटस्थम् ॥ ५८ ॥
अथ निम्बुकोत्थवारा खलु केवलेन पिष्टम् ।
पुटयेत्तु तावदेवं समुपैति पद्मकान्तिम् ॥ ५९ ॥
अचिरेण लोहमेवं मृतिमेति निर्विशेषाम् ।
एवं मृतन्तु लोहं युञ्जीत निर्विशङ्कः ॥ ६० ॥

चतुर्थो मारणप्रकारः

विमलं लोहचूर्णन्तु निम्बूकोत्थेन वारिणा ।
भृशं सम्पेष्य यत्नेन चक्रिकाः कारयेत्ततः ॥ ६१ ॥
सम्पुटस्थं ततः कृत्वा पुटेद्गजपुटेन तु ।
पञ्चाशद्भिः पुटैरेवं लोहं सुमृतिमाप्नुयात् ॥ ६२ ॥
भस्म सञ्जायते चैवं रक्तोत्पलसमप्रभम् ।
एवं मृतं त्वायसन्तु सर्वत्र विनियोजयेत् ॥ ६३ ॥

पञ्चमो मारणप्रकारः

[गीतिका]

विमलन्तु लोहचूर्णं खलु सेटेकैकमानम् ।
खरलोहखल्वमध्ये निदधीत वैद्यवर्यः ॥ ६४ ॥
अथ लोहमानतुल्यां दत्त्वा शिलां विशुद्धाम् ।
शालिञ्चमूलसालिलैः परिपेषयेन्निकामम् ॥ ६५ ॥
प्रविधाय शुष्कचूर्णं त्वथ वै पुटे गजाख्ये ।
पुटयेत्तु मृच्छरावद्वयमध्यगं ततोऽग्नौ ॥ ६६ ॥
समशुद्धनागजिह्वायुतमायसं त्रिधैवम् ।
पुटितं ततः प्रयाति त्वतिसूक्ष्मचूर्णभावम् ॥ ६७ ॥
परिपेष्य चाथ यत्नाद् विदधीत वस्त्रपूतम् ।
स्थूलावशिष्टलोहं शिलया पुनः पुटेद्वै ॥ ६८ ॥
त्रिफलार्द्रकाग्निभृङ्गद्वयहस्तिकर्णकानाम् ।
कुलिशस्य सूरणस्य स्वरसेन चाग्निमुख्याः ॥ ६९ ॥
स्वरसैः पुनर्नवायाः पुटयेच्च भूरिवारम् ।
पुटितन्तु लोहमेवं मृतिमेति निर्विशेषाम् ॥ ७० ॥
विधिना त्वनेन यत्नाद् विहिता तु लोहभूतिः ।
गुदजामयप्रणुत्यै कथिता त्वतिप्रशस्ता ॥ ७१ ॥

षष्ठो मारणप्रकारः

विमलं कान्तलोहं तु पलपञ्चकसंमितम् ।
पादिकं मृतमाक्षीकं दत्त्वा निम्बूकवारिणा ॥ ७२ ॥
सम्पेषयेत्प्रयत्नेन शुष्कचूर्णञ्च कारयेत् ।
सम्पुटस्थं ततः कृत्वा पुटद्वजपुटे ततः ॥ ७३ ॥
स्वाङ्गशीतं ततो ज्ञात्वा वस्त्रपूतञ्च कारयेत् ।
एवं पुटत्रयं दद्याद्रसतन्त्रविचक्षणः ॥ ७४ ॥

माक्षिकञ्च प्रतिपुटमवश्यं दापयेत्ततः ।
स्थूलावशिष्टलोहञ्च पुटेदेवं प्रयत्नतः ॥ ७५ ॥
उक्तपित्तघ्नभैषज्यैर्यथालाभमथापि वा ।
धात्रीरसेन पुटयेद्यावन्मृतिमवाप्नुयात् ॥ ७६ ॥
एतत्तु माक्षिकहतं कान्तलोहं भिषग्वरः ।
तत्तद्विशिष्टयोगेषु प्रयुञ्जीत विधानतः ॥ ७७ ॥

सप्तमो मारणप्रकारः

विशोधितं कान्तलोहं धात्रीस्वरसपेषितम् ।
पुटेद्गजपुटेनैव शतधा कृतचक्रिकम् ॥ ७८ ॥
शतधा पुटितं कान्तं यात्येवं मृतिमुत्तमाम् ।
रसायनं परमिदं तथायुष्करमुत्तमम् ॥ ७९ ॥

अथ लोहनिरुत्थीकरणम्

मृतं लोहं गव्यमाज्यं तथा शुद्धञ्च गन्धकम् ।
दत्त्वा कन्याम्भसा पिष्ट्वा शुष्कचूर्णञ्च कारयेत् ॥ ८० ॥
सम्पुटस्थं ततः कृत्वा पुटेद् गजपुटे भृशम् ।
इत्थमेकपुटेनैव भवेल्लोहं निरुत्थितम् ॥ ८१ ॥

निरुत्थीकृतलोहस्य परीक्षणम्

त्रिविधविधिहतं वै त्वायसं तीक्ष्णकान्तं
घृतमधुपुरगुञ्जाटङ्कणक्षोदयुक्तम् ।
सुपुटितमनलस्थं चेन्न यात्यात्मभावं
भवति सुमृतमेतत्सर्वयोगोपयुक्तम् ॥ ८२ ॥

अथ मृतलोहस्य गुणाः

लोहं रूक्षं सुमधुरमलं पाकतश्चाथ तिक्तं
वीर्ये शीतं गुरु च तुवरं लेखनञ्चातिनेत्रम् ।
बल्यं वृष्यं जठरगदनुत् श्लेष्मपित्तामयघ्नं
वर्ण्यं मेध्यं खलु किमधिकं हन्त नानामयघ्नम् ॥ ८३ ॥

अपि च

लोहं दीपनमुत्तमं क्षयहरं कुष्ठामयध्वंसनं
गुल्मप्लीहविधूननं क्रिमिहरं पाण्ड्वामयघ्नं परम् ।
मेदोमेहनिवर्हणं गरहरं दुर्नामरोगान्तकृत्
छर्दिश्वासहरं त्वलं बहुगिरा योगेन नानार्तिनुत् ॥ ८४ ॥

अपि च

विसूर्पकरिकेशरी प्रबलशूलनिर्मूलनः
क्षयक्षयकरः परं चिरजशोथसङ्कोचनः ।
यकृद्गदविधूननो गुदमहागदेभाङ्कुशः
परं विजयतेतरां विधिहतस्तु लोहो ह्ययम् ॥ ८५ ॥

अपि च

श्वासं नाशयति क्रिमीन् क्रशयति क्षैण्यं क्षिणोति द्रुतं
शोषं शोषयति भ्रमं त्वपहरेच्छूलं समुन्मूलयेत् ।
कासं ह्रासयति क्षयं क्षपयति भ्रान्तिं निहन्त्यन्तो
स्थौल्यं विह्वलयत्यलं दलयति श्लेष्मामयान् सर्वथा ॥ ८६ ॥

अथ लोहस्य गुणाः

पुरातनमतीसारं गण्डमालां नवोत्थिताम् ।
रजोरोधं वृक्कशोथं हृद्रोगं विषमज्वरम् ॥ ८७ ॥
फिरङ्गजं पाण्डुरोगं कामलाञ्च हलीमकम् ।
योषापस्मारकञ्चैव श्वेतप्रदरजां रुजम् ॥ ८८ ॥
मधुमेहं मांसतानं सभेदं शोषमुल्वणम् ।
तथैव ताण्डवगदं सूतिकाज्वरमेव च ॥ ८९ ॥
गलक्षतञ्चामवातं यकृद्रोगं भगन्दरम् ।
पीनसञ्चाम्लपित्तञ्च त्वाश्ववश्यं विनाशयेत् ॥ ९० ॥
सामान्यतः श्रुतिपुटनासागर्भाशयादितः ।
अल्पां रक्तस्रुतिं प्रायोभाविनीमाशु नाशयेत् ॥ ९१ ॥

यौवनारम्भकालीनयोषित्पाण्ड्वामयं तथा ।
आमपक्वाशयगतक्षतजासृक्स्रुतिं जयेत् ॥ ९२ ॥
नाडीशूलमनिद्राञ्च पाण्ड्वामयसमुत्थिताम् ।
आमवातभवामस्थिविकृतिञ्चापि नाशयेत् ॥ ९३ ॥
शारीरिकरुजञ्चापि मानसीमवषण्णताम् ।
रजःक्षयसमुद्भूतां वार्द्धक्ये नाशयेद् ध्रुवम् ॥ ९४ ॥
वातसंस्थानदौर्बल्यं बहूत्थानसमुत्थितम् ।
अचिरादेव नियतं मृतं लोहं विनाशयेत् ॥ ९५ ॥
आरोग्योन्मुखकाले तु यस्य कस्यामयस्य वै ।
मृतं लोहं प्रशंसन्ति विशेषाद्बलवृद्धये ॥ ९६ ॥

अथास्य विशिष्टा गुणाः

शाखाश्रितं कोष्ठसमाश्रितं वा
पित्तं विवृद्धन्तु मलाभिधेयम् ।
मृतन्तु लोहं शमयेन्नितान्तं
यथा समीरः खलु मेघवृन्दम् ॥ ९७ ॥

अस्य मात्रानिरूपणम्

आरभ्य गुञ्जपादांशात् गुञ्जाद्वितयसंमितम् ।
मृतं लोहं प्रयुञ्जीत प्राणाचार्यः प्रयत्नतः ॥ ९८ ॥

अस्य आमयिकः प्रयोगः

लोहं चतुर्जातयुतं सितया च समन्वितम् ।
शीलितं मात्रया तूर्णं रक्तपित्तं व्यपोहति ॥ ९९ ॥
वासाद्राक्षाकणाचूर्णयुक्तं लोहं निषेवितम् ।
विशेषात् खलु कासानां पञ्चतां पञ्चतां नयेत् ॥ १०० ॥
भार्ङ्गीव्योषसमायुक्तं मृतं लोहं निषेवितम् ।

श्वासवेगं निहन्त्याशु मेघवृन्दं यथानिलः ॥ १०१ ॥
कज्जलीपिप्पलीक्षौद्रयुतं लोहं तु शीलितम् ।
विनिहन्त्यचिरादेव विशेषात् श्लैष्मिकामयान् ॥ १०२ ॥
शुण्ठीचूर्णयुतं लोहं वातबाधां व्यपोहति ।
रससिन्दूरसितया लोहं पित्तामयान् हरेत् ॥ १०३ ॥
फलत्रिकसमायुक्तं मृतं लोहं निषेवितम् ।
सम्वत्सरप्रयोगेण वलीपलितनाशनम् ॥ १०४ ॥
ताम्बूलवीटिकोपेतं लोहन्तु परिशीलितम् ।
रससिन्दूरसंयुक्तं वृष्यं वर्ण्यञ्च कीर्तितम् ॥ १०५ ॥
हिङ्गुव्योषघृतोपेतं मृतं लोहं निषेवितम् ।
शूलमुन्मूलयत्याशु मेघवृन्दं यथानिलः ॥ १०६ ॥
धात्रीकणाचूर्णयुतं तुल्यया सितया सह ।
लोहं विनाशयेद्रक्तपित्तञ्चैवाम्लपित्तकम् ॥ १०७ ॥
विडङ्गत्रिफलामुस्तशिखरीबीजसंयुतम् ।
लोहं विनाशयत्याशु भस्मकाख्यं महागदम् ॥ १०८ ॥
गिरिजतुसमुपेतं शीलितं लोहचूर्णं ।
त्वभिनवकुशकाशक्वाथसंयोगतो वा ।
प्रतनुदिवसमात्रेणैव नात्यल्पहेतुं
व्यपनयति विशेषाद्दारुणं मूत्रकृच्छ्रम् ॥ १०९ ॥
पुनर्नवाढ्यं सुमृतन्तु लोहं
प्रभूतगोक्षीररसानुपीतम् ।
मासत्रयेणैव जराकृशानां
पुनर्नवत्वं प्रददाति नूनम् ॥ ११० ॥
मृतसूतयुतं लोहं कटुकीद्रवभावितम् ।
मासद्वयप्रयोगेण सर्वाङ्गैकाङ्गवातहृत् ॥ १११ ॥

घृतमधुविनियुक्तं वा हरिद्रारसाढ्यं
त्वशितमिह हि लोहं वापि कट्वीशिवाभ्याम् ।
अपहरति विशेषान्मासमात्रप्रयोगात्
सुचिरजमपि पाण्डुं कामलाञ्चातिघोराम् ॥ ११२ ॥
विमलबलिसमेतं क्षौद्रगव्याज्ययुक्तम्
कलितरुफलपथ्याधात्रिकोद्भूतवारा ।
कृतसमुचितपथ्यो वर्षमात्रप्रयोगात्
जनयति युवभावं ज्यायसाञ्चापि पुंसाम् ॥ ११३ ॥
लोहं गोक्षुरक्षुद्रैलाचूर्णेन परिशीलितम्
विनिहन्त्यचिरादेव मूत्रकृच्छ्रं सुदारुणम् ॥ ११४ ॥
खदिरासनसाराभ्यां सप्तधा परिभावितम् ।
लोहं निषेवितं हन्ति कुष्ठादीन् विविधान् गदान् ॥ ११५ ।
गन्धमारितताम्राढ्यं लोहं तु परिशीलितम् ।
बलात्मगुप्ताक्काथेन सर्वाङ्गैकाङ्गवातनुत् ॥ ११६ ॥
धात्रीरसहतं कान्तलोहं त्रिफलयान्वितम् ।
सेवितं वर्षमात्रं तु परमायुष्करं मतम् ॥ ११७ ॥

प्रदरान्तकलोहः

लोहं द्वितोलकमितं रङ्गं तोलकसंमितम् ।
सुवर्णगैरिकञ्चैव गव्याज्यपरिपाचितम् ॥ ११८ ॥
श्वेतसर्जरसोद्भूतं चूर्णं कर्षद्वयोन्मितम् ।
सुचूर्णितं मोचरसं तोलकैकमितं शुभम् ॥ ११९ ॥
समादाय भिषग्वर्यः काचकुप्यां निधापयेत् ।
प्रदरन्तकलोहोऽयं नामतः परिकीर्तितः ॥ १२० ॥
अनुपानविभेदेन सर्वप्रदरनाशनः ।
रक्तचन्दनजक्काथैर्वाशोकत्वककषायतः ॥ १२१ ॥

निहन्ति रक्तप्रदरं विविधास्रावसंयुतम् ।
श्वेतचन्दनपङ्केन श्वेतप्रदरनाशनः ॥ १२२ ॥

अथ मण्डूरस्य स्वरूपम्

प्रतापितस्य लोहस्य घनाघातच्युतम् मलम् ।
कालेन पिण्डतां यातं क्षितौ, मण्डूरमुच्यते ॥ १२३ ॥

मण्डूरस्य नामानि

मण्डूरं तु समाख्यातं किट्टं लोहभवं तथा ।
लोहकिट्टं लोहमलं लोहोच्छिष्टश्च तन्मतम् ॥ १२४ ॥

मण्डूरस्य प्राशस्त्यम्

षष्टिवर्षीयमधमं मध्यं सप्ततिवार्षिकम् ।
सर्वश्रेष्ठं समाख्यातं मण्डूरं शतवार्षिकम् ॥ १२५ ॥

प्रकारान्तरेण ग्राह्यमण्डूरस्य स्वरूपम्

स्निग्धं गुरु दृढं चैव कृष्णं कोटरवर्जितम् ।
जीर्णनष्टपुरःस्थञ्च मण्डूरं ग्राह्यमुच्यते ॥ १२६ ॥

मण्डूरस्य शोधनविधिः

ध्मातं विभीतकाङ्गारैर्गोमूत्रे परिषेचितम् ।
सप्तवारं लोहमलं शुद्धिमायात्यनुत्तमाम् ॥ १२७ ॥

प्रकारान्तरेण मण्डूरस्य शोधनविधिः

प्रखरदहनतप्तं लोहकिट्टं पुराणं
त्रिमुलसुरभिमूत्रे सप्तवारं निषिक्तम् ।
निगदितविधियोगान्मारणायानुरूपां
कलयति खलु शुद्धिं सत्वरं निर्विशेषाम् ॥ १२८ ॥

अथ मण्डूरस्य मारणप्रकारः

चूर्णीकृतं तु मण्डूरं त्रिफलाक्वथिताम्भसा ।
सम्पेष्य सम्पुटे कृत्वा त्रिंशद्वारं ततः पुटेत् ॥ १२९ ॥
एवं नातिचिरादेव रक्तचन्दनसप्रभम् ।
मण्डूरं जायते तूर्णं ततो योगेषु योजयेत् ॥ १३० ॥

लोहमारकगणोदितैस्तुतै र्भेषजैरपि सह प्रपेषितम् ।
लोहकिट्टमथ सम्पुटीकृतं पाचितं खलु समेति पञ्चताम् ॥१३१

मृतमण्डूरस्य गुणाः

मण्डूरं सुमृतं वृष्यं शिशिरं रुचिरं परम् ।
दीपनं पित्तशमनं रक्तवृद्धिकरं परम् ॥ १३२ ॥
पाण्डुप्रमत्तमातङ्गमदमर्दनकेशरी ।
कामलाकुडयकुलिशं मण्डूरं तु विशेषतः ॥ १३३ ॥
शोषप्रशमनश्चैव तथा शोफप्रणाशानम् ।
हलीमकं च प्लीहानं मण्डूरं हन्त्यशेषतः ॥ १३४ ॥

मण्डूरस्य मात्रा

आरभ्य गुञ्जापादांशाल्लोहमात्राविधानवित् ।
गुञ्जाद्वितयपर्यन्तं मण्डूरं विनियोजयेत् ॥ १३५ ॥

मण्डूरस्य आमयिकः प्रयोगः

पुनर्नवाष्टकक्काथसंयुक्तं लोहकिट्टकम् ।
निषेवितं निहन्त्याशु शोफजां महतीं रुजम् ॥ १३६ ॥
कट्वीफलत्रिकनिशायुग्मचूर्णेन शीलितम् ।
मण्डूरमचिरादेव नाशयेत्कामलां ध्रुवम् ॥ १३७ ॥
विडङ्गत्रिफलापञ्चकोलाब्दपरिशीलितम् ।
मण्डूरं कृमिशोफार्शोग्रहणीप्लीहपाण्डुनुत् ॥ १३८ ॥
रससिन्दूरसंयुक्तं मण्डूरं तु निषेवितम् ।
मासमात्रप्रयोगेण रक्तवृद्धिकरं परम् ॥ १३९ ॥
दशमूलकषायेण मण्डूरं परिशीलितम् ।
मशोथं सज्वरं सातिसारं पाण्ड्वामयं हरेत् ॥ १४० ॥

इति लोहविज्ञानीयो नाम विंशस्तरङ्गः ।

अथ उपधात्वादिविज्ञानीय एकविंशस्तरङ्गः

अथ सुवर्णमाक्षिकस्य नामानि

सुवर्णमाक्षिकं स्वर्णमाक्षिकं हेममाक्षिकम् ।
माक्षीकं माक्षिकञ्चैव ताप्यञ्च धातुमाक्षिकम् ॥ १ ॥
माक्षीकधातुश्च तथा तापीजञ्चापि तन्मतम् ।
ईषत्सुवर्णसाहित्यात्सुवर्णगुणसाम्यतः ॥ २ ॥
सुवर्णद्युतिमत्त्वाद्वा स्वर्णमाक्षिकमुच्यते ।
तापीतीरभवत्वाच्च ताप्यं तापीजमुच्यते ॥ ३ ॥

ग्राह्यसुवर्णमाक्षिकस्य लक्षणम्

स्निग्धं गुरु श्यामलकान्ति किञ्चित्
कपे सुवर्णद्युतिसुप्रकाशम् ।
काणोज्झित स्वणसमानवण
सुवर्णमाक्षीकमिह प्रशस्तम् ॥ ४ ॥

हेयसुवर्णमाक्षिकस्य लक्षणम

खरं परं वै गुरुताविहीनं प्रवृत्तकोणं खरलोहकाभम् ।
प्रकीर्तितं तत्परिहेयमेव सुवर्णमाक्षीकमिहामयज्ञैः ॥ ५ ॥

स्वर्णमाक्षिकशोधनस्य प्रयोजनम्

अशोधितं वामृतमप्यशुद्धं निषेवितं माक्षिकमक्षिबाधाम् ।
मन्दानलं कुष्ठहलीमकादीन् कोष्ठानिलं वै जनयेन्नितान्तम् ।६।

स्वर्णमाक्षिकस्य प्रथमः शोधनप्रकारः

सुवर्णमाक्षिकं लोहखल्वे तु खलु कुट्टयेत् ।
सुकुट्टितं ततो ज्ञात्वा चालन्या परिचालयेत् ॥ ७ ॥
ततो माक्षिकचूर्णन्तु चालनीपरिगालितम् ।
समादाय कटाहे तु स्थापयेद्भिषजां वरः ॥ ८ ॥
निम्बूकस्वरसं दत्त्वा पचेच्चल्लीगतं ततः ।

दर्व्या संचालयेत्तावद्यावत्स्यादुत्पलप्रभम् ॥ ९ ॥
ताप्यं तु यावल्लौहित्यं नैति तावत्प्रयत्नतः ।
पुनर्निम्बूरसं दत्त्वा पचेत्तीव्राग्नियोगतः ॥ १० ॥
भृशं दिनत्रयं वापि द्विदिनं वा विधानतः ।
पाचितं माक्षिकं नूनं शुद्धिमायात्यनुत्तमाम् ॥ ११ ॥

द्वितीयः शोधनप्रकारः

वरं सुवर्णमाक्षिकं सुचूर्णितं समाहरेत् ।
विधाय पोट्टलीगतं ततस्तु दोलिकागतम् ॥ १२ ॥
पचेत्ततः समं शृतादशुक्लमारिषोत्थितात् ।
ततस्तु पोट्टलीगतं पतत्यधो हि माक्षिकम् ॥ १३ ॥
दिनैकमेवमाक्षिकं विपाचितं विधानतः ।
विशुद्धिमेत्यनुत्तमां न कश्चिदत्र संशयः ॥ १४ ॥

तृतीयः शोधनप्रकारः

वरं सुवर्णमाक्षिकं प्रताप्य तीव्रपावके ।
निषेचयेद्विधानवित् प्रशस्तनिम्बुकोदके ॥ १५ ॥
त्रिसप्तवारमेव वै निषेचितं तु माक्षिकम् ।
विशुद्धिमेत्यनुत्तमां जवेन नात्र संशयः ॥ १६ ॥
प्रयासशून्यमार्गतस्त्वनेन गोत्रदूषणम् ।
सुवर्णमाक्षिकस्थितं विनश्यतीति निश्चितम् ॥ १७ ॥

चतुर्थः शोधनप्रकारः

सुचूर्णितं माक्षिकन्तु कदलीकन्दवारिणा ।
घटिकाद्वितयं पक्वं विशुध्यति न संशयः ॥ १८ ॥

अथ स्वर्णमाक्षिकस्य प्रथमो मारणप्रकारः

ताप्यं निम्ब्वम्लसंपक्वं पुनर्निम्बूकवारिणा ।
सम्पेष्य सम्पुटस्थन्तु पुटयेत् कृतचक्रिकम् ॥ १९ ॥

एवं दशपुटैरेव पञ्चतामेति माक्षिकम् ।
रक्तोत्पलदलच्छायं जायते चातिशोभनम् ॥ २० ॥

द्वितीयो मारणप्रकारः

विशोधितं माक्षिकन्तु बलिञ्चसमभागिकम् ।
खल्वे सम्पेषयेद्यत्नाद् भृशं निम्बूकवारिणा ॥ २१ ॥
संशोष्य सम्पुटे न्यस्य पुटयेत् कृतचक्रिकम् ।
एवं पञ्चपुटैरेव म्रियते हेममाक्षिकम् ॥ २२ ॥

तृतीयो मारणप्रकारः

सुचूर्णिते तु माक्षिके विशोधितं तु हिङ्गुलम् ।
क्षिपेत्तदष्टमांशिकं ततस्तुनिम्बुकाम्बुना ॥ २३ ॥
सुपेष्य सम्पुटीकृतं पचेददीर्घचक्रिकम् ।
विपक्वमष्टधैव वै प्रकीर्तितेन वर्त्मना ॥ २४ ॥
प्रयाति पञ्चतां परं जवेन हेममाक्षिकम् ।
क्षिपेत्तु हिङ्गुलं पुनः पुनर्निरुक्तमानतः ॥ २५ ॥

अथ स्वर्णमाक्षिकस्य गुणाः

सुवर्णमाक्षिकं वृष्यं मधुरं तु रसायनम् ।
तिक्तं स्वर्यञ्च चक्षुष्यं त्रिदोषघ्नं परं मतम् ॥ २६ ॥
क्षयमर्शांसि मेहानि विविधा बस्तिवेदनाः ।
पाण्डुश्वयथुकुष्ठानि विषदोषादिकान् हरेत् ॥ २७ ॥
जीर्णज्वरमपस्मारं मन्दानलमरोचकम् ।
माक्षिकं नाशयत्याशु योगवाहि परं मतम् ॥ २८ ॥

स्वर्णमाक्षिकस्य मात्रानिरूपणम्

गुञ्जार्धतः समारभ्य बलकालाद्यपेक्षया ।
गुञ्जाद्वितयपर्यन्तं माक्षिकं योजयेद्भिषक् ॥ २९ ॥

अथ स्वर्णमाक्षिकस्य आमयिकः प्रयोगः

सुमृतं माक्षिकं शालसारादिगणभावितम् ।

यथालाभं प्रयुक्तं तु सान्द्रमेहं विनाशयेत् ॥ ३० ॥
शिलाजत्वभ्रजन्तुघ्नमधुभिः परिशीलितम् ।
शीलितं मासमेकन्तु यक्ष्माणं विनिवारयेत् ॥ ३१ ॥
यवक्षारसमायुक्तं सुमृतं स्वर्णमाक्षिकम् ।
नाशयत्यचिरादेव मूत्रकृच्छ्रं सुदारुणम् ॥ ३२ ॥
पुनर्नवामृताशुण्ठीदार्वीक्वाथेन माक्षिकम् ।
सेवनादचिरादेव शोथं नाशयति ध्रुवम् ॥ ३३ ॥
काञ्चनारत्वचोत्थेन क्वाथेन परिशीलितम् ।
ताप्यमन्तःप्रविष्टान्तु बहिःकुर्यान्मसूरिकाम् ॥ ३४ ॥
विषाकरञ्जचूर्णेन शीलितं हेममाक्षिकम् ।
नाशयत्यचिरादेव नियतं विषमज्वरम् ॥ ३५ ॥
कणाकलितरूत्थेन चूर्णेन मधुनान्वितम् ।
शीलितं ताप्यभसितं कासबाधां व्यपोहति ॥ ३६ ॥
रसगन्धकसंयुक्तं मधुना सह माक्षिकम् ।
शीलितं त्वचिरादेव रक्तपित्तं व्यपोहति ॥ ३७ ॥
तुगाक्षीरीरजोमिश्रं शीलितं स्वर्णमाक्षिकम् ।
मासद्वितयमात्रेण ददाति विपुलं बलम् ॥ ३८ ॥
सिन्दूराभ्रसमायुक्तं सव्योषं स्वर्णमाक्षिकम् ।
निषेवितं निहन्त्याशु दारुणं गर्भिणीज्वरम् ॥ ३९ ॥
भागैकं रससिन्दूरं द्विभागं हेममाक्षिकम् ।
सम्मेल्य मधुना लीढं बलवीर्यकरं परम् ॥ ४० ॥
पिण्डखर्जूरिकोपेतं माक्षिकं गुञ्जसंमितम् ।
निहन्त्यापन्नसत्वाया रक्तस्रावमसंशयम् ॥ ४१ ॥
विषाबिल्वबलाविश्ववञ्जलाम्बुकषाययुक् ।
ताप्यमापन्नसत्वाया ज्वरातीसारशूलनुत् ॥ ४२ ॥

स्वर्णमाक्षिकस्य सत्वपातनप्रकारः

गोमूत्रैरण्डतैलाभ्यां कदलीकन्दवारिणा ।
घृतेन मधुना चापि भावयेद्धेममाक्षिकम् ॥ ४३ ॥
सप्तवारं विभाव्याथ मूषायां विन्यसेत्ततः ।
ध्मापयेत्सुचिरं विज्ञस्त्वतिप्रखरवह्निना ॥ ४४ ॥
एवं नातिचिरादेव ध्मातं कनकमाक्षिकम् ।
मृदुलं रविलोहाभं सत्वं मुञ्चति शोभनम् ॥ ४५ ॥

द्वितीयः सत्वपातनप्रकारः

पादांशटङ्कणोपेतं मर्दितं हेममाक्षिकम् ।
ध्मातं मूषागतं सत्वं मुञ्चत्याशु सुनिश्चितम् ॥ ४६ ॥

तृतीयः सत्वपातनप्रकारः

समगन्धं पचेत्ताप्यं चतुर्यामं प्रयत्नतः ।
ततोऽर्द्धगन्धकं भृष्टटङ्कणं चार्द्धमागिकम् ॥ ४७ ॥
विन्यस्य चान्धमूषायां ध्मापयेदतियत्नतः ।
एवं नातिचिरादेव सत्वं शुल्वनिभं पतेत् ॥ ४८ ॥

स्वर्णमाक्षिकसत्वस्य मारणप्रकारः

हेममाक्षिकसत्वन्तु पञ्चतोलकसंमितम् ।
तन्मितं विमलं सूतं बलिं दत्त्वा च मर्दयेत् ॥ ४९ ॥
जम्बीरस्य रसेनाथ मर्दयेदेकवासरम् ।
संशोष्य सम्पुटे कृत्वा पुटयेत्तीव्रवह्निना ॥ ५० ॥
त्रिवारं पुटयेदेव निर्दिष्टेनैव वर्त्मना ।
एवं माक्षिकसत्वन्तु पञ्चतां याति निश्चितम् ॥ ५१ ॥

स्वर्णमाक्षिकसत्वस्य गुणाः

हेममाक्षिकसत्वं तु शिशिरं रुचिरं परम् ।
वृष्यं बल्यं तथा मेध्यं जीर्णज्वरविनाशनम् ॥ ५२ ॥
रक्तपित्तं क्षयं कासं दाहं हन्यात्सुदारुणम् ।

योगवाहि परञ्चैतद्रसायनमनुत्तमम् ॥ ५३ ॥

मृतस्वर्णमाक्षिकसत्वस्य आमयिकः प्रयोगः

हेममाक्षिकसत्वं तु यथादोषानुपानतः ।
ताप्यवच्छीलितं हन्ति दुःसाध्यानामयानपि ॥ ५४ ॥

अथ रजतमाक्षिकस्य नामानि

रौप्यमाक्षिकमाख्यातं तारजं तारमाक्षिकम् ।
विमलं श्वेतमाक्षीकं तथा रजतमाक्षिकम् ॥ ५५ ॥
ईषद्रौप्यस्य साहित्याद् वा रौप्यगुणसाम्यतः ।
रौप्यवद् द्युतिमत्त्वाद्वा रौप्यमाक्षिकमुच्यते ॥ ५६ ॥

जात्यरजतमाक्षिकस्य स्वरूपम्

स्निग्धं सकोणं गुरु च वर्तुलं रजतोज्ज्वलम् ।
रौप्यवच्चाकचिक्याढ्यं जात्यं तद्रौप्यमाक्षिकम् ॥ ५७ ॥

हेयरौप्यमाक्षिकस्य स्वरूपम्

समलं लघु रूक्षञ्चं कषेऽतिमलिनच्छवि ।
अवर्तुलं विवर्णञ्च हेयं स्याद्रौप्यमाक्षिकम् ॥ ५८ ॥

रौप्यमाक्षिकस्य शोधनप्रयोजनम्

अशुद्धं रौप्यमाक्षीकं स्वर्णमाक्षिकवद्भृशम् ।
जनयत्याशु मन्दाग्निं तथा कुष्ठादिकान् गदान् ॥ ५९ ॥

रौप्यमाक्षिकस्य प्रथमः शोधनप्रकारः

[गीतिका]

विमलं तु जात्यमादौ सुविचूर्ण्य खल्वमध्ये ।
अथ निम्बुकोत्थवारा निदधीत वै कटाहे ॥ ६० ॥
अथ लोहचुल्लिकायां विनिधापयेत् कटाहम् ।
चुल्ल्यां प्रदीप्य वह्निं परिचालयेच्चदर्व्या ॥ ६१ ॥
विमलस्तु नैति यावत्त्वारक्तपङ्कजाभाम् ।
निक्षिप्य निम्बुकाम्भस्तावत्पचेत्प्रयत्नात् ॥ ६२ ॥

अरुणोत्पलप्रकाशं विमलं विलोक्य वैद्यः ।
अवतारयेद्विशुद्धं विमलं प्रयोगयोग्यम् ॥ ६३ ॥

द्वितीयः शोधनप्रकारः

विमलं तु जात्यमादौ सुविधाय पोट्टलीस्थम् ।
अथ दोलिकाख्ययन्त्रे वृषपत्रजोत्थवारा ॥ ६४ ॥
विधिना विधानदक्षः संस्वेदयेद् द्वियामम् ।
विमलोऽतिवेलमेवं विमलत्वमेत्यनल्पम ॥ ६५ ॥

तृतीयः शोधनप्रकारः

मेषशृङ्गीरसेनापि दोलायन्त्रे विधानतः ।
पाचितं रौप्यमाक्षीकं शुद्धिमायात्यनुत्तमाम् ॥ ६६ ॥

रौप्यमाक्षिकस्य मारणप्रकारः

विमलो लकुचद्रावैः पादांशबलिसंयुतः ।
पिष्ट्वा तु सप्तधैवेह पुटितो याति पञ्चताम् ॥ ६७ ॥

रौप्यमाक्षिकस्य सामान्येन मारणम्

स्वर्णमाक्षिकवत्कार्यं रौप्यमाक्षिकमारणम् ।
प्रयोगाल्पतया चास्य व्याख्यानं नाधिकं कृतम् ॥ ६८ ॥

रौप्यमाक्षिकस्य गुणादिनिरूपणम

स्वर्णमाक्षिकवज्ज्ञेया विमलस्य गुणा बुधैः ।
मात्रां चामयिकं योगं तथैव परिलक्षयेत् ॥ ६९ ॥

रौप्यमाक्षिकस्य सत्वपातनम्

पादांशटङ्कणोपेतो लकुचद्रावमर्दितः ।
विमलः सुचिरं ध्मातः सत्वं सीसोपमं त्यजेत् ॥ ७० ॥

अथ तुत्थकस्य नामानि

तुत्थं तु तुत्थकं तुत्थाञ्जनञ्चापि मयूरकम् ।
सस्यकं ताम्रगर्भञ्च शिखिग्रीवञ्च तन्मतम् ॥ ७१ ॥

ग्राह्यतुत्थकस्य स्वरूपम्

शिखिकण्ठसमच्छायं गुरु स्निग्धं महोज्ज्वलम् ।
तुत्थकं शस्यते विज्ञैरन्यद्धीनगुणं मतम् ॥ ७२ ॥

तुत्थकस्य निर्मलीकरणम्

सुचूर्णितं तुत्थकं तु दशतोलकसंमितम् ।
क्षिपेदत्युष्णसलिले पञ्चतोलकसंमिते ॥ ७३ ॥
ततः सारकपत्रेण सारयेद्वाससाथवा ।
सारितं सलिलं विज्ञः काचपात्रतलस्थितम् ॥ ७४ ॥
तावत्संस्थापयेद्यावन्नैति तत्कणरूपताम् ।
एवं कणत्वमापन्नं तुत्थं शुद्ध्यै नियोजयेत् ॥ ७५ ॥

निर्मलीकृततुत्थस्य गुणाः

तुत्थं तु तिक्तकं त्वच्यं ग्राहि वान्तिकरं परम् ।
कफघ्नमथ चक्षुष्यं व्रणदोषनिषूदनम् ॥ ७६ ॥
उपदंशफिरङ्गोत्थक्षतशोधनकृत्परम् ।
क्लिष्टवर्त्मप्रशमनं क्षारकर्मकरं स्मृतम् ॥ ७७ ॥

तुत्थकद्रवस्य निर्माणप्रकारः

द्विगुञ्जतश्चतुर्गुञ्जं तुत्थकं निर्मलीकृतम् ।
परिस्रुते तु सलिले पञ्चतोलकसंमिते ॥ ७८ ॥
निक्षिपेदथ विज्ञाय तुत्थकं सर्वथा द्रुतम् ।
तुत्थद्रवं प्रयुञ्जीत रसतन्त्रविचक्षणः ॥ ७९ ॥

तुत्थकद्रवस्य आमयिकः प्रयोगः

प्रक्लिन्नपूतिमांसानां सुचिरादप्यरोहताम् ।
तथात्युच्छ्रितमांसानां व्रणानां पूतिगन्धिनाम् ॥ ८० ॥
उपदंशफिरङ्गोत्थस्फोटानाञ्चाप्यरोहताम् ।
रोपणाय तथाशेषदोषनिर्हरणाय च ॥ ८१ ॥
तुत्थद्रवं प्रयुञ्जीत विधानज्ञो भिषग्वरः ।

द्रवेणानेन धौतास्तु व्रणा रोहन्त्यसंशयम् ॥ ८२ ॥
नेत्रवर्त्मयुगे युक्त्या योजितस्तुत्थकद्रवः ।
क्लिन्नवर्त्मरुजञ्चापि पोथकीमाशु नाशयेत् ॥ ८३ ॥

[गीतिका]

उपसर्गजे तु मेहे प्रदरे च शुक्लपूर्वे ।
भृशमुत्तराख्यबस्तिप्रति पादितायनेन ॥ ८४ ॥
द्रवमाशु तुत्थकोत्थं विनियोजयेद्विधिज्ञः ।
शममेति सर्वथैवं प्रथमोक्तरोगबाधा ॥ ८५ ॥

निर्मलीकृततुत्थस्य आमयिकः प्रयोगः

तुत्थकोदया वटी

भागैकं निर्मलं तुत्थं पथ्या च मधुयष्टिका ।
मरिचं तु कलांशं स्याद्वटी पिष्ट्वाम्भसा कृता ॥ ८६ ॥
माषकप्रमिता नाम्ना वटीयं तुत्थकोदया ।
घृष्ट्वाम्भसा प्रयुक्तेयं पोथक्यादिविकारनुत् ॥ ८७ ॥

तुत्थकोदया वर्तिः

पञ्चतोलोन्मितं तुत्थं विधिना निर्मलीकृतम् ।
निर्मलं शोरकञ्चैव स्फटिकारीञ्च तन्मिताम् ॥ ८८ ॥
कर्पूरं तोलकार्द्धञ्च पेषयेद्यत्नतोऽम्भसा ।
रक्तिद्वयमिताञ्चैकां वर्तिं निर्मापयेत् पृथक् ॥ ८९ ॥
द्रावयित्वा वर्तिमेकां पञ्चतोलोन्मिते जले ।
ततः कूर्चिकया यत्नादुष्ट्रकेशप्रणीतया ॥ ९० ॥
द्रवप्रसिक्तया वर्त्म विपर्यस्तं समञ्जयेत् ।
क्लिन्नवर्त्मरुजं घोरां पोथकीञ्च विनाशयेत् ॥ ९१ ॥

तुत्थकादिवर्तिः

तुत्थकुष्ठवरादार्वीदन्तीमूलत्रिवृत्तिलैः ।
सकणासैन्धवक्षौद्रैः पिष्ट्वा निम्बदलाम्भसा ॥ ९२ ॥

कृतास्त्वेषणिकाकारा वर्तिका व्रणशोधिका ।
योजयेद्युक्तितो नाडीव्रणादौ च भगन्दरे ॥ ९३ ॥

शिखिग्रीवादिवर्तिः

माषकैकं शिखिग्रीवं मरिचं कर्षसंमितम् ।
तोलकप्रमितेनाथ गृहनीरेण पेषयेत् ॥ ९४ ॥
वर्तिर्विनिर्मिता घृष्टा युक्तया वर्त्मनि योजिता ।
चिरोत्थं क्लेदबहुलं पिल्लमुन्मूलयत्यलम् ॥ ९५ ॥
सुचूर्णितं तुत्थकन्तु यत्नतः स्वल्पमात्रया ।
प्रतिसारणसंभिन्ने लगणे हन्ति वेदनाम् ॥ ९६ ॥

तुत्थामृतमलहरः

सिक्थतैलं सुविमलं दशतोलकसंमितम् ।
सुनिर्मलं शिखिग्रीवं खलु विंशतिगुञ्जकम् ॥ ९७ ॥
आदाय खल्वे सम्पेष्य काचकुप्यां निधापयेत् ।
कथितोऽयं मलहरस्तुत्थकामृतसंज्ञकः ॥ ९८ ॥

अस्य गुणाः

तुत्थकामृतसंज्ञोऽयं नित्यं मलहरोऽचिरात् ।
विनाशयेत् प्रलेपेन पामां चिरसमुत्थिताम् ॥ ९९ ॥

तुत्थकाद्यो मलहरः

घृतं द्वितोलकमितं दर्वीस्थं वह्निना पचेत् ।
तोलकादष्टमांशं वा पादिकं रालकं क्षिपेत् ॥ १०० ॥
रालं तु विद्रुतं ज्ञात्वा द्रुतं खल्वे विनिक्षिपेत् ।
दत्त्वाथ निर्मलं तुत्थं तोलकस्याष्टमांशिकम् ॥ १०१ ॥
खटीं कपर्दभसितं टङ्कञ्चैकैकतोलकम् ।
पेषयेद्वारिणा तावन्मुञ्चेन्नीरन्तु नीलताम् ॥ १०२ ॥
मुहुर्मुहुः क्षिपेन्नीरं मर्दनान्नीलतां गतम् ।
विशालास्ये काचकूपे निदध्यादथ यत्नतः ॥ १०३ ॥

तुत्थकाद्यो मलहरो व्रणसंशोधनः परम् ।
पूयनिःसारकश्चैव विविधव्रणनाशनः ॥ १०४ ॥

विशुद्धतुत्थकस्य प्रयोगः

सौभाग्यपुष्पसंयुक्तं तुत्थकं त्वार्द्रकाम्भसा ।
द्विगुञ्जं वामने दद्यात्संज्ञालोपापनुत्तये ॥ १०५ ॥

आभ्यन्तरप्रयोगार्थं तुत्थकशोधनस्य प्रथमः प्रकारः

[गीतिका]

तुत्थं विचूर्ण्य खल्वे नवनिम्बुकोत्थवारा ।
परिपेषयेद् द्वियामं रसतन्त्रकर्मविज्ञः ॥ १०६ ॥
विधिना ह्यनेन तुत्थं परिशोधितं तु नूनम् ।
अविलम्बितं विशुद्धिं समुपैति निर्विशेषाम् ॥ १०७ ॥

द्वितीयः शोधनप्रकारः

रक्तचन्दनमञ्जिष्ठाकषायेण तु भावितम् ।
सप्तवारं प्रयत्नेन शुद्धिमायात्यनुत्तमाम् ॥ १०८ ॥

तृतीयः शोधनप्रकारः

मृद्भाजने तुत्थकन्तु पोट्टल्यां सुस्थिरीकृतम् ।
गोमूत्रेण त्रियामं तु दोलायन्त्रगतं पचेत् ॥ १०९ ॥
तुत्थं मूत्रे द्रवीभूतं ज्ञात्वा मूत्रं विशोषयेत् ।
किञ्चिज्जलांशशेषे च पात्रं भूमौ निधापयेत् ॥ ११० ॥
पात्रे तु शीततां याते कणतामेति तुत्थकम् ।
एवं विशोधितं तुत्थं शुद्धिमायात्यनुत्तमाम् ॥ १११ ॥

चतुर्थः शोधनप्रकारः

अम्लवर्गप्रदिष्टेन एकेनाप्यौषधेन तु ।
भावितं सप्तधा तुत्थं शुद्धिमायात्यनुत्तमाम् ॥ ११२ ॥

शोधिततुत्थकस्य आमयिकः प्रयोगः

तुत्थामृता वटी

तोलकैकमितं तुत्थं विधिना परिशोधितम् ।
पलद्वयमितां बालपथ्यामादाय चूर्णिताम् ॥ ११३ ॥
खल्वे निम्बूकतोयेन पेषयेद्दिनसप्तकम् ।
वटिकाः कारयेद्वैद्यो गुञ्जाद्वितयसंमिताः ॥ ११४ ॥
ततः काचपिधानायां काचकुप्यां निधापयेत् ।
वटिकेयं समाख्याता बुधैस्तुत्थामृताभिधा ॥ ११५ ॥

अस्य गुणाः

एकैका वटिका नित्यं शीलिता शीतलाम्भसा ।
विनिहन्ति त्रिसप्ताहात् फिरङ्गमतिदारुणम् ॥ ११६ ॥
पूर्वोक्तरसपुष्पादिसूतयोगाद्यपेक्षया ।
क्वचित्क्वचिद्विशेषेण मताधिकफलप्रदा ॥ ११७ ॥
स्फीतता दन्तवेष्टेषु प्रयोगेऽस्य न जायते ।
शालिगोधूममुद्गाज्यं पथ्यमत्रप्रकीर्तितम् ॥ ११८ ॥

अथ तुत्थकमारणस्य प्रथमः प्रकारः

[गीतिका]

नवनिम्बुकोत्थवारा परिशोधितं तु तुत्थम् ।
कृतचक्रिकं निदध्याद् परिशोषयोन्निदाघे ॥ ११९ ॥
लघुना पुटेन विज्ञः पुटयेत्तु सम्पुटस्थम् ।
अथ भावयेत्प्रयत्नाद् दधिमस्तुना त्रिघस्रम् ॥ १२० ॥
विधिना ह्यनेन तुत्थं वमनादिदोषहीनम् ।
अविलम्बितं प्रयत्नान्मृतिमेति निर्विशेषाम् ॥ १२१ ॥

द्वितीयो मारणप्रकारः

सुनिर्मलं तुत्थकं तु पञ्चतोलकसंमितम् ।
टङ्कणं गन्धकश्चैव सममेव समाहरेत् ॥ १२२ ॥

पाषाणखल्वे विन्यस्य पेषयेल्लकुचाम्भसा ।
मूषिकायां निरुध्याथ कौक्कुटे तु पुटे पुटेत् ॥ १२३ ॥
पुटद्वयं प्रदातव्यं बलिनैव प्रयत्नतः ।
तुत्थकं जायते नूनं वान्तिभ्रान्त्यादिवर्जितम् ॥ १२४ ॥

तृतीयो मारणप्रकारः

पलोन्मितं तुत्थकं तु गन्धकन्तु पलार्द्धकम् ।
शरावसम्पुटे न्यस्य मृदा च परिलेपयेत् ॥ १२५ ॥
पुटत्रयं प्रदातव्यं स्वल्पैरेव वनोत्पलैः ।
तुत्थकं मृतिमाप्नोति वान्तिभ्रान्त्यादिवर्जितम् ॥ १२६ ॥

सुमृततुत्थकस्य गुणाः

तुत्थकं लेखनं भेदि कषायं मधुरं लघु ।
क्रिमिघ्नमथ चक्षुष्यं मेहमेदोहरं परम् ॥ १२७ ॥
कफपित्तहरं बल्यं शूलहृत्कुष्ठनाशनम् ।
श्वित्रापहं त्वम्लपित्तहरं चैव रसायनम् ॥ १२८ ॥
तुत्थं सङ्कोचनकरं नाडीनां बलकृत् परम् ।
त्वग्दोषशमनं कामं विशेषाद्रुचिरं मतम् ॥ १२९ ॥

मृततुत्थकस्य मात्रानिरूपणम्

गुञ्जाष्टमांशतो गुञ्जपादिकं तुत्थकं मृतम् ।
तत्तद्भेषजयोगेन वीतशङ्कः प्रयोजयेत् ॥ १३० ॥

मृततुत्थकस्य आमयिकः प्रयोगः
तुत्थकोदयरसायनम्

तुल्यकज्जलिकया समन्वितं
तुल्यगन्धकमृतं तु तुत्थकम् ।
मर्दितं सपदि निम्बुकाम्भसा
पेषयेत्समकटुत्रिकाम्भसा ॥ १३१ ॥
गुञ्जकद्वितयसंमितां वटीं
कारयेद्रसविधानकोविदः ।

भाषितोऽयमिह सूतचिन्तकै-
स्तुत्थकोदयरसायनाह्वयः ॥ १३२ ॥
निषेवयेद्वटीमेकां नागिनीदलजद्रवैः ।
दिने वारद्वयं युक्ता नाशयेद्विषमज्वरम् ॥ १३३ ॥
तक्रेण दापयेच्चैकां गर्भिणीशूलशान्तये ।
शीलिता निम्बुकद्रावैः शूलं गुल्मञ्च नाशयेत् ॥ १३४ ॥
हिङ्गुविश्वाम्लिकानिम्बूद्रवेण प्लीहशान्तिकृत् ।
पयसा ससितेनेह शुक्रमेहं समुद्धरेत् ॥ १३५ ॥
अष्टमांशकनकोत्थभस्मना सार्द्धमण्डलकमेव शीलितम् ।
तुत्थकोदयरसायनं हरेत् कासविड्ग्रहयुतां क्षयव्यथाम् ॥१३६

तुत्थकसत्वपातनस्य प्रथमःप्रकारः

पलद्वयोन्मितं तुत्थं यत्नतो विमलीकृतम् ।
टङ्कणं तत्समं दत्त्वा मर्दयेन्निम्बुकद्रवैः ॥ १३७ ॥
विन्यस्य चान्धमूषायां प्रधमेत्प्रखराग्निना ।
एवं नातिचिरादेव सत्वं ताम्रमयं पतेत् ॥ १३८ ॥

द्वितीयः सत्वपातनप्रकारः

पादसौभाग्यसंयुक्तं तुत्थकं सुविचूर्णितम् ।
करञ्जतैले विन्यस्य रक्षेदेकदिनं ततः ॥ १३९ ॥
विन्यस्य चान्धमूषायां प्रधमेत् कोकिलाग्निना ।
एवं नातिचिरादेव सत्वं ताम्रमयं पतेत् ॥ १४० ॥

तृतीयः सत्वपातनप्रकारः

चूर्णीकृतं तुत्थकं तु दशतोलकसंमितम् ।
निक्षिपेत्सलिलेऽत्युष्णे पञ्चतोलकसंमिते ॥ १४१ ॥
द्रवीभूतं ततो ज्ञात्वा लोहखण्डान् विनिक्षिपेत् ।
चूर्णरूपं शुद्धताम्रं तुत्थसत्वं पतत्यधः ॥ १४२ ॥
जलं निक्षिप्य पात्राधःप्रदेशे खलु सञ्चितम् ।

इन्द्रगोपसमाकारं तुत्थसत्वं समाहरेत् ॥ १४३ ॥

तुत्थसत्वस्य मारणं गुणाः प्रयोगश्च

तुत्थसत्वं सुविमलं मारयेद्रविलोहवत् ।
तद्वदेव गुणास्तस्य प्रयोगश्चापि तादृशः ॥ १४४ ॥

अथ कृत्रिमतुत्थस्य निर्माणप्रकारः

विशुद्धे ताम्रचूर्णे तु गन्धकाम्लं शनैः क्षिपेत् ।
विज्ञाय विद्रुतं ताम्रं शोषयेन्मृदुवह्निना ॥ १४५ ॥
विमर्द्यात्युष्णनीरेऽल्पे द्रवीकुर्याद्विधानवित् ।
जले शीतत्वमापन्ने कणत्वं समुपागतम् ॥ १४६ ॥
शिखिकण्ठसमच्छायं तुत्थकं तु समाहरेत् ।
इत्थं विनिर्मितं तुत्थं वीतशङ्कः प्रयोजयेत् ॥ १४७ ॥

अथ सिन्दूरस्य नामानि

सिन्दूरं गिरिसिन्दूरं महिलाभालभूषणम् ।
गणेशभूषणञ्चैव तथा शृङ्गारभूषणम् ॥ १४८ ॥
नागजं नागगर्भञ्च तथैव नागरेणुकम् ।
मङ्गल्यं भालसौभाग्यं तदेव परिकीर्तितम् ॥ १४९ ॥

ग्राह्यसिन्दूरस्य लक्षणम्

अतिसूक्ष्मकणं स्निग्धं गुरु वर्णसमुज्ज्वलम् ।
मृदुलं विमलञ्चैव सिन्दूरं जात्यमुच्यते ॥ १५० ॥

सिन्दूरस्य गुणाः

सिन्दूरं क्षुद्रकुष्ठघ्नं त्वच्यं व्रणविशोधनम् ।
भग्नसन्धानजननं तथैव व्रणरोपणम् ॥ १५१ ॥
पामाविचर्चिकासिध्मवीसर्पशमनं परम् ।
भूतघ्नञ्च विशेषेण रक्तदोषनिषूदनम् ॥ १५२ ॥

सिन्दूरस्य आमयिकः प्रयोगः

आभ्यन्तरः प्रयोगोऽस्य सिन्दूरस्य न दृश्यते ।

अतो बाह्यप्रयोगार्थं यत्किञ्चिदुपदिश्यते ॥ १५३ ॥
सिन्दूरं घृतसंयुक्तं लेपाल्लोचनवर्त्मनि ।
नाशयत्यचिरादेव कण्डूमञ्जननामिकाम् ॥ १५४ ॥
मध्वाज्यगुग्गुलुगुडयुतसिन्दूरलेपितौ ।
कामं तु स्फुटितौ पादौ भवतस्तूत्पलप्रभौ ॥ १५५ ॥

प्रथमः सिन्दूराद्यो मलहरः

विमलं सिक्थतैलन्तु कर्षत्रितयसंमितम् ।
तोलकार्द्धमितं टङ्कं सिन्दूरञ्चापि तन्मितम् ॥ १५६ ॥
सम्मेल्य मसृणे खल्वे काचकुप्यां निधापयेत् ।
सिन्दूराद्यो मलहरो नाम्नायं परिकीर्तितः ॥ १५७ ॥

अस्य गुणाः

सिन्दूराद्यो मलहरः पूयानिर्हरणः परम् ।
भूतसङ्घप्रशमनो व्रणशोधनरोपणः ॥ १५८ ॥

द्वितीयः सिन्दूराद्यो मलहरः

अत्रैव टङ्कणस्थाने रालकं यदि दीयते ।
सिन्दूराद्यो मलहरस्तदायमपि कथ्यते ॥ १५९ ॥

अस्य गुणाः

सिन्दूराद्यो मलहरः पामाकण्डूतिनाशनः ।
भग्नसन्धानजननो भूतघ्नो व्रणरोपणः ॥ १६० ॥
त्वग्दोषशमनः कामं स्फुटिताङ्गविरोपणः ।
गुदामयस्फोटकुष्ठवीसर्पादि विकारनुत् ॥ १६१ ॥

सिन्दूराद्यतैलम्

तैलं सर्षपसम्भूतं शुभं दशपलोन्मितम् ।
निशार्कपत्रकल्कन्तु दद्याद्विंशतितोलकम् ॥ १६२ ॥
पलोन्मितञ्च सिन्दूरं तुत्थं रक्तिचतुष्टयम् ।

तैलपाकविधानेन पाचयेत्तैलपाकवित् ॥ १६३ ॥
सिन्दूराद्यमिदं तैलं भिषग्भिः परिकीर्तितम् ।
पामाविचर्चिकास्फोटक्षतकण्डूतिकापहम् ॥ १६४ ॥

अथ मृद्दारशृङ्गस्य नामानि

मृद्दारशृङ्गकञ्चैव मतं बोदारशृङ्गकम् ।
मुद्राशङ्खं तथा मुद्रशङ्खकञ्च निगद्यते ॥ १६५ ॥

मृद्दारशृङ्गस्य स्वरूपम्

मृद्दारशृङ्गं पीताभं मदलं निर्दलं तथा ।
सीसगर्भं खरस्पर्शं गुरु चैवप्रकीर्तितम् ॥ १६६ ॥

मृद्दारशृङ्गस्य शोधनम्

मृद्दारशृङ्गमानीय कुट्टयेत् खल्वमध्यगम् ।
प्रस्तरांशं परित्यज्य पेषयेदतियत्नतः ॥ १६७ ॥
वस्त्रपूतं ततः कृत्वा पुनः सुविमलाम्भसा ।
पेषयेत्पक्षमेकं तु ततो घर्मे विशोषयेत् ॥ १६८ ॥
मृद्दारशृङ्गकं काममेतद्विधिविशोधितम् ।
क्षतेऽवचूर्णनाद्यर्थं युञ्जीत भिषजां वरः ॥ १६९ ॥

मृद्दारशृङ्गस्य गुणाः

मृद्दारशृङ्गं शिशिरं परं वातकफापहम् ।
फिरङ्गव्रणहृत् परं केश्यं व्रणरोपणमुत्तमम् ॥ १७० ॥
भग्नसन्धानजननं पामाकण्डूतिकादिनुत् ।
सङ्कोचकं विशेषेण त्वग्दोषशमनं मतम् ॥ १७१ ॥

मृद्दारशृङ्गस्य आमयिकः प्रयोगः

पलं मद्दारशृङ्गं तु टङ्काम्लश्च द्वितोलकम् ।
फिरङ्गं विनिहन्त्याशु व्रणेषु त्ववचूर्णितम् ॥ १७२ ॥

मृद्दारशृङ्गाद्यमलहरः

पलैकं सिक्थतैलन्तु पूर्वोक्तविधिसाधितम् ।
मृद्दारशृङ्गजं चूर्णं शुद्धं तोलकसंमितम् ॥ १७३ ॥
सम्मेल्य काचफलके काचकुप्यां निधापयेत् ।
अयं मृद्दारशृङ्गाद्यो नाम्ना मलहरः स्मृतः ॥ १७४ ॥

अस्य गुणाः

मृद्दारशृङ्गकाद्योऽयं त्वच्यो मलहरः परम् ।
भग्नसन्धानजननः पामाकण्डूतिनाशनः ॥ १७५ ॥
विपादिकाप्रशमनो व्रणशोधनरोपणः ।
गुदामयहरश्चायं विशेषेण प्रकीर्तितः ॥ १७६ ॥

द्वितीयो मृद्दारशृङ्गाद्यो मलहरः

पलैकप्रमितं तैलमतसीबीजसम्भवम् ।
प्रदीप्तचुल्लिकासंस्थे न्यसेत्पित्तलभाजने ॥ १७७ ॥
मृद्दारशृङ्गजं चूर्णं तोलकैकमितं क्षिपेत् ।
पचेत्तावत् प्रयत्नेन यावन्नैति प्रगाढताम् ॥ १७८ ॥
ततो दृढपिधानायां काचकुप्यां निधापयेत् ।
अयं मृद्दारशृङ्गाद्यो नाम्ना मलहरः स्मृतः ॥ १७९ ॥

अस्य गुणाः

मृद्दारशृङ्गकाद्योऽयं त्वच्यो मलहरः परम् ।
समाख्यातो विशेषेण विविधव्रणरोपणः ॥ १८० ॥

अथ खर्परस्य नामानि

खर्परः खर्परञ्चैव तदेव खर्परीयकम् ।
रसको रसकञ्चैव मतं यशदकारणम् ॥ १८१ ॥

खर्परस्य स्वरूपम्

खर्परोऽतिखरश्चैव सदलो निर्दलस्तथा ।
मृत्तिकाभश्च पीताभो भाराढ्यश्चेह शस्यते ॥ १८२ ॥

खर्परस्य द्वौ भेदौ

खर्परो द्विविधः प्रोक्तः सदलो निर्दलस्तथा ।
सदलो दर्दुराख्यः स्यात्कारवेल्लाभिधोऽपरः ॥ १८३ ॥
खर्परं दर्दुराख्यन्तु योजयेत्सत्वपातने ।
औषधेषु च सर्वत्र कारवेल्लं प्रयोजयेत् ॥ १८४ ॥

खर्परस्य प्रथमः शोधनप्रकारः

खर्परं खल्वगं लोहमुद्गरेण विघातयेत् ।
पतितं प्रस्तरांशञ्च यत्नतः परिवर्जयेत् ॥ १८५ ॥
प्रस्तरांशपरित्यक्तं खर्परं त्वथ खल्वगम् ।
निम्बूकस्वरसोपेतं पेषयेत्सप्तवासरम् ॥ १८६ ॥
विशोषितं तु पीताभं श्लक्ष्णचूर्णं प्रजायते ।
एवं नातिचिरादेव खर्परः परिशुध्यति ॥ १८७ ॥

द्वितीयः शोधनप्रकारः

खर्परः प्रखरे वह्नौ सप्तधा परितापितः ।
निषिक्तो निम्बुकद्रावे शुद्धिमायात्यनुत्तमाम् ॥ १८८ ॥

तृतीयः शोधनप्रकारः

खर्परः परिसन्तप्तस्तक्रे वा गृहवारिणि ।
निषिक्तः सप्तवारं तु विमलत्वमवाप्नुयात् ॥ १८९ ॥

खर्परस्य प्रथमो मारणप्रकारः

विशोधितं खर्परन्तु पलद्वितयसंमितम् ।
तुल्येन चातिशुद्धेन रसेन्द्रेण विमर्दयेत् ॥ १९० ॥
श्लक्ष्णचूर्णं ततः कृत्वा सम्पुटस्थं तु कारयेत् ।
पुटयेदतियत्नेन शुष्कवन्योत्पलानले ॥ १९१ ॥
त्रिधैवं पुटितोऽयन्तु निर्विशेषां मृतिं व्रजेत् ।
इत्थं सुमृदुलं रम्यं पीताभं भस्म जायते ॥ १९२ ॥

द्वितीयो मारणप्रकारः

खर्परो विमलः शुद्धतुल्यतालकपेषितः ।
सम्पुटस्थस्त्रिपुटितः सर्वथा मृतिमाप्नुयात् ॥ १९३ ॥

मृतखर्परस्य गुणाः

सुमृतः खर्परः शीतः कफपित्तापहः परम् ।
चक्षुष्यः सर्वमेहघ्नो रक्तप्रदरनाशनः ॥ १९४ ॥
रक्तपित्ताश्मरीश्वासगुदामयनिषूदनः ।
जीर्णज्वरहरः कामं त्वतीसारनिवर्हणः ॥ १९५ ॥
योगवाही विशेषेण त्रिदोषघ्नो विषापहः ।
विचर्चिकाकुष्ठहरो बलवीर्यविवृद्धिकृत् ॥ १९६ ॥

खर्परस्य मात्रानिरूपणम्

गुञ्जार्द्धतः समारभ्य गुञ्जाद्वितयसंमिता ।
खर्परस्य मता मात्रा रोगापनयनक्षमा ॥ १९७ ॥

खर्परस्य आमयिकः प्रयोगः

गोक्षुरक्काथसंयुक्तः खर्परः परिशीलितः ।
विनिहन्त्यचिरादेव मूत्रकृच्छ्रभवां रुजम् ॥ १९८ ॥
वंशलोचनचूर्णेन खर्परः परिशीलितः ।
चिरोत्थितं क्षयोत्थं वा कासं श्वासं समुद्धरेत् ॥ १९९ ॥
खर्परः शीलितस्तुल्यकान्तलोहस्य भस्मना ।
विनिहन्ति गदान् पाण्डुश्वयथुप्रदरादिकान् ॥ २०० ॥
रससिन्दूररजसा खर्परः परिशीलितः ।
निरन्तरप्रयोगेण हन्ति जीर्णज्वरं परम् ॥ २०१ ॥
प्रवालमरिचोपेतो रससिन्दूरसंयुतः ।
सजीरको निम्बुवारा खर्परस्तु निषेवितः ॥ २०२ ॥
धातुज्वरं वह्निमान्द्यं तथा जीर्णज्वरादिकम् ।
विनाशयत्याशु यथा तिमिरं तु प्रभाकरः ॥ २०३ ॥

खर्परस्य प्रथमः सत्वपातनप्रकारः

लाक्षाभयाहरिद्रोमागुडरालकटङ्कणैः ।
चूर्णीकृतं खर्परन्तु गव्यदुग्धाज्यतः पचेत् ॥ २०४ ॥
विधाय गोलकं घर्मे शोषयेद्रसकोविदः ।
वृन्ताकमूषानिहितं ध्मापयेत् प्रखराग्निना ॥ २०५ ॥
विद्रुतं परितो ज्ञात्वा ढालयेत् क्षितिगर्तके ।
यशदप्रभमत्यच्छं सत्वं पतति शोभनम् ॥ २०६ ॥

खर्परस्य द्वितीयः सत्वपातनप्रकारः

लाक्षाभयाहरिद्रोमागुडरालकटङ्कणैः ।
यशदप्रभवः पिष्ट एतैस्तु समभागिकैः ॥ २०७ ॥
मूकमूषागतो ध्मातः सततं प्रखराग्निना ।
यशदप्रभमत्यच्छं सत्वमाशु प्रमुञ्चति ॥ २०८ ॥

खर्परसत्वस्य मारणम्

[गीतिका]

सत्वं पलप्रमाणं खलु खर्परीयकोत्थम् ।
विनिधापयेत्कटाहे परिदीप्तचुल्लिकास्थे ॥ २०९ ॥
विद्रुतं विलोक्य सत्वं परिघट्टयंस्तु दर्व्या ।
त्वधिनिक्षिपेद्विशुद्धं भृशमल्पमल्पमालम् ॥ २१० ॥
विधिना ह्यनेन सत्वं मृतिमेति निर्विशेषाम् ।
सुमृतं तु सत्वमेवं विनियोजयेद्विशङ्कः ॥ २११ ॥

मृतखर्परसत्वस्य गुणाः

सत्वं खर्परसम्भूतं पाण्डुश्वयथुगुल्मनुत् ।
कासश्वासक्षयहरं विषमज्वरनाशनम् ॥ २१२ ॥
रजःशूलं रक्तगुल्मं श्वेतप्रदरमुल्बणम् ।
मधुमेहं तथा हिक्कां विशेषेण विनाशयेत् ॥ २१३ ॥

मृतखर्परसत्वस्य मात्रादिनिरूपणम्

मृतखर्परसत्वस्य मात्रा यशदवन्मता ।
आमयेषु च सर्वत्र प्रयोगश्चापि तादृशः ॥ २१४ ॥

अथ कान्तपाषाणस्य नामानि

कान्तपाषाणकः ख्यातः चुम्बको लोहकर्षकः ।
कान्तोपलः कान्तदृषत् स एव परिकीर्तितः ॥ २१५ ॥

कान्तपाषाणस्य शोधनम्

चूर्णितं कान्तपाषाणं निम्बूकद्रवसंयुतम् ।
शोभाञ्जनरसेनैव दोलायन्त्रगतं पचेत् ॥ २१६ ॥
चतुर्यामं पचेद्धीमान् सततं प्रखराग्निना ।
एवं नातिचिरादेव शुद्धिमायात्यनुत्तमाम् ॥ २१७ ॥

द्वितीयः शोधनप्रकारः

चूर्णितं कान्तपाषाणमगस्त्यद्रवभावितम् ।
स्वेदितं तु वराक्काथे शुद्धिमायात्यनुत्तमाम् ॥ २१८ ॥

कान्तपाषाणस्य मारणप्रकारः

विशुद्धं कान्तपाषाणं गोमूत्रेण विमर्दयेत् ।
त्रिफलाक्काथितेनापि विमर्द्य कृतचक्रिकम् ॥ २१९ ॥
सम्पुटस्थं पुटेद्धीमान् सप्तवारं प्रयत्नतः ।
एवन्तु कान्तपाषाणो म्रियते नात्र संशयः ॥ २२० ॥

मृतकान्तपाषाणस्य गुणाः

सुमृतः कान्तपाषाणः शिशिरो बृंहणस्तथा ।
बल्यो वृष्यस्तथा त्वच्यो मूर्च्छामोहनिवर्हणः ॥ २२१ ॥
ज्वरघ्नश्च विषघ्नश्च तथा वार्द्धक्यनाशनः ।
रक्तसञ्जननः कामं हृद्वेपननिषूदनः ॥ २२२ ॥
रजोदोषं शुक्रदोषं रक्तपित्तं सुदारुणम् ।
क्लैब्यं कण्डूं कामलाञ्च क्षयं पित्तं त्वगाश्रितम् ॥ २२३ ॥

कासं श्वासं महाघोरं प्रमेहं चाचिरोत्थितम्
विनाशयाद्वशेषेण न सन्देहोऽत्र कश्चन ॥ २२४ ॥

अस्य मात्रा

कान्तपाषाणकस्येह रक्तिकाद्वितयोन्मिता ।
पूर्णमात्रा मता विज्ञैर्गदापनयनक्षमा ॥ २२५ ॥

कान्तपाषाणस्य प्रयोगः

कान्तपाषाणकः कामं लोहवद्रुणकारकः ।
आमयेषु च सर्वेषु प्रयोगश्चापि तादृशः ॥ २२६ ॥

अथ कासीसस्य नामानि

काशीशश्चैव कासीसं पुष्पकासीसकन्तथा ।
पांशुकं पांशुकासीसं खगाख्यश्च प्रकीर्तितम् ॥ २२७ ॥

कासीसस्य द्वौ भेदौ

चूर्णकासीसकश्चैव पुष्पकासीसकन्तथा ।
कासीसं द्विविधं ख्यातं रसतन्त्रप्रणेतृभिः ॥ २२८ ॥

अनयोः स्वरूपम्

चूर्णकासीसकं श्वेतमीषत्पीतञ्च कीर्तितम् ।
पुष्पकासीसकं स्वच्छहरिद्वर्णं प्रकीर्तितम् ॥ २२९ ॥

कासीसस्य शोधनम्

कासीसं भृङ्गराजोत्थवारिणा घटिकात्रयम् ।
सकृत् स्विन्नं प्रयत्नेन शुद्धिमायात्यनुत्तमाम् ॥ २३० ॥

कासीसस्य गुणाः

कासीसं तुवरं ग्राहि विपाकोष्णन्तु शीतलम् ।
श्वित्रघ्नं नेत्र्यमतुलं विषघ्नं कचरञ्जनम् ॥ २३१ ॥
वातश्लेष्मामयहरं मूत्रकृच्छ्रप्रणाशनम् ।
कण्डूपाण्डुकृमिघ्नञ्च रक्तसञ्जननं परम् ॥ २३२ ॥
रजःप्रवर्तकं बल्यं ज्वरघ्नं प्लीहनाशनम् ।

बाह्यप्रयोगे विज्ञेयं सङ्कोचनकरं परम् ॥ २३३ ॥

कासीसस्य निर्माणप्रकारः

विशुद्धं लोहचूर्णन्तु काचपात्रे निधापयेत् ।
सजलं गन्धकद्रावं शनैस्तस्मिन् विनिक्षिपेत् ॥ २३४ ॥
तावन्तं द्रावकं दद्याद्यावता द्रुतिमाप्नुयात् ।
क्षणेनैवोष्णतां याति फेनश्चोत्तिष्ठते परम् ॥ २३५ ॥
ततः सारकपत्रेण सारयेद् रसकोविदः ।
मलं सारकपत्रस्थं हित्वा द्रवमिहाहरेत् ॥ २३६ ॥
द्रवोन्मितां क्षिपेत्तीव्रां निर्जलां विमलां सुराम् ।
सुरानिक्षेपणाद् याति कासीसं तु तलस्थताम् ॥ २३७ ॥
ततो द्रवमिमं हित्वा चूर्णं घर्मे निधापयेत् ।
भानुभानुविशुष्कन्तु कासीसं जायतेऽमलम् ॥ २३८ ॥
द्विभागिकन्तु कासीसं सलिले तु त्रिभागिके ।
निक्षिप्तं द्रवतां यातीत्याहु रसविशारदाः ॥ २३९ ॥

कासीसद्रवस्य निर्माणप्रकारः

सार्द्धद्वितोलकमिते सलिले तु परिस्रुते ।
पञ्चगुञ्जोन्मितं शुद्धं कासीसं निक्षिपेद्बुधः ॥ २४० ॥
विद्रुते जायते शीघ्रं कासीसद्रव उत्तमः ।
गुदभ्रंशविसर्पादिविविधामयनाशनः ॥ २४१ ॥

कासीसस्य मात्रानिरूपणम्

गुञ्जार्द्धतः समारभ्य रक्तिकाद्वितयोन्मिता ।
कासीसकस्य कथिता पूर्णमात्रा भिषग्वरैः ॥ २४२ ॥

कासीसस्य आमयिकः प्रयोगः

प्लीहशत्रुसहासारयुतं कासीसमुत्तमम् ।
निषेवितं निहन्त्याशु प्लीहानमतिदारुणम् ॥ २४३ ॥

सौभाग्यकन्यकासारयुतं तु परिशीलितम् ।
कासीसं विनिहन्त्याशु रजोरोधभवां रुजम् ॥ २४४ ॥
खगो दारुसिताकन्यासारोत्थरजसान्वितः ।
शीलितो हन्ति रक्ताल्पजातां हृद्वेपनव्यथाम् ॥ २४५ ॥
कासीसद्रवसंसिक्तवसनाच्छादितो भृशम् ।
विसर्पशोथः प्रशमं याति नास्ति हि संशयः ॥ २४६ ॥
कासीसं त्रिफलायुक्तं वारिणा परिपेषितम् ।
विलिप्तं व्रणशोथानां सवर्णकरणं परम् ॥ २४७ ॥
खगः सुराष्ट्रजाहिङ्गुसुरदारुयुतोऽम्भसा ।
न्यस्तः संवृत्तगुटिको दन्ते कृमिगदापहः ॥ २४८ ॥
एरण्डनिम्बबीजाढ्यं कासीसं सरसाञ्जनम् ।
निषेवितं हरत्याशु विसर्पमचिरोत्थितम् ॥ २४९ ॥
कासीसं रक्तिकैकन्तु कपित्थफलमज्जया ।
शीलितं नाशयत्येव हिक्कामिह समुत्थिताम् ॥ २५० ॥
सर्जिकाक्षारसंयुक्तं कासीसं परिशीलितम् ।
मासमात्रप्रयोगेण रक्तसञ्जननं परम् ॥ २५१ ॥
धत्तूरगुञ्जाबीजाढ्यः खगस्तु परिलेपितः ।
मासद्वयप्रयोगेण श्वित्रं हन्ति चिरोत्थितम् ॥ २५२ ॥
बाकुचीबीजरजसा खगः खलु सगैरिकः ।
मासद्वयं प्रलेपेन श्वित्रं हन्यात् सुदारुणम् ॥ २५३ ॥
कासीसस्य द्रवो बस्तियोगेन विनियोजितः ।
विनिहन्ति गुदभ्रंशमर्शांसि च विशेषतः ॥ २५४ ॥

इति उपधात्वादिविज्ञानीयो नाम एकविंशस्तरङ्गः

अथ मिश्रलोहादिविज्ञानीयो द्वाविंशस्तरङ्गः

अथ पित्तलस्य नामानि

पित्तलं पीतलोहञ्च कपिलोहञ्च रीतिका ।
आरं तथारकूटञ्च तदेव परिकीर्तितम् ॥ १ ॥

पित्तलस्य निर्माणप्रकारः

द्विभागिकं सूर्यलोहं विधिना परिशोधितम् ।
भागैकिकं च यशदं विमलं तु समाहरेत् ॥ २ ॥
निधाय गारमूषायां प्रधमेत् प्रखराग्निना ।
द्रवीभूतं ततो ज्ञात्वा ढालयेद्रसकोविदः ॥ ३ ॥
रीत्याऽनया विशेषेण पित्तलं खलु निर्मितम् ।
भस्मीकृत्य प्रयुञ्जीत रसेषु रसकर्मवित् ॥ ४ ॥

ग्राह्यपित्तलस्य स्वरूपम्

प्रखरानलसंतप्तं काञ्जिके परिषेचितम् ।
ताम्रप्रभं भवेद्यत्तु जात्यं तत्पित्तलं मतम् ॥ ५ ॥

हेयपित्तलस्य स्वरूपम्

तप्तं यत्पित्तलं वह्नौ निषिक्तं गृहवारिणि ।
लोहप्रभं भवेत्कामं तद्धेयमिह कीर्तितम् ॥ ६ ॥

पित्तलशोधनस्य प्रथमः प्रकारः

प्रतनूनि च पत्राणि पैत्तलानि समाहरेत् ।
स्थाल्यां वङ्गप्रलिप्तायां न्यस्य गोमूत्रसंयुतम् ॥ ७ ॥
प्रखरानलयोगेन पचेद्यामचतुष्टयम् ।
पित्तलं पक्वमेवन्तु शुद्धिमायात्यनुत्तमाम् ॥ ८ ॥

द्वितीयः शोधनप्रकारः

तनुपत्रीकृतं तप्तं रजनीरजसा युते ।
क्षिप्तं निर्गुण्डिकातोये पित्तलं शुद्धिमाप्नुयात् ॥ ९ ॥

अथ पित्तलमारणस्य प्रथमः प्रकारः

सूक्ष्मपत्रीकृतं शोधितं पित्तलं
तुल्यगन्धान्वितं खल्वयन्त्रे न्यसेत् ।
पेषयेद्भास्करक्षीरसंयोजितं
शोषितञ्चातपे सम्पुटे विन्यसेत् ॥ १० ॥
लेपित मृत्स्नया पङ्कपिण्डाभया,
त्वग्निवारं पुटेद्वारणाख्ये पुटे ।
मारितं पित्तलं त्वत्र रीत्यानया
जायते सुन्दरं कज्जलाभं परम् ॥ ११ ॥

द्वितीयो मारणप्रकारः

तनुपत्रीकृतं शुद्धं पित्तलं पलपञ्चकम् ।
समहिङ्गुलतालाभ्यां मर्दितं कन्यकाम्भसा ॥ १२ ॥
सम्पुटस्थं ततः कृत्वा वारणाख्ये पुटे पुटेत् ।
त्रिधैवं पुटितं यत्नात् पित्तलं याति पञ्चताम् ॥ १३ ॥
कज्जलाभं भवेद्भस्म रमणीयतरं शुभम् ।
इत्थं मृतं पित्तलं तु भवेद् भ्रान्त्यादिवर्जितम् ॥ १४ ॥

तृतीयो मारणप्रकारः

पत्रीकृतं पित्तलं तु समगन्धशिलान्वितम् ।
कन्यानीरेण सम्पिष्टं शोषितं सम्पुटे न्यसेत् ॥ १५ ॥
त्रिवारं पुटयेदेवं भस्म स्यात्कज्जलप्रभम् ।
एवं मृतं पित्तलं तु वीतशङ्कः प्रयोजयेत् ॥ १६ ॥

मृतपित्तलस्य गुणाः

सुमृतं पित्तलं रूक्षं तिक्तं नातिविलेखनम् ।
कृमिघ्नं कुष्ठशमनं पाण्ड्वामयविनाशनम् ॥ १७ ॥

पित्तलस्य प्रयोगमात्रानिरूपणम्

पित्तलस्य प्रयोगस्तु रविलोहसमो मतः ।

गुञ्जार्धतस्तु गुञ्जैकमिता मात्रा च युज्यते ॥ १८ ॥

पित्तलरसायनम्

पित्तलं कान्तकं व्योमसत्वं मृतं
कीटविद्वेषणं त्र्यूषणं तुल्यकम्
हामधान्याजमादाग्नभल्लातक-
ब्रह्मबीजोद्भवक्षोदसंयोजितम् ॥ १९ ॥
रक्तिकार्द्धोन्मितं मासमासेवितं
नाशयेद् दारुणां श्वेतकुष्ठव्यथाम् ।
वह्निसन्दीपनं त्वामसम्पाचनं
शूलनिर्मूलनं कीटकोत्सादनम् ॥ २० ॥

अथ कांस्यस्य नामानि

कंसीयं कांस्यकं कास्यं घोषपुष्पञ्च घोषकम् ।
घोषो घोषं वह्निलोहं तदेव परिकीर्तितम् ॥ २१ ॥

कांस्यस्य निर्माणप्रकारः

रविलोहं वेदभागमितं विधिविशोधितम् ।
भागिकं विमलं वङ्गं गाढं मूषागतं धमेत् ॥ २२ ॥
विद्रुतं जायते रम्यं वरघोषं तु कांस्यकम् ।
एवं विनिर्मितं कांस्यं मारणाय प्रयोजयेत् ॥ २३ ॥

ग्राह्यकांस्यस्य स्वरूपम्

सुनादं भास्वरं स्निग्धं श्वेतं मृदु च निर्मलम् ।
घनाग्निसहमत्यन्तं कांस्यं ग्राह्यमिहोच्यते ॥ २४ ॥

हेयकांस्यस्य स्वरूपम्

निरुज्ज्वलं खरं रूक्षं पीतं दहनतापितम् ।
आताम्रं मन्दनादञ्च कांस्यं हेयमुदीरितम् ॥ २५ ॥

कांस्यशोधनस्य प्रथमः प्रकारः

तनुपत्रीकृतं कांस्यं वह्निसन्तापितं भृशम् ।

निर्वापितं गव्यमूत्रे सप्तधा शुद्धिमाप्नुयात् ॥ २६ ॥

द्वितीयः शोधनप्रकारः

सूक्ष्मपत्रीकृतं घोषपुष्पाह्वयं
मूत्रपद्वन्वितं स्थालिकायां न्यसेत् ।
यामसम्पाचितं तीक्ष्णतीक्ष्णाग्निना
सर्वदोषोज्झितं जायते सत्वरम् ॥ २७ ॥

कास्यमारणस्य प्रथमः प्रकारः

तनुपत्रीकृतं कांस्यं समगन्धसमन्वितम् ।
अर्कक्षीरेण सम्पेष्य शोषयेदातपे दृढम् ॥ २८ ॥
सम्पुटस्थं ततः कृत्वा वारणाख्ये पुटे पुटेत् ।
एवं पुटत्रयात्कांस्यभस्म स्यात्सुमनोहरम् ॥ २९ ॥

द्वितीयो मारणप्रकारः

तुल्यरक्तान्वितं निम्बुकस्याम्भसा
सूक्ष्मपत्रीकृतं कांस्यकं पेषयेत् ।
शोषितं त्रिःपुटेत् सम्पुटस्थं ततो
घोषपुष्पं तदा पञ्चतां यात्यलम् ॥ ३० ॥

तृतीयो मारणप्रकारः

कांस्यं तुल्यशिलागन्धयुतं कन्याम्बुपेषितम् ।
पुटेत् त्रिधैवं यत्नेन भस्म स्यात् कज्जलप्रभम् ॥ ३१ ॥

मृतकांस्यस्य गुणाः

घोषपुष्पं तु तुवरं तिक्तोष्णं लेखने हितम् ।
नेत्रप्रसादनं रूक्षं सरं च विशदं परम् ॥ ३२ ॥
कृमिघ्नं कुष्ठशमनं कफपित्तप्रणाशनम् ।
वातघ्नं दीपनञ्चैव परमेतत्प्रकीर्तितम् ॥ ३३ ॥

मृतकांस्यस्य प्रयोगादयः

कांस्यकस्य प्रयोगस्तु रविलोहसमो मतः ।

गुञ्जार्द्धतश्च गुञ्जैकमिता मात्रा प्रयुज्यते ॥ ३४ ॥

अथ अञ्जनस्य नामानि

अञ्जनं तु समाख्यातं मेचकं लोचकं तथा ।

अञ्जनस्य द्वौ भेदौ

अञ्जनं द्विविधं ज्ञेयं स्रोतोजञ्च सुवीरजम् ॥ ३५ ॥

तत्र स्रोतोऽञ्जनस्य नामानि

स्रोतोऽञ्जनं तु स्रोतोजं यामुनेयञ्च यामुनम् ।
नीलाञ्जनं तदेवोक्तं कपोताञ्जनकाह्वयम् ॥ ३६ ॥

सौवीराञ्जनस्य नामानि

सौवीराञ्जनकं ख्यातं सौवीरं तु सुवीरजम् ।
कृष्णाञ्जनं तथा कालाञ्जनञ्चापि प्रकीर्तितम् ॥ ३७ ॥

स्रोतोऽञ्जनस्य स्वरूपम्

भंगे नीलोत्पलनिभं घर्षणे गैरिकप्रभम् ।
वल्मीकशीर्षप्रतिमं मतं स्रोतोऽञ्जनं बुधैः ॥ ३८ ॥

सौवीराञ्जनस्य स्वरूपम्

बाह्यतः खलु धूमाभं भंगे त्वतिसमुज्ज्वलम् ।
घर्षे खलु मषीवर्णं सौवीराञ्जनमुच्यते ॥ ३९ ॥

स्रोतोऽञ्जनसौवीराञ्जनयोः शोधनम्

अञ्जनद्वितयं यत्नात्पेषितं त्रिफलाम्भसा ।
दिनसप्तकमात्रेण विशुध्यति न संशयः ॥ ४० ॥

द्वितीयः शोधनप्रकारः

भृङ्गराजरसेनेह पेषितं त्वञ्जनद्वयम् ।
दिनसप्तकमात्रेण शुद्धिमायात्यनुत्तमाम् ॥ ४१ ॥

तृतीयः शोधनप्रकारः

फलत्रिकनिशायुग्मभृङ्गराजरसे भृशम् ।
अञ्जनद्वितयं स्विन्नं यामाच्छुद्धिमवाप्नुयात् ॥ ४२ ॥

स्रोतोऽञ्जनस्य गुणाः

स्रोतोऽञ्जनं तु शिशिरं तुवरं लेखनं परम् ।
स्निग्धं स्वादु परं ग्राहि कफपित्तविषापहम् ॥ ४३ ॥
रक्तपित्तक्षयहरं नेत्रामयनिषूदनम् ।
हिक्काच्छर्दिप्रशमनं नेत्रामयहरं परम् ॥ ४४ ॥

सौवीराञ्जनस्य गुणाः

सौवीरमञ्जनं ग्राहि स्निग्धञ्च तुहिनोपमम् ।
रक्तपित्तप्रशमनं नेत्रामयहरं परम् ॥ ४५ ॥
विषहिक्कापहं कामं व्रणशोधनरोपणम् ।
परं रजोरोधकरं रक्तप्रदरनाशनम् ॥ ४६ ॥

आभ्यन्तरप्रयोगे स्रोतःसौवीराञ्जनयोः मात्रा

गुञ्जार्धतः समारभ्य गुञ्जैकमितमञ्जनम् ।
दिनद्वयं त्रयं वापि प्रयुञ्जीत भिषग्वरः ॥ ४७ ॥
अञ्जनद्वितयं रक्तप्रदरे तु दिनत्रयात् ।
अधिकं नोपयुञ्जीत रसतन्त्रविशारदः ॥ ४८ ॥

अथ पुष्पाञ्जनस्य परिचयः

रीतिकाद्रावणविधौ रीतिस्थं यशदं द्रुतम् ।
समेत्यम्बरपीयूषयोगेन सितचूर्णताम् ॥ ४९ ॥
तदेव सितचूर्णन्तु पुष्पाञ्जनमुदीरितम् ।
भस्त्राध्मातं पुष्पितं तु यशदं वा तदाह्वयम् ॥ ५० ॥

पुष्पाञ्जनस्य गुणाः

पुष्पाञ्जनं तु शिशिरं स्निग्धं पित्तप्रणाशनम् ।
अभिष्यन्दप्रशमनं परं दाहविनाशनम् ॥ ५१ ॥
विचर्चिकादित्वग्दोषशमनं व्रणरोपणम् ।
समाख्यातं विशेषेण हिक्कापञ्चकनाशनम् ॥ ५२ ॥

अञ्जनत्रितयस्य बाह्यप्रयोगः

अञ्जनद्वितयं पुष्पाञ्जनेन सहितं तु वा ।
यशदेनाग्निदग्धेन ह्यभिष्यन्दहरं परम् ॥ ५३ ॥

तिमिरहराञ्जनम्

तोलकैकमितं सीसं विशुद्धं दर्विकागतम् ।
हसन्तिकायां विन्यस्य गालयेत्प्रखराग्निना ॥ ५४ ॥
सीसोन्मितं सुविमलं सूतं सीसे तु विद्रुते ।
निक्षिप्य द्रुतमादाय खल्वे सम्पेषयेद् दृढम् ॥ ५५ ॥
श्लक्ष्णचूर्णं ततो ज्ञात्वा द्वयोर्द्विगुणमञ्जनम् ।
सौवीरं विमलं दत्त्वा पेषयेद्दिनसप्तकम् ॥ ५६ ॥
माषकत्रितयं चन्द्रं दत्त्वाथ परिपेषयेत् ।
कुप्यां न्यसेन्मतमिदं तिमिरापहमञ्जनम् ॥ ५७ ॥

तुहिनाञ्जनम्

सोरकं तोलकार्द्धन्तु घनसारश्च तन्मितम् ।
पलैकं खलु सौवीरं दत्त्वा सम्पेषयेद् भृशम् ॥ ५८ ॥
निदध्यात्काचकुप्यान्तु नाम्नेदं तुहिनाञ्जनम् ।
कण्डूदाहपरिस्रावहरं परमुदीरितम् ॥ ५९ ॥

अथ शिलाजतुनामानि

शिलाजतु च शैलेयं शिलाजं शैलधातुजम् ।
शिलामयः शिलास्वेदः शिलानिर्यास इत्यपि ॥ ६० ॥
अश्मजं त्वश्मजतुकं गिरिजं त्वद्रिजं तथा ।
अश्मोत्थमश्मलाक्षा च गैरेयञ्च गतन्तु तत् ॥ ६१ ॥

शिलाजतुपरिचयः

सूर्यसन्तापसन्तप्ताः शिलाः शैलाधिपस्य यत् ।
गाढं मुञ्चन्ति निर्यासं तच्छिलाजतु कीर्तितम् ॥ ६२ ॥
शैलाधिपशिलासारो निर्गतो रवितापतः ।

शुष्कः सन्मूर्ततां यातः शिलाजतु निगद्यते ॥ ६३ ॥

शिलाजतुभेदाः

सौवर्णं राजतं ताम्रं लौहश्चेति विभेदतः ।
शिलाजतु समाख्यातं भिषग्भिस्तु चतुर्विधम् ॥ ६४ ॥

तेषां रूपाणि

शिशिरं मधुरं तिक्तं कटुकं कटुपाकि च ।
जपाकुसुमसङ्काशं सौवर्णं शैलधातुजम् ॥ ६५ ॥
शिशिरं पाण्डुरं तिक्तं स्वादुपाकि च राजतम् ।
तिक्तोष्णतीक्ष्णं नीलाभं ताम्रं गिरिजमीरितम् ॥ ६६ ॥
तिक्तं सलवणं कृष्णं विपाके कटुशीतलम् ।
गुरु स्निग्धं कषायश्च सर्वश्रेष्ठं तदायसम् ॥ ६७ ॥
सौवर्णं वातपित्तघ्नं राजतं श्लेष्मपित्तहृत् ।
कफघ्नं ताम्रजं ज्ञेयं त्रिदोषहरमायसम् ॥ ६८ ॥

शिलाजतुनः शोधनम्

[गीतिका]

विगताम्बुदे निवाते धरिणीतलप्रदेशे ।
प्रखरे निदाघकाले प्रणयेच्छिलाजशुद्धिम् ॥ ६९ ॥
विमलानि भाजनानि त्वयसा विनिर्मितानि ।
युगसंमितानि तीव्रे निदधीत सूर्यतापे ॥ ७० ॥
सुविचूर्णितं शिलाजं विनिधाय पात्रमध्ये ।
द्विगुणं प्रतप्तनीरं त्रिफलाकषायमर्द्धम् ॥ ७१ ॥
गिरिजे प्रदाय यामं निदधीत तीव्रतापे ।
कामं विमर्द्य गिरिजं विदधीत वस्त्रपूतम् ॥ ७२ ॥
विनिधाय पूर्वपात्रे निदधीत तीव्रतापे ।
अथ तीव्रतापयोगाद्विमलं सरप्रकाशम् ॥ ७३ ॥

मृदुलं प्रगाढकृष्णं यदुपैति नीरपृष्ठे ।
निदधीत सोष्णतोये खलु भाजनेऽपरस्मिन् ॥ ७४ ॥
अथ वै द्वितीयपात्रात् खलु भाजने तृतीये ।
अथ भाजनात्तृतीयात् निदधीत तुर्यपात्रे ॥ ७५ ॥
सलिलं तु यावदच्छं न भवेत्तु तावदेवम् ।
विदधीत वैद्यवर्यः सततं कृतावधानः ॥ ७६ ॥
सलिलं भवेद्यदाच्छं मलमेत्यधःप्रदेशे ।
सलिलोर्ध्वभागसंस्थं गिरिजं हरेद्विशुद्धम् ॥ ७७ ॥
विधिना ह्यनेन शुद्धिं तदुपैति निर्विशेषाम् ।
गिरिजं विशुद्धमेवं विनियोजयेद्विशङ्कः ॥ ७८ ॥

प्रक्षेपक्काथमानम्

शिलाजतुसमं क्काथ्यं जलमष्टगुणं ततः ।
पादांशशेषितः क्काथः शिलामयविशुद्धये ॥ ७९ ॥

द्वितीयः शोधनप्रकारः

निरुक्तेनैव विधिना क्काथस्थाने तु गोजलम् ।
दत्त्वाहृता शिलालाक्षा शुद्धिमायात्यसंशयम् ॥ ८० ॥

तृतीयः शोधनप्रकारः

पूर्वोक्तेनैव मार्गेण क्काथे भृङ्गोत्थितं रसम् ।
दत्त्वाहृतः शिलास्वेदः परां शुद्धिमवाप्नुयात् ॥ ८१ ॥

विशुद्धशिलाजतुनः परीक्षणम्

याङ्गारसंस्था निर्धूमा पक्का लिङ्गोपमा भवेत् ।
आस्वादे कटुतिक्ता च शिलालाक्षा तु सामला ॥ ८२ ॥

अपरं परीक्षणम्

सलिले या विनिक्षिप्ता तन्तुप्रसवकारिणी ।
आस्वादे कटुतिक्ता च शिलालाक्षा तु सामला ॥८३॥

शिलामयस्य गुणाः

शिलाजतु मतं तिक्तं विपाके कटुकं तथा ।
मूत्रलश्च विशेषेण योगवाहि रसायनम् ॥ ८४ ॥

अपि च

शिलास्वेदो बल्यः श्वयथुशमनः पाण्डुहरणः
क्षयश्वासप्लीहज्वरदहनमान्द्यापहरणः ।
अपस्मारोन्मादोदरगुदजकृच्छ्रप्रशमनः
समीरस्थौल्योरःक्षतहृदयशूलैकदलनः ॥ ८५ ॥
प्रमेहकरिकेशरी प्रबलशूलकालानलः
कृमिप्रशमनः परं सुविततास्मरीशैलभित् ।
सकुष्ठवमिगुल्मजित् प्रबलवातरक्तप्रणुत्
स्मृतो रसविशारदैः खलु शिलामयो निर्मलः ॥ ८६ ॥

शिलाजुतनो मात्रा

द्विगुञ्जतः समारभ्य वसुगुञ्जमितं परम् ।
शिलामयं प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ८७ ॥

शिलामयस्य आमयिकः प्रयोगः

शिलाजतु क्षौद्रयुतं शीलितं तु द्विगुञ्जकम् ।
शुक्रबन्धसमुद्भूतं मूत्रकृच्छ्रं निवारयेत् ॥ ८८ ॥
दशमूलकषायेण शिलाजतु सितायुतम् ।
अष्ठीलिकां वातबस्तिं वातकुण्डलिकां हरेत् ॥ ८९ ॥
वरुणादिकषायेण शीलितस्तु शिलामयः ।
विनिहन्त्यचिरादेव मूत्राघातमथाश्मरीम् ॥ ९० ॥
अमृतादिकषायेण शीलितं तु शिलाजतु ।
मूत्राघातं मूत्रकृच्छ्रं नाशयत्यविलम्बितम् ॥ ९१ ॥
ससितं च सकर्पूरं शैलेयं परिशीलितम् ।
मूत्रातीतं तथा मूत्रजठरश्च विनाशयेत् ॥ ९२ ॥

गोक्षुरकाथसंयुक्ता शिलालाक्षा तु शीलिता ।
मूत्रकृच्छ्राण्यशेषाणि नाशयेदतिसत्वरम् ॥ ९३ ॥
काकोल्यादिगणोद्दिष्टभेषजैः सह शीलितः ।
शिलामयो वराशुद्धो वीर्यवृद्धिकरः परम् ॥ ९४ ॥
लोहताप्यघृतक्षौद्राभयाजन्तुघ्नसंयुता ।
शीलिता तु शिलालाक्षा यक्ष्माणमिह नाशयेत् ॥ ९५ ॥
वीरतर्वादिकगणभेषजकाथसंयुतम् ।
गिरिजं शीलितं हन्ति मूत्रकृच्छ्रादिकान् गदान् ॥ ९६ ॥
सिताक्षीरयुतं प्रातः शीलितं तु शिलाजतु ।
विनिहन्ति विशेषेण प्रमेहजनितां व्यथाम् ॥ ९७ ॥
शिलाजतु सगोमूत्रं पुरविश्वकणायुतम् ।
ऊरुस्तम्भं महाघोरं नाशयत्यविलम्बितम् ॥ ९८ ॥
लोहभस्मयुतं नित्यं शिलाजतु समाक्षिकम् ।
शीलितं तु विशेषेण रक्तसञ्जननं परम् ॥ ९९ ॥
अर्जुनकाथसंयुक्तं शिलाजतु निषेवितम् ।
मासमात्रप्रयोगेण विनिहन्ति हृदामयम् ॥ १०० ॥
अग्निमन्थरसोपेतं शिलाजतु निषेवितम् ।
मासद्वयप्रयोगेण स्थौल्यं नाशयति ध्रुवम् ॥ १०१ ॥
शालसारादितोयेन शैलेयं परिभावितम् ।
तेनैव च कषायेण द्विमासं परिशीलितम् ॥ १०२ ॥
विनाशयेच्चिरोद्भूतं मधुमेहं विशेषतः ।
तथैव नाशयत्याशु त्वश्मरीं मूत्रशर्कराम् ॥ १०३ ॥
कणापाषाणभेदैलासंयुतस्तण्डुलाम्भसा ।
शिलामयः शीलितस्तु प्रमेहं विनिवारयेत् ॥ १०४ ॥
एलामागधिकायुक्ता शिलालाक्षा तु शीलिता ।

मूत्राघातं मूत्रकृच्छ्रं नाशयत्यविकल्पतः ॥ १०५ ॥
शिलामयः शिलाघृष्टः सचन्द्रः परिपूरणात् ।
क्षतं सद्योऽभिघातोत्थं विनापाकं प्ररोपयेत् ॥ १०६ ॥
रजनीरजसोपेता शिलालाक्षा तु शीलिता ।
गोमूत्रेण समाख्याता कुम्भकामलिनां हिता ॥ १०७ ॥
लोहकाञ्चनभस्माढ्यः सर्ज्जकद्रवभावितः ।
शिलामयो गुञ्जमितः सततं परिशीलितः ॥ १०८ ॥
मसूरिकाज्वरं स्फोटं शोणकायज्वरं तथा ।
नाशयत्यचिरादेव वृक्षमिन्द्राशनिर्यथा ॥ १०९ ॥

अथ गैरिकस्य नामानि

गैरिकं त्वथ गैरेयं गिरिमृद् गिरिमृत्तिका ।
रक्तधातुर्लोहधातुस्तदेव गिरिमृद्भवम् ॥ ११० ॥

गैरिकस्य द्वैविध्यम्

गैरिकं तु समाख्यातं द्विविधं रसकोविदैः ।
पाषाणगैरिकं त्वाद्यं द्वितीयं स्वर्णगैरिकम् ॥ १११ ॥

तयोः स्वरूपम्

सुवर्णगैरिकं स्निग्धं मसृणं त्वतिकोमलम् ।
पाषाणगैरिकं रूक्षं कठिनं नातिलोहितम् ॥ ११२ ॥
पाषाणगैरिकात् श्रेष्ठं कथितं स्वर्णगैरिकम् ।
अतः सर्वत्र मतिमान् योजयेत्स्वर्णगैरिकम् ॥ ११३ ॥

गैरिकशोधनस्य प्रथमः प्रकारः

सुवर्णगैरिकं खल्वे चूर्णीकृत्य ततः परम् ।
भावितं गव्यपयसा शुद्धिमायात्यनुत्तमाम् ॥ ११४ ॥

द्वितीयः शोधनप्रकारः

गव्याज्येन तु सम्भृष्टं यत्नतो मन्दवह्निना ।
सुवर्णगैरिकं शीघ्रं शुद्धिमाप्नोत्यसंशयम् ॥ ११५ ॥

शुद्धस्वर्णगैरिकस्य गुणाः

सुवर्णगैरिकं स्निग्धं मधुरं शिशिरं परम् ।
तुवरं तापहरणं हिक्कावमिनिवारणम् ॥ ११६ ॥
रक्तपित्तप्रशमनं तथासृग्दरनाशनम् ।
विषापहं तथा बल्यं मतं लोचनयोर्हितम् ॥ ११७ ॥
उदर्दकण्डूशमनं तथैव व्रणरोपणम् ।
ज्वरघ्नं च विशेषेण वह्निदाहनिवर्हणम् ॥ ११८ ॥

गैरिकस्य मात्रानिरूपणम्

द्विगुञ्जतः समारभ्य चतुर्गुञ्जमितं परम् ।
सुवर्णगैरिकं शुद्धं युञ्जीत भिषजां वरः ॥ ११९ ॥

गैरिकस्य आमयिकः प्रयोगः

निशाम्रबीजजन्तुघ्नसोमवल्करसाञ्जनैः ।
गैरिकं वारिणा लेपात् योनिकण्डूयनं हरेत् ॥ १२० ॥
सिन्धूत्थयष्टीनिशया गैरिकं परिशीलितम् ।
विनाशयेद्विशेषेण ह्यभिष्यन्दभवां रुजम् ॥ १२१ ॥
नागरारग्वधखटीकट्फलेन सकाञ्जिकम् ।
कर्णमूलोत्थितं शोथं हन्ति लिप्तं तु गैरिकम् ॥ १२२ ॥
सुवर्णगैरिकं गुञ्जाद्वयं मधुसमन्वितम् ।
भक्षितं विनिहन्त्याशु शीतपित्ताह्वयं गदम् ॥ १२३ ॥
सुवर्णगैरिकं शुद्धं निशया परिलेपितम् ।
शीतपित्तं तथोदर्दं नाशयत्यविकल्पतः ॥ १२४ ॥
गैरिकं चन्दनोशीरधान्यकक्काथसंयुतम् ।
एलया सितया वापि रक्तपित्तं विनाशयेत् ॥ १२५ ॥
मालतीकलिकालाक्षारक्तचन्दनसंयुतम् ।
सुवर्णगैरिकं हन्ति व्रणशुक्रं नवोत्थितम् ॥ १२६ ॥

सुवर्णगैरिकं शुद्धं केवलं वा खगान्वितम् ।
घृतेन लिप्तं हन्त्याशु विसर्पस्य विसर्पिताम् ॥ १२७ ॥
नारिकेलस्य तैलेन विमलं स्वर्णगैरिकम् ।
प्रलिप्तं नाशयेत्पीडां वह्निदग्धव्रणोत्थिताम् ॥ १२८ ॥
रससिन्दूरसंयुक्तं विमलं स्वर्णगैरिकम् ।
शीलितं नाशयेत्तूर्णं जीर्णं वा पैत्तिकं ज्वरम् ॥ १२९ ॥

गैरिकाद्यमलहरः

सुवर्णगैरिकं शुद्धं तोलकैकमितं शुभम् ।
तन्मितां रजनीञ्चैव माषकं भालभूषणम् ॥ १३० ॥
सिक्थतैलं च विमलं कर्षत्रितयसंमितम् ।
सम्पेष्य खलु यत्नेन काचकुप्यां तु विन्यसेत् ॥ १३१ ॥
गैरिकाद्यो मलहरो नामतः परिकीर्तितः ।
कण्डूदाहप्रशमनो विविधव्रणरोपणः ॥ १३२ ॥

इति मिश्रलोहादिविज्ञानीयो नाम द्वाविंशस्तरङ्गः

अथ रत्नविज्ञानीयस्त्रयोविंशस्तरङ्गः

रत्नपदनिर्वचनम्

रमणीयतरं यस्माद्रमन्तेऽस्मिन्नतीव वा ।
तस्माद्रत्नमिदं ख्यातं शब्दशास्त्रविशारदैः ॥ १ ॥

नवमहारत्नानि

हीरकं त्वथ माणिक्यं मौक्तिकं पुष्परागकम् ।
नीलं तार्क्ष्यञ्च वैदूर्यं गोमेदं विद्रुमं तथा ॥ २ ॥
एतानीह महारत्नान्याख्यातानि नवानि तु ।

नवग्रहाणां रत्नानि

माणिक्यं मौक्तिकं चैव विद्रुमं तार्क्ष्यसंज्ञकम् ॥ ३ ॥
पुष्परागः पविर्नीलं गोमेदं च विदूरजम् ।
नवग्रहाणां क्रमशो रत्नानि परिलक्षयेत् ॥ ४ ॥

अथ हीरकस्य नामानि

हीरको हीरकं हीरमभेद्यं भिदुरं तथा ।
कुलिशं वज्रकं वज्रं तथोक्तं भार्गवप्रियम् ॥ ५ ॥

जात्यहीरकस्य स्वरूपम्

स्निग्धं विद्युद्विभं स्वच्छमलेख्यं च विलेखनम् ।
तीक्ष्णं षट्कोणमष्टास्रं जात्यं हीरकमुच्यते ॥ ६ ॥

हेयहीरकस्य स्वरूपम्

वर्तुलं मलिनं नीलं भूत्याभं स्फुटितं खरम् ।
सकाकपादं रेखाढ्यं हेयं हीरकमादिशेत् ॥ ७ ॥

हीरकस्य परीक्षणम्

यन्निकाषफलके शिलातले
घृष्यते न हि निकामघर्षितम् ।
लीलयैव दलयत्यथापरान्
तद्वरं भिदुरमीरितं बुधैः ॥ ८ ॥

अशुद्धहीरकस्य दोषाः

अविशुद्धं मृतं हीरं शीलितं पार्श्ववेदनाम् ।
कुष्ठं तापं भ्रमादींश्च जनयत्यविलम्बितम् ॥ ९ ॥

हीरकशोधनस्य प्रथमः प्रकार

पोट्टलीमध्यगं भार्गवस्य प्रियं
कोद्रवक्काथतो दोलिकायन्त्रके ।
सप्तभिर्वासरैः स्वेदितं संततं
याते शुद्धिं परां निश्चितं सत्वरम् ॥ १० ॥

द्वितीयः शोधनप्रकारः

कुलत्थक्काथसंयुक्तं हीरं दोलाख्ययन्त्रगम् ।
स्विन्नं दिनत्रयं यत्नाद्विशिष्टां शुद्धिमाप्नुयात् ॥ ११ ।

तृतीयः शोधनप्रकारः

हीरकं परिसन्तप्तं सुधाक्षीरे निषेचितम् ।
शतवारं प्रयत्नेन शुद्धिमाप्नोत्यसंशयम् ॥ १२ ॥

चतुर्थः शोधनप्रकारः

हीरकं परिसन्तप्तं प्रखरानलयोगतः ।
शतधा वापितं सूते शुद्धं शुद्धिमवाप्नुयात् ॥ १३ ॥
एवं निर्वापितं हीरं चूर्णतामेति सत्वरम् ।
अनुभूतः प्रकारोऽयं समाख्यातो महोत्तमः ॥ १४ ॥

हीरकमारणस्य प्रथमः प्रकारः

शोधितं हीरकं यत्नतश्चूर्णितं
तालकं गन्धकं हिङ्गुलं तन्मितम् ।
माक्षिकं मारितञ्चेह हीरोन्मितं
राजकोलद्रवेणेह सम्पेषयेत् ॥ १५ ॥
पिप्पलोत्थद्रवैर्भावयेत्सप्तधा
भावितस्यास्य वै कारयेद् गोलकम् ।

उत्पलस्याग्रना वारणाख्य पुट
सम्पुटस्थं ततो पाचयेद्यत्नतः ॥ १६ ॥
हीरकं पञ्चतां नैति यावद्भृशं
तावदेवं पुटेद्यत्नतः कोविदः ।
माक्षिकं न क्षिपेद्वै द्वितीये पुटे
हीरकं पञ्चतामेति सर्वात्मना ॥ १७ ॥

द्वितीयो मारणप्रकारः

हीरकं विमलं सूतं मृतन्तु समभागिकम् ।
मनःशिलां गन्धकञ्च समं दत्त्वा विमर्दयेत् ॥ १८ ॥
सम्पुटस्थं तु पुटयेद् वारणाख्ये पुटे भृशम् ।
तावत्पुटेत्प्रयत्नेन यावन्नायाति पञ्चताम् ॥ १९ ॥
द्वितीयादिपुटेष्वत्र सूतं न विनियोजयेत् ।
एवं चतुर्दशपुटैर्हीरकं म्रियते ध्रुवम् ॥ २० ॥
अनुभूतः प्रकारोऽयं सुगमस्तु प्रकाशितः ।
एवं मृतं हीरकन्तु वीतशङ्कः प्रयोजयेत् ॥ २१ ॥

तृतीयो मारणप्रकारः

हीरकं विमलं तालं तथा रोगशिलामला ।
समं समं समादाय खरखल्वे विमर्दयेत् ॥ २२ ॥
त्रिवर्षारूढकार्पासशिफास्वरसयोगतः ।
सम्पेष्य कामं यामैकं निदाघे परिशोषयेत् ॥ २३ ॥
विशुष्कं सम्पुटे न्यस्य पुटयेत्तु महापुटे ।
एवं चतुर्दशपुटैर्हीरकं याति पञ्चताम् ॥ २४ ॥

मृतहीरकस्य गुणाः

सुमृतं हीरकं हृद्यं परमं षडसान्वितम् ।
योगवाहि मतञ्चैतत्सर्वोत्कृष्टं रसायनम् ॥ २५ ॥

राजयक्ष्मप्रशमनं मेहमेदोविनाशनम् ।
पाण्डुशोथोदरहरं तथा क्लैब्यहरं परम् ॥ २६ ॥
वृष्यं महायुष्यमतीव नेत्र्यं
बल्यं त्रिदोषघ्नमतीव वर्ण्यम् ।
मेध्यं विशेषाद्विविधामयघ्नं
सुधोपमं स्यात्सुमृतं तु हीरम् ॥ २७ ॥

मृतहीरकस्य मात्रा

रक्तिकाया नेत्रगुणभागतस्तु कलांशकम् ।
मृतं हीरं प्रयुञ्जीत बलकालाद्यपेक्षया ॥ २८ ॥

हीरकस्य मात्रानिर्माणप्रकारः

रक्तिकैकमितं हीरं रम्ये खल्वे विनिक्षिपेत् ।
मेलयेद्रससिन्दूरं चतुर्माषकसंमितम् ॥ २९ ॥
सम्पेष्य त्वतियत्नेन रसतन्त्रविचक्षणः ।
गुञ्जैकतः समारभ्य द्विगुञ्जं विनियोजयेत् ॥ ३० ॥

मृतहीरकस्य आमयिकः प्रयोगः

हीरकं रससिन्दूरयुतं सन्तानिकान्वितम् ।
निषेवितं निहन्त्याशु ध्वजभङ्गं सुदारुणम् ॥ ३१ ॥
हीरकं सहिरण्यन्तु रससिन्दूरसंयुतम् ।
विनिहन्त्यचिरादेव राजयक्ष्माणमुल्बणम् ॥ ३२ ॥
मकरध्वजसंयुक्तं हीरकं परिशीलितम् ।
नाशयत्यचिरादेव सर्वान् क्लैब्यान् विशेषतः ॥ ३३ ॥

कंदर्पकोकिलरसः

सकर्पूरो हीरो हि समसिन्दूरसहितः
सितैलासंमिश्रः प्रचुरसरसंयुक्तपयसा ।
निपीतः षण्मासं जनयति सुमिष्टाशनयुतो
नरं नानानारीनिधुवनसमासक्तहृदयम् ॥ ३४ ॥

लावण्येऽमलमौक्तिकं रतिपतिं रूपे च सम्मोहने
भीमं भोजनभक्षणे खगपतिं दूरात्सदा वीक्षणे ।
सिंहं संहतगात्रताभवमदे बुद्धौ तु वाचस्पतिं
हीरस्येह तु सेवको नरवरः प्रस्पर्द्धते निर्भरम् ॥ ३५ ॥
रसोऽयं तु समाख्यातो नाम्ना कन्दर्पकोकिलः ।
सेवितव्यः सदा यत्नाच्छरीरबलवृद्धये ॥ ३६ ॥

अथ हीरकरसायनम्

हीरं तार्क्ष्यञ्च माणिक्यं पुष्परागं च नीलकम् ।
वैदूर्यमथ गोमेदं चन्द्ररत्नञ्च विद्रुमम् ॥ ३७ ॥
भागोत्तरमिदं तस्मात्पञ्चगुञ्जोन्मितं हरेत् ।
योजयेन्मृतवैक्रान्तं तस्मादष्टगुणं ततः ॥ ३८ ॥
माक्षिकद्वयजं भस्म पृथक् वैक्रान्तसम्भवम् ।
तथा सर्वत्रिगुणितां समगन्धेशकज्जलीम् ॥ ३९ ॥
पिष्ट्वाजपयसा चैव वन्ध्याकर्कोटकीद्रवैः ।
वन्योत्पलैः कलावारं पादायुधपुटे पुटेत् ॥ ४० ॥
भिषग्वरैः समाख्यातमेतद्धीररसायनम् ।
गर्भिणीनान्तु नारीणां विविधामयनाशनम् ॥ ४१ ॥
हीराद्यं विमलं रसायनमिदं सन्दीपनं पाचनं
बल्यं मेध्यमलं तथैव महिलासौभाग्यसम्वर्द्धनम् ।
योनिव्याधिनिवर्हणं खलु नृणां वन्ध्यत्वरोगापहं
वन्ध्यानां खलु पुत्ररत्नजननं काकादिसंज्ञावताम् ॥ ४२ ॥

अथ माणिक्यस्य नामानि

माणिक्यं रङ्गमाणिक्यं पद्मरागसमाह्वयम् ।
रविरत्नं शोणरत्नं कुरुविन्दं च लोहितम् ॥ ४३ ॥

जात्यमाणिक्यस्वरूपम्

रक्तोत्पलदलच्छायं रम्यं दीप्तप्रभं परम् ।

वृत्तायतं समाङ्गञ्च माणिक्यं जात्यमुच्यते ॥ ४४ ॥

त्याज्यमाणिक्यस्वरूपम्

विच्छायं लघु धूमाभं विरूपं कर्कशं परम् ।
मलिनं चिपिटं वक्रं माणिक्यं त्याज्यमुच्यते ॥ ४५ ॥

माणिक्यशोधनस्य प्रथमः प्रकारः

निम्बूकस्वरसेनेह दोलायन्त्रे विधानतः ।
यामैकं स्वेदितं कामं माणिक्यं शुद्धिमाप्नुयात् ॥ ४६ ॥
अम्लवर्गोक्तभैषज्यैर्दोलिकायन्त्रयोगतः ।
विपाचितं तु माणिक्यं शुद्धिमायात्यनुत्तमाम् ॥ ४७ ॥

द्वितीयः शोधनप्रकारः

निम्बूकाम्लयुतं वारा माणिक्यं चषकस्थितम् ।
सुराप्रदीपे संपक्वं शुद्धिमायात्यनुत्तमाम् ॥ ४८ ॥
आविष्कृता विधरय गुरुवयमहादयः
प्रकाशितः खलु मया भिषजां हितकाम्यया ॥ ४९ ॥

माणिक्यमारणस्य प्रथमः प्रकारः

विमलीकृतमत्यर्थं माणिक्यं सुविचूर्णितम् ।
शिलालगन्धैर्विमलैः पृथक् तु समभागिकैः ॥ ५० ॥
निम्बूकस्वरसेनेह पेषयेद्दिनसप्तकम् ।
विन्यसेत्सम्पुटे घर्मे विशुष्कं कृतचक्रिकम् ॥ ५१ ॥
ततस्तु पुटयेद्धीमान् पुटे वारणसंज्ञके ।
रीत्यानया सुपुटितमष्टवारं प्रयत्नतः ॥ ५२ ॥
माणिक्यं म्रियते भस्म जायते पाण्डुरप्रभम् ।
पिष्टं तु लकुचद्रावैः पुटेदेवमथापि वा ॥ ५३ ॥

द्वितीयो मारणप्रकारः

चूर्णीकृतं शोणरत्नं विमलैः समभागिकैः ।
पेषयेन्निम्बुकद्रावैर्बलिरोगशिलेङ्गुलैः ॥ ५४ ॥

विमर्द्य सुदृढे खल्वे यत्नतः सप्तवासरम् ।
पुटयेद्वारणपुटे विशुष्कं कृतचक्रिकम् ॥ ५५ ॥
रीत्यानयापि पुटितमष्टवारमसंशयम् ।
माणिक्यमचिरादेव मृतिमाप्नोत्यनुत्तमाम् ॥ ५६ ॥

अथ मृतमाणिक्यस्य गुणाः

माणिक्यं सुमृतं मेध्यं मधुरं तु रसायनम् ।
दीपनं वृष्यमायुष्यं वातपित्तहरं परम् ॥ ५७ ॥
कफप्रशमनं स्निग्धं क्षयरोगनिषूदनम् ।
वाजीकरणमत्यन्तं ध्वजभङ्गहरं मतम् ॥ ५८ ॥

अथ माणिक्यस्य मात्रा

आरभ्य गुञ्जापादांशात् गुञ्जार्द्धप्रमितं मृतम् ।
माणिक्यं योजयेद्धीमान् बलकालाद्यपेक्षया ॥ ५९ ॥

माणिक्यमिहिरोदयरसायनम्

माणिक्यं कनकं रौप्यं तार्क्ष्यं तु समभागिकम् ।
कस्तूरिकाञ्च सर्वार्द्धं दत्त्वा कन्याम्भसा ततः ॥ ६० ॥
पिष्ट्वा द्विगुञ्जप्रमिता वटिकाः कारयेद्भिषक् ।
रसोऽयं तु समाख्यातो माणिक्यमिहिरोदयः ॥ ६१ ॥
रसायनमिदं वृष्यं बल्यं वह्निप्रदीपनम् ।
क्लैब्यापहं विशेषेण ध्वजभङ्गहरं मतम् ॥ ६२ ॥

अथ मौक्तिकस्य नामानि

मुक्ता मुक्ताफलञ्चैव मौक्तिकं मौक्तिकेयकम् ।
शुक्तिजं शौक्तिकेयञ्च शशिरत्नं शशिप्रियम् ॥ ६३ ॥

जात्यमौक्तिकस्य स्वरूपम्

चन्द्राद्भासं स्थूलमत्यन्तरम्य
स्निग्धं वृत्तं निर्व्रणं निर्मलं यत्
धत्ते न्यस्तं यत्तलायां गुरुत्वं

प्राज्ञैरुक्तं मौक्तिकं तत्तु जात्यम् ॥ ६४ ॥

विमर्दितं शालितुषैर्गोमूत्रपटुना भृशम् ।
यन्नैति विकृतिं किञ्चित्तन्मौक्तिकमकृत्रिमम् ॥ ६५ ॥

त्याज्यमौक्तिकस्य लक्षणम्

दीर्घं पार्श्वकृशं रूक्षं त्र्यस्रं श्यामञ्च सव्रणम् ।
हतप्रभं क्षुद्रकायं मौक्तिकं हेयमीरितम् ॥ ६६ ॥

मौक्तिकशोधनस्य प्रथमः प्रकारः

जयन्तीस्वरसेनेह दोलायन्त्रे विधानतः ।
यामैकं सततं स्विन्नं मौक्तिकं शुद्धिमाप्नुयात् ॥ ६७ ॥

द्वितीयः शोधनप्रकारः

अगस्त्यद्रवयोगेन यामं स्विन्नमनारतम् ।
दोलायन्त्रे पोट्टलीस्थं शुद्धिमायाति मौक्तिकम् ॥ ६८ ॥

तृतीयः शोधनप्रकारः

सुराप्रदीपवह्निना शरावगं तु मौक्तिकम् ।
सुधोदकेन पाचितं विशुद्धिमेत्यनुत्तमाम् ॥ ६९ ॥

मौक्तिकमारणस्य प्रथमः प्रकारः

विमलं मौक्तिकं गव्यपयसा परिपेषितम् ।
त्रिधा लघुपुटे पक्वं मृतं स्यान्छशिसुन्दरम् ॥ ७० ॥

द्वितीयो मारणप्रकारः

मुक्ताफलन्तु तरुणीपरिस्रुतजलान्वितम् ।
पिष्टं त्रिवारं पुटितं मृतिमाप्नोत्यनुत्तमाम् ॥ ७१ ॥

मृतमौक्तिकस्य गुणाः

मौक्तिकं वृष्यमायुष्यं मधुरं शिशिरं परम् ।
दीपनं दाहशमनं नेत्र्यं वर्ण्यं च कीर्तितम् ॥ ७२ ॥
जीर्णज्वरप्रशमनं त्वस्थिदन्तविवर्द्धनम् ।
हृद्यं मेहहरं मेध्यं दन्तोद्भेदज्वरापहम् ॥ ७३ ॥

मौक्तिकं सुशिशिरं क्षयापहं श्वासकासपरिकोपनाशनम् ।
अस्थिशोषशमनं विषापहं देहवीर्यबलबुद्धिवर्धनम् ॥ ७४ ॥

मृतमौक्तिकस्य मात्रानिरूपणम्

आरभ्य गुञ्जापादांशाद् गुञ्जैकप्रमितं मृतम् ।
मौक्तिकं विनियुञ्जीत बलकालाद्यपेक्षया ॥ ७५ ॥

मृतमौक्तिकस्य आमयिकः प्रयोगः

रससिन्दूरसंयुक्तं मौक्तिकं परिशीलितम् ।
विनिहन्त्यचिरादेव दन्तोद्भेदभवं ज्वरम् ॥ ७६ ॥
मृतविद्रुमगन्धेशसंयुतं मृतमौक्तिकम् ।
बीजपूराम्भसा पिष्टं पक्वं लघुपुटे ततः ॥ ७७ ॥
भक्षितं सततश्चैतद् गुञ्जाद्वितयसंमितम् ।
मासमात्रप्रयोगेण निहन्ति क्षयमुल्बणम् ॥ ७८ ॥
मृतविद्रुमसंयुक्तं मौक्तिकं परिशीलितम् ।
हन्ति फुप्फुसदौर्बल्यं चिरकालसमुद्भवम् ॥ ७९ ॥
कटुकीगैरिकोपेतं सुमृतं मौक्तिकेयकम् ।
निषेवितं निहन्त्याशु हिक्काः परमदारुणाः ॥ ८० ॥
स्वर्णार्ककान्तभसितसमेतं खलु मौक्तिकम् ।
बीजपूरस्य तोयेन हिक्कां जयति दारुणाम् ॥ ८१ ॥

अथ मुक्तापञ्चामृतरसायनम्

मौक्तिकं विद्रुमं वङ्गं शङ्खं मुक्तागृहं तथा ।
वसुवेदाक्षिचन्द्रेन्दुभागिकं क्रमशः पृथक् ॥ ८२ ॥
वरीविदारीकन्येक्षुदुग्धहंसपदीरसैः ।
पृथक् सम्पेष्य यत्नेन पञ्चधा पुटपाचितम् ॥ ८३ ॥
ततः काचपिधानेन पिदध्यात्कूपिकागतम् ।
रसायनमिदं ख्यातं मुक्तापञ्चामृताह्वयम् ॥ ८४ ॥

अनारतं द्विगुञ्जन्तु गव्यदुग्धेन शीलितम् ।
मासद्वयप्रयोगेण रसायनफलप्रदम् ॥ ८५ ॥
जीर्णज्वरं महाघोरं राजयक्ष्माणमुल्बणम् ।
निहन्ति सर्वरोगांश्च तत्तद्रोगानुपानतः ॥ ८६ ॥

अथ पुष्परागस्य नामानि

पुष्पराजः पुष्परागः पीतरक्ताह्वयस्तथा ।
गुरुरत्नं पीतमणिः स एव गुरुवल्लभः ॥ ८७ ॥

जात्यपुष्पराजस्य लक्षणम्

स्निग्धं समं सुमसृणं तु सुवर्णवर्णं
स्वच्छं परं सुविमलं तु सुवृत्तगात्रम् ।
यत्कर्णिकारकुसुमप्रभमुज्ज्वलञ्च
जात्यं तदेव गदितं खलु पुष्पराजम् ॥ ८८ ॥
निकषोपलसंघृष्टं वर्णं पुष्णाति यन्निजम् ।
पुष्पराजन्तु तज्जात्यं मतं रत्नपरीक्षकैः ॥ ८९ ॥

हेयपुष्पराजस्य लक्षणम्

श्यामलं निष्प्रभं कर्कशं द्व्यक्षकं
कृष्णाबिन्दुङ्कितं शर्कराङ्गप्रभम् ।
उन्नतं त्वानतं यच्च रूक्षं परं
पुष्पराजं मतं तत्तु हेयं बुधैः ॥ ९० ॥

पुष्पराजस्य शोधनम्

कुलत्थक्वथितोपेतैः काञ्जिकैः स्वेदितं समम् ।
दोलायन्त्रे पुष्पराजं यामैकेन विशुद्ध्यति ॥ ९१ ॥

पुष्पराजस्य मारणम्

माणिक्यमारणोद्दिष्टविधिभ्यामतियत्नतः ।
मारयेत्पुष्पराजन्तु रसतन्त्रविचक्षणः ॥ ९२ ॥

पुष्पराजस्य गुणाः

पुष्पराजन्तु शिशिरं दीपनं पाचनं परम् ।
कफवातप्रशमनं कुष्ठच्छर्दिनिवर्हणम् ॥ ९३ ॥
विषघ्नं दाहशमनं गुदजामयनाशनम् ।
मेध्यं बृंहणमायुष्यं रसज्ञैः परिकीर्तितम् ॥ ९४ ॥

पुष्पराजस्य मात्रा

आरभ्य गुञ्जापादांशाद् गुञ्जैकप्रमितं परम् ।
सुमृतं पुष्पराजन्तु प्रयुञ्जीत भिषग्वरः ॥ ९५ ॥

अथ नीलस्य नामानि

नीलो नीलोपलो नीलं नीलरत्नं सुनीलकम् ।
महानीलश्च नीलाश्मा शनिरत्नश्च कीर्तितम् ॥ ९६ ॥

जात्यनीलस्य लक्षणम्

स्वच्छं सच्छायममलं मसृणं तु महोज्ज्वलम् ।
स्निग्धं गुरु लसज्ज्योतिर्जात्यं नीलं मतं बुधैः ॥ ९७ ॥

हेमनीलस्य लक्षणम्

रक्तार्द्धं विगतच्छायं रूक्षं लघु च कोमलम् ।
परिहेयं शौरिरत्नं मतं रत्नपरीक्षकैः ॥ ९८ ॥

अथ नीलस्य शोधनम्

नीलीस्वरससंयुक्तं दोलायन्त्रे विधानतः ।
यामैकं परिपक्वन्तु नीलं शुद्ध्यति निश्चितम् ॥ ९९ ॥

अथ नीलस्य मारणम्

माणिक्यमारणोद्दिष्टविधिभ्यामतियत्नतः ।
मारयेच्छनिरत्नं तु रसागमविशारदः ॥ १०० ॥

मृतनीलस्य गुणाः

नीलं तु सुमृतं वृष्यं बल्यं दीपनमुत्तमम् ।
त्रिदोषशमनं वर्ण्यं गुदजामयनाशनम् ॥ १०१ ॥

त्वच्यं कुष्ठादिदोषघ्नं श्वासकासनिषूदनम् ।
कफपित्तानिलहरं विषमज्वरनाशनम् ॥ १०२ ॥

मृतनीलस्य मात्रा

गुञ्जाष्टमांशप्रमितात् गुञ्जार्द्धप्रमितं परम् ।
सुमृतं नीलरत्नं तु प्राणाचार्यः प्रयोजयेत् ॥ १०३ ॥

अथ मरकतस्य नामानि

गारुत्मतं मरकतं तार्क्ष्यं गारुडसंज्ञकम् ।
बुधरत्नं रोहिणेयं हरिद्रत्नञ्च तन्मतम् ॥ १०४ ॥

जात्यमरकतस्य स्वरूपम्

सच्छायं मसृणं स्वच्छं गुरु स्निग्धञ्च कोमलम् ।
अव्यङ्गञ्च हरिद्वर्णं जात्यं मरकतं मतम् ॥ १०५ ॥

हेयमरकतस्य स्वरूपम्

रूक्षन्तु विगतच्छायं विकृताङ्गं खरं लघु ।
सत्रास चातिमलिनं हेयं मरकतं मतम् ॥ १०६ ॥

अथ मरकतस्य शोधनम्

सुरभीपयसा यामं दोलायन्त्रे विधानतः ।
विपाचितं मरकतं विशुद्ध्यति सुनिश्चितम् ॥ १०७ ॥

अथ मरकतस्य मारणम्

माणिक्यमारणोद्दिष्टविधिभ्यामातियत्नतः ।
अष्टधा पुटितं तार्क्ष्यं म्रियतेऽत्र न संशयः ॥ १०८ ॥

मरकतस्य गुणाः

मृतं मरकतं बल्यं विषघ्नं वह्निदीपनम् ।
ओजोविवर्द्धनं वृष्यं पाण्डुशोफनिषूदनम् ॥ १०९ ॥
श्वासच्छर्दिप्रशमनं गुदजामयनाशनम् ।
समाख्यातं विशेषेण सन्निपातनिवर्हणम् ॥ ११० ॥

अथ मरकतस्य मात्रा

आरभ्य गुञ्जापादांशाद्गुञ्जैकप्रमितं परम् ।
मृतं मरकतं युञ्ज्यात् बलकालाद्यपेक्षया ॥ १११ ॥

अथ वैदूर्यस्य नामानि

विदूररत्नं वैदूर्यं केतुरत्नं विदूरजम् ।
बिडालाख्यं बिडालाक्षं वायजञ्च प्रकीर्तितम् ॥ ११२ ॥

जात्यवैदूर्यस्य स्वरूपम्

वैदूर्यं गुरु सुस्निग्धं बिडालेक्षणसप्रभम् ।
भ्रमच्छुभ्रोत्तरीयाढ्यं वैदूर्यं जात्यमुच्यते ॥ ११३ ॥

हेयवैदूर्यस्य स्वरूपम्

विच्छायं लघु रूक्षञ्च सत्रासं चिपिटं खरम् ।
कृष्णं तथा मृच्छिलाढ्यं वैदूर्यं हेयमीरितम् ॥ ११४ ॥

वैदूर्यस्य शोधनम्

त्रिफलाक्वथितोपेतं वैदूर्यं याममात्रकम् ।
दोलायन्त्रे परिस्विन्नं शुद्धिमायात्यनुत्तमाम् ॥ ११५ ॥

वैदूर्यस्य मारणम्

माणिक्यमारणोद्दिष्टविधिभ्यामतियत्नतः ।
विदूररत्नं पुटितं त्वष्टधा मृतिमाप्नुयात् ॥ ११६ ॥

मृतवैदूर्यस्य गुणाः

सुमृतं खलु वैदूर्यं मधुरं शिशिरं परम् ।
दीपनं मेध्यमायुष्यं बल्यं च मलभेदनम् ॥ ११७ ॥
रक्तपित्तप्रशमनं चक्षुष्यं बृंहणं परम् ।
पित्तामयप्रशमनं समाख्यातं विशेषतः ॥ ११८ ॥

वैदूर्यस्य मात्रा

वस्वंशतो रक्तिकाया वैदूर्यं गुञ्जसंमितम् ।
प्राणाचार्यः प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ११९ ॥

अथ गोमेदकस्य नामानि

गोमेदकश्च गोमेदः पिङ्गस्फटिक इत्यपि ।
गोमेदं राहुरत्नञ्च कीर्तितश्च तमोमणिः ॥ १२० ॥

जात्यगोमेदस्य स्वरूपम्

गोमूत्राभं स्निग्धममन्दं समगात्रं
हेमारक्तं निर्दलमच्छं गुरुभारम् ।
दीप्तच्छायं मञ्जुलरूपं मसृणं यद्
गोमेदाख्यं रत्नमिह स्यात्तज्जात्यम् ॥ १२१ ॥

हेयगोमेदस्य स्वरूपम्

सत्रासं विगतच्छायं चिपिटं मलिनप्रभम् ।
सदलं लघु रूक्षं च गोमेदं हेयमीरितम् ॥ १२२ ॥

गोमेदस्य शोधनम्

निम्बूकस्वरसेनेह दोलायन्त्रे विधानतः ।
परिस्विन्नं तु यामैकं शुद्धिमायात्यनुत्तमाम् ॥ १२३ ॥

गोमेदस्य मारणम्

माणिक्यमारणोद्दिष्टविधिभ्यामातियत्नतः ।
त्वष्टवारं सुपुटितं गोमेदं मृतिमाप्नुयात् ॥ १२४ ॥

मृतगोमेदस्य गुणाः

गोमेदकं रुचिकरं दीपनं पाचनं परम् ।
त्वग्दोषशमनं बल्यं कफपित्तप्रणाशनम् ॥ १२५ ॥
उष्णं पाण्ड्वामयहरं क्षयक्षयकरं परम् ।
समाख्यातं विशेषेण बुद्धिसम्वर्द्धनं तथा ॥ १२६ ॥

मृतगोमेदस्य मात्रा

आरभ्य गुञ्जापादांशाद्गुञ्जैकप्रमितं मृतम् ।
गोमेदं तु प्रयुञ्जीत बलकालाद्यपेक्षया ॥ १२७ ॥

अथ प्रवालस्य नामानि

प्रवालकं प्रवालश्च भौमरत्नञ्च विद्रुमम् ।
अब्धिजन्तुविशेषोत्थं तदेव परिकीर्तितम् ॥ १२८ ॥

ग्राह्यविद्रुमस्य स्वरूपम्

आरक्तमञ्जुलच्छायं स्निग्धं वृत्तञ्च निर्व्रणम् ।
दीर्घं स्थूलं गुरु दृढं ग्राह्यं विद्रुममुच्यते ॥ १२९ ॥

हेयविद्रुमस्य लक्षणम्

पाण्डुरं सव्रणं रूक्षं सशिरं लघु धूसरम् ।
कृष्णं सूक्ष्मं सुमसृणं हेयं विद्रुममीरितम् ॥ १३० ॥

विद्रुमस्य प्रथमः शोधनप्रकारः

जयन्त्याः स्वरसेनेह दोलायन्त्रे तु विद्रुमम् ।
यामैकं सुपरिस्विन्नं शुद्धिमायात्यनुत्तमाम् ॥ १३१ ॥

द्वितीयः शोधनप्रकारः

सर्जिकाक्षारसंयुक्ते सलिले परिपाचितम् ।
यामैकेन प्रवालं तु शुद्धिमायात्यनुत्तमाम् ॥ १३२ ॥

तृतीयः शोधनप्रकारः

तण्डुलीयद्रवेणेह दोलायन्त्रे तु यामकम् ।
प्रवालकं परिस्विन्नं शुद्धिमायात्यनुत्तमाम् ॥ १३३ ॥

अथ विद्रुमस्य प्रथमो मारणप्रकारः

विशोधितं विद्रुमं तु श्लक्ष्णचूर्णं तु कारयेत् ।
कन्याम्भसाऽथ सम्पेष्य शोषयेत् कृतचक्रिकम् ॥ १३४ ॥
सम्पुटस्थं ततः कृत्वा त्रिवारं पुटयेद्भिषक् ।
एवं पुटत्रयैर्भस्म जायते शशिसुन्दरम् ॥ १३५ ॥

द्वितीयो मारणप्रकारः

विद्रुमं गव्यदुग्धेन सम्पेष्य कृतचक्रिकम् ।
म्रियते पुटितं भस्म जायतेऽतिमनोहरम् ॥ १३६ ॥

तृतीयो मारणप्रकारः

जयन्त्याः स्वरसेनेह सम्पेष्य कृतचक्रिकम् ।
त्रिवारं पुटितं सम्यक् विद्रुमं म्रियते ध्रुवम् ॥ १३७ ॥

चतुर्थो मारणप्रकारः

पिष्टं वरीरसेनेह प्रवालं कृतचक्रिकम् ।
म्रियते पुटितं वह्नौ भस्म स्यात् सुमनोहरम् ॥ १३८ ॥

अथ विद्रुमस्य गुणाः

विद्रुमं सुमृतं क्षारं मधुरं लघु शीतलम् ।
दीपनं पाचनं चैव दृष्टिरोगनिषूदनम् ॥ १३९ ॥
त्रिदोषशमनं बल्यं विशेषात्कफवातनुत् ।
क्षयकासहरं चैव रक्तपित्तप्रणाशनम् ॥ १४० ॥
स्वेदातिनिर्गमहरं रात्रिस्वेदहरं परम् ।
विषघ्नं भूतशमनं वीर्यवर्णविवर्द्धनम् ॥ १४१ ॥

मृतविद्रुमस्य मात्रा

गुञ्जार्धतः समारभ्य गुञ्जाद्वयमितं परम् ।
विद्रुमं विनियुञ्जीत बलकालाद्यपेक्षया ॥ १४२ ॥

अथ विद्रुमस्य आमयिकः प्रयोगः

तण्डुलोदकयोगेन प्रवालं रक्तिकाद्वयम् ।
शीलितं विनिहन्त्याशु मूत्रकृच्छ्रं कफोत्थितम् ॥ १४३ ॥
रससिन्दूरसंयुक्तं प्रवालं गुञ्जसंमितम् ।
कट्वीद्राक्षाभयायुक्तं विड्विघातं निहन्त्यलम् ॥ १४४ ॥
प्रवालं सुमृतं गुञ्जं रससिन्दूरसंयुतम् ।
गोक्षुरस्य कषायेण शीलितं मूत्रसादहृत् ॥ १४५ ॥
द्विरक्तिकं तु सुमृतं विद्रुमं मधुसंयुतम् ।
शीलितं नाशयत्याशु निशास्वेदमशेषतः ॥ १४६ ॥

विद्रुमं रससिन्दूरसंयुक्तं परिशीलितम् ।
पुनर्नवागोक्षुराभ्यां शोथं नाशयति ध्रुवम् ॥ १४७ ॥
रससिन्दूरसंयुक्तं विद्रुमं परिशीलितम् ।
वरीक्षुरकषायेण मूत्रकृच्छ्रं व्यपोहति ॥ १४८ ॥
समयशदसमेतं मारितं भौमरत्नं
विमलमधुविमिश्रं शीलितं तु त्रिमासम् ।
करयुगलसमुत्थां स्वेदसंस्रावबाधा-
मपहरति नितान्तं वै बहूत्थानजाताम् ॥ १४९ ॥
अभ्रवांशीरजोयुक्तं विद्रुमं परिशीलितम् ।
विनिहन्ति विशेषेण कासं क्षयसमुत्थितम् ॥ १५० ॥
विश्वाभ्ररससिन्दूरव्याघ्रीयुक्तं तु विद्रुमम् ।
मधुना सेवितं हन्ति शिशूनां कासमुल्बणम् ॥ १५१ ॥
अभ्रकट्फलसिन्दूरभार्ङ्गीयुक्तं तु विद्रुमम् ।
शिशूनां सज्वरं श्वासं नाशयत्याशु निश्चितम् ॥ १५२ ॥
शुक्तिकारससिन्दूरतुगाक्षीरीसमन्वितम् ।
विद्रुमं शीलितं श्वासं कासञ्च विनिहन्त्यलम् ॥१५३ ॥

अथ क्षुद्ररत्नगणः

वैक्रान्तं सूर्यकान्तश्च चन्द्रकान्तो नृपोपलः ।
पेरोजकञ्च स्फटिकं क्षुद्ररत्नगणो ह्ययम् ॥ १५४ ॥

अथ वैक्रान्तस्य नामानि

वैक्रान्तश्चैव विक्रान्तं वैक्रान्तं जीर्णवज्रकम् ।
कुवज्रं क्षुद्रकुलिशं चूर्णवज्रञ्च तन्मतम् ॥ १५५ ॥

वैक्रान्तस्य निर्वचनम्

वज्रवत् सर्वरोगाणां हरणाय यतस्त्विदम् ।
धत्ते विक्रान्तिमतुलां वैक्रान्तं कथ्यते ततः ॥ १५६ ॥

ग्राह्यवैक्रान्तस्य स्वरूपम्

अष्टास्रमष्टफलकं सितपीतासितारुणम् ।
मसृणं गुरु षट्कोणं वैक्रान्तं जात्यमुच्यते ॥ १५७ ॥
श्वेतो नीलस्तथा रक्तः पीतः पारावतप्रभः ।
तार्क्ष्याभः कर्बुरः कृष्णो वर्णतश्चाष्टधा हि सः ॥ १५८ ॥

वैक्रान्तशोधनस्य प्रथमः प्रकारः

वैक्रान्तं पोट्टलीसंस्थं पटुक्षारसमन्वितम् ।
अम्लेन केनचिद्वापि कोद्रवक्वथितेन वा ॥ १५९ ॥
गोमूत्रेणाथवा कामं प्रखरानलयोगतः ।
दोलायन्त्रे परिस्विन्नं शुद्धिमायात्यनुत्तमाम् ॥ १६० ॥

द्वितीयः शोधनप्रकारः

वैक्रान्तः सपटुक्षारः कुलत्थक्वाथयोगतः ।
दोलायन्त्रे परिस्विन्नः शुद्धिमाप्नोति यामतः ॥ १६१ ॥

तृतीयः शोधनप्रकारः

वैक्रान्तं पोट्टलीसंस्थं कदलीकन्दजद्रवे ।
दोलायन्त्रे परिस्विन्नं यामैकेन विशुध्यति ॥ १६२ ॥

वैक्रान्तस्य प्रथमो मारणप्रकारः

विमलबलिविमिश्रं चूर्णवज्रस्य चूर्णं
समदरदसमेतं निम्बुनीरेण पिष्टम् ।
द्विरदपुटसमाख्ये तत् पुटे सम्पुटस्थं
वसुमितपुटपक्वं पञ्चतां याति नूनम् ॥ १६३ ॥

द्वितीयो मारणप्रकारः

विशोधितं तु वैक्रान्तं यत्नतश्चूर्णयेद्भिषक् ।
त्रिगुणं गन्धपाषाणं समं चैव रसेश्वरम् ॥ १६४ ॥
दत्त्वा निम्बूकतोयेन पेषयेद् याममात्रकम् ।
सुशुष्कं सम्पुटे न्यस्य पुटेद् गजपुटेन वै ॥ १६५ ॥

एवमष्टपुटेनैव वैक्रान्तं म्रियते ध्रुवम् ।
चतुर्थादिपुटेष्वत्र रसेशं न नियोजयेत् ॥ १६६ ॥

वैक्रान्तस्य गुणाः

तत्तन्महागदहरः परमश्च मेध्यो
वह्निप्रदीपनकरोऽतिरसायनश्च ।
दोषत्रयापहरणो बहुयोगवाही
वैक्रान्तकस्तु गदितः खलु वज्रतुल्यः ॥ १६७ ॥
वैक्रान्तकं परं त्वच्यं राजयक्ष्मनिषूदनम् ।
जराशोषादिशमनं ज्वरकुष्ठापहं तथा ॥ १६८ ॥
पाण्डूदरश्वासकासप्रमेहश्वयथुप्रणुत् ।
देहदार्ढ्यकरञ्चैव समाख्यातं विशेषतः ॥ १६९ ॥

मृतवैक्रान्तस्य मात्रा

तत्त्वांशतो रक्तिकाया रुद्रांशप्रमितं मृतम् ।
वैक्रान्तकं प्रयुञ्जीत बलकालाद्यपेक्षया ॥ १७० ॥

मृतवैक्रान्तस्य आमयिकः प्रयोगः

प्रथमं वैक्रान्तरसायनम्

सुमृतं खलु वैक्रान्तं चतुर्गुञ्जमितं शुभम् ।
तोलकैकमितञ्चैव सुमृतं घनसत्वकम् ॥ १७१ ॥
रसेश्वरञ्च सुमृतं तोलकार्द्धकसंमितम् ।
आदाय खल्वे सम्मर्द्य शाल्मलीमूलवारिणा ॥ १७२ ॥
कारयेद्रसतन्त्रज्ञो रक्तिकैकमितां वटीम् ।
एकैकां वटिकां दद्यात् समध्वाज्यं तु प्रत्यहम् ॥ १७३ ॥
रसायनमिदं बल्यं वृष्यं वर्ण्यञ्च बृंहणम् ।
क्लैब्यापहञ्च परमं नास्ति भेषजमीदृशम् ॥ १७४ ॥
आमया न प्रशाम्यन्ति येऽन्यभेषजसेवया ।
एतद्रसायनाभ्यासात् यान्ति शान्तिं तु निश्चितम् ॥ १७५ ॥

द्वितीयं वैक्रान्तरसायनम्

वैक्रान्तकं तु सुमृतं रक्तिकाष्टकसंमितम् ।
पादांशिकश्च सुमृतं काञ्चनं नष्टचन्द्रिकम् ॥ १७६ ॥
विमलं रससिन्दूरं तोलकद्वयसम्मितम् ।
आदाय खल्वे संमर्द्य शाल्मलीमूलवारिणा ॥ १७७ ॥
रक्तिकैकमितां रम्यां वटिकां कारयेत्ततः ।
रसज्ञैः कीर्तितमिदं वैक्रान्तकरसायनम् ॥ १७८ ॥
मरिचाज्यकणायुक्तं मासद्वयमनारतम् ।
रसायनमिदं यत्नात् सपथ्यं परिशीलितम् ॥ १७९ ॥
विनिहन्ति जराशोषं राजयक्ष्माणमुल्बणम् ।
ध्वजभङ्गं तथा क्लैब्यं कासं श्वासश्च दारुणम् ॥ १८० ॥
अर्शांसि वह्निमान्द्यञ्च ग्रहणीं पाण्डुकामलाम् ।
उरःक्षतादिकान् रोगान् नाशयत्याशु निश्चितम् ॥ १८१ ॥

अथ सूर्यकान्तस्य नामानि

सूर्यकान्तः सूर्यमणिस्तथा सूर्योपलाह्वयः ।
दीप्तोपलो वह्निगर्भो तथैव ज्वलनोपलः ॥ १८२ ॥

ग्राह्यसूर्यकान्तस्य लक्षणम्

विमलो निस्तुषः स्निग्धो घृष्टो व्योमसुनिर्मलः ।
मसृणो निर्व्रणश्चैव जात्यः सूर्योपलः स्मृतः ॥ १८३ ॥

सूर्यकान्तस्य परीक्षणम्

यस्तु सूर्यांशुसंस्पृष्टो प्रसूते दहनप्रभाम् ।
स एव जात्यः कथितः सूर्यकान्तः पुराविदैः ॥ १८४ ॥

सूर्यकान्तस्य गुणाः

सूर्यकान्तो मतो मेध्य उष्णश्चैव रसायनः ।
वलासवातशमनो विशेषेण च कीर्तितः ॥ १८५ ॥

सूर्यकान्तस्य मारणम्

सूर्यकान्तः सुसम्पिष्टः शिलाबलिसमन्वितः ।
सप्तधा पुटितो यत्नान्म्रियते नात्र संशयः ॥ १८६ ॥

अथ चन्द्रकान्तस्य नामानि

चन्द्रकान्तश्चन्द्रमणिस्तथा चन्द्रोपलाह्वयः ।
शशिकान्तश्चेन्दुकान्तः स एव परिकीर्तितः ॥ १८७ ॥

जात्यचन्द्रकान्तस्य लक्षणम्

यन्निर्मलं सुमसृणं शिशिरं च पीतं
स्निग्धं परं सुविशदं परमं पवित्रम् ।
स्रावं स्रवत्यथ परं तुहिनांशुसंगा-
च्चन्द्रोपलं खलु तदेव मतं तु जात्यम् ॥ १८८ ॥

चन्द्रकान्तस्य गुणाः

चन्द्रकान्तोऽतिशिशिरः स्निग्धः पित्तापहः परम् ।
रक्तपित्तप्रशमनस्तथा दाहनिषूदनः ॥ १८९ ॥

चन्द्रकान्तस्य मारणम्

कुनटीहिङ्गुलोपेतः कन्यानीरेण पेषितः ।
चन्द्रकान्तः सुपुटितो म्रियते नात्र संशयः ॥ १९० ॥

अथ राजावर्तस्य नामानि

राजावर्तो नृपावर्त आवर्तमणिरित्यपि ।
नृपोपलश्च नीलाश्मा स एव परिकीर्तितः ॥ १९१ ॥

जात्यराजावर्तस्य स्वरूपम्

यन्निर्मलः सुमसृणः खलु गारशून्यः
स्निग्धश्च शारदनिरभ्रनभःसुनीलः ।
कृष्णो गुरुश्च शिखिकण्ठसमप्रकाशो
राजोपलः खलु स एव मतस्तु जात्यः ॥ १९२ ॥

राजावर्तस्य प्रथमः शोधनप्रकारः

सगव्यमूत्रः सक्षारो निम्बूकद्रवयोगतः ।
स्विन्नो नृपोपलो यामं शुद्धिमायात्यनुत्तमाम् ॥ १९३ ॥

द्वितीयः शोधनप्रकारः

निम्बूकाम्लसमायुक्तः सजलः क्षारसंयुतः ।
नृपोपलः परिस्विन्नो विशुध्यति न संशयः ॥ १९४ ॥

तृतीयः शोधनप्रकारः

शिरीषपुष्पस्वरसैः स्वेदितस्तु नृपोपलः ।
दोलायन्त्रे याममात्रं शुद्धिमायात्यनुत्तमाम् ॥ १९५ ॥

राजावर्तस्य मारणम्

विचूर्णितं नृपोपलं विशुद्धगन्धकान्वितम् ।
नवेन निम्बुकाम्बुना सुपेषयेद् दिनत्रयम् ॥ १९६ ॥
विशोषितश्च विन्यसेच्छरावसम्पुटास्थितम् ।
विधाय सन्धिलेपनं पुटेत्पुटे गजाह्वये ॥ १९७ ॥
विपाचितः सुवर्त्मना ह्यनेन नागवारकम् ।
नृपोपलोऽविलम्बितं समेति पञ्चतामलम् ॥ १९८ ॥

मृतराजावर्तस्य गुणाः

नृपोपलः कटुस्तिक्तो दीपनः पाचनस्तथा ।
शिशिरः पित्तशमनो बृंहणोऽतिरसायनः ॥ १९९ ॥
पाण्डुप्रमेहहरणः क्षयशोषनिवर्हणः ।
मदात्ययात्ययकरश्छर्दिहिक्कानिवारणः ॥ २०० ॥

मृतराजावर्तस्य आमयिकः प्रयोगः

नृपोपलः सममृततारताप्यसमन्वितः ।
विपक्वो गव्यहविषा सितामध्वाज्यसंयुतः ॥ २०१ ॥
निषेवितो निहन्त्याशु सर्वानेव मदात्ययान् ।
रससिन्दूरताम्राढ्यः सुमृतस्तु नृपोपलः ॥ २०२ ॥

यष्टीमधुकचूर्णेन सितामध्वाज्यसंयुतः ।
निषेवितो निहन्त्याशु सर्वानेव मदात्ययान् ॥ २०३ ॥
मृताभ्रसत्त्वकान्ताभ्यां सुमृतस्तु नृपोपलः ।
मधुना शीलितं हन्ति प्रमेहादिकमुल्बणम् ॥ २०४ ॥

राजावर्तस्य सत्वपातनं मारणञ्च

मनःशिलाज्यसंयुतं नृपोपलं विचूर्णितम् ।
पचेत्तु लोहभाजनेऽथ सैरिभीसुदुग्धतः ॥ २०५ ॥
समित्रपञ्चकस्ततो विमर्द्य गोलकीकृतः ।
सुतीक्ष्णखादिराग्निना विपाचितस्ततस्त्वयम् ॥ २०६ ॥
स्वकीयसत्त्वमुत्तमं विमुञ्चतीह सत्वरम् ।
ततः सलुङ्गगन्धकं विपक्वमेति पञ्चताम् ॥ २०७ ॥

अथ पेरोजकस्य नामानि

पेरोजकञ्च पेरोजं रसज्ञैः परिकीर्तितम् ।
भस्माङ्गं हरितं चेति द्विविधं तत्प्रकीर्तितम् ॥ २०८ ॥

पेरोजकस्य शोधनमारणम्

शोधनं मारणञ्चैव पेरोजस्य विशेषतः ।
नृपोपलसमं ख्यातं रसतन्त्रविशारदैः ॥ २०९ ॥

मृतपेरोजकस्य गुणाः

पेरोजकं सुतुवरं मधुरं च सुदीपनम् ।
शूलदूषीविषघ्नञ्च चराचरविषापहम् ॥ २१० ॥

अथ स्फटिकस्य नामानि

स्फटिकः स्फटिकं चैव स्फाटिकं स्फटिकोपलः ।
स्फाटीकं स्फटिकाश्मा च तथैव स्फटिकोपलः ॥ २११ ॥
शालिपिष्टं धौतशिलं शिवरत्नं शिवप्रियम् ।
सितोपलोऽमलमणिः स एव परिकीर्तितः ॥ २१२ ॥

जात्यस्फटिकस्य स्वरूपम्

शीतं स्निग्धं निस्तुषं नेत्रहृद्यं
घृष्टं धत्ते स्वच्छतां पूर्वतुल्याम् ।
स्वच्छच्छायं यच्च शुद्धान्तरालं
तन्निर्दिष्टं शैवरत्नं तु जात्यम् ॥ २१३ ॥

स्फटिकस्य शोधनमारणम्

शोधनं मारणञ्चैव शिवरत्नस्य सर्वदा ।
राजावर्तमणेस्तुल्यं जानीयाद्रसकोविदः ॥ २१४ ॥

मृतस्फटिकस्य गुणाः

स्फटिको मधुरो बल्यस्तुपारसमशीतलः ।
रक्तपित्तप्रशमनो ज्वरदाहादिनाशनः ॥ २१५ ॥

इति रत्नादिविज्ञानीयो नाम त्रयोविंशस्तरङ्गः ।

अथ विषोपविषादिविज्ञानीयश्चतुर्विंशस्तरङ्गः

विषपदस्य निर्वचनम्

दृष्ट्वैतद् यद्विषीदन्ति जनास्तस्माद्विषं मतम् ।
नरं वा विषिणोत्येतन्मृत्युपाशैस्ततो विषम् ॥ १ ॥

विषस्य नामानि तद्द्वैविध्यञ्च

विषं क्ष्वेडञ्च गरलं कालकूटञ्च तन्मतम् ।
स्थावरं जङ्गमञ्चेति द्विविधं विषमुच्यते ॥ २ ॥

स्थावरजङ्गमविषयोः स्वरूपम्

खन्यौषधाश्रयं यत्तु विषं तत्स्थावराह्वयम् ।
सर्पादिजन्तुप्रभवं विषं जङ्गमसंज्ञकम् ॥ ३ ॥

स्थावरविषस्य भेदाः

अधिष्ठानविभेदेन विषं स्थावरसंज्ञकम् ।
समाख्यातं दशविधं रसतन्त्रविचक्षणैः ॥ ४ ॥

स्थावरविषस्य अधिष्ठानानि

कन्दः सारोऽथ निर्यासः पुष्पं मूलं फलं दलम् ।
त्वक् क्षीरं खनिरित्यस्य ह्यधिष्ठानानि वै दश ॥ ५ ॥

प्रकारान्तरेण स्थावरविषस्य द्वैविध्यम्

विषं चोपविषं चेति द्विविधं स्थावरं विषम् ।
प्रथमं वत्सनाभादि द्वितीयं तिन्दुकादिकम् ॥ ६ ॥

विषस्य नव भेदाः

हालाहलः कालकूटः शृङ्गकश्च प्रदीपनः ।
सौराष्ट्रिको ब्रह्मपुत्रो हारिद्रः सक्तुकस्तथा ॥ ७ ॥
वत्सनाभ इति ज्ञेया विषभेदा अमी नव ।
रसे रसायनादौ च वत्सनाभः प्रशस्यते ॥ ८ ॥
विषाणां सक्तुकान्तानां प्रयोगो नेह दृश्यते ।
अतस्त्वेषां विषाणां तु स्वरूपं न प्रदर्शितम् ॥ ९ ॥

१—हालाहलादिविषाणां तन्त्रान्तरोक्तानि लक्षणानि—

हालाहलः—गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा ।
तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः ॥
असौ हालाहलो ज्ञेयः किष्किन्धायां हिमालये ।
दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते ॥

कालकूटः—देवासुररणे देवैर्हतस्य पृथुमालिनः ।
दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः ॥
निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्तितः ।
सोऽहिच्छत्रे शृङ्गवेरे कोङ्कणे मलये भवेत् ॥

शृङ्गकः—यस्मिन् गोशृङ्गके बद्धे दुग्धं भवति लोहितम् ।
स शृङ्गक इति प्रोक्तो द्रव्यतत्वविशारदैः ॥

प्रदीपनः—प्रदीपलोहितो यः स्याद्दीप्तिमान् दहनप्रभः ।
महादाहकरः पूर्वैः कथितः स प्रदीपनः ॥

सौराष्ट्रिकः—सुराष्ट्रविषये यः स्यात् स सौराष्ट्रिक उच्यते ।

वत्सनाभक्षुपस्य परिचयः

*सिन्दुवारदलः पार्श्वे तरुवृद्धिविवर्जितः ।
नीलपुष्पः कन्दविषो क्षुपो हस्तद्वयोच्छ्रितः ॥ १० ॥
वत्सनाभ इति ख्यातो रसतन्त्रविचक्षणैः ।
गढपाले च काश्मीरे नेपालादौ च जायते ॥ ११ ॥

वत्सनाभस्य परिचयः

दैर्घ्ये तु पञ्चाङ्गुलतः परं सप्ताङ्गुलोन्मितः ।
व्यासे चैकाङ्गुलात् सार्द्धद्व्यङ्गुलप्रमितस्तथा ॥ १२ ॥
आमूलचूलं क्रमशः स्थूलश्च पाण्डुरप्रभः ।
कन्दोऽस्य भिषजां वर्यैर्वत्सनाभ इति स्मृतः ॥ १३ ॥
दीर्घमूलं स्थूलकन्दं वत्सनाभविषक्षुपम् ।
उत्पाट्य शीतसमये वसन्ते वा समाहरेत् ॥ १४ ॥

वत्सनाभस्य भेदाः

कृष्णाभः कपिशः पाण्डुर्वर्णतस्त्रिविधो मतः ।
वत्सनाभो विशेषेण क्रमेण गुणवत्तमः ॥ १५ ॥

वत्सनाभस्य नामानि

वत्सनाभो वत्सनागः क्ष्वेडोऽस्त्री च विषं मतम् ।
अमृतश्च तदेवोक्तं रसतन्त्रविशारदैः ॥ १६ ॥

ग्राह्यवत्सनाभस्य स्वरूपम्

स्थूलं स्निग्धं गुरु नवं फलपाकोत्तरोद्धृतम् ।
कीटाद्यभक्षितश्चैव विषं ग्राह्यमिहोच्यते ॥ १७ ॥

ब्रह्मपुत्रः—वर्णतः कपिलो यः स्यात् तथा भवति साग्रकः ।
ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले ॥

हारिद्रः—हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः ।

सक्तकः—यद् ग्रन्थिः सक्तकेनैव पूर्णमध्यः स सक्तुकः ॥

वत्सनाभसंशोधनस्य प्रयोजनम्

अविशुद्धं विषं दाहं मोहं हृद्गतिरोधनम् ।
मृत्युञ्च विदधात्याशु तस्मात्तं परिशोधयेत् ॥ १८ ॥

वत्सनाभस्य प्रथमः शोधनप्रकारः

यथोक्तगुणसम्पन्नं वत्सनाभं समाहरेत् ।
ततश्चणकसंस्थानं खण्डशः कारयेद्भिषक् ॥ १९ ॥
पाषाणचषके वापि मृत्तिकाभाजने ततः ।
गोमूत्रेण समाप्लाव्य स्थापयेत्प्रखरातपे ॥ २० ॥
प्रत्यहं पूर्वनिक्षिप्तं गोमूत्रमपनीय तु ।
दत्त्वा च नूतनं मूत्रं तीव्रघर्मे तु विन्यसेत् ॥ २१ ॥
एवं दिनत्रयं कृत्वा त्वचामपनयेत्ततः ।
शोषयेच्च विषं त्वेवं शुद्धिमायात्यनुत्तमाम् ॥ २२ ॥

द्वितीयः शोधनप्रकारः

विषं चणकसंस्थानं कृत्वा पोट्टलिकागतम् ।
सुरभीपयसा चेह दोलिकायन्त्रयोगतः ॥ २३ ॥
यामद्वयं वा यामैकं स्वेदयेदतियत्नतः ।
संशोधितं विषं त्वेवं विशुद्ध्यति न संशयः ॥ २४ ॥

तृतीयः शोधनप्रकारः

खण्डीकृतो वत्सनाभः पोट्टलीगर्भसंस्थितः ।
अजादुग्धेन सुस्विन्नो यामतः शुद्धिमाप्नुयात् ॥ २५ ॥

अथ वत्सनाभस्य गुणाः

विषं तु कटुकं तिक्तमुष्णं चैव कषायकम् ।
योगवाहि परं चैतन्महोत्कृष्टं रसायनम् ॥ २६ ॥
त्रिदोषघ्नं विशेषेण मतं वातवलासनुत् ।
दीपनं शीतशमनं बृंहणं बलवर्द्धनम् ॥ २७ ॥
अग्निमान्द्यप्रशमनं प्लीहोदरनिवर्हणम् ।

वातरक्तापहं चैव श्वासकासविधूननम् ॥ २८ ॥
गुदामयग्रहणिकागुल्मनिर्दलनं परम् ।
कुष्ठपाण्डुज्वरहरं त्वामवातप्रणाशनम् ॥ २९ ॥
विनिहन्ति विशेषेण तिमिरं च निशान्धताम् ।
अभिष्यन्दं नेत्रशोथं कर्णशोथञ्च दारुणम् ॥ ३० ॥
कर्णशूलं शिरःशूलं गृध्रसीं कटिवेदनाम् ।
आखुवृश्चिकसर्पाणां विषं चैवाविलम्बितम् ॥ ३१ ॥

वत्सनाभस्य विशिष्टा गुणाः

विषं प्राणप्रदमलं विधिना परिशीलितम् ।
तदेवाविधिनायुक्तं मतं प्राणहरं परम् ॥ ३२ ॥
तस्माद्विषविधानज्ञो रोगाणां लक्षणानि तु ।
विमृश्य सूक्ष्मया बुद्ध्या प्रयुञ्जीत प्रयत्नतः ॥ ३३ ॥
विषं विशेषतो वातवेदनाहरमुत्तमम् ।
मूत्रलं स्वेदजननं शूलनिर्मूलनं परम् ॥ ३४ ॥
प्रवृद्धतापशमनं तथा शोथनिषूदनम् ।
तत्तद्धेतुप्रवृद्धाया हृद्गतेश्च नियामकम् ॥ ३५ ॥
स्वेदसञ्जनकान्येषां भेषजानामपेक्षया ।
परं तु तापशमनं न चातिस्वेदकृत्तथा ॥ ३६ ॥
प्रवृद्धरक्तसञ्चारसुसंयमनसंविधौ ।
अमोघास्त्रमिदं ख्यातं सर्वोत्कृष्टं महौषधम् ॥ ३७ ॥
रसतन्त्रचिकित्सायां बाहुल्येन निरूपिते ।
विषप्रयोगे भूम्ना तु प्रवृत्ते सति भारते ॥ ३८ ॥
पूर्वाचार्यविनिर्दिष्टं रक्तनिर्हरणादिकम् ।
इदानीमत एवेह तिरोभूतं तु निर्भरम् ॥ ३९ ॥
विशोधितं खलु विषं मात्रया परिशीलितम् ।
हृदयस्य गतिं नैवावसादयति कर्हिचित् ॥ ४० ॥

मस्तिष्कदेशे संवृद्धां रक्तसञ्चरणाक्रियाम् ।
नाशयत्याशु मस्तिष्के जातं वा रक्तसञ्चयम् ॥ ४१ ॥
फुप्फुसच्छदशोथघ्नस्तथा फुप्फुसशोथनुत् ।
तथा शोथसमुद्भूतविविधज्वरवेगजित् ॥ ४२ ॥
शोथं विनाशत्याशु हृदयावरणोत्थितम् ।
तथान्त्रावरणोद्भूतं ज्वरञ्च विनिहन्त्यलम् ॥ ४३ ॥
फुप्फुसच्छदशोथादिरोगाणां प्रक्रमे विषम् ।
प्रयुक्तं निरुणद्ध्येतत् केषांचिद्भिषजां मतम् ॥ ४४ ॥
गलशोथं तुण्डिकेरीं तथैव गलशुण्डिकाम् ।
अन्यांश्च तरुणान् कण्ठरोगानाशु निहन्त्यलम् ॥ ४५ ॥
तत्तत्स्थानसमुद्भूतं त्वभिघातादिहेतुजम् ।
बाह्यमाभ्यन्तरं रक्तस्रावं ह्रासयति द्रुतम् ॥ ४६ ॥
सदाहं सक्षवं तीव्रशिरोवेदनयान्वितम् ।
सदाहभ्रूयुगं हन्ति प्रतिश्यायं नवोत्थितम् ॥ ४७ ॥
सकफां बहुरक्तां वा स्वल्परक्तामुपक्रमे ।
प्रवृद्धमलवेगाढ्यां विनिहन्ति प्रवाहिकाम् ॥ ४८ ॥
ऊर्ध्वजत्रुगता या तु नाडिका पञ्चमी मता ।
शूलं तदुत्थितं शीघ्रं विनिहन्ति विशेषतः ॥ ४९ ॥
बहुवेगं वाल्पवेगं प्रगाढारक्तलोहितम् ।
ज्वरान्वितं तूर्ध्वगतं रक्तपित्तं व्यपोहति ॥ ५० ॥
तावदेव प्रयोक्तव्यं विषं होरात्रयोत्तरम् ।
गात्रतापो भवेन्नेह यावत् खलु शतांशिकम् ॥ ५१ ॥
अन्तर्दाहसमायुक्तं द्रुतं प्रबलनाडिकम् ।
पिपासया परिगतं द्रुतहृद्गतिसंयुतम् ॥ ५२ ॥

अजीर्णाध्मानसंयुक्तं तथैव स्वेदवर्जितम् ।
आतिमात्राभिसंवृद्धगात्रतापांशसंगतम् ॥ ५३ ॥
कासकम्पशिरःशूलैः पर्याकुलमनारतम् ।
अस्थैर्यारतिर्वैचित्यभयोद्वेगादिसंयुतम् ॥ ५४ ॥
वातवेदनयाक्रान्तं त्वारक्तमुखमण्डलम् ।
शुष्कोष्णचर्मसंस्पर्शं प्रगाढारक्तमूत्रकम् ॥ ५५ ॥
शीतपूर्वं तु दाहान्तं ज्वरं विविधहेतुजम् ।
विषं विधिप्रयुक्तं तु नाशयत्याशु निश्चितम् ॥ ५६ ॥
विविधोत्थानसंभूतान् विविधस्थानसंस्थितान् ।
निहन्ति तरुणानाशु शोथांस्तु विविधाकृतीन् ॥ ५७ ॥
विविधोत्थानसंस्थानां त्वसह्यत्वप्रकाशिकाम् ।
स्पर्शासहां रात्रिभवां वेदनाञ्च निहन्त्यलम् ॥ ५८ ॥
तत्तद्रोगघ्नभैषज्ययुतं तु विमलं विषम् ।
योगवाहितया हन्ति सर्वानेव महामयान् ॥ ५९ ॥
नानारसप्रयोगेण शान्तिं यान्ति न ये गदाः ।
विषप्रयोगेण तु ते प्रशाम्यन्ति न संशयः ॥ ६० ॥

विषप्रयोगस्य निषेधः

न बालेष्वतिवृद्धेषु रोगिणीगर्भिणीषु च ।
न चातिक्षीणगात्रेषु यक्ष्मलक्ष्मयुते न च ॥ ६१ ॥
न क्रोधिते न च भ्रान्ते हृद्दौर्बल्ये विशेषतः ।
वत्सनाभविषं वैद्यः प्रायशो न प्रयोजयेत् ॥ ६२ ॥
एतेष्वपि प्रयोक्तव्येऽवश्यं खलु विधानवित् ।
यत्नतोऽत्यल्पकालार्थं युञ्जीतात्यल्पमात्रया ॥ ६३ ॥

विषस्य मात्रया प्रयोगे फलवैशिष्ट्यम्

विषं भवति पीयूषं मात्रया विनियोजितम् ।
तदेवामात्रया युक्तं द्रुतं मुष्णाति जीवितम् ॥ ६४ ॥

तस्मात् पूर्वं तु रोगाणां रोगिणां च बलाबलम् ।
वीक्ष्य देशादिकञ्चापि विषमात्रां प्रकल्पयेत् ॥ ६५ ॥

वत्सनाभविषस्य मात्रा

कलांशतो रक्तिकाया वस्वंशप्रमितं विषम् ।
विमलं विनियुञ्जीत बलकालाद्यपेक्षया ॥ ६६ ॥

अथ वत्सनाभविषस्य आमयिकः प्रयोगः

मृत्युञ्जयरसः

अमृतं द्विगुणामलेङ्गुलाढ्यं
त्रिदिनं त्वार्द्रकवारिणा निपिष्टम् ।
बलिमागधिकामरीचटङ्कैः
समभागैः परिपेषयेन्निकामम् ॥ ६७ ॥
वटिकाः कारयेद्यत्नात् ततो विषविधानवित् ।
गुञ्जार्धसम्मिता वापि गुञ्जापादांशसम्मिता ॥ ६८ ॥
रसोऽयं तु समाख्यातो मृत्युञ्जयसमाह्वयः ।
अयं वातज्वरहरस्तथा फुप्फुसशोथहृत् ॥ ६९ ॥
प्रवाहिकाप्रशमनो विविधज्वरनाशनः ।
आध्मानाजीर्णसंयुक्तसंनिपातनिपातनः ॥ ७० ॥

मृत्युञ्जयरसस्य आमयिकः प्रयोगः

आरक्तवक्त्रे प्रबलज्वरे च श्वासोच्छ्रये कष्टदकासवेगे ।
देयो दिनेऽयं प्रथमे द्वितीये मृत्युञ्जयः फुप्फुसशोथरोगे ॥७१॥
रसोऽयं शीलितस्तीव्रज्वरवेगसमन्वितम् ।
आध्मानाजीर्णसंयुक्तं कृमिरोगं विनाशयेत् ॥ ७२ ॥
विविधोत्सेधजं वापि हृदावरणशोथजम् ।
ज्वरमारम्भवेलायां हन्ति मृत्युञ्जयो रसः ॥ ७३ ॥
नवज्वरायमाणं च त्वजीर्णाध्मानसंयुतम् ।
सन्निपातं निहन्त्याशु रसोऽयं निम्बुकाम्भसा ॥ ७४ ॥

गौरवारुचिसंसृष्टं सामं वापि निरामकम् ।
रसोऽयं निम्बुकद्राक्षैर्निहन्ति विषमज्वरम् ॥ ७५ ॥
पिप्पलीमधुसंयुक्तो रसोऽयं परिशीलितः ।
नवज्वरायमाणन्तु जीर्णज्वरमपोहति ॥ ७६ ॥
सोत्सेधारक्तशिश्नाग्रं सदाहं वेदनान्वितम् ।
निहन्त्यारम्भवेलायामौपसर्गिकमेहकम् ॥ ७७ ॥

लेश्वरो रसः

अमृत विमल युगतोलमितं
दरदं च कणा सममेव समम् ।
परिपेष्य भृशं खलु सार्द्धयव-
प्रमिता वटिका विदधीत बुधः ॥ ७८ ॥
रसोऽयं तु समाख्यातो विबुधैर्हिङ्गुलेश्वरः ।
आमवातप्रशमनस्तथा वातज्वरापहः ॥ ७९ ॥

हिङ्गुलेश्वरस्य आमयिकः प्रयोगः

तीव्रज्वरं साङ्गमर्दं सन्धिशूलसमन्वितम् ।
आमवातं निहन्त्याशु शीलितो हिङ्गुलेश्वरः ॥ ८० ॥
शीतकम्पाङ्गमर्दाढ्यं शिरोवेदनयान्वितम् ।
रसोऽयं शीलितो हन्ति वातिकज्वरमुल्बणम् ॥ ८१ ॥
नवज्वरायमाणन्तु जीर्णज्वरमथापि वा ।
सविरामज्वरं हन्ति रसोऽयं परिशीलितः ॥ ८२ ॥

पञ्चामृतरसः

अमृतं तोलकमितं रसं गन्धञ्च तन्मितम् ।
मरिचं टङ्कणञ्चैव तोलकत्रितयोन्मितम् ॥ ८३ ॥
समादाय ततो वारा वटिका रक्तिकोन्मिताः ।
निर्मापयेद्भिषग्वर्यो रसः पञ्चामृताभिधः ॥ ८४ ॥

विविधोत्थानसंस्थानं विविधस्थानसंस्थितम् ।
ज्वरातिसारयुक्तञ्च शोथं हन्त्यविलम्बितम् ॥ ८५ ॥
जलोदरं शिरःशूलं पीनसञ्च गलग्रहम् ।
नासारोगं कण्ठरोगं हन्ति च श्लैष्मिकामयम् ॥ ८६ ॥

अस्य आमयिकः प्रयोगः

पुनर्नवाकषायेण रसोऽयं वार्द्रकद्रवैः ।
विविधोत्थानसंस्थानं शोथं हन्त्याशु सर्वगम् ॥ ८७ ॥
आर्द्रकद्रवयोगेन रसोऽयं परिशीलितः ।
शिरःशूलं निहन्त्याशु वृक्षं शक्राशनिर्यथा ॥ ८८ ॥

शिवताण्डवरसः

विषं तु तोलकमितं रससिन्दूरकं तथा ।
तालकं विमलं सूतं बलिं च समभागिकम् ॥ ८९ ॥
चूर्णीकृतं च मरिचं चतुस्तोलकसंमितम् ।
समादाय भिषग्वर्यः पेषयेदार्द्रकद्रवैः ॥ ९० ॥
निर्मापयेद्विधानज्ञो वटिका रक्तिकोन्मिताः ।
रसोऽयं तु समाख्यातः शिवताण्डवंसकः ॥ ९१ ॥
दृढदन्तं लिप्तदेहं भ्रान्ततारकलोचनम् ।
विषयाशक्तकरणं सन्निपातं निपातयेत् ॥ ९२ ॥

आनन्दभैरवो रसः

अमृतं गव्यमूत्रेण यत्नतो विमलीकृतम् ।
मागधी मरिचं चैव सौभाग्यं दरदं तथा ॥ ९३ ॥
समं समं समादाय वारिणा परिपेषयेत् ।
रक्तिकार्द्धमिताश्चैव वटिकाः कारयेत्ततः ॥ ९४ ॥
प्रवाहिकाप्रशमनः पूयमेहप्रणुत्परम् ।
ज्वरातीसारजिन्नाम्ना रसो ह्यानन्दभैरवः ॥ ९५ ॥

आनन्दभैरवस्य आमयिकः प्रयोगः

सशोथारक्तशिश्नाग्रं दाहकण्डूयनान्वितम् ।
पूयमेहं निहन्त्याशु रसो ह्यानन्दभैरवः ॥ ९६ ॥
अतीसारं ज्वरोद्भूतं ज्वरं वाप्यतिसारजम् ।
बहुतापं वातिवेगं हन्त्ययं तु रसोत्तमः ॥ ९७ ॥
अजीर्णशूलप्रबलज्वरायां प्रवाहिकायां कफवातजायाम् ।
ज्वरोपशान्त्यै विनियोजनीयः फलेन्द्रपत्रस्वरसादियोगात् ९८

जयावटी

विष निशा कटुत्रिकं कृमिघ्ननिम्बमुस्तकम् ।
समं समं समोन्मितं जयन्तिकाशिफारजः ॥ ९९ ॥
समाहरेद्भिषग्वरो वटीं द्विगुञ्जसंमिताम् ।
प्रणाययेत्तु नामतो बुधैर्मता जयावटी ॥ १०० ॥
जयावटी विशेषतः प्रमेहकासपाण्डुजित् ।
नवज्वरापहा परं तथैव रक्तपित्तनुत् ॥ १०१ ॥

जयावटिकाया आमयिकः प्रयोगः

चन्दनस्य कषायेण शीलिता तु जयावटी ।
रक्तपित्तं निहन्त्याशु सज्वरं त्वविलम्बितम् ॥ १०२ ॥
बलामूलकषायेण शीलिता तु जयावटी ।
जत्रूर्ध्वमञ्चमीनाडीगतं शूलं व्यपोहति ॥ १०३ ॥
मुस्तेन्द्रयवविश्वानां क्वाथेन तु जयावटी ।
शीलिता ग्रहणीं हन्ति सज्वरामतिदारुणाम् ॥ १०४ ॥
पर्पटस्य कषायेण जया तु परिशीलिता ।
विनाशयति पित्तोत्थं ज्वरं खल्वतिदारुणम् ॥ १०५ ॥

कफकेतु रसः

अमृतं तोलकमितं गोमूत्रपरिशोधितम् ।
पिप्पली शङ्खभासितं टङ्कणं चैव तन्मितम् ॥ १०६ ॥

शृङ्गवेररसेनैव पेषयेत्तु दिनत्रयम् ।
गुञ्जार्धमात्रा वटिकाः कर्तव्याः खलु यत्नतः ॥ १०७ ॥
रसोऽयं भाषितो नाम्ना कफकेतुसमाह्वयः ।
प्रतिश्यायं तथा कासं कण्ठरोगञ्च नाशयेत् ॥ १०८ ॥
गलग्रहं कर्णरोगं श्वासं प्रतमकाभिधम् ।
विनिहन्ति विशेषेण रसोऽयमविलम्बितम् ॥ १०९ ॥

अस्य आमयिकः प्रयोगः

क्षौद्रार्द्रकरसोपेतो रसोऽयं परिशीलितः ।
तीव्रशीघ्रव्यथोपेतं स्तब्धाङ्गं काससंयुतम् ॥ ११० ॥
सज्वरं वातजं वापि खलु वातबलासजम् ।
प्रतिश्यायं निहन्त्याशु दिवसत्रयमात्रतः ॥ १११ ॥
सन्निपातसमुद्भूतं तथैव तु गलग्रहम् ।
कर्णक्षतादिजनितं ज्वरं हन्ति च दारुणम् ॥ ११२ ॥
नवज्वरायमाणञ्च प्रतिश्यायसमन्वितम् ।
श्वासं प्रतमकाभिख्यं नाशयत्यविलम्बितम् ॥ ११३ ॥

विषरसायनम्

अमृतं तोलकमितं गोमूत्रविमलीकृतम् ।
तत्समं रससिन्दूरं हिङ्गुलं विमलं तथा ॥ ११४ ॥
तथैव तारं ताम्रं च रसगन्धकजारितम् ।
व्योषं पलार्द्धप्रमितं चतुर्जातं च चित्रकम् ॥ ११५ ॥
समादाय भिषग्वर्यो वारिणा परिपेषयेत् ।
वटिकाः कारयेद्युक्त्या रक्तिद्वितयसंमिताः ॥ ११६ ॥
प्राणाचार्यैः समाख्यातं नाम्ना विषरसायनम् ।
बल्यं वर्ण्यं परं वृष्यं नानारोगनिषूदनम् ॥ ११७ ॥
मासद्वयप्रयोगेण रसस्यास्य निरन्तरम् ।

दिव्यदृष्टिर्दीर्घकायो भवत्येवाविलम्बितम् ॥ ११८ ॥
अग्निसन्दीपनमिदं यकृत्प्लीहनिषूदनम् ।
अजीर्णानाहशमनं परं शूलनिवर्हणम् ॥ ११९ ॥
कर्तुं जीवनसाफल्यं विहर्तुं ललनाकुले ।
यौवनानन्दमाहर्तुमिदं सेव्यं रसायनम् ॥ १२० ॥

अमृतरसायनम्

विषं द्वितोलकमितं सुरभीमूत्रभावितम् ।
धात्रीहतं कान्तलोहं गगनं स्वर्णमाक्षिकम् ॥ १२१ ॥
स्वर्णसिन्दूरकञ्चैव तारं वङ्गञ्च तन्मितम् ।
खादिरं नागरं चैव त्रितोलकमितं पृथक् ॥ १२२ ॥
समादाय भिषग्वर्यः कन्यानीरेण मर्दयेत् ।
निर्मापयेत्तु वटिका रक्तिद्वितयसंमिताः ॥ १२३ ॥
समाख्यातं भिषग्वर्यैर्नाम्नामृतरसायनम् ।
नानातङ्कप्रशमनं रसायनमनुत्तमम् ॥ १२४ ॥
रसायनमिदं रम्यं दीपनं बृंहणं परम् ।
बलसञ्जननञ्चैव रतिशक्तिविवर्द्धनम् ॥ १२५ ॥
कासश्वासप्रशमनं क्षयक्षयकरं परम् ।
क्लैब्यापहं विशेषेण शुक्रतारल्यनाशनम् ॥ १२६ ॥
अतीसारग्रहाणिकावह्निमान्द्यनिषूदनम् ।
परं त्वग्दोषशमनं तथा कुष्ठविनाशनम् ॥ १२७ ॥
अपत्यकरमत्यन्तं परमोजोविवर्द्धनम् ।
धृतिस्मृतिप्रदञ्चैव नानामेहनिषूदनम् ॥ १२८ ॥
यौवनोपवने नित्यं रतिपुष्पचिचीषया ।
विहरद्भिः कामिभिस्तु सेव्यमेतद्रसायनम् ॥ १२९ ॥
एतद्दिव्यरसायनं घृतसिताक्षौद्रेण संयोजितम्

वर्षैकं परिशीलितं ह्यविरतं कामं द्विगुञ्जोन्मितम् ।
वार्द्धक्यं विनिहन्त्यलं शमयति श्लेष्माणमत्युल्बणं
कामं कामकलाविलासचतुरप्रौढाङ्गनारञ्जनम् ॥ १३० ॥

अथ विषस्य प्रयोगाः

व्योषताम्रसमायुक्तं विषं तु परिशीलितम् ।
वातशूलं तथा गुल्मं विनिहन्ति सुदारुणम् ॥ १३१ ॥
मधुयष्टीपद्मकन्दलाक्षोशीरयुतं विषम् ।
शीलितं तण्डुलाम्भोभी रक्तपित्तहरं परम् ॥ १३२ ॥
वचाचन्दनलोध्राढ्यं विषं क्षौद्रेण शीलितम् ।
समाख्यातं विशेषेण जीर्णज्वरविनाशनम् ॥ १३३ ॥
वरीविदारिकाद्राक्षाकपिकच्छूसमन्वितम् ।
विषं तु मधुना लीढं शुक्रसञ्जननं परम् ॥ १३४ ॥
रजनीगोक्षुरद्राक्षायुतं युक्तं विषं द्रुतम् ।
गोक्षुरस्य कषायेण मूत्रकृच्छ्रप्रणाशनम् ॥ १३५ ॥
त्रायन्तीवायसीमूलगायत्रीराजपादपैः ।
शृतैर्विषं शीलितं तु ख्यातं कुष्ठनिषूदनम् ॥ १३६ ॥
पाषाणभेदाश्मजतुयवक्षारसमन्वितम् ।
अमृतं शीलितं हन्ति त्वश्मरीमतिदारुणाम् ॥ १३७ ॥
सर्जिकाक्षारसंयुक्तं सव्योषं परिशीलितम् ।
विषं खलु समाख्यातं परं गुल्मप्रणाशनम् ॥ १३८ ॥
जन्तुघ्नदाडिमशिफाशतपुष्पायुतं विषम् ।
शीलितं नाशयत्याशु कृमिरोगं सुदारुणम् ॥ १३९ ॥
त्रिक्षारशरपुङ्खाढ्यं कणामूलयुतं विषम् ।
शीलितं मात्रया नित्यं मतं प्लीहनिषूदनम् ॥ १४० ॥

अथास्य बाह्यप्रयोगाः

बीजपूरद्रवैः पिष्टं विषं समसितायुतम् ।
अञ्जनान्नाशयत्याशु काचं नातिचिरोत्थितम् ॥ १४१ ॥
निशाद्वयकणायुक्तं विषं कृष्णाञ्जनान्वितम् ।
अञ्जितं नाशयत्येव काचं नातिचिरोत्थितम् ॥ १४२ ॥
त्रिसप्तवारं त्वमृतं भावितं धात्रिकारसैः ।
अञ्जितं शुद्धशङ्खाढ्यं तिमिरं हन्ति दारुणम् ॥ १४३ ॥
सुरभीमूत्रयोगेन सप्तधा भावितं विषम् ।
सकणं त्वञ्जितं यत्नान्मतं काचजिदञ्जनम् ॥ १४४ ॥
सुश्लक्ष्णपिष्टहीराढ्यं विषं गोमूत्रभावितम् ।
नारीस्तन्येन संघृष्टं मतं काचजिदञ्जनम् ॥ १४५ ॥
करवीरकरञ्जार्कनिम्बपत्रनिशायुतम् ।
रक्तचन्दनमञ्जिष्ठासप्तपर्णवचान्वितम् ॥ १४६ ॥
मालतीपत्रसंयुक्तं विषं तालशिलायुतम् ।
प्रलेपेन निहन्तीह व्रणान् कुष्ठसमुद्भवान् ॥ १४७ ॥
धृष्टमाद्रकतायन विषमत्यल्पमात्रया ।
सद्यःपूरणयोगेन कर्णशूलहरं मतम् ॥ १४८ ॥
कदलीकन्दतोयेन विषं भृङ्गाम्बुभावितम् ।
पूरणाद्विनिहन्तीह पुष्पं नातिचिरोत्थितम् ॥ १४९ ॥
भृङ्गराजरसेनैव पूरणाच्च निशान्धताम् ।
विषाञ्जिते च नयने सिञ्चेद्धारा मुहुर्मुहुः ॥ १५० ॥

विषप्रभावर्तिका

विषं तु तोलकमितं निशास्वरसपेषितम् ।
विशोधिता रोगशिला भृङ्गराजद्रवेण तु ॥ १५१ ॥
श्लक्ष्णचूर्णीकृतं शङ्खं त्वब्धिफेनं च सैन्धवम् ।

कणाभया लोध्रनिशे बीजमक्षकरञ्जयोः ॥ १५२ ॥
वृक्षाम्लं मरिचं चैव मञ्जिष्ठा रक्तचन्दनम् ।
समं समं समादाय त्वजाक्षीरेण पेषयेत् ॥ १५३ ॥
निर्मापयेद्भिषग्वर्यो वर्तिकाः खलु शोभनाः ।
नामतस्तु समाख्याता भिषग्भिस्तु विषप्रभाः ॥ १५४ ॥
सङ्घृष्टा वर्तिका वारा नेत्रयोर्विनियोजिता ।
शुक्लार्ममांसपिल्लादीन् रोगान् नाशयति द्रुतम् ॥ १५५ ॥
शिरीषदलपुष्पाढ्यं विषं तु परिशीलितम् ।
समाख्यातं विशेषेण भृशमाखुविषापहम् ॥ १५६ ॥
कदलीकन्दतोयेन विषं साज्यं प्रयोजितम् ।
अशनाल्लेपनाच्चैव हन्ति सर्पविषं भृशम् ॥ १५७ ॥
गोतक्रेण समायुक्तं विषमत्यल्पमात्रया ।
निपीतं शमयत्येव विषमाखुकुलोद्भवम् ॥ १५८ ॥
विषं तु तिलतैलेन घृष्टं लेपप्रयोगतः ।
विनिहन्त्यचिरादेव वृश्चिकार्तिं सुदारुणाम् ॥ १५९ ॥
अर्कक्षीरेण लिप्तं तु विषमत्यल्पमात्रया ।
सर्वासामेव लूतानां विषं जयति दारुणम् ॥ १६० ॥
कुष्ठैलाबाकुचीमांसीदेवदारुनतान्वितम् ।
विषं पानप्रलेपाभ्यां मतं सर्वविषापहम् ॥ १६१ ॥
विषगर्भाभिधं[1] तैलं नित्यमभ्यङ्गयोजितम् ।
मन्यास्तम्भं हनुस्तम्भं पक्षाघातं परिग्रहम् ॥ १६२ ॥

१–विषगर्भतैलं यथा–धत्तूरस्य रसस्य पञ्चकुडवं तैलं तथा काञ्जिकं
प्रस्थानाञ्च चतुष्टयं गदवचा त्रिंशत्परं शाणकाः ।
हृद्धात्रीमरिचात्पृथङ् नव विषात् षट् स्वर्णबीजात्पटोः
स्युः सप्ताधिकविंशतिः परिमितं तीव्रानिलध्वंसनम् ।

सर्वाङ्गग्रहणं पृष्ठत्रिककम्पादिकं तथा ।
निहन्ति हि विशेषेण निखिलानिलवेदनाः ॥ १६३ ॥

अथ उपविषाणां नामानि

विषतिन्दुकबीजं च त्वहिफेनञ्च रेचकम् ।
धत्तूरबीजं विजया गुञ्जा भल्लातकाह्वयः ॥ १६४ ॥
अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकम् ।
समाख्यातो गणोऽयं तु बुधैरुपविषाभिधः ॥ १६५ ॥

अथ विषतिन्दुकस्य नामानि

कुचेलकं कुचेलश्च कुचिला कुचिलं तथा ।
विषतिन्दुस्तथा तिन्दुस्तिन्दुकं विषतिन्दुकम् ॥ १६६ ॥
कारस्करो रम्यफलः कुपाको विषमुष्टिका ।
विषमुष्टिः कालकूटस्तदेव विनिगद्यते ॥ १६७ ॥

विषतिन्दुकस्य परिचयः

कारस्करः समाख्यातः शिखिजातीयकस्तरुः ।
काण्डोऽस्य वक्रः स्थूलश्च काण्डत्वक् भसितप्रभा ॥१६८॥
पत्रं तु वर्तुलं प्रायो मसृणं खल्वखण्डितम् ।
हरिद्वर्णं स्पष्टशिरं ह्रस्वकं पत्रवृन्तकम् ॥ १६९ ॥
कुसुमं लघु शुक्लञ्च हरिदाभञ्च कोमलम् ।
नारङ्गरङ्गं मसृणं फलं रम्यं सुवर्तुलम् ॥ १७० ॥
मज्जा शुभ्रा कोमला च बीजं वृत्तञ्च रोमशम् ।
बीजमेव चिकित्सायां विबुधैर्विनियुज्यते ॥ १७१ ॥
कोङ्कणे च तथा वङ्गे दक्षिणे च विशेषतः ।
देशेष्वन्येषु च तथा जायते विषतिन्दुकम् ॥ १७२ ॥

विषतिन्दुकस्य प्रथमः शोधनप्रकारः

विषतिन्दुकबीजानि विन्यसेद् गृहवारिणि ।
दिनत्रयं प्रयत्नेन त्वपनीय बहिस्त्वचम् ॥ १७३ ॥

निदाघे चाथ संशोष्य चूर्णयेद्भिषजां वरः ।
एवं विशुद्धिमायाति सर्वथा विषतिन्दुकम् ॥ १७४ ॥

द्वितीयः शोधनप्रकारः

कारस्करस्य बीजानि त्वतिमन्दाग्नियोगतः ।
निधाय पिष्टपचने तावदाज्येन भर्जयेत् ॥ १७५ ॥
यावद् बहिस्त्वचा किञ्चिज्जायते कपिशप्रभा ।
कुचेलमेवं त्वरितं शुद्धिमायात्यनुत्तमाम् ॥ १७६ ॥

तृतीयः शोधनप्रकारः

विषतिन्दुकबीजानि पोट्टल्यां विन्यसेद्भिषक् ।
स्वेदयेद् गव्यपयसा दोलिकायन्त्रमार्गतः ॥ १७७ ॥
एवं यामकमात्रेण शुद्धिमायान्त्यनुत्तमाम् ।
शोधितं तिन्दुकं त्वेवं वीतशङ्कः प्रयोजयेत् ॥ १७८ ॥

विषतिन्दुकस्य गुणाः

विषतिन्दुकमाग्नेयं कटुकं दीपनं परम् ।
उग्रवीर्यं तीक्ष्णसारं कामोद्दीपनमुत्तमम् ॥ १७९ ॥
अम्लपित्तप्रशमनं मूत्रलं क्षुत्प्रदीपनम् ।
पाचनं श्लेष्महरणं बलसञ्जननं परम् ॥ १८० ॥
मेदोहरं रुचिकरं सारमेयविषापहम् ।
ग्रहणीहरमत्यन्तं तथोन्मादविनाशनम् ॥ १८१ ॥
आध्मानापहमत्यन्तं तथाजीर्णविनाशनम् ।
आमाशयोत्थशूलघ्नं हृद्दौर्बल्यहरं परम् ॥ १८२ ॥
श्वासप्रशमनञ्चैव तथा फुप्फुसशोथनुत् ।
अर्धाङ्गार्दितवातघ्नं नाडीबलविवर्धनम् ॥ १८३ ॥
दुष्टनागाशनोद्भूतं वा मदात्ययसम्भवम् ।
अर्धाङ्गवातं हन्तीह भृशमङ्गविशेषगम् ॥ १८४ ॥

मांसपेशीशोषयुते नवे कठिनपेशिके ।
पक्षाघाते न युञ्जीत स्पर्शानुभववर्जिते ॥ १८५ ॥
मदात्ययात्ययकरं नाडीशूलनिवर्हणम् ।
अनिद्रापहमत्यन्तं गुदजामयनाशनम् ॥ १८६ ॥
राजयक्ष्मसमुद्भूतनिशास्वेदनिवारणम् ।
मानसश्रमसम्भूतावसादविनिषूदनम् ॥ १८७ ॥
अनिद्राजनिताजीर्णनाशनं दुग्धपाचनम् ।
अर्द्धावभेदकहरं श्रमकासनिवर्हणम् ॥ १८८ ॥
निम्ननिर्दिष्टरोगाणां तत्तल्लक्षणसम्भवे ।
कारस्करं प्रयुञ्जीत भृशमत्यल्पमात्रया ॥ १८९ ॥
निर्जनप्रियतां चैव परां क्रोधालुतां तथा ।
विनिहन्ति हि रुग्णानां तत्तद्धेतुविशेषजाम् ॥ १९० ॥
अम्लतिक्तरसोन्मिश्रानुद्गारान् नाशयत्यलम् ।
श्रमोत्थां चित्तदौर्बल्यसमेतां मलबद्धताम् ॥ १९१ ॥
अत्यम्लवदनास्वादं नवं वा चिरकालजम् ।
आध्मानं नाशयत्याशु भोजनोत्तरकालिकम् ॥ १९२ ॥
चित्तावसादसंयुक्तं दारुणाध्मानसंगतम् ।
अम्लपित्तसमुद्भूतमन्त्रशूलं व्यपोहति ॥ १९३ ॥
मलत्यागसमीहाढ्यां मुहुर्वेदनयान्विताम् ।
कष्टप्रवृत्ताल्पमलां नाशयेन्मलबद्धताम् ॥ १९४ ॥
अत्यल्पमूत्रस्रवणं सदाहं वेदनान्वितम् ।
मूत्रणेच्छापरिगतं मूत्ररोधं निवारयेत् ॥ १९५ ॥
रक्तातिस्रावसंयुक्तं दीर्घकालानुबन्धिनम् ।
रजःस्रावं निहन्त्याशु समयात्पौर्वकालिकम् ॥ १९६ ॥
सवेदनां तथा पीतदुर्गन्धास्रावसंयुताम् ।

विनिहन्ति विशेषेण श्वेतप्रदरजां रुजम् ॥ १९७ ॥
रात्रौ निद्रायमाणस्य विवृद्धां पृष्ठदेशजाम् ।
वेदनां शमयत्याशु तथैव कटिवेदनाम् ॥ १९८ ॥
दिने तु स्रवदास्रावं निशि स्रावविवर्जितम् ।
व्यपोहति विशेषेण प्रतिश्यायं नवोत्थितम् ॥ १९९ ॥
भक्षणोत्तरजं श्वासं हन्ति पित्तसमुत्थितम् ।
अनारतं जायमानं वर्त्मस्पन्दनकं तथा ॥ २०० ॥
रात्रिजागरणोद्भूतं तथा बह्वशनोत्थितम् ।
विवर्द्धमानं प्रत्यूषे सशब्दं तृष्णयान्वितम् ॥ २०१ ॥
आलोहितं घनश्चैव कामं सलिलसन्निभम् ।
समुल्बणं विशेषेण विनिहन्त्युदरामयम् ॥ २०२ ॥
मुहुर्मुहुर्मलत्यागवाञ्छयातिनिपीडितम् ।
कष्टप्रवृत्ताल्पमलं विनिहन्ति गुदामयम् ॥ २०३ ॥

विषतिन्दुकस्य मात्रा

आरभ्य गुञ्जापादांशाद् गुञ्जैकप्रमितं परम् ।
मात्रावृद्धानियुञ्जीत विमलं विषतिन्दुकम् ॥ २०४ ॥

विषतिन्दुकस्य आमयिकः प्रयोगः

नवजीवनरसः

कुचेलकं सुविमलं तोलकद्वयसंमितम् ।
लोहं द्वितोलकमितं रससिन्दूरकं तथा ॥ २०५ ॥
पलार्द्धं त्र्यूषणश्चैव समादायार्द्रकद्रवैः ।
विमर्द्य कारयेद्वैद्यो वटिका रक्तिकोन्मिताः ॥ २०६ ॥
रसोऽयं तु समाख्यातो नवजीवनसंज्ञकः ।
नवजीवनमेतद्धि ददाति नवजीवनम् ॥ २०७ ॥
दीपनं पाचनश्चैव बलसञ्जननं परम् ।
नाडीबलप्रजननं रतिशक्तिविवर्द्धनम् ॥ २०८ ॥

अन्त्रशूलहरं कामं त्वाध्मानविनिवारणम् ।
मलबन्धहरं चैव तथातीसारनाशनम् ॥ २०९ ॥
अर्द्धावभेदकहरं रक्तसञ्जननं परम ।
शूलापहं मानसिकश्रमोद्भूतावसादनुत् ॥ २१० ॥

अग्नितुण्डीरसः

अमृतं तोलकमितं जीरकञ्च फलत्रिकम् ।
रसेश्वरं सुविमलं बलिश्चैव विडङ्गकम् ॥ २११ ॥
सौवर्चलं च सामुद्रं सौभाग्यं सैन्धवं तथा ।
सर्जिक्षारं यवक्षारं चित्रकं त्वजमोदिकाम् ॥ २१२ ॥
कुचेलकं सुविमलं सर्वेषां समभागिकम् ।
समादाय भिषग्वर्यो जम्बीराम्लेन मर्दयेत् ॥ २१३ ॥
निर्मापयेत्ततो यत्नाद्वटिका रक्तिकोन्मिताः ।
नामतस्तु समाख्यातास्त्वग्नितुण्डीरसाख्यया ॥ २१४ ॥
अग्नितुण्डीरसो ह्येष दीपनः पाचनः परम् ।
अग्निमान्द्यप्रशमनो नाडीबलविवर्द्धनः ॥ २१५ ॥
गुदामयप्रशमनस्तथातीसारनाशनः ।
कटिपृष्ठसमुद्भूतां नाशयेद्वातवेदनाम् ॥ २१६ ॥

लक्ष्मीविलासो रसः

कुचेलकं सुविमलं रसतोलकसम्मितम् ।
सुपुष्पितं च सौभाग्यं मरिचं चैव तन्मितम् ॥ २१७ ॥
लोहं द्विकर्षप्रमितं गन्धेशौ द्व्येकभागिकौ ।
सर्वं सम्मेल्य यत्नेन भावयेदार्द्रकद्रवैः ॥ २१८ ॥
वरीभूधात्रिकाभृङ्गस्वरसेन च भावयेत् ।
निर्मापयेत्प्रयत्नेन वटिका रक्तिकोन्मिताः ॥ २१९ ॥
समाख्यातो रसो लक्ष्मीविलास इति नामतः ।
तारुण्यलक्ष्मीमतुलां प्रददाति रसो ह्ययम् ॥ २२० ॥

रोगदुर्बलदेहानां कृशानां क्षीणरेतसाम् ।
देहपुष्टिकरः कामं तथा वीर्यविवर्द्धनः ॥ १२१ ॥
बलवर्णकरो वृष्यो वह्निमान्द्यविनाशनः ।
रक्तसञ्जननश्चैव तथा लावण्यवर्द्धनः ॥ २२२ ॥

शूलनिर्मूलनरसः

त्र्यूषणं गन्धपाषाणं मरिचं शङ्खभस्मकम् ।
सैन्धवं रससिन्दूरं जीरकं चाम्लवेतसम् ॥ २२३ ॥
सर्वार्द्धभागिकश्चैव विमलं विषतिन्दुकम् ।
आदाय भिषजां वर्यः शृङ्गवेरस्य वारिणा ॥ २२४ ॥
विभाव्य कारयेद्यत्नाद्वटिका रक्तिकोन्मिताः ।
रसोऽयं तु समाख्यातः शूलनिर्मूलनाभिधः ॥ २२५ ॥
दीपनः पाचनश्चायं वह्निमान्द्यप्रणाशनः ।
अतीसारग्रहणिकाविषूचीविनिवारणः ॥ २२६ ॥
बलवणकरा वृष्या गुल्मामयानिषूदनः ।
रसोऽयं शूलदलने बहुशो दृष्टप्रत्ययः ॥ २२७ ॥

सुप्तिवातारि रसः

कर्षैकप्रमितं शुद्धं विषतिन्दुकबीजकम् ।
समा कज्जलिका चैव समगन्धेशसाधिता ॥ २२८ ॥
त्र्यूषणं च पलार्द्धं स्यान्निर्गुण्डीद्रवयोगतः ।
ब्रह्मबीजद्रवेणापि भावयेत्सप्तवारकम् ॥ २२९ ॥
निर्मापयेत्प्रयत्नेन वटी गुञ्जद्वयोन्मिताः ।
रसोऽयं सुप्तिवाताख्यः सुप्तिवातनिषूदनः ॥ २३० ॥

सारमेयविषापहो योगः

विषतिन्दुकबीजं तु प्रत्यहं परिशीलितम् ।
निहन्ति कुक्कुरविषं खलु मासैकमात्रतः ॥ २३१ ॥

विषतिन्दुकस्य बाह्यप्रयोगः

विषतिन्दुकतैलम्

विषतिन्दुकबीजं तु तोलकैकमितं शुभम् ।
तिलतैले तु विमले तोलकाष्टकसंमिते ॥ २३२ ॥
मन्दाग्निना पचेत्तावद्यावदायाति रक्तताम् ।
एतत्सञ्जायते रम्यं विषतिन्दुकतैलकम् ॥ २३३ ॥
विषतिन्दुकतैलन्तु भृशमभ्यङ्गयोजितम् ।
पक्षाघातादिकान् रोगान् विनिहन्त्यविकल्पतः ॥ २३४ ॥

अथ अहिफेनस्य नामानि

अहिफेनमफेनञ्च निफेनमहिफेनकम् ।
अफूकं फणिफेनञ्च नागफेनञ्च तन्मतम् ॥ २३५ ॥

अहिफेनस्य परिचयः

खस्तिलस्य फलानां तु चीरणात्खलु दुग्धवत् ।
निर्यासो योऽभिनिर्याति सैवाफेनाख्यया मतः ॥ २६६ ॥

खस्तिलनिर्यासस्य निर्मलीकरणम्

खस्तिलस्य तु निर्यासं सलिले तु सुनिर्मले ।
सन्द्राव्य खलु यत्नेन वस्त्रपूतन्तु कारयेत् ॥ २३७ ॥
निर्मलीकृतमेतत्तु खस्तिलद्रवतोयकम् ।
गव्यदुग्धसमायुक्तं पचेन्मन्दाग्नियोगतः ॥ २३८ ॥
पाककालं सुविज्ञाय पाकविद्भिषजां वरः ।
समाहरेत्प्रयत्नेन त्वफेनं निर्मलीकृतम् ॥ २३९ ॥

खस्तिलनिर्यासनिर्मलीकरणस्य प्रयोजनम्

विक्रीयते विपण्यां यत्त्वफेनं खलु साम्प्रतम् ।
द्रव्यान्ययोगाद्धूर्तादिभावितत्त्वाच्च गर्हितम् ॥ २४० ॥
खस्तिलस्य तु निर्यासमादायातो भिषग्वरः ।
स्वयं सुनिर्मलीकृत्य शोधयेच्च प्रयोजयेत् ॥ २४१ ॥

अहिफेनस्य शोधनम्

निर्मलं त्वहिफेनं तु शृङ्गवेरस्य वारिणा ।
विभावितं सप्तवारं शुद्धिमायात्यनुत्तमाम् ॥ २४२ ॥

अहिफेनस्य गुणाः

अहिफेनं सुतिक्तं तु निद्राजनकमुत्तमम् ।
ग्राहि चैव विशेषेण वेदनाविनिवारणम् ॥ २४३ ॥
सन्निपातप्रशमनं तथा वमिनिषूदनम् ।
पुरातनं नवं वापि विनिहन्त्यतिसारकम् ॥ २४४ ॥
निहन्त्यामाशयोद्भूतक्षतमांसार्बुदव्यथाम् ।
मद्यपानोत्थशोथस्य व्यथाञ्चामाशयाश्रयाम् ॥ २४५ ॥
अपानवायोर्भुक्तान्नबहिर्निःसारणात्मिकाम् ।
क्रियां विवृद्धां चपलां ह्रासयत्यविकल्पतः ॥ २४६ ॥
प्रथमायामवस्थायामतीसारैकलक्षणाम् ।
विनिहन्ति विशेषेण विषूचीमतिदारुणाम् ॥ २४७ ॥
सातिसारं सप्रलापं पर्याकुलमनिद्रया ।
निपातयेत्सन्निपातमान्त्रिकज्वरसंज्ञकम् ॥ २४८ ॥
प्रवाहिकाप्रशमन त्वन्त्रशूलावनाशनम् ।
मदात्ययहरं चैव तथोन्मादनिवर्हणम् ॥ २४९ ॥
रजःशूलप्रशमनमस्थिभग्नव्यथापहम् ।
नवामवातशमनं हितमस्थिच्युतौ तथा ॥ २५० ॥
शुष्ककासप्रशमनं गर्भस्रावनिषूदनम् ।
राजयक्ष्मसमुद्भूतनिशास्वेदनिवारणम् ॥ २५१ ॥
हृद्धमन्योर्गतेः कामं मन्दीकरणकारणात् ।
अन्त्रोत्थं फुप्फुसोत्थं वा रक्तस्रावं व्यपोहति ॥ २५२ ॥
श्लेष्माधिक्याद् बृहद्वेगं कफनिर्गमवर्जितम् ।

कण्ठकण्डूसमुत्थं वा कासं नाशयति द्रुतम् ॥ २५३ ॥
नाडीनां धमनीनां च यस्मात्तु हृदयस्य च ।
नैसर्गिकीं प्रवृद्धां वा गतिं मन्दयति द्रुतम् ॥ २५४ ॥
तस्माद्धृदयरोगेषु रसतन्त्रविचक्षणः ।
अहिफेनं प्रयुञ्जीत सावधानतया सदा ॥ २५५ ॥

अहिफेनस्य निषेधः

न बालेषु न वृद्धेषु मधुमेहप्रपीडिते ।
शीतपादकरायाञ्च विषूच्यां खलु नैव च ॥ २५६ ॥
न श्लैष्मिके तथा कासे प्रचुरश्लेष्मनिर्गमे ।
अहिफेनं वृक्कशोथे प्रयुञ्जीत न कर्हिचित् ॥ २५७ ॥

बाह्यप्रयोगे अहिफेनस्य गुणाः

अहिफेनं विशेषेण खलु बाह्यप्रयोगतः ।
फुप्फुसच्छदशोथघ्नं त्वन्त्रावरणशोथनुत् ॥ २५८ ॥
विविधोत्थानसम्भूतां विविधस्थानसंश्रयाम् ।
तथा विविधसंस्थानां वेदनां विनिहन्त्यलम् ॥ २५९ ॥
अभिष्यन्दप्रशमनं कर्णशूलनिवर्हणम् ।
क्रमिदन्तोत्थशूलघ्नं त्वामवातापहं तथा ॥ २६० ॥
गुदामयहरञ्चैव पायुस्थविदरापहम् ।
व्रणपीडाप्रशमनं नाडीनामवसादनम् ॥ २६१ ॥

अहिफेनस्य मात्रा

आरभ्य गुञ्जापादांशाद् गुञ्जैकप्रमितं शुभम् ।
अहिफेनं प्रयुञ्जीत बलकालाद्यपेक्षया ॥ २६२ ॥

अहिफेनस्य आमयिकः प्रयोगः

पिण्डखर्जूरसंयुक्तं फणिफेनं तु शीलितम् ।
नाशयत्यचिरादेव गर्भस्रावमसंशयम् ॥ २६३ ॥

अर्कमूलत्वचाचूर्णसंयुक्तं त्वहिफेनकम् ।
शीलितं त्वचिरादेव विनिहन्ति प्रवाहिकाम् ॥ २६४ ॥
एलालाक्षारजोयुक्तं फणिफेनं तु शीलितम् ।
रक्तस्रावं निहन्त्याशु फुप्फुसोत्थं सुदारुणम् ॥ २६५ ॥
रसाञ्जनसमायुक्तं शिलाघृष्टं त्वफेनकम् ।
योजितं विनिहन्त्याशु त्वभिष्यन्दभवां रुजम् ॥ २६६ ॥

वेदनान्तकरसः

अहिफेनं सुविमलं माषकत्रयसंमितम् ।
घनसारं समं तुल्यां पारसीकयवानिकाम् ॥ २६७ ॥
रससिन्दूरकञ्चैव रसमाषकसंमितम् ।
आदाय पेषयेद्यत्नाद् विजयाद्रवयोगतः ॥ २६८ ॥
निर्मापयेत्तु वटिका रक्तिकाद्वयसंमिताः ।
रसोऽयं तु समाख्यातो वेदनान्तकसंज्ञकः ॥ २६९ ॥
रसोऽयमम्भसा युक्तो विनिहन्ति विशेषतः ।
विविधोत्थानसंस्थानां वेदनां विविधाश्रयाम् ॥ २७० ॥

निद्रोदयरसः

अहिफेनं सुविमलं रसमाषकसंमितम् ।
तन्मितां च तुगाक्षीरीं रससिन्दूरकं तथा ॥ २७१ ॥
धात्रीचूर्णं तोलकैकं समादाय भिषग्वरः ।
विभावयेत्प्रयत्नेन विजयावारिणा त्रिधा ॥ २७२ ॥
निर्मापयेत्तु वटिका रक्तिद्वितयसंमिताः ।
रसोऽयं तु समाख्यातो निद्रोदयसमाह्वयः ॥ २७३ ॥
तत्तद्गदैर्वेदनयार्दितानां
पुंसां सुखस्वापकरोऽतिवेलम्
यथार्थनामा समुदीरितोऽयं

रसस्तु निद्रोदयनामधेयः ॥ २७४ ॥

सिन्दूरभूषणरसः

अहिफेनं सुविमलं रसमाषकसंमितम् ।
तत्समं सुमृतं स्वर्णं घनसारञ्च तन्मितम् ॥ २७५ ॥
रुचिरं रससिन्दूरं तोलकद्वयसंमितम् ।
एलाबीजं तुगाक्षीरीं पृथक् तोलकसंमितम् ॥ २७६ ॥
समादाय ततो मुस्तक्वाथेन परिपेष्य तु ।
निर्मापयेत्तु वटिका रक्तिकाद्वयसंमिताः ॥ २७७ ॥
रसोऽयं तु समाख्यातो नाम्ना सिन्दूरभूषणः ।
महौषधमिदं ख्यातमतीसारप्रणुत्तये ॥ २७८ ॥

हर्षोदया वटी

फणिफेनं सुविमलं तोलकैकमितं शुभम् ।
कस्तूरिकाञ्च कर्पूरं पृथक् माषत्रयोन्मितम् ॥ २७९ ॥
मरिचं रससिन्दूरं पृथक् तोलकसंमितम् ।
जातीफलं जातिपत्रीं कुङ्कुमं शुद्धमिङ्गुलम् ॥ २८० ॥
समाहरेत्पृथग्वैद्यो रसमाषकसंमितम् ।
विजयास्वरसेनेह त्रिवारं खलु भावयेत् ॥ २८१ ॥
कारयेद्वटिका यत्नाद् गुञ्जाद्वितयसंमिताः ।
वटिकेयं समाख्याता बुधैर्हर्षोदयाभिधा ॥ २८२ ॥
बलवर्णाग्निजननी प्रमदामदमर्दिनी ।
वीर्यसंस्तम्भनी ह्येषा विशेषेण प्रकीर्तिता ॥ २८३ ॥
ताम्बूलवीटिकोपेता वटीयं परिशीलिता ।
मासमात्रप्रयोगेण ददाति विपुलं बलम् ॥ २८४ ॥
पृथुसन्तानिकोपेतं प्रतप्तं माहिषं पयः ।
तथा माषान्नपिष्टानि सेवयेत्प्रत्यहं पुमान् ॥ २८५ ॥

स्मरस्मयस्मेरविलोचनाभि-
र्विलासिनीभिः परितर्जितानाम् ।
यतः प्रहर्षं प्रकरोति यूनां
हर्षोदया सार्थकनामिकातः ॥ २८६ ॥

अहिफेनासवः

अहिफेनं सुविमलं तोलकत्रयसंमितम् ।
पञ्चाशत्तोलकमितां मृतसंजीवनीं सुराम् ॥ २८७ ॥
समादाय भिषग्वर्यः काचकुप्यां तु विन्यसेत् ।
ततः काचपिधानेन रोधयेत् कूपिकामुखम् ॥ २८८ ॥
ततः कूपीं सुनिभृते स्थापयेत् सप्तवासरम् ।
अहिफेनासवो नाम्ना समाख्यातो भिषग्वरैः ॥ २८९ ॥

अस्य गुणाः

विविधोत्थानसम्भूतातीसारविनिषूदनः ।
कर्णशूलप्रशमनो दन्तशूलनिबर्हणः ॥ २९० ॥
अस्थिभग्नादिसम्भूतां तथास्थिच्युतिसम्भवाम् ।
वेदनां बहुहेतूत्थां विनिहन्त्यतिसत्वरम् ॥ २९१ ॥
विविधोत्थानजातानां वेदनानां निवृत्तये ।
महौषधमिदं ख्यातं रसतन्त्रविचक्षणैः ॥ २९२ ॥

अस्य मात्रा

आरभ्य शरबिन्दुभ्यस्तिथिबिन्दुमितं परम् ।
अहिफेनासवं युञ्ज्याद् बलकालाद्यपेक्षया ॥ २९३ ॥

अहिफेनासवस्य आमयिकः प्रयोगः

अहिफेनासवोऽयं तु मात्रया परिशीलितः ।
विविधोत्थानसम्भूतं नूतनं वा पुरातनम् ॥ २९४ ॥
सुदारुणमतीसारमतीसारैकलक्षणाम् ।
विषूचीं च निहन्त्याशु यथा सूर्यस्तमस्ततिम् ॥ २९५ ॥

बिन्दुक्षेपकयन्त्रेण निक्षिप्तः कर्णयोरयम् ।
अत्यल्पमात्रयैवेह कर्णशूलं व्यपोहति ॥ २९६ ॥
अहिफेनासवे सिक्तं तूलं तु कृमिदन्तके ।
न्यस्तं नातिचिरादेव वेदनां हन्ति तद्भवाम् ॥ २९७ ॥

मङ्गलोदया वटी

फणिफेनं सुविमलं माषकैकमितं शुभम् ।
उत्तमं घनसारं च सप्तमाषकसंमितम् ॥ २९८ ॥
सम्पेष्य वारिणा यत्नाद्वटिका रक्तिकोन्मिताः ।
कारयेद्भिषजां वर्यो रसतन्त्रविचक्षणः ॥ २९९ ॥
नामतस्तु समाख्याता वटिका मङ्गलोदया ।
प्रलापादिप्रणुत्त्यर्थं मता हिततमा परम् ॥ ३०० ॥

वेदनान्तकमलहरः

सिक्थतैलं सुविमलं ग्रहतोलकसंमितम् ।
फणिफेनञ्च विमलं ग्रहमाषकसंमितम् ॥ ३०१ ॥
फणिफेनमितञ्चैव खलु हेरम्बभूषणम् ।
समादाय भिषग्वर्यः खल्वे सम्मेलयेत्ततः ॥ ३०२ ॥
काचकुप्यां निधायाथ पिधानेन निरोधयेत् ।
मतो मलहरोऽयं तु वेदनान्तकसंज्ञकः ॥ ३०३ ॥
वेदनां शमयत्याशु गुदाङ्कुरसमाश्रयाम् ।
पायुस्थविदरोद्भूतां वेदनाञ्चातिदारुणाम् ॥ ३०४ ॥
गुदाङ्कुरप्रशमनः पायुस्थविदरान्तकः ।
मतो मलहरोऽयं तु वेदनान्तकसंज्ञकः ॥ ३०५ ॥

अथ जयपालस्य नामानि

जयपालश्च जेपालो रेचकः सारकस्तथा ।
विभेदनो मलद्रावी स एव परिकीर्तितः ॥ ३०६ ॥

जयपालस्य परिचयः

नात्युच्छ्रितो नातिह्रस्वो दन्तीजातीयकस्तरुः ।
अधुना तु विशेषेण देशे पञ्चनदाह्वये ॥ ३०७ ॥
तथैव सिंहलद्वीपे द्वीपेष्वन्येषु जायते ।
बीजं तस्य भिषग्वर्यैर्जयपाल इति स्मृतः ॥ ३०८ ॥
दन्तीबीजात् क्षुद्रतरं बीजमस्य तु यद्यपि ।
परं तीव्रतरा शक्तिर्दृश्यते मलभेदने ॥ ३०९ ॥

जयपालस्य प्रथमः शोधनप्रकारः

जयपालस्य बीजानि नवानि तु समाहरेत् ।
बाह्यत्वचमपाकृत्य द्विधा खलु विभेदयेत् ॥ ३१० ॥
हरिद्वर्णां नातिदीर्घां रसनां तु परित्यजेत् ।
पोट्टल्यामथ विन्यस्य दोलायन्त्रे विधानतः ॥ ३११ ॥
गव्यदुग्धे प्रयत्नेन यामैकं स्वेदयेत्ततः ।
एवं त्रिवारं सुस्विन्नो जयपालो विशुद्ध्यति ॥ ३१२ ॥

द्वितीयः शोधनप्रकारः

त्वग्रसज्ञाविरहितं जयपालस्य बीजकम् ।
वस्त्रंशटङ्कणोपेतं पोट्टल्यां रोधयेद् दृढम् ॥ ३१३ ॥
स्वेदयेद् दोलिकायन्त्रे द्वियामं गव्यदुग्धतः ।
इत्थं स्विन्नस्तु जेपालः शुद्धिमायात्यनुत्तमाम् ॥ ३१४ ॥

तृतीयः शोधनप्रकारः

जयपालं त्वग्रमज्ञारहितं पोट्टलीगतम् ।
दोलायन्त्रे तु यामैकं स्वेदयेद् गव्यदुग्धतः ॥ ३१५ ॥
सम्पेष्य खल्वे नूत्नेषु खर्परेषु प्रलेपयेत् ।
विज्ञाय विगतस्नेहं जयपालं समाहरेत् ॥ ३१६ ॥
न्यसेद्वा यत्नतो मध्ये मषीशोषकपत्रयोः ।
एवं तु विगतस्नेहो रेचकः शुद्धिमाप्नुयात् ॥ ३१७ ॥

जयपालस्य गुणाः

जयपालो मतस्तिक्तो विरेचनकरः परम् ।
जलोदरप्रशमनो नवज्वरनिवर्हणः ॥ ३१८ ॥
कृमिहारी कुष्ठहरो वातश्लेष्मनिषूदनः ।
वान्तिकृत्पित्तजननो वृश्चिकादिविषप्रणुत् ॥ ३१९ ॥

जयपालस्य मात्रा

अष्टमांशाद्रक्तिकाया रक्तिकाचरणांशिकम् ।
जयपालं प्रयुञ्जीत भेषजैः सह योजितम् ॥ ३२० ॥

जयपालस्य आमयिकः प्रयोगः

इच्छाभेदी रसः

टङ्कणं मरिचं सूतं गन्धकं विश्वभेषजम् ।
समाहरेद्भिषग्वर्यस्तोलकैकमितं पृथक् ॥ ३२१ ॥
विशुद्धं जयपालं च तोलकत्रयसंमितम् ।
समादाय सुसम्पेष्य सार्द्धगुञ्जैकसंमिताः ॥ ३२२ ॥
वटिकाः कारयेद्वैद्यो द्विगुञ्जप्रमितास्तथा ।
इच्छाभेदीरसोऽयं तु नामतः परिकीर्तितः ॥ ३२३ ॥
शीततोयेन वटिकां सार्द्धगुञ्जैकसंमिताम् ।
मृदुकोष्ठे नागरिके सितया विनियोजयेत् ॥ ३२४ ॥
क्रूरकोष्ठेषु शूरेषु ग्रामीणेषु तु कोविदः ।
प्रयुञ्जीत सितोपेतां वटीं गुञ्जद्वयोन्मिताम् ॥ ३२५ ॥
वटीं भुक्त्वा जलं शीतं यावद्वारं तु पीयते ।
तावद्वारं विरिच्यन्ते मनुजा नात्र संशयः ॥ ३२६ ॥
विरेचननिवृत्त्यर्थं काममुष्णोदकं पिबेत् ।
विरेकान्ते प्रयोक्तव्यं पथ्यं तक्रौदनं खलु ॥ ३२७ ॥
प्रशान्तरेचनः पुमान् प्रयत्नतस्तु यामकम् ।
पिबेन्न शीतलं जलं विरिच्यते पुनर्यतः ॥ ३२८ ॥

जलोदरारिरसः

सुमृतं रविलोहञ्च पिप्पलीं रसगन्धकम् ।
मरिचं रजनीचूर्णं पृथक् तोलकसंमितम् ॥ ३२९ ॥
नवं विशुद्धं जैपालं युगतोलकसंमितम् ।
आदाय वारत्रितयं त्रिवृत्क्वाथेन भावयेत् ॥ ३३० ॥
निर्मापयेत्प्रयत्नेन वटिका रक्तिकोन्मिताः ।
जलोदरारिर्नाम्नायं रसः ख्यातो भिषग्वरैः ॥ ३३१ ॥
रसोऽयं रेचनकरो जलोदरहरस्तथा ।
विरेकस्तम्भनार्थञ्च हितं दध्योदनं मतम् ॥ ३३२ ॥

ज्वरारिरसः

हिङ्गुलं पिप्पली शुण्ठी मरिचं विश्वभेषजम् ।
सौभाग्यममृतं धात्री पृथक् तोलकसंमितम् ॥ ३३३ ॥
जयपालं पलमितं नवं सुविमलीकृतम् ।
सम्पेष्यार्द्रकतोयेन वटीं गुञ्जकसंमिताम् ॥ ३३४ ॥
निर्मापयेत्प्रयत्नेन, ज्वरारिर्नामतो मतः ।
समाख्यातो विशेषेण नवज्वरनिवर्हणः ॥ ३३५ ॥

अञ्जनभैरवरसः

सूतगन्धकणाटङ्कं पृथगेकैकभागिकम् ।
जयपालं सुविमलं सर्वेषामर्द्धभागिकम् ॥ ३३६ ॥
आदाय निम्बुकद्रावैः पेषयेदतियत्नतः ।
छायायामथ संशोष्य काचकुप्यान्तु विन्यसेत् ॥ ३३७ ॥
रसोऽयं तु समाख्यातो नाम्ना ह्यञ्जनभैरवः ।
अञ्जनाद्विनिहन्त्याशु सन्निपातं सुदारुणम् ॥ ३३८ ॥

वृश्चिकविषहरः प्रलेपः

जलपिष्टस्तु जैपालो यत्नतः परिलेपितः ।
विषं वृश्चिकदंशोत्थं विनिहन्ति विशेषतः ॥ ३३९ ॥

जयपालयुक्तयोगानां निषेधः

बाले वृद्धे कृशे क्षीणे गर्भिण्याञ्च गुदामये ।
प्रवाहिकायां, शोथे च त्वामपक्वाशयाश्रिते ॥ ३४० ॥
गुदभ्रंशे चान्त्रशोथयुते बद्धगुदोदरे ।
तथान्त्रच्छदशोथे च जयपालं न योजयेत् ॥ ३४१ ॥

अथ धत्तूरस्य नामानि

धत्तूरः कितवोन्मत्तौ धूर्तश्च कनकाभिधः ।
शठश्च कण्टकफलः कीर्तितः शिवशेखरः ॥ ३४२ ॥

धत्तूरस्य परिचयः

धत्तूरः क्षुपजातीयः सकण्टकफलस्तथा ।
सुलभो, भिद्यते चायं पुष्पवर्णविभेदतः ॥ ३४३ ॥
धत्तूराः सर्व एवैते मताः समगुणान्विताः ।
विशेषतस्तु सर्वेषु कृष्णपुष्पो गुणाधिकः ॥ ३४४ ॥
पत्रं मूलं फलं बीजं तथा मृदुदलद्रवः ।
प्रयुज्यते विशेषेण धत्तूरस्य भिषग्वरैः ॥ ३४५ ॥

धत्तूरबीजानां प्रथमः शोधनप्रकारः

धत्तूरबीजान्यादाय पोट्टल्यां रोधयेत्ततः ।
स्वेदयेद्दोलिकायन्त्रे गव्यदुग्धेन यामकम् ॥ ३४६ ॥
संस्वेद्य क्षालयेदुष्णतोयेन तु ततो भिषक् ।
इत्थं शुद्धानि बीजानि वीतशङ्कः प्रयोजयेत् ॥ ३४७ ॥

द्वितीयः शोधनप्रकारः

नवानि धूर्तबीजानि दोलिकायन्त्रयोगतः ।
स्वेदयेद्द्रव्यमूत्रेण यामैकं पोट्टलीगतम् ॥ ३४८ ॥

खल्वेऽथ खलु सम्पेष्य वस्त्रपूतं तु कारयेत् ।
इत्थं शुद्धानि बीजानि वीतशङ्कः प्रयोजयेत् ॥ ३४९ ॥

धत्तूरस्य गुणाः

धत्तूरः कटुकश्चोष्णस्तथा शोथनिषूदनः ।
कृमिघ्नः कुष्ठशमनो विशेषाज्ज्वरनाशनः ॥ ३५० ॥
परं त्वग्दोषशमनस्तथा कण्डूतिकापहः ।
भ्रमकृन्मोहजननः समाख्यातो भिषग्वरैः ॥ ३५१ ॥

धत्तूरस्य विशिष्टा गुणाः

धत्तूरः श्वासशमनः कफसंशोषणः परम् ।
आक्षेपोन्मादहरणः स्तम्भनो हर्षवर्द्धनः ॥ ३५२ ॥
अभिष्यन्दप्रशमनः कर्णशूलनिवर्हणः ।
सवेदनार्बुदहरो लसीकाग्रन्थिशोथहृत् ॥ ३५३ ॥
कृमिदन्तव्यथाहारी त्वामवातव्यथाहरः ।
स्तनशोथप्रशमनः प्रलापपरिकृन्तनः ॥ ३५४ ॥
भूतापहस्तथोन्मत्तसारमेयविषापहः ।
कटिव्यथाहरः कान्ताकामोन्मादविनाशनः ॥ ३५५ ॥
निम्ननिर्दिष्टरोगेषु धत्तूरोऽत्यल्पमात्रया ।
विशेषेण प्रयोक्तव्य इति सद्भिषजां मतम् ॥ ३५६ ॥
विविधस्थानसम्भूतां खलु शोथसमुत्थिताम् ।
वेदनां विविधाकारां विनिहन्ति विशेषतः ॥ ३५७ ॥
प्रासूतिकज्वरोत्थं वा सन्निपातसमुत्थितम् ।
भृशदुर्गन्धपीताभकृष्णवर्णमलान्वितम् ॥ ३५८ ॥
सलिलाभं विशेषेण विनिहन्त्यतिसारकम् ।
कण्ठशुण्डीश्च हन्त्याशु भृशदारुणवेदनाम् ॥ ३५९ ॥
मसूरिकादौ स्फोटानामस्फुटोद्गमहेतुजम् ।

आक्षेपं च प्रलापं च शमयत्यविकल्पतः ॥ ३६० ॥
विसर्पोत्थं ज्वरोत्थं वा सन्निपातसमुत्थितम् ।
विनिहन्ति विशेषेण प्रलापादीनुपद्रवान् ॥ ३६१ ॥
सन्निपातसमुद्भूतां शय्यातः खलु रोगिणाम् ।
पलायनात्मिकां चेष्टां विनिवारयति द्रुतम् ॥ ३६२ ॥
प्रसवोत्तरकाले वा सन्निपातज्वरे खलु ।
मूत्रानुत्पत्तिहेतूत्थं मूत्ररोधं व्यपोहति ॥ ३६३ ॥
नाडीदौर्बल्यजनितं वक्षस्याकुञ्चनान्वितम् ।
तारालापयुतं हन्ति श्वासं तु तमकाभिधम् ॥ ३६४ ॥
कफजान् कफपित्तोत्थान् रोगान् वा कफवातजान् ।
विनिहन्ति विशेषेण ह्यूर्ध्वजत्रुसमाश्रितान् ॥ ३६५ ॥
ग्रन्थिकज्वरसम्भूतं कक्षावङ्क्षणकण्ठजम् ।
ग्रन्थीनां श्वयथुं हन्ति ज्वरश्चैव तदाश्रितम् ॥ ३६६ ॥

धत्तूरस्य मात्रा

आरभ्य गुञ्जापादांशाद्गुञ्जार्धं तु विशोधितम् ।
धत्तूरबीजचूर्णन्तु प्रयुञ्जीत विधानवित् ॥ ३६७ ॥
गुञ्जार्द्धतः समारभ्य सार्द्धगुञ्जैकसंमितम् ।
चूर्णं धत्तूरपत्राणां प्राणाचार्यः प्रयोजयेत् ॥ ३६८ ॥

धत्तूरस्य आमयिकः प्रयोगः

धत्तूरमूलं पत्रं वा सम्पेष्य विमलाम्भसा ।
कवोष्णस्तूपनाहेन वृद्धशोथं व्यपोहति ॥ ३६९ ॥
धूर्तपत्रद्रवे पिष्टं निफेनं सरसाञ्जनम् ।
विनिहन्ति विशेषेण नेत्राभिष्यन्दमुल्बणम् ॥ ३७० ॥
धत्तूरपत्रस्वरसः कवोष्णः स्वल्पमात्रया ।

निक्षिप्तो नाशयत्याशु कर्णशूलमसंशयम् ॥ ३७१ ॥
धूर्तबीजानि सम्पेष्य वटिका खलु निर्मिता ।
क्रिमिदन्तस्थरन्ध्रस्था वेदनां हन्ति दारुणाम् ॥ ३७२ ॥
धूर्तपत्रं निशाफेनयुतं पिष्ट्वामलाम्भसा ।
प्रलेपान्नाशयत्याशु स्तनश्वयथुवेदनाम् ॥ ३७३ ॥
धत्तूरदलकल्केन तैलपाकविधानतः ।
साधितं सार्षपं तैलं हन्ति पेशीगतानिलम् ॥ ३७४ ॥
कटिवातव्यथां चैव सन्धिवातभवां व्यथाम् ।
यूकालिक्षादिकं चैव हन्ति केशेषु मर्दनात् ॥ ३७५ ॥
धत्तूरफलचूर्णं तु काकोदुम्बरिकान्वितम् ।
शीलितं तण्डुलाम्भोभिः सारमेयविषं हरेत् ॥ ३७६ ॥
सगुडः सार्कदुग्धश्च कृष्णधूर्तदलद्रवः ।
शीलितो विनिहन्त्येव सारमेयविषं द्रुतम् ॥ ३७७ ॥
धूर्तपत्रं साहिफेनं जलेन परिपेषितम् ।
लेपनान्नाशयत्याशु सर्वश्वयथुवेदनाम् ॥ ३७८ ॥

प्रलापान्तकरसः

धत्तूरबीजं विमलं नवमाषकसंमितम् ।
रसेश्वरं गन्धकं च पृथक् षण्माषकोन्मितम् ॥ ३७९ ॥
कटुत्रिकं च सौभाग्यं पृथक् तोलकसंमितम् ।
आदाय पेषयेद्यत्नात् कामं निम्बूकवारिणा ॥ ३८० ॥
निर्मापयेत्ततो युक्त्या वटिका रक्तिकोन्मिताः ।
रसोऽयं तु समाख्यातः प्रलापान्तकसंज्ञकः ॥ ३८१ ॥
विशेषतो मतोऽयं तु प्रलापपरिकृन्तनः ।
दीपनः पाचनश्चैव वह्निमान्द्यप्रणाशनः ॥ ३८२ ॥

उन्मादगजाङ्कुशः

धूर्तबीजं रसं गन्धं वङ्गं रौप्यं च मारितम् ।
समाहरेद्भिषग्वर्यः सर्वं तु समभागिकम् ॥ ३८३ ॥
कन्याम्भसा विमर्द्याथ वटिका रक्तिकोन्मिताः ।
निर्मापयेत्प्रयत्नेन रसतन्त्रविशारदः ॥ ३८४ ॥
रसोऽयं तु समाख्यातो ह्युन्मादद्विरदाङ्कुशः ।
हन्त्युन्मादं विशेषेण तथा ज्वरनिवर्हणः ॥ ३८५ ॥

ग्रन्थिशोथनिवारिका वर्तिका

धत्तूरस्य फलं त्वेकं तथैव विषतिन्दुकम् ।
तोलकप्रमितश्चैव चूर्णितं कृष्णजीरकम् ॥ ३८६ ॥
सहासारं मोचरसं कृष्णजीरकभागिकम् ।
समादाय स्नुहीपत्ररसेन परिमर्दयेत् ॥ ३८७ ॥
वर्तिकाः कारयेद्वैद्यो माषकत्रयसंमिताः ।
ग्रन्थिकज्वरसम्भूतग्रन्थिशोथनिवारिकाः ॥ ३८८ ॥
वर्तिकैका शिलायां तु सङ्घृष्य विमलाम्भसा ।
प्रलिप्ता शमयत्याशु ग्रन्थिशोथं सुदारुणम् ॥ ३८९ ॥
दिने वारद्वयं वापि वारत्रयमथापि वा ।
सङ्घृष्य वर्तिकामेकां लेपयेद्भिषजां वरः ॥ ३९० ॥

अथ भङ्गाया नामानि

भङ्गा भङ्गी मातुलानी मादिनी मादिका तथा ।
मातुली विजया तन्द्राकारिणी बहुवादिनी ॥ ३९१ ॥

भङ्गायाः परिचयः

भङ्गा तु क्षुपजातीया सर्वत्र सुलभा मता ।
अतः परिचयस्तस्या विस्तरान्न प्रदर्शितः ॥ ३९२ ॥
दलद्रवो दलं बीजं मातुलान्या विशेषतः ।

प्रयुज्यते भेषजेषु कामं रसचिकित्सकैः ॥ ३९३ ॥

भङ्गायाः प्रथमः शोधनप्रकारः

मातुलानीं शुष्कपत्रां सलिले तु निमज्जयेत् ।
निष्पीड्य शुष्कां गव्याज्ये भर्जयेन्मन्दवह्निना ॥ ३९४ ॥
सुभृष्टामथ विज्ञाय सत्वरं तु समाहरेत् ।
इत्थं विशोधितां भङ्गां सर्वत्र विनियोजयेत् ॥ ३९५ ॥

द्वितीयः शोधनप्रकारः

भङ्गां विशुष्कामादाय बब्बूलत्वक्कषायतः ।
स्वेदयेद् घटिकार्द्धं तु मध्यमानलयोगतः ॥ ३९६ ॥
विज्ञाय विजयां स्विन्नां घर्मे खलु विशोषयेत् ।
एवं संस्वेदिता भङ्गा शुद्धिमायात्यनुत्तमाम् ॥ ३९७ ॥
एवं विशोधितां भङ्गां पिष्ट्वा गोदुग्धयोगतः ।
कामोद्दीपनयोगेषु विशेषेण नियोजयेत् ॥ ३९८ ॥

भङ्गाया गुणाः

भङ्गा तिक्ता लघुस्तीक्ष्णा ग्राहिणी कफहारिणी ।
दीपनी पाचनी चैव पित्तला मदकारिणी ॥ ३९९ ॥

भङ्गाया विशिष्टा गुणाः

भङ्गा क्षुद्दीपनी चैव ध्वजभङ्गहरा परम् ।
स्वप्नमेहहरा चैव शुक्रस्तम्भनकारिणी ॥ ४०० ॥
निद्राप्रदायिनी कामं कामोद्दीपनकारिणी ।
प्रलापनाशिका चैव धनुःस्तम्भहरा तथा ॥ ४०१ ॥
अन्त्रशूलहरा चैव वृक्कशूलप्रणाशिनी ।
पित्तशोषजशूलघ्नी त्वामाशयबलप्रदा ॥ ४०२ ॥
अजीर्णजातिसारघ्नी तथाजीर्णनिवारिणी ।
उन्मादनाशिनी चैव वृक्कशोथव्यथाहरा ॥ ४०३ ॥
मूत्रला रक्तसंयुक्तमूत्रस्रावनिवारिका ।

विचित्रानन्दजननस्वप्नसन्तानकारिका ॥ ४०४ ॥
अर्शोव्यथाहरा चैव किञ्चिज्ज्वरनिवारिका ।
व्रणमेहसमुद्भूतशिश्नोत्थानव्यथाहरा ॥ ४०५ ॥
नाडीदौर्बल्यसम्भूतं तथाक्षेपसमुत्थितम् ।
रजःशूलं निहन्त्याशु भास्करस्तिमिरं यथा ॥ ४०६ ॥
आमाशयोत्थशूलघ्नी यक्ष्मकासहरा परम् ।
बस्त्याक्षेपहरा चैव साक्षेपतमकापहा ॥ ४०७ ॥
दारुणाक्षेपसंयुक्तमतिकष्टप्रदायिनम् ।
परं सङ्क्रामकं कासं विनिहन्ति विशेषतः ॥ ४०८ ॥
रजोनिवृत्तिकालोत्थां प्रौढावस्थाक्षये तथा ।
शीर्षव्यथां तु नारीणां विनिहन्ति सुदारुणाम् ॥ ४०९ ॥
गर्भस्रावसमुद्भूतां मासिकस्रावकालजाम् ।
रक्तप्रदरजां वापि वृद्धां रक्तस्रुतिं जयेत् ॥ ४१० ॥
आलपन् विस्मरेद् यत्र स्वकीयं पूर्वभाषितम् ।
दौर्बल्यं मानसोद्भूतं विनाशयति सत्वरम् ॥ ४११ ॥
अन्नजातं तु निखिलं भुक्तं यत्र न जीर्यति ।
अजीर्णं नाशयत्याशु सारुचिं क्षुद्विवर्जितम् ॥ ४१२ ॥
अर्द्धावभेदकोपेतकाचरोगनिवारिका ।
सङ्कोचनी तथा श्रोत्रदृष्टिशक्तिविवर्द्धिनी ॥ ४१३ ॥

भङ्गाया मात्रा

द्विगुञ्जतः समारभ्य चतुर्गुञ्जमितां परम् ।
भङ्गां खलु प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ४१४ ॥

भङ्गाया आमयिकः प्रयोगः

आर्द्रा विशुष्का वा भङ्गा त्वजादुग्धेन पेषिता ।
प्रलिप्ता पादतलयोः निद्रां जनयति द्रुतम् ॥ ४१५ ॥

भङ्गा सुश्लक्ष्णसंपिष्टा शिलायां विमलाम्भसा ।
कोष्णोपनाहयोगेन कथितार्शोव्यथाहरा ॥ ४१६ ॥
धूम्रपानविधानेन भङ्गा युक्ताथवाशिता ।
साक्षेपं तमकश्वासं कासं संक्रामकं हरेत् ॥ ४१७ ॥

मदनोदयमोदकः

जातीपत्रीफले मांसी लवङ्गं चन्द्रकुङ्कुमम् ।
एला दारुसिता व्योषं वङ्गं जीरकमभ्रकम् ॥ ११८ ॥
लोहं च रससिन्दूरं पृथक् तोलकसंमितम् ।
शतावरी गोक्षुरको द्राक्षा कर्कटशृङ्गिका ॥ ४१९ ॥
बलान्मगुप्ता कुष्ठं च वृद्धदारकबीजकम् ।
चूर्णीकृतं सर्वमेतत् पृथक् कर्षद्वयोन्मितम् ॥ ४२० ॥
भङ्गा विशोधिता चैव पूर्वचूर्णार्द्धसंमिता ।
सितां सर्वद्विगुणितां दत्त्वा रसविशारदः ॥ ४२१ ॥
आरभ्य माषत्रितयाद्रसमाषकसंमितान् ।
निर्मापयेन्मोदकांस्तु खलु मोदकपाकवित् ॥ ४२२ ॥
नामतोऽयं समाख्यातो मदनोदयमोदकः ।
मदनोद्दीपनकरो विशेषात्परिकीर्तितः ॥ ४२३ ॥
घृतं परं घनीभूतं सितैलासंयुतं पयः ।
अनुपाने प्रयोक्तव्यं तदतीव हि बृंहणम् ॥ ४२४ ॥
मोदकस्यास्य सततं मासत्रयनिषेवणात् ।
कामरूपो भवेन्मर्त्यस्तथा भीमपराक्रमः ॥ ४२५ ॥
स्मरस्मयस्मेरदृशो नवयौवनघूर्णिताः ।
प्रमदास्तोषयत्यस्य सेवकोऽपतितध्वजः ॥ ४२६ ॥

त्रैलोक्यविजया वटी

भङ्गासत्वं भागिकं तु पूर्वोक्तविधिसाधितम् ।

तुगाक्षीरीरजश्चैव भागत्रितयसंमितम् ॥ ४२७ ॥
संमर्द्य वारिणा खल्वे वटिका रक्तिकोन्मिताः ।
निर्मापयेत्प्रयत्नेन रसतन्त्रविचक्षणः ॥ ४२८ ॥
वटिकेयं समाख्याता त्रैलोक्यविजयाभिधा ।
प्रलापोन्मादशमनी वृक्कशूलप्रणाशिनी ॥ ४२९ ॥
रजःशूलहरा चैव यक्ष्मकासनिवारिका ।
अतीसारप्रशमनी स्वप्नमेहनिषूदनी ॥ ४३० ॥

त्रैलोक्यसंमोहनरसः

त्रैलोक्यविजयां शुद्धां भानुतोलकसंमिताम् ।
हिङ्गुलं रससिन्दूरं घनसारं लवङ्गकम् ॥ ४३१ ॥
अभ्रकं शङ्खभसितं पृथक् तोलकसंमितम् ।
गोक्षुरो वानरीबीजं तथा कर्कटशृङ्गिका ॥ ४३२ ॥
चूर्णीकृतं पृथक् चैतत्तोलकद्वयसंमितम् ।
समादाय भिषग्वर्यः सप्तधा सुविधानतः ॥ ४३३ ॥
भङ्गायाः शतपुष्पाश्च स्वरसेन विभावयेत् ।
निर्मापयेत्त वटिका रक्तित्रितयसंमिताः ॥ ४३४ ॥

यतः स्मरस्यापि कटाक्षपातैः
स्त्रीणां तु संमोहनकारिणीनाम् ।
सम्मोहनं वै विदधाति तस्मात्
त्रैलोक्यसंमोहनसंज्ञकोऽयम् ॥ ४३५ ॥
वामावश्यकरः परं रुचिकरः क्लैब्यापहारी परं
हर्षोत्साहकरो धृतिस्मृतिकरः शुक्रातिसंस्तम्भनः ।
पुत्रापत्यकरो रतिप्रियकरः सर्वत्र सौख्याकरः
सेव्योऽयं खलु कामिभी रसवरस्त्रैलोक्यसंमोहनः ॥४३६॥

अथ गुञ्जाया नामानि

गुञ्जा रक्ता रक्तिका च ताम्रिका कृष्णचूडिका ।
उच्चटा शीतपाकी च भिल्लभूषणिकारुणा ॥ ४३७ ॥
चूडामणिस्ताम्रिका च शिखण्डी कृष्णला तथा ।
काकणन्ती च काम्भोजी सैवेह परिकीर्तिता ॥ ४३८ ॥

गुञ्जायाः परिचयः

मिष्टमूलदला रम्या लता तु शीतपाकिनी ।
कृष्णचूडफला गुञ्जा सर्वेषां विदिता मता ॥ ४३९ ॥
पत्रं पत्ररसो मूलं बीजं चास्याः प्रयुज्यते ।
बीजमेव भिषग्वर्यैर्मतं तूपविषाह्वयम् ॥ ४४० ॥

गुञ्जाबीजानां शोधनप्रयोजनम्

गुञ्जाबीजं वान्तिकरं तीव्ररेचनकृत्तथा ।
शीलितं त्वतिमात्रं तु गुञ्जाबीजमशोधितम् ॥ ४४१ ॥
विषूचीलक्षणाकारां करोति हि विषक्रियाम् ।
अतो दोषनिवृत्त्यर्थं गुञ्जाबीजानि शोधयेत् ॥ ४४२ ॥

गुञ्जाबीजानां प्रथमः शोधनप्रकारः

नवानि गुञ्जाबीजानि चूर्णीकृत्य प्रयत्नतः ।
द्विगुणीकृतवस्त्रान्तः पोट्टल्यां रोधयेत्ततः ॥ ४४३ ॥
स्वेदयेद्दोलिकायन्त्रे द्वियामं गव्यदुग्धतः ।
इत्थं तु गुञ्जाबीजानि शुद्धिमायान्त्यनुत्तमाम् ॥ ४४४ ॥

द्वितीयः शोधनप्रकारः

गुञ्जाबीजं पोट्टलीस्थं दोलायन्त्रे सकाञ्जिकम् ।
यामकं स्वेदनादेव शुद्धिमायात्यनुत्तमाम् ॥ ४४५ ॥

गुञ्जाया गुणाः

गुञ्जाबीजं सुविमलं कामोद्दीपनमुत्तमम् ।
ऊरुस्तम्भहरं चैव बलसम्वर्द्धनं परम् ॥ ४४६ ॥

गुञ्जापत्रं शोथहरं त्वामवातप्रणाशनम् ।
तथैव च समाख्यातं वेदनाहरमुत्तमम् ॥ ४४७ ॥
गुञ्जापलाशनिर्यासो मधुरः कटुकस्तथा ।
स्वरभेदप्रशमनः शोथघ्नो वेदनाहरः ॥ ४४८ ॥
गुञ्जामूलं सुमधुरं कफनिःसारकं परम् ।
वातपित्तहरं चैव तृष्णाशोथनिवारणम् ॥ ४४९ ॥
स्वरभेदप्रशमनं तथा वान्तिविनाशनम् ।
मूत्रकृच्छ्रप्रशमनं बलवर्णकरं परम् ॥ ४५० ॥
कासघ्नं शुक्रजननं रुच्यं विषविनाशनम् ।
वृष्यं व्रणापहं चैव विशेषात्परिकीर्तितम् ॥ ४५१ ॥
गुञ्जामूलं विशेषेण मधुयष्टिगुणोपमम् ।
अत एवाधुना तनु तदभावे प्रयुज्यते ॥ ४५२ ॥

शुद्धगुञ्जाबीजस्य मात्रा

गुञ्जार्द्धतः समारभ्य सार्द्धगुञ्जैकसंमितम् ।
गुञ्जाबीजं सुविमलं प्रयुञ्जीत विधानवित् ॥ ४५३ ॥

गुञ्जाया आमयिकः प्रयोगः

गुञ्जाबीजं शिलापिष्टं वारिणा परिलेपितम् ।
निहन्त्युत्पिष्टसन्धिस्थां दारुणां शोथवेदनाम् ॥ ४५४
इन्द्रलुप्तं पक्षवधं तत्तदङ्गसमाश्रितम् ।
गृध्रसीं दारुणां चैव सुघोरमवबाहुकम् ॥ ४५५ ॥
गुञ्जाबीजं शिलापिष्टं वारिणा चित्रकान्वितम् ।
प्रलिप्तं शमयत्येव श्वित्रकुष्ठं विशेषतः ॥ ४५६ ॥

प्रथमं गुञ्जाद्यतैलम्

गुञ्जाबीजं शिलापिष्टं कल्कीकृतमनुत्तमम् ।
तिलतैलं भृङ्गराजपत्रनिर्यासकं तथा ॥ ४५७ ॥
चतुर्गुणोत्तरं चैव मानमेषां प्रकल्पयेत् ।

तैलपाकविधानेन तैलमेभिस्तु साधितम् ॥ ४५८ ॥
निहन्त्यभ्यङ्गयोगेन कण्डूकुष्ठादिकामयान् ।
तथा दारुणकं हन्ति विविधा वातवेदनाः ॥ ४५९ ॥

द्वितीयं गुञ्जाद्यतैलम्

गुञ्जाबीजशिफाभिस्तु तैलं द्विगुणवारिणा ।
विपाचितं गण्डमालां निहन्त्यभ्यङ्गयोगतः ॥ ४६० ॥
एरण्डतैलसंयुक्तं गुञ्जापत्रं सुपेषितम् ।
कोष्णोपनाहयोगेन वेदनाहरमुत्तमम् ॥ ४६१ ॥
गुञ्जापत्ररसे पक्वं तैलमभ्यङ्गयोजितम् ।
शोथप्रशमनं चैव वेदनाहरमीरितम् ॥ ४६२ ॥
गुञ्जापत्रं नवं वापि विशुष्कं चूर्णितं भृशम् ।
नाशयत्यचिरादेव स्वरभेदमसंशयम् ॥ ४६३ ॥

गुञ्जाजीवनरसः

गुञ्जाबीजं सुविमलं सार्द्धतोलकसंमितम् ।
तन्मितं रससिन्दूरं तयोश्च द्विगुणीकृताम् ॥ ४६४ ॥
विशोधितां तु विजयां समादाय भिषग्वरः ।
सम्पेष्य वटिकाः कार्या गुञ्जाद्वितयसंमिताः ॥ ४६५ ॥
रसोऽयं तु समाख्यातो गुञ्जाजीवनसंज्ञकः ।
बलसञ्जननश्चैव मदनोद्दीपनः परम् ॥ ४६६ ॥

गुञ्जाभद्ररसः

गुञ्जाबीजं सुविमलं रसतोलकसंमितम् ।
जयन्ती निम्बबीजं च रसतोलकसंमितम् ॥ ४६७ ॥
तोलकत्रितयं सूतं गन्धं द्वादशतोलकम् ।
समादाय ततः खल्वे पेषयेदतियत्नतः ॥ ४६८ ॥
काकमाचीजयाधूर्तनिम्बूकद्रवयोगतः ।
वटिकाः कारयेद्यत्नाद्गुञ्जाद्वितयसंमिताः ॥ ४६९ ॥

रसोऽयं तु समाख्यातो गुञ्जाभद्रसमाह्वयः ।
ऊरुस्तम्भं महाघोरं विनिहन्ति विशेषतः ॥ ४७० ॥

अथ भल्लातकस्य नामानि

भल्लातकस्तु भल्लातस्तपनोऽरुष्करोऽग्निकः ।
कृमिघ्नश्चैव वातारिः स एव परिकीर्तितः ॥ ४७१ ॥

भल्लातकस्य परिचयः

भल्लातकः समाख्यातः शाखिजातीयकस्तरुः ।
जायतेऽद्रिषु बाहुल्याद् फलं तस्य प्रयुज्यते ॥ ४७२ ॥

ग्राह्यभल्लातकस्य स्वरूपम्

भल्लातकानि पक्वानि नीरक्षिप्तानि यानि तु ।
निमज्जन्ति हि तान्येव ग्राह्याणीह विशुद्धये ॥ ४७३ ॥

भल्लातकस्य शोधनप्रयोजनम्

भल्लातकस्य तु रसः स्वल्पोऽपि पतितस्त्वचि ।
करोति दारुणं दाहं व्रणं चैवातिदारुणम् ॥ ४७४ ॥
शोथं सञ्जनयत्याशु तीव्रदाहसमन्वितम् ।
मुखे निपतितो घोरं वीसर्पं प्रकरोति वै ॥ ४७५ ॥
उक्तोपद्रवशान्त्यर्थं फलं भल्लातकोद्भवम् ।
शोधयेद्भिषजां वर्यः सावधानतया सदा ॥ ४७६ ॥

भल्लातकस्य प्रथमः शोधनप्रकारः

इष्टकाचूर्णसंयुक्तं फलं भल्लातकोद्भवम् ।
पोट्टलीमध्यनिहितं घर्षयेन्नातिवेगतः ॥ ४७७ ॥
ततः प्रतप्ततोयेन क्षालयेदतियत्नतः ।
इत्थं तैलत्वचाहीनं भल्लातं शुद्धिमाप्नुयात् ॥ ४७८ ॥

द्वितीयः शोधनप्रकारः

भल्लातकफलानीह नारिकेलाम्बुयोगतः ।
स्विन्नानि दोलिकायन्त्रे शुद्धिमायान्त्यनुत्तमाम् ॥ ४७९ ॥

भल्लातकस्य गुणाः

भल्लातकः कटुस्तिक्त अत्युष्णः कृमिनाशनः ।
रसायनो बलकरो गुल्मार्शोग्रहणीहरः ॥ ४८० ॥
कुष्ठामयप्रशमनः कफवातोदरापहः ।
विबन्धाध्मानशूलघ्नः श्वासादिगदनाशनः ॥ ४८१ ॥

भल्लातकस्य मात्रा

गुञ्जैकतः समारभ्य गुञ्जात्रितयसंमितम् ।
भल्लातकं प्रयुञ्जीत बलकालाद्यपेक्षया ॥ ४८२ ॥

भल्लातकस्य आमयिकः प्रयोगः

हरीतकीतिलगुडयुतं भल्लातकं समम् ।
निषेवितं प्लीहपाण्डुज्वरघ्नं श्वासकासनुत् ॥ ४८३ ॥

भल्लातकरसायनम्

शुण्ठीविडङ्गलोहाढ्यं भल्लातं विमलीकृतम् ।
मध्वाज्यसंयुतं युक्तं मासत्रितयसेवनात् ॥ ४८४ ॥
रक्तवृद्धिं करोत्येतद् बलं चैव विवर्द्धयेत् ।
नवयौवनलावण्यं जनयत्यविकल्पतः ॥ ४८५ ॥
समाख्यातमिदं नाम्ना भल्लातकरसायनम् ।
सेवितव्यं सदा यत्नाद्रक्ताल्पत्वनिवृत्तये ॥ ४८६ ॥

अथ करवीरस्य नामानि

करवीरो हयारिश्च हयमारोऽश्वमारकः ।
अश्वान्तकोऽश्वहाश्वघ्नो मतश्चण्डातकस्तथा ॥ ४८७ ॥
करवीरः श्वेतपीतरक्तपुष्पविभेदतः ।
त्रिविधस्तु समाख्यातो वैद्यविद्याविशारदैः ॥ ४८८ ॥

करवीरस्य परिचयः

करवीरः समाख्यातः सर्वत्र सुलभस्तरुः ।
भिषग्वरैरस्य मूलं मतं तूपविषाह्वयम् ॥ ४८९ ॥

करवीरस्य मूलत्वक् तद्रसो वा निषेवितः ।
करोति हि विशेषेण मोहदाहभ्रमादिकान् ॥ ४९० ॥
करवीरकमूलन्तु बाह्ययोगे प्रयुज्यते ।
आभ्यन्तरः प्रयोगोऽस्य न कुत्रापि प्रकीर्तितः ॥ ४९१ ॥

करवीरस्य बाह्यप्रयोगः

करवीरकमूलं तु वारिणा परिपेषितम् ।
समाख्यातं प्रलेपेन ह्युपदंशव्रणापहम् ॥ ४९२ ॥
करवीरदलद्रावो नेत्रयोर्विनियोजितः ।
अभिष्यन्दं जलस्रावं व्यपोहति विशेषतः ॥ ४९३ ॥

करवीराद्यतैलम्

करवीरशिफाक्वाथविपक्वं तिलतैलकम् ।
कल्कीकृतविडङ्गाग्नियोगतो गोजलान्वितम् ॥ ४९४ ॥
करवीराद्यतैलं तु समाख्यातं भिषग्वरैः ।
अभ्यङ्गाद्विनिहन्त्याशु त्वग्गतान् विविधान् गदान् ॥४९५॥

अथ लाङ्गलिकाया नामानि

लाङ्गली हलिनी सीरी विशल्या कलिकारिका ।
अग्निजिह्वा स्वर्णपुष्पा दीप्ता नक्तेन्दुपुष्पिका ॥ ४९६ ॥
विद्युज्ज्वाला वह्निशिखा लाङ्गल्या गर्भपातिनी ।
हली लाङ्गलिनी चैव समाख्याता भिषग्वरैः ॥ ४९७ ॥

लाङ्गलिकायाः परिचयः

लाङ्गली स्वर्णकुसुमा लता तु सुमनोहरा ।
सीरमूला विशेषेण मता नक्तेन्दुपुष्पिका ॥ ४९८ ॥
लाङ्गल्या मूलमेवेह मतं तूपविषाह्वयम् ।
तदेव च विशेषेण योगेषु विनियुज्यते ॥ ४९९ ॥

लाङ्गलिकायाः आभ्यन्तरप्रयोगे दोषाः

शुष्का वार्द्रा लाङ्गलिनी स्वल्पापि परिशीलिता ।
करोति दारुणं दाहं मोहातीसारविभ्रमम् ॥ ५०० ॥

लाङ्गलिकाया गुणाः

लाङ्गली कटुका चोष्णा कफवातापहा सरा ।
अपरापातनी चैव सद्यःप्रसवकारिका ॥ ५०१ ॥
शोथापहा विशेषेण मता व्रणनिवारिणी ।
कुष्ठकृमिप्रशमनी विशेषात्परिकीर्तिता ॥ ५०२ ॥
आभ्यन्तरप्रयोगार्थं लाङ्गलीं न प्रयोजयेत् ।
बाह्यप्रयोगे युञ्जीत तत्तद्रोगापनुत्तये ॥ ५०३ ॥

लाङ्गलिकाया बाह्यप्रयोगः

सुधौतं लाङ्गलीमूलं वारिणा परिपेषितम् ।
नाभौ योनौ प्रलिप्तं वा सद्यःप्रसवकृन्मतम् ॥ ५०४ ॥
लाङ्गली वारिणा पिष्टा करपादप्रलेपिता ।
अपरां पातयत्याशु न सन्देहोऽत्र कश्चन ॥ ५०५ ॥
लाङ्गलीमूलतोयं तु पूरितं कृमिकर्णके ।
निहन्त्यन्तःप्रविष्टांस्तु शतपद्यादिकान् कृमीन् ॥ ५०६ ॥
सूर्यभक्ताद्रवोपेतः सव्योषो लाङ्गलीद्रवः ।
विधाय वस्त्रपूतं तु योजयेत् कृमिकर्णके ॥ ५०७ ॥
पातयत्यचिरादेव कृमिकीटपिपीलिकाः ।
तथा कर्णजलौकाश्च तथैवान्यान् कृमीनपि ॥ ५०८ ॥
कङ्गगोधावसोपेतं तुलसीलाङ्गलीद्रवैः ।
साधितं तैलमभ्यङ्गाद् हन्त्युन्मन्थं विशेषतः ॥ ५०९ ॥

अथ अर्कक्षीरस्य नामानि

अर्कक्षीरं रविक्षीरं सूर्यक्षीरं तथैव च ।
अर्कदुग्धं सूर्यदुग्धं रविदुग्धं च तन्मतम् ॥ ५१० ॥

अर्कक्षीरस्य गुणाः

अर्कक्षीरं मतं स्निग्धं तिक्तोष्णं कुष्ठगुल्मनुत् ।
उदरापहमत्यन्तं रेचनं वान्तिकारकम् ॥ ५११ ॥
गुदाङ्कुरप्रशमनं कृमिदन्तव्यथापहम् ।
क्षारकर्मकरं चैव त्वचि लिप्तं विशेषतः ॥ ५१२ ॥

अर्कक्षीरस्य बाह्यप्रयोगः

सक्षौद्रे रविदुग्धे तु तूलमल्पं निषेचितम् ।
कृमिदन्तस्थरन्ध्रस्थं कृमिदन्तव्यथापहम् ॥ ५१३ ॥
त्रिगुणक्षौद्रसंयुक्तं रविदुग्धं प्रलेपितम् ।
मुखक्षतं शमयति द्रुतं नास्तीह संशयः ॥ ५१४ ॥
निशाशिरीषबीजाढ्यं सूर्यदुग्धे विलेपितम् ।
गुदाङ्कुरान् पातयति चिरोत्थानप्यसंशयम् ॥ ५१५ ॥

अथ स्नुहीक्षीरस्य नामानि

स्नुहीक्षीरं सुधाक्षीरं सेहुण्डक्षीरकं तथा ।
स्नुहीदुग्धं सुधादुग्धं स्नुग्दुग्धं च मतन्तु तत् ॥ ५१६ ॥

स्नुहीक्षीरस्य शोधनम्

पलद्वयं सुधादुग्धं तोलकद्वयसंमिते ।
चिञ्चादलद्रवे वस्त्रपूते घर्मे विशोषयेत् ॥ ५१७ ॥
द्रवं विशुष्कं विज्ञाय सुधादुग्धं समाहरेत् ।
ततः सर्वत्र योगेषु प्रयुञ्जीत भिषग्वरः ॥ ५१८ ॥

स्नुहीक्षीरस्य गुणाः

सुधादुग्धं वातहरं गुल्मोदरविनाशनम् ।
विषाध्मानहरं चैव गुदाङ्कुरहरं परम् ॥ ५१९ ॥
परं विरेचनकरं पुष्पकृच्चक्षिमध्यगम् ।
समाख्यातं विशेषेण क्षारकर्मकरं परम् ॥ ५२० ॥

अस्य आमयिकः प्रयोगः

सुधादुग्धं निशाकोषातकीसैन्धवसंयुतम् ।
गोमूत्रेण प्रलिप्तं तु पातयेद्गुदजाङ्कुरान् ॥ ५२१ ॥

क्षारवर्तिका

चूर्णं दारुहरिद्रायास्तोलकैकमितं हरेत् ।
मासार्द्धं पेषयेद्धारा निदाघे खलु शोषयेत् ॥ ५२२ ॥
समांशिके सुधादुग्धे रविदुग्धे च तन्मिते ।
निक्षिप्य खलु खल्वेऽथ पेषयेदतियत्नतः ॥ ५२३ ॥
विज्ञाय वर्तिकायोग्यं रसतन्त्रविशारदः ।
दीर्घा एषणिकाकारा वर्तिकाः कारयेत्ततः ॥ ५२४ ॥
समाख्याता भिषग्वर्यैर्नामतः क्षारवर्तिका ।
भगन्दरमहाघोरनाडीव्रणविशोधिका ॥ ५२५ ॥
वर्तिकेयं सुविन्यस्ता प्रयत्नेन भगन्दरे ।
नाडीव्रणान्तराले च खलु शोधयति द्रुतम् ॥ ५२६ ॥

क्षारसूत्रम्

सुधादुग्धे वस्त्रपूतहरिद्राचूर्णसंयुते ।
निषिक्तेन तु तूलेन स्वल्पेन खलु यत्नतः ॥ ५२७ ॥
प्रलिप्तं सुदृढं सूत्रं छायायामथ शोषयेत् ।
विलिप्य सप्तधा ह्येवं शोषयेद्भिषजां वरः ॥ ५२८ ॥
सूत्रमेतत्समाख्यातं क्षारसूत्रं तु नामतः ।
गुदाङ्कुरच्छेदनार्थममोघास्त्रमिदं मतम् ॥ ५२९ ॥
भगन्दरच्छेदनार्थमप्येतद्विनियुज्यते ।
प्रयोक्तव्यं क्षारसूत्रं सावधानतया सदा ॥ ५३० ॥

अथ कृष्णसर्पविषस्य नामानि

कृष्णसर्पविषं चैव गरलं दारदं तथा ।
तदेव जङ्गमविषं समाख्यातं भिषग्वरैः ॥ ५३१ ॥

कृष्णसर्पविषस्य आहरणविधिः

शुक्तिकां तालपत्रेण खर्जूरस्य दलेन वा ।
आच्छाद्य सर्वतो दीर्घयष्टिकायां तु बन्धयेत् ॥ ५३२ ॥
कृष्णसर्पो यथा रोषात् तालपत्रे दशेत्तथा ।
निदध्यात् कृष्णसर्पस्य सम्मुखं यष्टिकामिमाम् ॥ ५३३ ॥
निदध्यात्तावदेवं तु बहुवारं दशेद्यथा ।
शुक्तिकासञ्चितं सर्पविषं त्वथ समाहरेत् ॥ ५३४ ॥
पुनः पुनः कृष्णसर्पं रोषयन् भिषजां वरः ।
समाहरेद्विषं त्वेवं सावधानतया सदा ॥ ५३५ ॥

कृष्णसर्पविषस्य शोधनम्

तैलाक्तशुक्तिकामध्यसञ्चिते जङ्गमे विषे ।
पादांशं सार्षपं तैलं न्यस्य घर्मे विशोषयेत् ॥ ५३६ ॥
जायते पीतवर्णं तन्निदाघे परिशोषितम् ।
कृष्णसर्पविषं त्वेवं शुद्धिमायात्यनुत्तमाम् ॥ ५३७ ॥

कृष्णसर्पविषस्य गुणाः

कृष्णसर्पविषं तीक्ष्णं महोष्णमतिदारुणम् ।
पित्तप्रकोपणकरं तथा दाहकरं परम् ॥ ५३८ ॥
आसन्नमृत्युकालोत्थसंज्ञालोपप्रणाशनम् ।
श्वासकृच्छ्रप्रशमनं तथा श्लेष्मविशोषणम् ॥ ५३९ ॥
हृद्दौर्बल्यसमुद्भूतं महात्ययिकलक्षणम् ।
अवसादं निहन्त्याशु निश्चितं करणाश्रितम् ॥ ५४० ॥
प्रणश्यन्नाडिकां घोरां शीतपादकरान्विताम् ।
श्वासकृच्छ्रादिसंयुक्तां विनिहन्ति विषूचिकाम् ॥ ५४१ ॥
निरुक्तलक्षणोपेतं सन्निपातं व्यपोहति ।
शीताङ्गसन्निपातघ्नं हृदुत्तेजनकृत्परम् ॥ ५४२ ॥
शीतगात्रश्वासकृच्छ्रप्रणश्यन्नाडिकादिषु ।

सन्निपातसमाकारलक्षणेषु भवत्सु तु ॥ ५४३ ॥
अन्येष्वपि च रोगेषु नूत्नेष्वात्ययिकेषु च ।
कारस्करसमायुक्तैः प्रयोगैर्विविधैस्तथा ॥ ५४४ ॥
कस्तूरीभैरवाद्यैश्च न सिद्ध्यन्ति गदा यदा ।
निष्फला स्याद् यदा चैव मृतसञ्जीवनी सुरा ॥ ५४५ ॥
तदैव कृष्णसर्पस्य विषं योगेषु योजितम् ।
प्रयुञ्जीत भिषग्वर्यः सावधानतया सदा ॥ ५४६ ॥

कृष्णसर्पविषस्य निषेधः

न बालेषु न वृद्धेषु न तथा राजयक्ष्मिषु ।
न संन्यासे न मूर्च्छायां न जीर्णज्वरजर्जरे ॥ ५४७ ॥
जीर्णामयप्रजीर्णेषु रक्तपित्तिषु नैव च ।
न क्षीणेषु प्रयुञ्जीत कृष्णसर्पविषं भिषक् ॥ ५४८ ॥

कृष्णसर्पविषस्य आमयिकः प्रयोगः

सूचिकाभरणरसः

कृष्णसर्पविषं शुद्धं माषकद्वयसंमितम् ।
रसाहिगन्धकविषं पृथक् माषद्वयोन्मितम् ॥ ५४९ ॥
छागमायूरवाराहमात्स्यपित्तैस्तु पेषयेत् ।
संमर्द्यार्द्रकतोयेन यामैकमतियत्नतः ॥ ५५० ॥
कारयेद्वटिका वैद्यः क्षुद्रसर्षपसंमिताः ।
समाख्यातो रसोऽयं तु सूचिकाभरणाह्वयः ॥ ५५१ ॥
सन्निपातसमाक्रान्तलोकानुग्रहकाम्यया ।
आविष्कृतो रसोऽयं तु भैरवेण महात्मना ॥ ५५२ ॥
क्षतादिवर्जितकरस्तथा नीचनखः पटुः ।
वटीनिर्मापकश्चास्य कर्तव्यः परिचारकः ॥ ५५३ ॥
रसं नखान्तसंलग्नमपनीय शलाकया ।

प्रक्षालयेत्करौ कामं भूयो भूयो मलारिणा ॥ ५५४ ॥

अस्य गुणाः

सूचिकाभरणो ह्येष सन्निपातविनाशनः ।
विषूचिकाहरः कामं श्वासकृच्छ्रापहः परम् ॥ ५५५ ॥
कृष्णस्याहेर्विषगुणनिर्दिष्टेषु तु लक्ष्मसु ।
प्रयुञ्जीत विशेषेण रसतन्त्रविचक्षणः ॥ ५५६ ॥
रसोऽयं खलु दातव्यः शृङ्गवेरस्य वारिणा ।
आरक्तास्यश्च रक्ताक्षस्तीव्रतापयुतो यदि ॥ ५५७ ॥
न स्याद्रोगी तु होरार्द्धे वटीं दद्यात्ततोऽपराम् ।
दध्योदनं च दातव्यं पथ्यमत्र विजानता ॥ ५५८ ॥
आरक्ताक्षं रक्तवक्त्रं तीव्रतापसमन्वितम् ।
विज्ञाय रोगिणं वैद्यः स्नपयेच्छीतलाम्बुना ॥ ५५९ ॥
शीताम्बुसिक्तवस्त्रेण भूयोभूयः प्रयत्नतः ।
आच्छादयेन्मस्तकं तु व्यथादाहप्रणुत्तये ॥ ५६० ॥
कृष्णसर्पविषस्यात्र तीव्रतापादिकेषु तु ।
समुत्पन्नेषु चिन्हेषु न युञ्जीत पुना रसम् ॥ ५६१ ॥
कृष्णसर्पविषोपेतरसेषु तु विशेषतः ।
एष एव विधिः कार्यो रसतन्त्रविशारदैः ॥ ५६२ ॥

द्वितीयः सूचिकाभरणरसः

विषं सर्पविषं शङ्खविषं माषमितं पृथक् ।
विशोधितं हिङ्गुलश्च माषकत्रयसंमितम् ॥ ५६३ ॥
सम्पेष्य पञ्चपित्तेन वटिकाः सर्षपोन्मिताः ।
निर्माय विनियुञ्जीत सावधानतया भिषक् ॥ ५६४ ॥
रसोऽयं तु समाख्यातः सूचिकाभरणाह्वयः ।
तत्तन्निर्दिष्टरोगेषु पूर्ववद्गुणकारकः ॥ ५६५ ॥

विसूचीध्वंसनरसः

कृष्णसर्पविषं शुद्धं विषं पारदगन्धकम् ।
सौभाग्यं नागरं ताप्यं मृतं माषमितं पृथक् ॥ ५६६ ॥
विशोधितं च दरदं सर्वेषां समभागिकम् ।
समादाय ततः खल्वे मर्दयेन्निम्बुकाम्भसा ॥ ५६७ ॥
वटिकाः कारयेद्वैद्यः श्वेतसर्षपसंमिताः ।
रसोऽयं तु समाख्यातो विषूचीध्वंसनाह्वयः ॥ ५६८ ॥
विषूचीध्वंसनरसो विषूचीविनिषूदनः ।
शीतपादकराद्यग्रलक्षणेषु सुखावहः ॥ ५६९ ॥
सूचिकाभरणोद्दिष्टविधानेन भिषग्वरः ।
विषूचीध्वंसनरसं प्रयुञ्जीत प्रयत्नतः ॥ ५७० ॥

मृतसञ्जीवनरसः

कृष्णसर्पविषं शुद्धं विषं ताप्यं च टङ्कणम् ।
दरदं रसगन्धं च तालं माषमितं पृथक् ॥ ५७१ ॥
छागमायूरवाराहमत्स्यपित्तेन भावयेत् ।
निर्मापयेत्तु वटिकाः क्षुद्रसर्षपसंमिताः ॥ ५७२ ॥
आसन्नमरणान् मर्त्यान् यतः सञ्जीवयत्यलम् ।
अतो रसोऽयमाख्यातो मृतसञ्जीवनाह्वयः ॥ ५७३ ॥
श्वासं प्रलापं बाधिर्यं मूकतां हिमगात्रताम् ।
रसोऽयं नाशयेत्तूर्णमासन्नमरणाश्रयाम् ॥ ५७४ ॥

रक्तचित्रकशोधनम्

रक्तचित्रकमूलं तु चूर्णतोये निमज्जयेत् ।
ततो निदाघसंशुष्कं शुद्धिमायात्यनुत्तमाम् ॥ ५७५ ॥

वृद्धदारकशोधनम्

वृद्धदारकबीजानि दोलायन्त्रे तु यामकम् ।
स्विन्नानि गव्यपयसा विशुद्ध्यन्ति न संशयः ॥ ५७६ ॥

निम्बूकबीजशोधनम्

अपामार्गकषायेण दोलायन्त्रे तु यामकम् ।
स्विन्नानि निम्बूबीजानि विशुद्ध्यन्ति विशेषतः ॥५७७॥

हिङ्गुशोधनम्

रामठं समशुद्धाज्यसंयुतं दर्विकागतम् ।
विपक्वमग्नितापेन शुद्धिमायात्यनुत्तमाम् ॥ ५७८ ॥

गुग्गुलुशोधनम्

चतुर्गुणे गव्यदुग्धे गुग्गुलुं स्वेदयेद् भृशम् ।
वस्त्रपूतं विधायाथ मलं वस्त्रस्थमुत्सृजेत् ॥ ५७९ ॥
दुग्धं शीतं तु विज्ञाय दुग्धपात्रतलस्थितम् ।
समाहरेद् गुग्गुलुं तु सर्वदोषसमुज्झितम् ॥ ५८० ॥

ग्रन्थसमाप्तिकालः

खेभग्रहेन्दुप्रमिते श्रीमद्विक्रमवत्सरे ।
चैत्रे कृष्णत्रयोदश्यां ग्रन्थ एष समग्रथि ॥ ५८१ ॥
विभासयति मोदिनीं दिनमणिस्तु यावत्परं
तथा गगनमण्डले तुहिनदीधितिर्द्योतते ।
भिषग्वरमहोदयाः खलु रसागमाध्यायिन-
स्तथा रसतरङ्गिणीमिह पठन्तु तावत्परम् ॥ ५८२ ॥

इति गढपालमण्डलान्तर्गतश्रीनगरनिकटवर्ति-खोला-ग्रामनिवासिना
सदानन्दशर्म्मणा विरचितायां रसतरङ्गिण्यां
विषोपविषादिविज्ञानीयो नाम चतुर्विंशस्तरङ्गः ।
॥ समाप्ता चेयं रसतरङ्गिणी ॥

॥ अनुक्रमणिका ॥

पृष्ठाङ्काः

अ

अग्नितुण्डीरसः ... ३३४
अङ्गारकोष्ठिका ... १६
अङ्गारधानिका ... १६
अञ्जनभैरवरसः ... ३४५
अञ्जनम् ... २८१
अधःपातनप्रकाराः ... ३४
अधःपातनयन्त्रम् ... २०
अनुपानस्य लक्षणम् ... ५७
अन्त्रशोषान्तकरसः ... २२५
अपामार्गक्षारः ... १५८
अपुनर्भवलक्षणम् ... १२
अभ्रकभस्मनोऽमृतीकरणम् ९९
अभ्रकभस्मनो लोहितीकरणम् ९९
अभ्रकम् ... ९३
अभ्रकसत्वपातनम् ... १०१
अभ्रकसत्वमारणम् ... १०३
अभ्रकस्य कल्पाः ... १०४
अभ्रकस्य मारको गणः ... ९८
अमृतरसायनम् ... ३२६
अमृतीकरणम् ... १२
अम्लपञ्चकम् ... ७
अम्लपञ्चकम् (अपरम्) ... ७
अम्लवर्गः ... ७
अर्कक्षारः १५९
अर्कक्षीरम् ... ३६२
अर्कलवणम् ... १६४

पृष्ठाङ्काः

अर्जुनहरशङ्खचूर्णम् ... २१
अविशुद्धसूतस्य हेयत्वम् २६
अष्टौ संस्काराः ... ३०
अहिफेनम् ... ३३६
अहिफेनस्य निर्मलीकरणम् ३३६
अहिफेनस्य निषेधः ... ३३८
अहिफेनासवः ... ३४१

आ

आनन्दभैरवो रसः ... ३२३
आरनालीयसीसकम् ... २२६
आरनालीयकसीसद्रवः ... २२७
आवापलक्षणम् ... १०

इ

इच्छाभेदी रसः ... ३४४

उ

उत्थापनप्रकाराः ... ३२
उत्थापनस्वरूपम् ... ३२
उन्मादगजाङ्कुशः ... ३५०
उपलनामानि ... १९
उपविषाणां नामानि ... ३३०
उलूखलयन्त्रम् ... २५

ऊ

ऊर्ध्वपातनप्रकाराः ... ३३
ऊर्ध्वपातनयन्त्रम् ... २०

क

ककाराष्टकम् ७२

	पृष्ठाङ्काः
कच्छपयन्त्रस्वरूपम् ...	२१
कज्जालका	४८
कज्जलीस्वरूपम् ...	८
कन्दर्पकोकिलरसः ...	२९४
कपोतपुटम् ...	१८
कफकेतुरसः ...	३२४
करवीरः ...	३५९
करवीरस्य परिचयः ...	३५९
करवीराद्यतैलम् ...	३६०
काञ्जिकाम्लस्य निर्माणप्रकारः	२२७
कान्तपाषाणः	२७३
कासीसद्रवस्य निर्माणप्रकारः	२७५
कासीसम्	२७४
कासीसस्य निर्माणप्रकारः	२७५
कांस्यम् ...	२७९
कुक्कुटकपुटम् ...	१८
कूष्माण्डादिगणः ...	७३
कृत्रिमतालस्य निर्माणप्रकारः	१०६
कृष्णसर्पविषम्	३६३
कृष्णसर्पविषस्य आहरण-विधिः ...	३६४
कृष्णसर्पविषस्य निषेधः....	३६५
कोष्ठिका	१६
क्षारत्रिकम्	६
क्षारद्वयम्	६
क्षारनिर्माणप्रकारः	१५७
क्षारपञ्चकम्	६
क्षारवर्तिका	३६३
क्षारशून्यत्वपरीक्षणम्	२१२
क्षारसूत्रम्	३६३
क्षाराणां गुणाः	१५७
क्षाराणां मात्रा	१५८
क्षाराष्टकम् ...	६
क्षीरत्रयम्	८
क्षुद्ररत्नगणः ...	३०७
...	१३३
क्षत्राकरणम् ...	१७०

ख

खटिका ...	१२४
खर्परम् ...	२६९
खर्परसत्वपातनम् ...	२७२
खर्परसत्वमारणम् ...	२७२
खल्वयन्त्रम् ...	२४

ग

गजपुटम् ..	१८
गन्धकः ..	७४
गन्धककल्पाः ..	७९
गन्धकगन्धनाशनप्रकारः	७७
गन्धकतैलम् ..	८२
गन्धकद्रावकः ..	८४
गन्धकाद्यमलहरः ..	७९
गन्धकाम्लीययशदद्रवः ..	२३५
गन्धकाम्लीययशदम् ..	२३४
गारमूषा ..	१५
गुग्गुलुशोधनम् .	३६८
गुञ्जा .	३५५
गुञ्जाजीवनरसः ..	३५७
गुञ्जाद्यतैलम् (प्रथमं) .	३५६
,, (द्वितीयं) ..	३५७
गुञ्जाभद्ररसः .	३५७
गुञ्जायाः परिचयः .	३५५
गैरिकम् .	२८८
गोदन्तम् .	१२७

पृष्ठाङ्काः

गोमेदकः ... ३०४
गावरपुटम् ... १८
गोर्वरम् ... १४
गोस्तनीमूषा ... १५
ग्रन्थसमाप्तिकालः ... ३६८
ग्रन्थिशोथनिवारिका वर्तिका ३५०

घ

घोषाकृष्टं ताम्रम् ... १०

च

चण्डेश्वरो रसः ... १२१
चन्दनादिवटिका ... ४२
चन्द्रकान्तः ... ३११
चिञ्चाक्षारः ... १६२
चूर्णः ... १२५
चूर्णोदकम् ... १२५

ज

जङ्गमविषस्वरूपम् ... ३१४
जयपालः ... ३४२
जयपालयुक्तयोगानां निषेधः ३४६
जयपालस्य परिचयः ... ३४३
जयावटी ... ३२४
जलशुक्तिः ... १३५
जलोदरारिरसः ... ३४५
जारणास्वरूपम् ... ३७
ज्वरारिरसः ... २४५

ट

टङ्कणः ... १४७
टङ्कणामृतमलहरः ... १४९
टङ्कणाम्लः ... १४९
टङ्कणाम्लद्रवः ... १५१
टङ्कणाम्लमलहरः ... १५०

पृष्ठाङ्काः

ड

डमरुकाख्ययन्त्रम् ... २३

ढ

ढालनम् ... ९

त

ताडनम् ... १०
ताम्रभस्मनोऽमृतीकरणम् १९८
ताम्रम् ... १९४
तालकम् ... १०५
तालकविकारे भैषज्यम् ... ११५
तालकसत्वपातनम् ... ११४
तालकोदयमलहरः ... ११२
तिमिरहराञ्जनम् ... २८३
तिर्यक्पातनप्रकारः ... ३४
तिर्यक्पातनयन्त्रम् ... २०
तिलक्षारः ... १५९
तुत्थकद्रवः ... २५९
तुत्थकम् ... २५८
तुत्थकसत्वपातनम् ... २६५
तुत्थकादिवर्तिः ... २६०
तुत्थकाद्यो मलहरः ... २६१
तुत्थकोदयरसायनम् ... २६४
तुत्थकोदया वटी ... २६०
तुत्थकोदया वर्तिः ... २६०
तुत्थस्य निर्माणप्रकारः ... २६६
तुत्थामृतमलहरः ... २६१
तुत्थामृता वटी ... २६३
तुहिनाञ्जनम् ... २८३
तैलवर्गः ... ८
त्रिरेखवर्तिका ... १२९
त्रैलोक्यविजया वटी ... ३५३

	पृष्ठाङ्काः
त्रैलोक्यसंमोहनरसः	... ३५४
त्र्यम्बकेश्वररसः	... २०५
द	
दद्रुविद्रावणमलहरः	७९
दर्विकायन्त्रम्	२३
दीपनप्रकाराः	३६
दीपनस्वरूपम्	३६
दुग्धपाषाणः	१२६
दुग्धवर्गः	८
दोलायन्त्रलक्षणम्	१९
दोषाष्टकनिरूपणम्	१९८
द्रावको गणः	९
धत्तूरः	... ३४६
धत्तूरस्य परिचयः	... ३४६
धन्वन्तरिभागः	... १३
धातुपदनिर्वचनम्	... १७०
धातुसत्वलक्षणम्	... ९
धातूनां नामपरिगणनम्	... १७०
धातूनां सामान्यः शोधनप्रकारः	... १७०
धातूनां सामान्यो मारणप्रकारः	... १७०
धान्याभ्रकम्	... ९५
न	
नवजीवनरसः	... ३३३
नवसादरः	... १५२
नवसादरसत्वपातनम्	... १५३
नवसादरीयबाष्पद्रवः	... १९१
नाडिकायन्त्रम्	... २४
नारकललवणः	... १६३
निद्रोदयरसः	... ३३९
निम्बूकबीजशोधनम्	... ३६८
निम्बूकाम्लः	... ४६
निम्बूकाम्लीययवजः	... १४३
निम्बूकाम्लीयसर्जिका	... १४६
नियामको गणः	.. ३६
नियामनप्रकाराः	... ३५
नियामनस्वरूपम्	.. ३५
निरुत्थलक्षणम्	... १२
निर्वापलक्षणम्	.. १०
नीलम्	.. ३०१
पञ्चगव्यम्	.. ८
पञ्चतिक्तम्	.. ७
पञ्चमृत्तिकाः	.. ७
पञ्चामृतम्	.. ८
पञ्चामृतरसः	.. ३२२
परिचारकलक्षणम्	... ४
परिभाषालक्षणम्	.. ५
परिभाषाविज्ञानफलम्	.. ५
परिस्रुतसलिलम्	.. १२
पर्पटीस्वरूपम्	.. १०
पलाशक्षारः	.. १६१
पातनापात्रतयस्वरूपम्	.. ३३
पातालकोष्ठिका	.. १७
पातालयन्त्रम्	.. २४
पारदः	.. २६
पारदमारणविधयः	.. ६३
पारदसेवनविधिः	.. ६९

पृष्ठाङ्काः

पारदस्य अष्टौ संस्काराः ३०
पारदस्य नैसर्गिका दोषाः २६
पारदस्य सप्तकञ्चुकाः ... २७
पालिकायन्त्रम् ... २३
पित्तलम् ... २७७
पिधानम् ... १४
पिष्टिका ... ९
पुटमानानुक्तौ पुटप्रदानप्रकारः १९
पुटयन्त्रम् ... २३
पुटलक्षणम् ... १७
पुष्परागः ... ३००
पुष्पाञ्जनस्य परिचयः ... २८२
पेरोजकम् ... ३१३
प्रदरान्तकलोहः ... २४९
प्रलापान्तकरसः ... ३४९
प्रवालम् ... ३०५

ब

बहिःशीतलक्षणम् ... ११
बाष्पस्वेदनयन्त्रम् ... २३
बिडलवणम् ... १६५
बिडलवणस्य निर्माणप्रकारः १६५
बोधनप्रकाराः ... ३५
बोधनलक्षणम् ... ३४

भ

भङ्गा ... ३५०
भङ्गायाः परिचयः ... ३५०
भल्लातकः ... ३५८
भल्लातकरसायनम् ... ३५९
भल्लातकस्य परिचयः ... ३५८
भस्मयन्त्रम् २१
भाण्डपुटम् ... १८

पृष्ठाङ्काः

भावनायां द्रवपरिमाणम् ११
भावनालक्षणम् ... ११
भूतघ्नचक्रिका ४६
भूधरपुटम् ... १९
भूधरयन्त्रम् ... २१
भूनागसत्वम् ... २०७

म

मकरध्वजः ... ६०
मङ्गलोदया वटी ... ३४२
मण्डूरम् ... २५०
मदनोदयमोदकः ... ३५३
मधुरत्रिकम् ... ७
मनःशिला ... १९५
मनःशिलाया निर्माणप्रकारः ११७
मनःशिलायाः सत्वपातनम् ११७
मनःशिलाविकारे भैषज्यम् ११७
मयूरपक्षसत्वपातनम् ... २०८
मरकतम् ... ६०
मर्दनप्रकाराः ... ३१
मर्दनस्वरूपम् ... ३१
मल्लमूषा ... १५
महापुटम् ... १८
महामूषा ... १५
महारत्नानि ... २९१
मानपरिभाषा ... १२
माणिक्यम् ... २९५
माणिक्यमिहिरोदयरसायनम् २९७
मारको गणः (पारदस्य) ... ६३
मारणस्य लक्षणम् ... ६२
मित्रपञ्चकम् ... ९
मुक्तापञ्चामृतरसायनम् ... २९९

	पृष्ठाङ्काः
मुग्धरसः ...	३८
मूत्राष्टकम् ...	६
मूर्च्छनप्रकाराः ...	३२
मूर्च्छनस्वरूपम्	३२
मूर्च्छनाया द्वौ भेदौ ...	३८
मूर्च्छनायाः सामान्यं स्वरूपम्	३८
मूषानामानि ...	१४
मूषानिर्माणोचिता मृत्तिका	१४
मूषाप्यायनकम् ...	१६
मृगशृङ्गम्	१३८
मृततालकपरीक्षणम्	१११
मृतपारदस्य गुणाः	६६
मृतपारदस्य लक्षणम्	६२
मृतलोहम्	११
मृतसञ्जीवनरसः	३६७
मृत्युञ्जयरसः	३२१
मृदङ्गयन्त्रम्	२२
मृद्दारशृङ्गम्	२६८
मृद्दारशृङ्गाद्यमलहरः(प्रथमः)	२६९
,, (द्वितीयः)	२६९
मौक्तिकम् ...	२९७

य

यन्त्रलक्षणम्	१९
यवक्षारः	१४०
यशदम्	२२९
यशदामृतद्रवः	२३६
यशदामृतमलहरः	२३४
योगमूषा	१५

र

रक्तचित्रकशोधनम्	३६७
रजतदलम्	१८३
रजतम् ...	१८२
रजतमाक्षिकम् ...	२५७
रजतमाक्षिकसत्वपातनम्	२५८
रजतमारणम् ...	१८४
रत्नपदनिर्वचनम् ...	२९१
रवितार्ण्डवरसः ...	२०४
रसकर्पूरः ...	४४
रसकर्पूरगुटिका ...	४६
रसकर्पूरद्रवः ...	४७
रसतरङ्गिण्याः परिचयः...	२
रसपङ्कस्य लक्षणम् ...	९
रसपर्पटिका ...	५०
रसपुष्पम् ...	३९
रसपुष्पमलहरः ...	४२
रसपुष्पाद्यमलहरः ...	४३
रसपूजनम् ...	२८
रसभक्षणकालः ...	७०
रसमाणिक्यम्	११३
रसवैकृतौ सुखाचारः ...	७२
रसवैद्यप्रशंसा ...	२
रसशाला ...	२
रसशालायां उपकरणद्रव्याणि	३
रसशालायां कर्मविभागः	३
रसशास्त्राचार्यस्वरूपम्	४
रससिद्धानां नामपरिगणनम्	४
रससिन्दूरम् ...	५३
रससेवनेऽपथ्यम्	७१
रससेवने पथ्यम् ...	७१
रसस्य साधारणशोधनम्	२८
रसायनसेवनेऽपथ्यानि...	७१
रसायनोचितो रसः ...	७०

पृष्ठाङ्काः

राजावर्तः ... ३११
राजावर्तस्य सत्वपातनं तन्मारणञ्च ... ३१३
रोमकलवणम् ... १६७

ल

लक्ष्मीविलासो रसः ... ३३४
लवणत्रिकम् ... ६
लवणद्रावकः ... १६७
लवणपञ्चकम् ... ५
लवणयन्त्रम् ... २३
लाङ्गलिका .. ३६०
लाङ्गलिकायाः परिचयः .. ३६०
लावकपुटम् .. १९
लोहनिरुत्थीकरणम् .. २४५
लोहम् .. २३७
लोहमारणे भानुपाकादि-विधानम् .. २३९

व

वङ्कनालम् ... १०
वङ्गम् ... २०८
वङ्गस्य औष्णयशैत्यजनने हेतुः ... २१३
वज्रद्रावणिका मूषा १५
वज्रमूषा ... १४
वत्सनाभः ... ३१६
वत्सनाभक्षुपस्य परिचयः ३१६
वत्सनाभस्य परिचयः ... ३१६
वनौषधिसत्वलक्षणम् ... ९
वराटकः .. १३५
वर्तुलः खल्वः .. २५
वह्निमृत्स्नालक्षणम् .. ६३

पृष्ठाङ्काः

वाराहपुटम् ... १८
वारितरलक्षणम् ... ११
वालुकापुटम् ... १९
वालुकायन्त्रम् ... २२
विशुद्धाविशुद्धसूतस्य स्वरूपम् . २६
विश्वासघातको वैद्यः . १३
विषतिन्दुकतैलम् . ३३६
विषतिन्दुकम् . ३३०
विषतिन्दुकस्य परिचयः ३३०
विषपदनिर्वचनम् . ३१४
विषप्रभावर्तिका . ३२८
विषप्रयोगस्य निषेधः . ३२०
विषप्रयोगाः . ३२७
विषरसायनम् . ३२५
विषस्य नवभेदाः . ३१५
विषस्य मात्रया प्रयोगे फलवैशिष्ट्यम् . ३२०
विसूचीध्वंसनरसः . ३६७
वृद्धदारकशोधनम् . ३६७
वृन्ताकमूषा . १६
वृश्चिकविषहरः प्रलेपः . ३४५
वेदनान्तकमलहरः . ३४२
वेदनान्तकरसः . ३३९
वैक्रान्तम् . ३०७
वैक्रान्तरसायनम् (प्रथमं) ३०९
,, (द्वितीयं) ३१०

श

शङ्खः ... १२८
शङ्खकल्पः ... १३०
शङ्खद्रावकः (प्रथमः) ... १३१

पृष्ठाङ्काः

शङ्खद्रावकः (द्वितीयः) ... १३२
,, (तृतीयः) ... १३२
,, (चतुर्थः) ... १३३
शङ्खमारणम् ... १२९
शङ्खवर्तिः ... १२९
शङ्खविषम् ... ११७
शङ्खविषोदयरसः ... १२०
शिखिग्रीवादिवर्तिः ... २६१
शिलाजतु ... २८३
शिवताण्डवरसः ... ३२३
शिष्यस्वरूपम् ... ५
शिष्योपनयने वर्जनीयाः ५
शुक्तिः ... १३४
शुद्धावर्तलक्षणम् ... १०
शूलनिर्मूलनरसः ... ३३५
शूलेभकेशरीरसः ... २०६
शोधनलक्षणम् ... ११
शोधनार्थे रसपरिमाणम् २७
श्रीसिद्धदरदामृतः .. ९०
श्रीसिद्धहिङ्गुलेश्वरः ... ९२

ष

षड्गुणगन्धकजारणप्रकाराः ३७
षड्गुणगन्धकजारणप्रयोजनम् ३७
षड्गुणगन्धकजीर्णस्य रसराजस्य गुणाः ... ३७

स

सजललवणद्रावकः ... १६८
सजलसोरकद्रावकः ... १५६
सजलारनालीयकसीसद्रवः २२७
सत्वानां वैशिष्ट्यम् १०१

पृष्ठाङ्काः

सन्धिलेपनम् ... १४
सप्तकञ्चुकानां परिचयः २७
समुद्रफेनः ... १३८
समुद्रफेनस्य उत्पत्तिस्थानम् १४०
सर्जिक्षारः . १४४
सर्वाङ्गसुन्दरो रसः . ६१
सहपानस्य लक्षणम् . ५७
सामान्यपुटक्रमः . १७
सामान्यमूषा . १४
सामुद्रलवणम् . १६५
सारमेयविषापहो योगः . ३३५
सिक्थतैलम् . ४३
सिक्थतैलस्य लक्षणम् . ९
सिद्धमकरध्वजः . ६१
सिन्दूरभूषणरसः . ३४०
सिन्दूरम् . २६६
सिन्दूराद्यतैलम् २६७
सिन्दूराद्यो मलहरः (प्रथमः) २६७
,, (द्वितीयः) २६७
सीसकम् २२०
सीसकसेवनविकृतौ विधानम् २२९
सुधालवणम् ७६
सुप्तिवातारिरसः ३३५
सुराष्ट्रजा १२१
सुवर्णम् १७१
,, (घृष्टं) १७३
सुवर्णमण्डलम् १७३
सुवर्णमाक्षिकम् २५२
सुवर्णमाक्षिकसत्वपातनम् २५६
सुवर्णमारणम् ... १७५

पृष्ठाङ्काः

सुवर्णलवणम् ... १७३
सुवर्णवङ्गपञ्चकरसायनम् २१८
सूचिकाभरणरसः (प्रथमः) ३६५
" (द्वितीयः) ३६६
सूर्यकान्तः ... ३१०
सूर्यपुटलक्षणम् १७
सूर्यावर्तरसः २०६
सैन्धवम् १६३
सैन्धवस्य मुख्यत्वम् ६
सोरकः १५४
सोरकद्रावकः १५६
सोरकाम्लीयरजतद्रवः—
(प्रथमः) ... १९२
" (द्वितीयः)... १९३
" (तृतीयः) १९३
सोरकाम्लीयरजतम् ... १८९
सौवर्चललवणम् ... १६६
सौवर्चललवणस्य निर्माण प्रकारः ... १६६
स्थालीयन्त्रम् ... २२
स्थावरविषभेदाः ... ३१४
स्थावरविषस्य अधिष्ठानानि ३१५
स्थावरविषस्य द्वैविध्यम् ३१५
स्थावरविषस्वरूपम् ... ३१४

पृष्ठाङ्काः

स्नुहाक्षारः ... १६०
स्नुहीक्षीरम् ... ३६२
स्फटिकः ... ३१३
स्फटिकारिका ... १२१
स्वर्णवङ्गम् ... २१५
स्वाङ्गशीतस्य लक्षणम् ... ११
स्वेदनप्रकाराः ... ३०
स्वेदनलक्षणम् ... ३०

ह

हर्षोदया वटी ... ३४०
हिंगुलम् ... ८७
हिंगुलाकृष्टो रसः ... ९
हिंगुलाद्यमलहरः ... ८९
हिंगुलाद्रससिन्दूरस्य निर्माणप्रकारः ... ९०
हिंगुलामृतमलहरः ... ८९
हिंगुलीयो माणिक्यरसः ९१
हिंगुलेश्वरो रसः ... ३२२
हिंगुलोत्थितपारदस्य निर्माणप्रकारः ... ३०
हिंगुशोधनम् ... ३६८
हीरकम् ... २९१
हीरकरसायनम् ... २९५
हृदयार्णवरसः ... २०५

❀ अशुद्धिपत्रम् ❀

अशुद्धपाठाः	शुद्धपाठाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
छात्राणां	बालानां	२	३
सकृदपि हि न	सकृदपि न	२	१४
म्यात्	स्यात्	२	१४
विमलापवन	विमलोपवन	२	२२
इष्टिका चूर्णकं	इष्टिकाचूर्णकं	७	१९
कञ्जली	कज्जली	८	१८
हिङ्गुलोत्थः	हिङ्गुलोत्थः	९	९
कुक्कुटकपुटम्	कुक्कुटकपुटम्	१८	१४
नतनाल	नतनाले	२०	२४
काञ्जिकं	काञ्जिकं	३१	१५
विबुधः	विबुधः	३२	१३
यत्कर्म कथ्यते	यत्कर्म बोधनं कथ्यते	३४	२६
करञ्ज	करञ्जश्च	३६	७
पात्रस्थ	पात्रस्थ	४०	११
रक्तित्रयमिता	रक्तिकैकमिता	४५	१७
त्याश	त्याशु	७७	१५
द्रावो	द्रावः	८५	६
संशाषयेद्	संशोषयेद्	८८	१८
विमद्य	विमर्द्य	८९	१५
समारभ्य	रक्तिकायाः	११६	१७
रक्तसंमित	रक्तिसंमित	११९	२१
सेविनो	सेविनः	१२०	६
कण्ठ	कण्ठं	१३२	१
अकक्षारस्य	अर्कक्षारस्य	१५९	८
पुटयेत्त	पुटयेत्तु	१६३	२५
काचपत्र	काचपात्र	१९०	२५
चूर्णम्	चूर्णकम्	१९१	१७
हिन्दीभाषाषाम्र	हिन्दीभाषायाम्	२०७	२२

		पृष्ठाङ्काः	पङ्क्त्यङ्काः
महाम्भोभि	महाम्भोधि	२१७	१
स्वाङ्गशीत	स्वाङ्गशीतं	२२७	२
भिषग्ः	भिषग्	२२९	३
मिङ्गलीय	मिङ्गुलीय	२४३	९
चूर्णेन	चूर्णेन	२४९	९
रङ्गं	रङ्गं	२८९	१८
प्रदरन्तक	प्रदरान्तक	२४९	२३
च्युतम्	च्युतं	२५०	४
हिङ्गलं	हिङ्गुलं	२५४	१४
वञ्जल	वञ्जुल	२५५	२४
तुत्थाज्जन	तुत्थाञ्जन	२५८	२४
प्रति पादित	प्रतिपादित	२६०	६
मुहुर्मुहुः	मुहुर्मुहुः	२६१	२५
परिशोषयोन्निदाघे	परिशोषयेन्निदाघे	२६३	१९
कञ्जलिकया	कज्जलिकया	२६४	२२
गार्मिणी	गार्भिणी	२६५	५
शीलितम	शीलितम्	२६५	५
सिन्द्रस्य	सिन्दूरस्य	२६६	१२
किञ्चिद्	किञ्चिद्	२६७	१
बोदारश्रृङ्गकम्	बोदारश्रृङ्गकम्	२६८	५
व्रणहृत् परं	व्रणहृत्	२६८	१९
महारश्रृङ्गं	मृहारश्रृङ्गं	२६८	२३
मृहारश्रृङ्गाद्यो	मृहारश्रृङ्गाद्यो	२६९	१७
लेपित	लेपिते	२७८	६
स्फटिकोपलः	स्फटिकदृषत्	३१३	२२
मेदाः	भेदाः	३१६	१३
सम्मिता	सम्मिताः	३२१	१३
शिवताण्डवंसकः	शिवताण्डवसंज्ञकः	३२३	१६
निषूदन	निषूदनम्	३२६	१८
निर्मापयेत्त	निर्मापयेत्तु	३५४	१६
मोदिनीं	मेदिनीं	३६८	१५